भरण १ पोषण २ रक्षण ३ संवर्धन ४ शारीररोगापहार ५ मानसदुःखापनयन ६ कुतश्चिदागच्छत्संक्लेशप्रतिकरण ७ समाश्वासन ८ प्रसन्नता स्थापनेष्विव ९ विद्वज्जनस्पृहणीयता १ सौभाग्यशालिता २ स्वाश्रयिता ३ संत्रस्तजनाऽऽलम्बनदातृता ४ निधानाऽऽप्तिकालीनतुच्छधनाऽनाप्त्यसंतोषाभावसमानज्ञानाकराऽऽप्तिकालीनमहत्त्वाकाङ्क्षाद्यपूर्त्तिजाऽसंतोषाभाववत्ता ५ सन्देहनिराकर्तृता ६ निदानशोधकता ७ सावहिततामात्राऽवकाशकाऽहितनिवारणक्षमता ८ प्रज्ञापनविचक्षणतासु ९ मात्रनुग्रहेषु (= मात्रा क्रियमाणेषु पुत्रविषयकेषु मातृविषयकेषु वोपकारेषु, अधीतिपक्षे तु मातापुत्रस्थानीयज्ञान-परिणतज्ञानिनोर्द्वयोरपि विद्वज्जनस्पृह्यत्वादयः संघटन्ते) ताताधीनाः खलु धनोपार्जन १ ज्ञातिप्रतिष्ठा २ मित्रवर्तुलविश्वसनीयता ३ ऽनुरागिपरिजनता ४ यशोऽकलङ्क ५ महाजनसंपर्का ६ इव कालिकशारीरिकमानसिकसांपत्तिकशोषणरूपाऽऽपतितविषमपरिस्थितिसप्रासन्न्यसहिष्णुता १ ज्ञाताऽज्ञातव्यक्ति-दिदृक्षितयथास्थितचित्तचित्रदर्शनारूपनिर्मायता २ पूर्वकर्मवशसंजातभीष्मशात्रवगुणवद्बहुमानप्रशंसारूपनिरभिमानता ३ गत्यन्तराभावाऽऽपतितहिंसागतसर्वतोऽल्पाऽपायहेतुयतनाशीलता ४ ब्रह्माब्धिस्तिमिततालेशसंक्षोभनिमित्तसुदूरपरिहारिता ५ वर्चस्वितासत्तासौन्दर्यपरिवारसंपदनाकर्षणरूपनैस्पृह्यस्वभावा दृढतरमुपयोगिनः, धनोपार्जनाद्यभावे भरणपोषणादेरशक्यत्वाद्, चोर्यशाठ्यादिना कथञ्चिच्छक्यत्वे तु भरणादेर्निश्चितं प्रत्यपायकारित्वाच्च । पितृच्छत्रनिर्मुक्तजातक-तन्मातृहितसाधनाऽसंभववत् क्रियाऽनुष्ठानस्य नामशेषीभवनकाले न खल्वाराधकत्वाधीती क्रमशोऽस्तित्वं व्यक्तित्वं च धारयितुं स्थापयितुं वाऽलं भवतः । जातकजन्मादावेव पितुरकस्मान्मरणे पितृसम्बन्धिषु कस्यचिदाश्रयण इव प्राक्कृतकर्मवशतः क्रियाऽनुष्ठितेर्व्युपरमणेऽनुष्ठितिरूपतातनिकटसंबन्धिक्रियापक्षपात (=संविग्नपाक्षिकता) संश्रयणेऽपि पितृच्छत्रसनाथता निर्वहत्येव । तथापि, जातकानां नहि सान्निध्यं यावन्मातुस्तावत् पितुरपि संभवति, तद्वच्च साधूनां स्वाभाविकदिनचर्यायां क्रियाप्राधान्यवत्कालतो ज्ञानोपसनारूपस्वाध्यायकालो भूयानेव भवति । नूनं माताऽनिष्टमात्रसर्जनाऽवसरेऽभिलषितवस्तूनामपूरिकेषत्पारुष्या च भवति, स्वाभाव्येन तु मृदुः सर्वदा च मातुलमातामहपरिवारस्तु बलवदनिष्टसर्जनाऽवसरं मुक्त्वा सर्वेच्छापूरकत्वेन मृदुत्वेन वत्सलत्वेन च शिशूनां बहुरोचको भवति, तथैवाऽस्खलितगाथाकण्ठस्थीकरण-पठितपरावर्त्तनदुर्बोधपदार्थाऽनुत्साहाऽपासन-विस्मृतसूत्रार्थपुनरुज्जीवन-प्रगल्भतारूपाऽधीतिर्निद्राविकथादिप्रमादोदयाऽवसरेऽनिच्छया क्रियमाणा दृश्यमानकाठिन्या च प्रतिभाति सामान्यतस्तु मृदुसर्वदैव, मातामहपरिवारस्थानीयानि च शास्त्राणि दूरतो रमणीयतया प्रतिभासमानगिरय इव बहुरोचकानि भवन्ति, आरुह्यमाणो गिरिस्त्वधीतिकल्पः कदाचिदेव (=निद्रादावेव) नैसर्गिकसौन्दर्यद्वारकश्रमविघटन-मनःप्रफुल्लताऽऽदीच्छिताऽहेतुर्दुरारोहश्च प्रतिभायात्। प्रस्तूयमानस्य चाऽस्य प्रायः पूर्वाचार्यरचितगाथानां संग्रहात्मकस्य ग्रन्थस्य मातामहपरिवारे गणनापात्रसभ्यतयाऽऽराधकरोचकताया उद्घोषणं सिद्धसाधनकक्षत्वादप्रस्तुतमेव भवति, प्रस्तुता तु...

ग्रन्थनामविचारणा : उपदेशरत्नकोशः, सन्देहविषौषधिः, पञ्चरत्नम्, दर्शनशुद्धिः, मिथ्यात्वमहार्णवतारणतरी, आगमसमुद्रबिन्दुः, कुग्राहग्रहमन्त्रः, इति सप्त नामानि स्वयमेव ग्रन्थप्रान्ते निर्देक्ष्यन्ते। परम्, द्वे नामनी विश्रुतिमुपगतवन्ती। तत्राऽऽद्यं **श्रीविमलगणि-श्रीदेवभद्रसूरिविरचिताभ्यां टीकाभ्यां ख्यातिं गमितम्**

'दर्शनशुद्धि'रिति। अपरञ्च प्रस्तुतटीकाकृत्समानश्रीचक्रेश्वरसूरिसन्तानीयैः समुद्घोषितम् 'सम्यक्त्व-प्रकरणम्' इति, तन्मूलं चाऽनुसंधत्ते श्रीमांस्तिलकाचार्यः प्रस्तुतटीकान्तभागे "एतां दर्शनशुद्धि - सम्यक्त्वमिति प्रसिद्धोल्लापननामिकां सर्वे भव्याः पठन्तु" इति । तिलकाचार्यटीकासमेतस्य चाऽस्य सम्यक्त्वरत्व-महोदधिरित्यभिधानमस्याष्टीकायाः सर्जनानन्तरं कियता कालेन प्रचारमितम् ? तत्र ज्ञायते वैक्रम १५०४ तमे वर्षे लिखितादर्शे तु तन्नामप्रचारमितमिवैव विलोक्यते। सम्यक्त्वप्रकरणे यानि रत्नानि देवसाधुमार्गधर्मतत्त्वानि पञ्च तदुपलक्षितानि चाऽसङ्ख्येयानि, तेषामेकत्र चिरकालपर्यन्तसंचयनायाऽस्य महोदधितुल्यत्वात् ।

सटीकस्याऽस्य प्रामाण्यम् : पौर्णमिकगच्छारम्भकः सन्नपि मूलकृत् - "पूर्णिमायामेव पाक्षिकप्रतिक्रान्तिः", "श्रावका एव चैत्यप्रतिष्ठाकारकाः", "..." इत्यादिभ्यो मान्यताभ्योऽत्र न शब्दाकारं दत्तवान्, नाऽपि च टीकाकृदपि। इतोऽग्रे प्रामाणिकतायाश्चिह्नं किमन्वेष्टव्यम् ? यद्यप्येकं स्थलं विद्यते टीकायाः सदर्थाननुकूलं तद्यथा -

"अयं च द्रव्यस्तवः सावद्यरूपत्वान्न यतेर्योग्य इति प्रतिपादनायाहुः-

छण्हं जीवनिकायाण संजमो जेण पावए भंगं । तो जइणो जगगुरुणो पुप्फाइयं न इच्छति ।।११।। (मार्गतत्त्वे)

षण्णां जीवनिकायानां संयमो येन प्राप्नोति भङ्गं ततो यतेर्जगद्गुरवस्तीर्थकराः पुष्पादिकं उपलक्षणत्वात् सर्वं द्रव्यस्तवं नेच्छन्ति = नानुजानन्ति" इति ।

तथाऽप्येतत्संमार्जनीयम्, प्रवचनपरीक्षातृतीयविश्रामाद्यनुसारेण यथा हि -

"वस्तुगत्या विचारे कुसुमादिजिनपूजायां सावद्यतया निर्वचनम्, तन्निष्ठुरं वचनम् । 'पूजा कुसुमादिना तर्हि साधूनां स्वयमपि युक्ता कर्तुम्' इति पराशङ्कावचनम्, एतदपि दुर्वचनम् । यद्यन्निरवद्यं तत्तत्साधुभिः स्वयमपि करणीयमित्येवं नियमो नास्ति, यस्माद्, निरारम्भतयोपवर्णितोऽपि द्वादशव्रतसामायिकपौषधश्राद्धप्रतिमाद्युद्धारः साधूनां नास्ति, अथवा जिनकल्पिकानां परस्परमपि वैयावृत्त्यम् = अशनादिदानसंवाहनादिरूपं केन हेतुना जिनैर्निषिद्धम् ? तत्र सावद्यसंभावनाया अप्यसंभवात् । पूजायाः सावद्यत्वस्वीकारे श्रावकैः पुष्पादिना विहिता सा पूजा साधूनामुपदेशाऽनुमोदनाविषयो न स्याद्, यतः साधूनां सावद्यं = सपापमनुष्ठानं मनोवाक्कायकृतकारिताऽनुमतिभिर्हेयं वर्तते, नहि साधवः सावद्यमुपदिशन्ति न वाऽनुमोदन्ते, अब्रह्मसेवादेरप्युपदेशादिविषयत्वापत्तेः । यथा महाव्रतेषु अणुव्रतादिगृहिधर्मः संक्रान्तस्तथा (जिनाज्ञया सर्वद्रव्यत्यागरूपे) पञ्चममहाव्रते (जिनाज्ञानुसारेण देशतो द्रव्यात्यागरूपा जिनस्य कुसुमादिना) पूजा किं न संक्रान्ता ? अपि तु संक्रान्ता (एव) । जिनप्रतिमानां प्रतिष्ठा जतत्समक्षं मुनिगुरुभिः कर्तव्या त्रैलोक्यपूजाहेतुत्वाद् गणधरप्रतिष्ठावद्, व्याप्तिग्रहस्त्वेवम् - यद्यत् त्रैलोक्यपूजाकारणं तत् तत् मुनिगुरुणैव विधेयम्, यथा गणधरपदप्रतिष्ठा, न पुनर्गृहिकृत्यं त्रैलोक्यपूज्यत्वहेतुर्भवति ।"

न चैतावदंशविद्यमानतामात्रेण श्रीमत्तिलकाचार्यकृतेरप्रामाण्यं घोषयितुमुचितम् गुरुनियोगादनाभोगाद्वा मिथ्या श्रद्दधानेऽपि सम्यक्त्वसंभवस्य कर्मप्रकृत्यादिप्रसिद्धत्वात्।

अस्माकं प्रगुरूणामपि प्रगुरुभिर्विजयदानसूरीश्वरै "विविधप्रश्नोत्तरे" स्वग्रन्थेऽस्वाध्यायिपाठ्याऽपाठ्य सूत्रविभागस्पष्टीकरणप्रसङ्गे खरतरगच्छमान्यताप्ररूपकस्यापि सन्देहदोलावलिग्रन्थस्य साक्षितया सबहुमानमुल्लिखितत्वाच्च।

कविसार्वभौमस्तिलकाचार्य : टीका खल्वत्रत्या कञ्चिदारम्भभागं विना समस्ता तिलकाचार्यस्यैवास्ति इति ज्ञायते, "सोऽहं वृत्तिं प्रगुरुभिरिमां कर्तुमारब्धमात्रां तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम्" इति प्रशस्तिगततत्पद्येनैव।

यदा ह्यसौ कथां प्रारभते तदा समाप्तिपर्यन्तं तादृशं रसमासिक्तवान् येन श्रोताजनोऽन्तरोत्थातुमन्यचित्तो वा भवितुं नैव शक्नोति, अलङ्काराणां याथात्म्येन घटकता, प्रकाण्डवैयाकरणरञ्जकता, अस्खलितप्रतिभा, इष्यवनतभूजा जलप्रवाहवन्निरन्तरायार्थाधिगमकता । यथास्थानप्रयुज्यमानशब्दपर्यायता, अपुनरुक्ततादीर्घानुसंधानाऽत्रुटितताद्रिषु नैकमपि गुणं श्रीतिलकाचार्यरचनाशैल्याः वर्णयितुं मेऽस्ति बुद्धिशक्तिः, तत्तु कविपुण्डरीका मादृक्षु कृपामाधाय विधास्यन्ति, **अहं त्वेतावदेव जानामि श्रीतिलकाचार्यकृतयो विद्वन्मूर्धन्यमूर्धानोऽपि** धूनयन्तीति।

दृष्टचरा वृत्तयः- इतोऽन्ये द्वे टीका मद्दृष्टिपथमायाते स्तः । तृतीया चेयम् । तत्र प्राचीना श्रीविमलगणिनामद्यावध्यमुद्रिता एल.डी. भाण्डागारादौ च विद्यमानाऽस्ति । **मध्यकालीना श्रीदेवभद्रसूरीणां मुद्रिताऽस्ति। तृतीया तु प्रस्तुतैषा श्रीतिलकाचार्याणाम्। त्रयोऽपि टीकाकाराः श्रीचन्द्रप्रभसूरीश्वर-सन्तानीया एव,**

पौर्णमिकमतविहङ्गावलोकनम् :- श्रीमद्वीरप्रभुपञ्चमगणधरश्रीमत्सुधर्मस्वामिपट्टपरम्परायां चत्वारिंशत्तमो गच्छनायकोऽस्माकं सर्वेषां गुरुत्वङ्गतोऽगाधगुणगरिमान्वितः श्रीमान् मुनिचन्द्रसूरिर्वैक्रममदऋषिशशिविधु (=११७८) शरदि गौर्जरनगरराजे पत्तने स्वर्गं जगाम । अस्य परमतारक**गुरोरुपदेशपदवृत्ति-धर्मबिन्दुविवरणा-ऽनेकान्तजय-पताकाटीकाद्या विद्वच्चित्तचकोरचन्द्रायमाणा आसन्नपञ्चविंशतयः** कृतयः साम्प्रतं समुपलभ्यन्ते। अमुं गुरुवरं प्रति नैकैर्ग्रन्थकारैर्वास्तवं बहुमानं प्रकटितमस्ति, तेभ्यः कस्यचिदेकस्योल्लेखस्तपागच्छपट्टावलीतो लेशेनाऽत्राऽवलोक्यते-

सौवीरपायीति तदेकवारिपानाद् विधिज्ञो बिरुदं बभार, जिनागमाम्भोनिधिधौतबुद्धिर्यः शुद्धचारित्रिषु लब्धरेखः।

संविज्ञमौलिर्विकृतीश्च सर्वास्तत्याज देहेऽप्यमनः सदा यः, विद्वद्विनेयाऽभिवृतः प्रभावप्रभागुणौघैः किल गौतमाभः।।

एतस्य खलु गीतार्थमूर्धन्यश्रीगुरोरदूष्यवैदुष्यदिगन्तकीर्तयो भूरयः शिष्या आसन्, तेभ्यो नैयायिकादिदर्शनष-ट्कतार्किकधुरन्धराणां मस्तकानि धूनयामासुषः, पत्तने सिद्धराजजयसिंहसभायां दिगम्बरवादिमणिकुमुदचन्द्राय घोरपराजयं प्रददुषः, चतुरशीतिश्लोकप्रमितस्याद्वादरत्नाकरविवरणविशदीकृतप्रमाणनयतत्त्वालोकालङ्कारग्रन्थसर्जनेन कस्मैचनाऽप्यध्येत्रेऽद्यापि नियमतो लक्ष्यवेधियुक्तिकलापाऽमोघधनुर्धारितां लीलया वितरतः परमपूज्यस्य वादिदेवसूरीश्वरस्य न नाम जैनशासने प्रविष्टपूर्वैरेवाऽनाकर्णितपूर्वमित्येव न, अपि तु सत्तर्कमन्विष्यन्मात्रैर्जैनेतरैरपि सरोमाञ्चोद्गमं श्रुतचरम् । प्रस्तुतग्रन्थकृतां **श्रीचन्द्रप्रभसूरीणामयं श्रीमुनिचन्द्रसूरिर्लघुगुरुभ्राता "यतयश्चैत्यप्रतिष्ठाया अनधिकारिण एव, पाक्षिक प्रतिकान्तिश्च पूर्णिमायामेव (=पञ्चदश्यामेव)" इत्याग्रहद्वयेन कालवैचित्र्याच् श्रीचन्द्रप्रभसूरिवरतो निधियमरुद्र (११५९) मितवैक्रमाब्दे प्रादुर्भूतं पौर्णमिकमतं शमयितुं भृशं प्रयेतानः,** तत्प्रयत्नांशरूपा च **पाक्षिकसप्ततिरत्र** ग्रन्थसमाप्त्यनन्तरं परिशिष्टे संद्रक्ष्यते वाचकगणैः।

प्रस्तुतग्रन्थस्य निर्माता श्रीचन्द्रप्रभसूरिराट् तर्कशास्त्रेष्वपि स्वैरविहारी = **अस्खलितबुद्धिप्रचारः आसीदिति निश्चिन्वन्ति केचन विद्वांसः साम्प्रतोपलभ्यमानतन्निर्मितप्रमेयरत्नकोषाऽऽख्यग्रन्थनिरीक्षणेन । अस्य**

शिष्यप्रशिष्या अपि विद्वन्मतल्लिकाभिरपि स्पृहणीयप्रतिभाविलासा बभूवुस्तदपि किञ्चिदवलोकिष्यामहे। शिष्यप्रशिष्यादि सन्तानहृदयेऽस्य सबहुमानं सगौरवं, समहिमं च प्रतिष्ठाऽऽसीदिति निष्टङ्कनाय बहुषु प्रमाणेषु सत्स्वप्येकममममचरित्रकृता श्री मुनिरत्नसूरिणा वि. १२२५ वर्षे स्तुतं पद्यमत्रोद्धियते -

गोभिर्दर्शनशुद्धिं योऽकषायस्वादुभिर्व्यधात् । सोऽपूर्वाऽभ्युदयः श्रीमान् नन्द्याच् चन्द्रप्रभः प्रभुः ।।

अहो केयं काव्यबन्धचातुरी गुरुभक्तिपरिप्लाविता !!! चन्द्रस्तु पदार्थविलोकनेऽवरुन्धन्ति तमांसि कषायरसाभिः स्वप्रभाभिर्विशोधयति - दूरमपास्यति, पूर्वस्या एव दिशश्च तस्योदयः, तदुदयश्च कृष्णपक्षेषु क्रमशः क्षीयमाणताया जनकः सन् नाऽभ्युदयत्वेन ख्यापयितुं शक्यतेऽस्माभिः । अस्माकं परमगुरुस्तु चन्द्रप्रभाचार्यः कषायरसेतरस्वादु - मधुररसाभिः गोभिः-वाणीभिः दर्शनशुद्धिं व्यधात्, अस्मादृशां वाक्षु माधुर्यं कामहास्यरत्यादिमोहनीयजनितम्, अस्मद्गुरुस्त्वकषायस्वादुवाग्, अनन्यसाधारणसमन्तत-उन्नीयमानोदयश्च, अतश्चन्द्रस्तिष्ठतु, प्रथमं तु चन्दप्रभप्रभुरेव नन्द्यात् ।

महिमा खलु चन्द्रप्रभसूरिवरेण्यस्य कियान् प्रसृत्वर आसीत्तदवबुद्धये त्वेक एवोल्लेखः पर्याप्तस्तथाहि - चन्द्रप्रभसू.शि. देवप्रभसू.शि.तिलकप्रभसू.शि.वीरप्रभसू.शि. अजितप्रभसूरिणा वि. १३०७ वर्षे विरचितश्रीशान्तिनाथचरितप्रशस्त्या ज्ञायते यच्'चन्द्रावतीनगर्यां नवगृहचैत्ये श्रीमदुपदेशमालाटीकां संदृभ्यतश्चन्द्रगच्छीयश्रीजयसिंहसूरेश्चैत्यवासतो वैराग्यं समुज्जागरितम्, उद्भूताऽद्भूतवैराग्यश्च स स्ववैराग्योपष्टम्भनक्षमं श्रीचन्द्रप्रभसूरिं संशिश्रियिवान्' इति।

'पुत्रादिच्छेत् पराजयम्' इति नीतिवाक्यं खलु श्रीचन्द्रप्रभजीवने चरितार्थीभूतमुपलभ्यते, यतस्तच्छिष्याग्रेसरस्य श्रीधर्मघोषसूरिशानस्य माहात्म्यं ततोऽप्यधिकं प्रासार्षीदित्यनुमानयन्ति भूयांसि स्तुतिपद्यानि, तेभ्यः कानिचित् - धर्मघोषसूर्यनुजविमलगणिशिष्यो देवभद्रसूरिः दर्शनशुद्धिवृत्तिप्रशस्तौ -

एतत्पट्टधुरन्धरः शमनिधिः श्रेष्ठस्तपः शालिनां प्रह्वः श्रीजयसिंहभूपतिशिरोरत्नांशुधौतक्रमः ।
अर्हच्छासनवार्धिवर्धनविधौ ताराधिनाथोऽभव-द्भव्याम्भोजवनप्रबोधनरविः श्री धर्मघोषप्रभुः ।।

श्रीमांस्तिलकाचार्य आवश्यकलघुवृत्तौ... यत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंह देवः । हेमप्रभसूरिः वि. १२४३ वर्षनिर्मितप्रश्नोत्तररत्नमालावृत्तिप्रशस्तौ श्रीचन्द्रप्रभसूरिपट्टतिलको निर्ग्रन्थ-चूडामणिर्जज्ञे श्रीजयसिंहभूपतिनुतः श्रीधर्मघोषप्रभुः...। मुनिरत्नसूरिरममचरित्रे सूरिः श्रीधर्मघोषोऽभूत् तत्पट्टे देवताकृतिः सिद्धराजस्तुतः कर्ता स्वमूर्त्तेः सूरिविंशतेः,

निष्ठामतीतविषयामपि वर्तमाने, व्युत्पादयन् विरचयन् गुणवत्सु वृद्धिम्।
सूत्रार्थयुक्तिकलनासु विशुद्धबुद्धिर्यः शब्दसिद्धिमकरोदपरप्रकाशः ।।

अत्र यदुपान्त्यपद्योल्लिखितम् 'स्वसमाना विंशतिस्सूरयोऽनेन निष्पादिताः' इति, तद् उदारतानिष्कम्पसात्त्विकतयोः प्रकर्षप्रतिकमेव, ततोऽधिकं किं दिदृक्षिष्यते महात्मनां महिमाऽऽधिक्यप्रतीत्यै ? तेभ्यः विंशतेः केचन साम्प्रतमपीतिहासग्रन्थेष्वलङ्काररूपे नाम धारयन्ति तथाहि - (१) समुद्रघोषसूरिः, एतस्य विषयेऽतिशयोक्तिशून्यां स्तुतिमाहाऽममचरित्रकृत् -

यो मालवोपात्तविशिष्टतर्कविद्याऽनवद्यः प्रशमप्रधानः । विद्वज्जनालिश्रितपादपद्मः केषां न विद्यागुरुतामधत्त ? ।।

(२) समस्तभद्रसूरिः एतद्विषये दर्शनशुद्धिवृत्तिकृद्देवभद्रसूरिराह - शिष्यस्तस्य समन्तभद्रगणभृत्सोऽभूज्जगदीपकः।।

(३) चक्रेश्वरसूरिः प्रस्तुतटीकाया आरम्भकर्ता, एतस्य षट्सूरिशिष्यमण्डली नाममात्रेण तु प्रस्तुतवृत्तिप्रशस्तौ सुदर्शनैव, तेषु षट्सु सूरिषु प्रथमं (A) सुमतिसिंहाचार्यं तमेव संभावयामि हि यस्माद् वि. १२३६ वर्षे पत्तनपुरे सार्धपौर्णमिकगच्छः प्रादुर्भूतस्तद्व्यतिकरलेशस्त्वेवम् "पौर्णमिकानामाग्रहद्वयी शास्त्राऽमान्येति परमार्हतश्रीकुमारपालेन भूभुजा ज्ञाते पौर्णमिकप्रसारः स्वपत्तने तेन निरुद्धः, वि. १२२९ वर्षे दिवं गताः श्रीकलिकालसर्वज्ञपादास्तदनु च प्रायः षण्मास्या परमार्हतस्य स्वर्लोकप्रयाणम्, तत आसन्नपञ्चसु वर्षेष्वितेषु पत्तने को वृत्तान्तः ? इत्यवगमनाय श्रीसुमतिसिंहसूरिरायातः, केनचित् पृष्टश्च, 'भवान् पौर्णमिकः ?' उत्तरितश्चाऽनेनाऽदम्योत्साहवशेन सहसा 'सार्धपौर्णमिकोऽहम्' अर्थात् न केवलं पौर्णमिक एवाऽहम्, किन्तु केनाऽप्यप्रधृष्यत्वेनाऽर्धाधिकोऽस्मीति" इदमेव सार्धपौर्णमिकमतोत्पत्तिकारणं प्रवचनपरीक्षाऽनुसारेण । तृतीय (C) त्रिदशप्रभसू.शि.तिलकप्रभशि.धर्मप्रभ शि. अभयप्रभशि.रत्नप्रभसू.शि.कमलप्रभेण वि. १३७२ वर्षे श्रीपुण्डरीकचरित्रं संदृब्धे। "श्रीमता मुनिचन्द्रसूरिणा वि. ११६८ वर्षे देवेन्द्रनरकेन्द्रप्रकरणस्य नन्दिसूत्रोल्लिखितविमानप्रज्ञप्तिनरकविभक्तिप्रभृतिप्रकीर्णोद्धाररूपस्य वृत्तिर्निर्मिता, सा च चक्रेश्वरसूर्यादिभिः संमिल्य विशोध्य प्रामाणिककक्षां गमिता" इत्युल्लेखेषु श्रूयमाणस्तथा चक्रेश्वरसूरि-परमानन्दसूर्योरुपदेशेन वि. १२२१ वर्षे लिपीकृतः श्रीनेमिचन्द्रसूरिकृतरत्नचूडकथाया य आदर्शोऽधुनोपलभ्यते तत्राप्युल्लिखितश्चक्रेश्वरसूरिरयमेव इति संभावयाम्यहम् ।

(४) देवभद्रसूरिः, श्रीधर्मघोषसूरिणां लघुसहोदरश्रीविमलगणिराजस्य शिष्यः, प्रस्तुतग्रन्थोपरि चाऽष्टात्रिंशच्छतश्लोकमानटीकाया निर्माता च ।

(५) यशोघोषसूरिः, एतस्य शिष्यरत्नेन श्रीहेमप्रभसूरिणा हरिपालमन्त्रिविज्ञप्त्या विमलसूरिकृतप्रश्नोत्तररत्नमालाटीका वि. १२४३ वर्षे विरचिता ।

(६) सुमतिभद्रसूरिः, एतच्छिष्यजयन्द्रशि. भावचन्द्रशि. चारित्रचन्द्रशि.मुनिचन्द्रशि.विद्यारत्नेन वि. १५७७ वर्षे कूर्मापुत्रचरित्रं संदृब्धम्, हर्षकुलगणिना च तच्छोधितम् ।

इत्येबमादयो धर्मघोषसूरिभिः सूरिपदे प्रतिष्ठापिता इतोऽपि बहवः सूरिधुरन्धरा उपलभ्येरन् इतिहासपरिश्रमिणाम्, का शक्तिर्मे तत्परिश्रमाय ?

अथ सविनयं सानन्दं सबहुमानं सादरं संदृश्यतां तिलकाचार्यः, अस्य खलु ज्ञानलवदुर्विदग्धानां ज्ञानित्वमदं विगालयन्त्यः, विदुषां वैदुष्यमलङ्कारयन्त्यः, कवीनां काव्यप्रौढिं विकासयन्त्यः, तार्किकाणामस्खलितधीप्रचारं जनयन्त्यः, आगमिकानां तत्त्वसन्देहमपसारयन्त्यः, ऐतिह्यविदां वृत्तान्तजिज्ञासां संतोषयन्त्यः, परः सहस्रप्रयोग-वैविध्येऽपि वैयाकरणानामपप्रयोगशोधनकण्डूं वन्ध्यामेव विदधत्यः, येषां केषाञ्चनाऽज्ञानिनामपि चेतांस्याह्लादयन्त्यः कृतयः पङ्क्तिमात्रेणाऽपि ज्ञाता अमन्दमानन्दं जनयन्ति, अनुभवन्तु तल्लेशं भवन्तोऽपि

वन्दे वीरं तपोवीरं तपसा दुस्तपेन यः । शुद्धं स्वं विदधे स्वर्णं स्वर्णकार इवाऽग्निना ।।१।।

जिनप्रवचनं नौमि नवं तेजस्विमण्डलम्। यतो ज्योतींषि धावन्ति हन्तुमन्तर्गतं तमः ।।२।।

प्रणमाम्यात्मगुरूंस्तान् घनसारशलाकयेव यद्वाचा। अज्ञानतिमिरपूरितमुद्घटितमान्तरं चक्षुः ।।३।। जीतकल्पवृत्तौ

जिनभद्रगणिं स्तौमि क्षमाश्रमणमुत्तमम् । यः श्रुताज्नीतमुद्दध्रे शौरिः सन्धोः सुधामिव ।।४।। आवश्यकवृत्तौ ।।

शय्यंभवस्य श्रुतरत्नसिन्धोः सर्वस्वभूतं दशकालिकं यत् ।

उद्धाट्य बह्वर्थसुवर्णकोशं तद् भव्यसुग्राह्यमहं करोमि ।।५।। दशवैकालिकवृत्तौ ।।

अत्राऽऽह कश्चिद् "दशवैकालिकतो महार्घाणि श्रुतरत्नानि शय्यंभवाऽऽत्मकेऽर्णवे नाऽऽसन्नित्येकोऽनर्थस्तथा द्वितीयश्चाऽर्थग्राहणाशक्त्यभिमानरूपश्च सत्कविदोषः कथं नाऽत्र पद्ये ?" इति । स खलु प्रष्टव्यः "मनकमुनिः षण्मास्यैव चतुर्दशपूर्वसारमाप्नुयादितीच्छया निष्पन्ने सूत्रे किमु शय्यंभवात्मकश्रुतसागरसारभूताऽतिशयोक्तिः ? नैव, यथेतरेऽपि कवयः

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला । तत्रापि यश्चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।।

इति, अथवा

मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते । ततोऽपि नासिका श्रेष्ठा नासिकायाश्च लोचने ।।

इति श्लोके किमु सर्वकाव्यसारभूतता कालीदासीयाऽभिज्ञानशाकुन्तलतुर्याङ्कगतचतुःश्लोक्याम्, तथा सर्वतनुसारभूतताऽक्षियुगले साऽतिशयोक्तिः ? नैव, किं तर्हि ? यथास्थितार्थनिर्देशः, तथा दशवैकालिकेऽपि श्रुतसागरस्य सर्वस्वभूततां किं नाऽभ्युपैषि ? तथा बहुष्वर्थेषूपयुज्यमानं सुवर्णं बह्वर्थसुवर्णम्, तस्य (= तेन निर्वृतः) कोशः = बह्वर्थसुवर्णकोशः = अनन्तार्थद्योतकसदक्षरविन्यासरूपो दशवैकालिकग्रन्थः तस्मिन् हि श्रुतसागरसर्वस्वभूतान्यर्थरत्नानि निबिडभृतानि, तं कोशसमं दशवैकालिकमहमुद्घाटयामि, उद्घाट्य च यथा भव्यबालैरपि तदर्थाः सुखेन गृह्येरंस्तथा सरलपद्धत्या तद्ग्राहणायै प्रयसिष्यामीत्यभिधेयनिर्देशनं शिष्टाचाररूपमपि भवतः किं कुक्षिशूलायते ?

नूनमित्थमप्रधृष्य विद्यामहानदीनां शरणभूतस्य वादिपर्वतसंनिपतनैरप्यसंक्षुब्धस्य तिलकाचार्यपयोनिधेर्बिन्दुसमाः सर्वा अपि कृतयः सोत्साहमीक्षितव्यास्सन्ति । तासां च प्राप्यमाणानां नामानि यथा -

वि. १२६२ वर्षे पत्तेयबुद्धचरियं । वि. १२७४ वर्षे जीतकल्पवृत्तिः । वि. १२७७ वर्षे प्रस्तुता सम्यक्त्वप्रकरणवृत्तिः। वि. १२९६ वर्षे आवश्यकवृत्तिः । वि. १३०४ वर्षे सामाचारी । श्राद्धप्रतिक्रमण-सूत्रवृत्तिः। साधुप्रतिक्रमणसूत्रवृत्तिः । पाक्षिकसूत्रावचूरिः । पाक्षिकक्षामणकावचूरिः । श्रावकप्रायश्चित्त-सामाचारी। पौषधिकप्रायश्चित्तसामाचारी। चैत्यवन्दनालघुवृत्तिः। दशवैकालिकसूत्रवृत्तिः।

इत्थं खलु **पौर्णमिकगच्छः समच्छविदुषामाकर** आसीदित्यनुमीयते।

- मुनितपोरत्नविजयः ।
(वर्तमाने पू.आ.श्री.विजय तपोरत्नसूरीश्वराः)
वैक्रम-२०४१ तमवर्षे
वैशाखशुक्लपूर्णिमायां गुरुवासरे
धोराजी नगरे
(प्राक् प्रकाशितप्रतितरुद्धृता)

પ્રત-દર્શન

પ્રસ્તુત સંપાદનમાં ઉપયુક્ત હસ્તલિખિત પ્રતોના આદ્ય-અંત પૃષ્ઠોની પ્રતિકૃતિઓ અને આદ્ય-અંત વાક્યાંશ અહીં આપવામાં આવેલ છે.

આના નિરીક્ષણથી કઈ કઈ પ્રતિઓનો ઉપયોગ અમે કર્યો છે તેનો ખ્યાલ આવશે. અમને મૂળ પ્રતો મળી નથી, પણ તેની ઝેરોક્ષ કરાયેલ નકલો જ મળી હતી. પ્રસ્તુત સંશોધન અને સંપાદન પણ એ ઝેરોક્ષ કોપીઓના આધારે જ શક્ય બન્યું છે.

આ પ્રતો અમને પૂરી પાડનાર શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર (પાટણ), એલ.ડી. ઈન્સ્ટીટ્યૂટ અમદાવાદ, શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા ગાંધીનગર), આદિના જ્ઞાનભંડારો તેમજ ગ્રંથાલયોના સદુપદેશક સર્વે પૂજ્યો, વહીવટદારો અને મેળવી આપનારા સુશ્રાવકોની શ્રુતભક્તિની અમે અનુમોદના કરીએ છીએ. શ્રુતભક્તિમાં કરેલ સહાય નિમિત્તે આભાર દર્શાવીએ છીએ.

– સંપાદક – પ્રકાશક





સમ્યક્ત્વપ્રકરણ વૃત્તિસહિત

શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર - પાટણ

ડાબડા નં. ૫૧, નં. ૧૦૨૧, પત્ર-૨૨૯ સંજ્ઞા-P

શરૂઆત : नमः श्रीपंचपरमेष्ठिभ्यः। यद्वक्त्रांभोजवाप्याः स्फुटवचनघटीयंत्रचारेण निर्यत्...

અંત : इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृतौ समर्थितं पंचमं तत्त्वतत्त्वम्। तत्समाप्तौ च समाप्ता सम्यक्त्वप्रकरणवृत्तिरिति।। श्री शुभं भवतु ।।





सम्यक्त्वप्रकरण सह वृत्ति

श्री कैलाससागरसूरि ज्ञानमंदिर, कोबा, गांधीनगर

नं. १२२५९, पत्र-१९९, संज्ञा-K

शરૂआत : नमः श्रीसर्वज्ञाय ।

यद्वक्त्रांभोजवाप्याः स्फुटवचनघटीयंत्रचारेण निर्यत्...

अंत : श्रीमान् शिवप्रभसूरिः समजायत पञ्चमः परं कुतूहलमिदं य विरागाधिभूरभूत् ।।७।।

श्रीसम्यक्त्ववृत्तिः समाप्ता । शुभं भवतु... । संवत् १५७१ वर्षे आषाढवदिनवमी रवौ लिखितम् ।।



દર્શનશુદ્ધિપ્રકરણ વિવરણ

શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર - પાટણ

સંઘવી પાડાનો ભંડાર

નં. ૧૪૮, પત્ર-૨૮૨, સંજ્ઞા-T

શરૂઆત : नमः सर्वज्ञाय । नत्वा श्री वर्द्धमानाय निस्सीमज्ञानचक्षुषे...

અંત : प्रज्ञाप्राग्भारपश्चात्कृतविबुधगुरुर्वाचनासूरिरुच्चैः, अग्रे गण्यो मुनीनां विमलगणिरिति श्लाघ्यनामा बभूव ।। सरसा।।





दर्शनशुद्धिप्रकरण सटीक

श्री हेमचन्द्राचार्य जैन ज्ञानमंदिर - पाटण

डाबडा नं. ५८, नं. १४१८, संज्ञा-A, पत्र-१२५

शરૂआत : अर्हं नमः सर्वज्ञाय । नमः श्रीवर्द्धमानाय निस्सीमज्ञानचक्षुषे...

अंत : यावद्व्योमवने निरायतकरैर्नक्षत्रपुष्पावलीं, चिन्वानो वरिवर्त्तते प्रतिदिनं भास्वान्महामालिकः ।
ग्रन्थस्तावदयं सुवर्णनिधिवन्नानार्थसिद्धिप्रदः, तत्त्वप्रीतितरस्विनां कृतधियां चेतश्चिरं चुम्बतु ।।१४।।





દર્શનશુદ્ધિપ્રકરણ લઘુવૃત્તિ સહિત અપરનામ ઉપદેશરત્નકોશવૃત્તિ સહિત

શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર - પાટણ

ડાબડા નં. ૧૦૪, નં. ૨૫૯૪, પત્ર-૭૪, સંજ્ઞા-C

શરૂઆત : નમઃ સર્વજ્ઞાય । નત્વા શ્રીવર્દ્ધમાનાય નિસ્સીમજ્ઞાનચક્ષુષે...

અંત : શ્રીસંઘવીપાટકમધ્યવર્ત્તિનિ સંજ્ઞાનકોશેતિ વિશીર્ણતાં ગતાત્ શ્રીતાડપત્રાત્કિલ પુસ્તકં નવમષ્ટેષુનંદેદુમિતે ૧૯૫૮ સુવત્સરે।।૫।।

લેખયિત્વા પ્રયત્નેન તેનૈવ ગુણશાલિના શ્રીસંઘનૂતનજ્ઞાનકોશે મુક્તમિદં મુદા ।।૬।। સમાપ્તોઽયં ગ્રંથઃ ।

નંદેષ્વંકમૃગાંકાબ્દે [૧૯૫૯] જ્યેષ્ઠમાસે સિતેદલે નવમ્યાં ચ શનૌવારે વ્યલેખિ રામવિભુના શ્રીરસ્તુ ।। કલ્યાણમસ્તુ ।।





श्री दर्शनशुद्धिप्रकरण

श्री हेमचन्द्राचार्य जैन ज्ञानमंदिर - पाटण

पत्र : १२५, संज्ञा : B

शरुआत : नमः सर्वज्ञाय । नत्वा श्रीवर्द्धमानाय निस्सीमज्ञानचक्षुषे...

अंत : अनुष्टुभां सहस्राणि त्रीणि सहाष्टभिः शतैः । वृत्तावस्यां तु सर्वाग्रं गणितज्ञैरुदाहृतम् ।।१४।।

संवत् १६७१ वर्षे फागुणसुदि १ रवौ लिखितोऽयं ग्रंथः लेखकपाठकयोः शुभं भवतु । कल्याणमस्तु ।।





દર્શનશુદ્ધિપ્રકરણ સટીક

શ્રી કૈલાસસાગરસૂરિ જ્ઞાનભંડિર, કોબા, ગાંધીનગર

નં. ૮૦૧૭, પત્ર-૧૧૬, સંજ્ઞા-D

શરૂઆત : અર્હં । નમઃ સર્વજ્ઞાય । નમઃ શ્રીવર્દ્ધમાનાય નિસ્સીમજ્ઞાનચક્ષુષે...

અંત : ગ્રંથસ્તાવદયં સુવર્ણનિધિવન્નાનાર્થસિદ્ધિપ્રદઃ, તત્ત્વપ્રીતિતરસ્વિનાં કૃતધિયાં ચેતશ્ચિરં ચુમ્બતુ ।।૧૫।। સંવત્ ૧૯૫૬ । આસોવદી ૨ ।। શ્રીરસ્તુ।। સંપૂર્ણમ્ ।।

ग.द.भं.सू. २८६८४ दर्शनशुद्धि प्रकरण

ला.द. भारतीय संस्कृति विद्यामंदिर
अमदावाद



ला.द. भारतीय संस्कृति विद्यामंदिर
अमदावाद

ला.द.भं.सू. - १००५१ दर्शनशुद्धि प्रकरण - वृत्ति सह पत्र - १२५



दर्शनशुद्धिप्रकरण वृत्ति सह

लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर

नं. १००५१, पत्र-१२५, A प्रत मुजब

शરૂआत : अर्हं । नमः सर्वज्ञाय । नमः श्रीवर्द्धमानाय निस्सीमज्ञानचक्षुषे....

अंत : ग्रंथस्तावदयं सुवर्णनिधिवन्नानार्थसिद्धिप्रदः तत्त्वप्रीतितरस्विनां कृतधियां चेतश्चिरं चुम्बतु ।।१५।।

ला.द. भारतीय संस्कृति विद्यामंदिर
अमदावाद





दर्शनशुद्धिप्रकरण

लालभाई दलपतभाई संस्कृति विद्यामंदिर

नं. २८७८४, पाटणनी A प्रत मुजब

शरूआत : अर्हं । नमः सर्वज्ञाय । नमः श्रीवर्द्धमानाय निस्सीमज्ञानचक्षुषे...

अंत : ग्रंथस्तावदयं सुवर्णनिधिवन्नानार्थसिद्धिप्रदः तत्त्वप्रीतितरस्विनां कृतधियां चेतश्चिरं चुम्बतु ।।१५।।

वादीभसिंह पू.आचार्यश्रीचन्द्रप्रभसूरिविरचितं

दर्शनशुद्धिप्रकरणम्

अपरनाम

सम्यक्त्वप्रकरणम्

- आचार्य श्री चक्रेश्वरसूरि प्रारम्भकृतावृत्तिः
- आचार्य श्री तिलकसूरिसमाप्तिकृतावृत्तिः
- आचार्य श्री देवभद्रसूरिकृताऽन्यवृत्तिः
- पूर्वाचार्यविरचिताऽनेकग्रन्थवृत्तयः

आसन्नसिद्धियाणं विहिपरिणामो उ होइ सयकालं ।
विहिचाउ अविहिभत्ती अभव्वजियदूरभव्वाणं ।।

विधिनुं महत्व :

આસન્ન સિદ્ધિક=નજીકના કાળમાં મોક્ષે જનારા આત્માને જ સદાને માટે સર્વ ધર્મ ક્રિયાઓમાં વિધિનું પાલન કરવાનો પરિણામ હોય છે અને વિધિનો ત્યાગ તથા અવિધિનું સેવન કરવાનું મન અભવ્ય અને દુર્ભવ્ય જીવોને હોય છે. ૨૭

धन्नाणं विहिजोगो विहिपक्खाराहगा सया धन्ना ।
विहिबहुमाणी धन्ना विहिपक्खअदूसगा धन्ना ।।

ધન્ય પુરુષોને જ વિધિનો યોગ પ્રાપ્ત થાય છે, સદાકાળ વિધિમાર્ગનું પાલન કરનારાઓ પણ ધન્ય છે, વિધિનું બહુમાન કરનારાઓને પણ ધન્ય છે અને વિધિમાર્ગને દૂષિત નહિ કરનારાઓને પણ ધન્ય છે. ૨૮

सर्ववाञ्छित-मोक्षफलप्रदायकश्रीशङ्खेश्वरपार्श्वनाथाय नमः

णमोऽत्थु णं समणस्स भगवओ महावीरस्स

नमो नमः श्रीगुरुरामचन्द्रसूरये

ऐं नमः

वादीभसिंहपूज्याचार्यश्रीचन्द्रप्रभसूरिविरचितं

पूज्याचार्यश्रीचक्रेश्वरसूरिप्रारब्धतत्प्रशिष्यपूज्याचार्यश्रीतिलकसूरि-

निर्वाहितवृत्तियुतं पूज्याचार्यश्रीदेवभद्रसूरिसंदृब्धान्यवृत्तिसमेतञ्च

दर्शनशुद्धिप्रकरणम्

अपरनाम

सम्यक्त्वप्रकरणम्

चक्रे० : यद्वक्त्राम्भोजवाप्याः स्फुटवचनघटीयन्त्रचारेण निर्यत्,
सूरिश्रेणिप्रणालीप्रणयिगुरुगुणप्रोच्छलच्छीकरौघम् ।
तत्त्वाम्भोऽद्यापि सिञ्चत्सफलयतितमां शासनोद्यानमेतत्;
तं भक्त्या नौमि नम्रस्त्रिजगदधिपतिं श्रीजिनं वर्धमानम् ।।

श्रुतसारस्य सम्यक्त्वग्रन्थस्यार्थगरीयसः ।
सुबोधां वृत्तिमाधास्ये मुक्त्वा सङ्क्षेपविस्तरौ ।।

किन्तु ग्रन्थेष्वभिज्ञाः शृणुत शुभधियः सावधानं विधाय,
स्वान्तं तत्त्वप्रकाशो भवति गुणवति श्रोतरि श्राव्यमाणे ।
तत्त्वाभ्यासानुरागाद्विरचयितुमिमां मे मतिः सम्प्रवृत्ता;
कश्चिद् भव्योपकारो यदि परमपरा सा भवेत् पुण्यसिद्धिः ।।

यद्वैतामुपकारिणीं न कलयाम्याश्रित्य बुद्ध्याऽधिकान्,
स्पर्द्धाबन्धभृतो बुधान् सममतीनुद्दिश्य जल्पोऽपि कः ।
ये मत्तोऽपि जना विहीनमतयः किं तैः पुनर्ज्ञास्यते;
तां वृत्तिं गुणिनोऽधुना रचयितुं सन्देग्धि तन्मे मनः ।।

किन्तु –

श्रीचन्द्रप्रभसूरिगुम्फितगिरामर्थेक्षणे तत्परं,
चेतः किञ्च वचस्तदर्थभणनात्पूतात्म सम्पस्यते ।
कायस्तस्य विलेखनेन भविता व्यापारसारस्ततः;
सिद्धं मे परमार्थतः फलमिदं सत्कर्मलीनात्मनः ।।

तत्र तावत्स्वभावेनैव महाविदेहापेक्षया न शुभभावानाममत्रं भरतक्षेत्रम्, सकलबुद्धि-बलायुषां ह्रस्वीकरणदर्पिणी चेयमवसर्पिणी, मिथ्यात्वोदयकारकश्चायं दुःषमानामारकः, संरुद्धावधि-ज्ञानजातिस्मरणसङ्गमः, प्रवृत्तश्चायं भस्मकग्रहोद्गमः, सञ्जातं चेदमसंयतपूजाप्राचुर्यं दशमाश्चर्यम् । किञ्चैदंयुगीनाः पुमांसः प्रायेण स्वीकृतमहाव्रता अपि न दृश्यन्ते संयमे रताः, पारम्पर्येण श्रावका अपि न सम्यक्त्वादिगुणैरात्मभावकाः, न च धर्मः सम्प्रत्येव विच्छित्तिमुपेष्यति, यतो भगवता श्रीवर्धमानस्वामिना समवसरणासीनेन दुष्प्रसभाचार्यपर्यवसानोऽसौ समगीर्यत ।

परं गरीयांसः कुशाग्रीयबुद्धिसम्पाद्यबोधसम्बन्धाश्च सिद्धान्तशास्त्रप्रबन्धाः, स्थूलबुद्धिधनाश्च संप्रतितना जनास्ततो यथैते स्तोकेनैव हित्वा मिथ्यात्वम्, गृह्णन्ति सम्यक्त्वम्, प्रतिपद्यन्ते देशविरतिम्, स्वीकुर्वते सर्वविरतिम्, तथाविधातुं यत्नो युज्यत इत्यवधार्य करुणारसपरीतान्तःकरणतया सिद्धान्तादुद्धृत्य काश्चिद्यथावस्थिता एव गाथाः, काश्चिद् पुनस्तदर्थान् देवतत्त्वादिक्रमेण संकलय्य भविकजनबुद्धिलोचनान्तर्धायककलिकालबलोच्छलितमहामोहपटलापसारणप्रवरणसिद्धाञ्जन-समानम्, चलच्चारित्रधर्मराजभवनावष्टम्भनस्तम्भोपमानम्, मिथ्यात्वतमस्काण्डखण्डनप्रचण्ड-मार्त्तण्डमण्डलायमानम्, महादुर्लभमनुष्यजन्मोपलम्भसफलीकरणहेतुम्, भवाम्भोधिसेतुम्, रागाद्य-रातिभीतजन्तुशरणम्, **सम्यक्त्वप्रकरणमि**दमल्पतरं चिकीर्षवश्चारित्रमहाराजराजधानीय-मानमूर्तयः, सुविशुद्धसिद्धान्तोपनिषद्विचारणाद्भुतस्फूर्तयः, सकलश्वेताम्बरदर्शनप्रदीपोपमानाः प्रोन्मादिप्रतिवादिवारणघटाविघट्टनसिंहायमानाः, पचेलिमाप्रतिमप्रतिभाप्राग्भारपराभूतपुरुहूतसूरयः, पूज्यश्रीचन्द्रप्रभसूरयः प्रत्यूहव्यूहापोहार्थं शिष्टसमयाऽनुवर्तनार्थं च मङ्गलाऽभिधेयप्रयोजना-भिधायकं प्रथममेव गाथायुग्ममाहुः –

देव० : नमः[१] सर्वज्ञाय।

नत्वा श्रीवर्धमानाय निस्सीमज्ञानचक्षुषे ।
जितान्तरारिवर्गाय सम्यक्तत्त्वार्थदेशिने ।।
दर्शनशुद्धेर्वृत्तिं वक्ष्ये संक्षेपतः[२] समयनीत्या ।
मन्दमतिबोधवृद्ध्यै स्मरणार्थं[३] चात्मनः सततम् ।।
जिनवदननलिनसदना विबुधासुरमनुजवृन्दवन्द्यपदा ।
सर्वाङ्गसुन्दरतनुर्वाग्देवी वसतु मे हृदये ।।
श्रीमच्चन्द्रप्रभगणभृतः[४] सारगम्भीरवाचां,
गुम्फः क्वायं निबिडजडिमस्निग्धबन्धुः क्व चाऽहम् ।
किन्त्वेतस्मिन्निजगुरुपरिक्षुण्णमार्गे पुरस्ताद्;
अस्तक्लेशं प्रसरतु ममाप्येष वाचां प्रचारः ।।

इहानादितादात्म्यसम्बन्धाधिरूढगाढमिथ्यात्वतिमिरान्तरितविवेकलोचनमविरतप्रवृत्ताविरतिविषधरी विषमविषावेगविहस्तचेतसमुत्कटकटुकषायोदग्रग्रहग्रासावेशविह्वलमप्रतिमप्रमादमदिरामदमेदुरमुदारदुरधिषहशारीरमानसातिकटुकदुःखव्रातमुद्गरप्रपातनष्टचेतनमत्यन्तप्रबलकलिकालवशविलुप्यमानायुर्बलबुद्धिविभवं भव्यप्राणिगणमवलोक्य[५] समुत्पन्नपरमकारुण्यरसतरङ्गरङ्गितान्तःकरणः स्वपरसमयापारपारावारपारदृश्वा चारित्रमहाराजराजधानीयमानमूर्तिः सुगृहीतनामधेयः श्रीचन्द्रप्रभसूरिस्तदनुग्रहाय नित्यानन्दसुखोपायभूतमर्हत्प्रवचनार्णवनिष्यन्दबिन्दुकल्पमल्पतरं[६] **दर्शनशुद्धिप्रकरण**मुपदिदिक्षुः प्रत्यूहव्यूहापोहार्थं शिष्टसमयानुवर्तनार्थं च भावमङ्गलप्रतिपादकं श्रोतृजनप्रवृत्तिनिबन्धनाभिधेयप्रयोजनसम्बन्धाभिधायकं[७] च प्रथममेव गाथायुग्ममाह –

पत्तभवन्नवतीरं दुहदवनीरं सिवंबतरुकीरं ।
कंचणगोरसरीरं नमिऊण जिणेसरं वीरं ।।१।।
वुच्छं तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं ।
सम्मत्तस्स सरूवं संखेवेणं निसामेह ।।२।।

१. अर्हं नमः सर्वज्ञाय नमः श्री A
२. यतः A ३. स्मरणार्थमथात्मनः TC
४. व्याख्यातुं विषमागमार्थनिचितं गाम्भीर्य मुद्राञ्चितम् श्रीचन्द्रप्रभसूरिभिर्विरचितं ग्रन्थं कुधीः कोऽस्म्यहं । किंतु श्रीविमलाभिधानगणिभिः क्षुण्णोऽयमध्वाधिकं; चेतोऽस्मिन्निति मादृशामपि पदव्यासार्थमुत्कण्ठते ।। A
५. मानसानेक A ६. कल्पतरं A ७. निबन्धनसम्बन्धप्रयोजनाभिधायकं T,B,C

चके० : इहान्वयः सुगमः । पदार्थस्तु सतात्पर्योऽभिधीयते । तत्र **'पत्तभवन्नवतीरं'**ति प्राप्तं लब्धं भवः संसारः स एव दुस्तरत्वादर्णवः समुद्रस्तस्य तीरं तटं येन स तथा तम्, इहोपचारात्तीरासन्नमपि तीरम्, यथा गङ्गासमीपोऽपि देशो गङ्गेति, तदनेन छद्मस्थाऽवस्थोक्ता । अस्यामपि स्वामिनोऽत्यन्तासन्नसिद्धिकत्वेन भवाम्भोधितटवर्त्तित्वात् । **'दुहदवनीरं'**ति दुःखमेव दवो वनवह्निः सन्तापकत्वात्तस्य विध्यापकत्वेन नीरमिव नीरम्, यथाहि दावपावकोपद्रुताः पादपाः पयोदपयसा शाड्वलीभवन्ति तथाऽङ्गिनोऽपि दौर्गत्यादिदुःखोपतप्ताः स्वामिदेशनया निर्वान्तीति भावः, अनेन केवल्यवस्था सूचिता । अस्यामेव स्वामिनो धर्मोपदेशकत्वात् । **'सिवंबतरुकीरं'**ति शिवं निर्वाणं तदेवाम्रतरुश्चूतद्रुमस्तत्र कीर इव कीरः शुकस्तमित्यनेन कीरस्येव सहकारे निर्वाणपद एव भगवतः परमनिर्वृत्तिरिति व्यञ्जयताऽमुना सिद्धाऽवस्थाऽभ्यधायि । **'कंचणगोरसरीरं'**ति काञ्चनं स्वर्णं तद्वद् गौरं गौरवर्णं शरीरं यस्य तमित्यनेन स्वामिनो रूपातिशयसम्पदुक्ता । **'नमिऊणे'**ति नत्वा । **'जिणेसरं'**ति जयन्ति रागाद्यऽरातीनिति जिनाः, सामान्यकेवलिनस्तेषु वक्ष्यमाणाऽष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयाद्यैश्वर्ययोगादीश्वरो जिनेश्वरस्तम्, **'वीरमि'**ति परीषहोपसर्गसहनरञ्जितसुरेश्वररचितवीरनामानं चतुर्विंशतीर्थाधिपतिम् ।

'वुच्छं तुच्छमईणं'ति वक्ष्ये तुच्छाऽल्पा गुरुतरशास्त्रबोधाद्यक्षमा मतिर्येषां ते तथा, तेषा**मनुग्रहार्थमु**पकाराय । **'समत्थभव्वाणं'**ति भव्याः सिद्धिसौधाऽधिरोहयोग्याः प्राणिनस्तदन्येषामुपकाराऽनर्हत्वात्, ततश्च समस्ताश्च ते भव्याश्च समस्तभव्यास्तेषाम्, समस्तग्रहणं च भव्यजन्तुष्वनुग्रहं प्रत्यविशेषार्थं, यद्वा समर्थभव्यानां तेषामेव धर्मोपदेशानुग्रहाधिकारित्वाद् यदाह-

होइ समत्थो धम्मं कुणमाणो, जो न बीहइ परेसिं ।
माइपिउसामिगुरुमाइयाण, धम्माऽणभिण्णाणं ।। [श्रावकधर्मविधिप्र० ५]

'सम्मत्तस्स सरूवं'ति सम्यक्त्वस्य देवतत्त्वादिश्रद्धानरूपस्य स्वरूपं याथात्म्यं सङ्क्षेपेण निशामयत शृणुतेति गाथाद्वयार्थः ।।१, २।।

देव० : सा च समुदायभेदतात्पर्यभेदात् त्रिधा, तत्र तावत् प्राप्तभवार्णवतीरमित्यादिविशेषणविशिष्टं जिनेश्वरं वीरं नत्वा तुच्छमतीनां समस्तभव्यानामनुग्रहार्थं सम्यक्त्वस्य स्वरूपं सङ्क्षेपेण वक्ष्यामीति समुदायार्थः । अथ भेदव्याख्यानं सतात्पर्यमुच्यते-तत्र **'पत्तभवण्णवतीरं'**ति प्राप्तमुपलब्धं भवार्णवतीरं संसाराम्भोधितटं येन स तथा तम्, **'दुहदवनीरं'**ति दुःखमसातं तदेव दवो वनवह्निः सन्तापसाधर्म्यात् तस्य निर्वापकत्वेन नीरमिव नीरम्, यथाहि दवदहनसम्बन्ध-

विधुरितास्तरवः सजलजलदवृष्ट्या विशिष्टां सम्पदमासादयन्ति तथा प्राणिनोऽपि रोगजरामरणादिदुःखसन्ततिसन्तप्ताः सन्तो भगवद्देशनया सततानन्दसुखभाजो भवन्तीति तात्पर्यार्थः[१] । **'सिवंबतरुकीरं'**ति शिवमपवर्गस्तदेवाम्रतरुश्चूतद्रुमः परमनिवृत्तिहेतुत्वेन तत्र कीर इव कीरः शुकः सदावस्थायित्वात्तत्रायमर्थो यथाहि शुकः सहकारतरौ निर्भरानन्दः सदा मोदते[२], तथासौ भगवान् शिव इति । **'कंचणगोरसरीरं'**ति काञ्चनं स्वर्णं तद्वद् गौरं शरीरमङ्गं[३] यस्य स तथा तम्, अनेन शेषानपि शरीरातिशयान् सूचयति ।

नत्वा प्रणम्य **'जिणेसरं'**ति जयन्ति रागाद्यान्तररातीनिति जिनाः सामान्यकेवलिनस्तेषु वक्ष्यमाणाष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयाद्यैश्वर्ययोगादीश्वरो जिनेश्वरो वीतरागशिरोमणिरित्यर्थस्तं **'वीरं'**ति विशेषेण विविधं वा ईरयति क्षिपत्यष्टप्रकारं कर्मेति वीरः,

विदारयति यत्कर्म तपसा च विराजते ।
तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ।। [ ]

इति निरुक्ताद्वा वीरोऽपश्चिमतीर्थाधिपतिस्तम् ।

'वुच्छं तुच्छमईणं' इत्यादि, तुच्छाल्पा गुरुतरशास्त्रबोधाद्यक्षमा मतिर्बुद्धिर्येषां ते तथा तेषा**मनुग्रहार्थमु**पकृतये **'समत्थभव्वाणं'**ति भव्या मुक्तिगमनयोग्याः प्राणिनस्तदितरेषामुपकारानर्हत्वात्, ततश्च समस्ताश्च ते भव्याश्च समस्तभव्यास्तेषाम्, समस्तग्रहणं च भव्यजन्तुष्वनुग्रहं प्रत्यविशेषार्थम् । यदिवा समर्थभव्यानाम्, तेषामेव धर्मोपदेशानुग्रहेऽधिकारित्वात्, यदाह–अर्थी समर्थः शास्त्रेणापर्युदस्तश्च धर्मेऽधिक्रियते, समर्थाश्च ये शुद्धं धर्ममनुतिष्ठन्तः पित्रादिभ्यो न बिभ्यति त इह ग्राह्याः । यदाह –

होइ समत्थो धम्मं कुणमाणो जो न बीहइ परेसिं ।
माइपिउसामिगुरुमाइयाण धम्माऽणभिण्णाणं ।। [श्रावकधर्मविधिप्र॰ ५]

'सम्मत्तस्स सरूवं'ति सम्यगित्येतस्य भावः सम्यक्त्वं वक्ष्यमाणलक्षणम्, तस्य स्वरूपं याथात्म्यम्, **सङ्क्षेपेण** समासेन **'निसामेह'**त्ति निशामयताकर्णयत[४], श्रवणं प्रत्यवहिता भवत । शिष्याभिमुखीकरणमेतद्, अनेन पराङ्मुखमपि प्रतिबोधयतो व्याख्यातुर्धर्म एवेति ख्यापितं भवति । तथा च वाचकः –

१. गाथार्थः A २. रमते A ३. पीतवर्णं शरीरं A ४. निशाम्यत A

न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ।। [तत्वार्थका० १-२९]

इह च प्रथमगाथासूत्रेणेष्टदेवतानमस्काररूपं[१] भावमङ्गलमुक्तम्, द्वितीयगाथया[२] तु 'सम्मत्तस्स सरूवं'ति पदेनाभिधेयं 'तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं'ति अवयवेन गुरोरनन्तरप्रयोजनं च साक्षादभिहितम्, तथा शिष्यानन्तरप्रयोजनं सम्यक्त्वस्वरूपावगमः, परम्परन्तु द्वयोरपि निःश्रेयसावाप्तिरिति विज्ञेयम् । सम्बन्धस्तु सामर्थ्यगम्यः, स च शास्त्राभिधेययोर्वाच्यवाचकभावः, शास्त्रप्रयोजनयोस्तूपायोपेयलक्षण इति । अथ शिवाम्रतरुकीरमित्यस्मिन् सति प्राप्त-भवार्णवतीरमिति कथं नानर्थकमेकार्थत्वात्, काञ्चनगौरशरीरमित्येतदपि शिवपदप्राप्तस्य मूर्तेरसत्वेन दुरवगमम्, दुःखदवनीरमित्येतदप्यशरीरस्य वाग्योगाभावेन दुर्घटम्, जिनेश्वरमिति विशेष्यपदमपि दुरुपपादम्, तत्र सर्वेषां समानत्वाद् । एतेषु वा सत्सु शिवाम्रतरुकीरमिति विरुद्धमिति सर्वमसमञ्जसमिति । तदयुक्तमभिप्रायापरिज्ञानादिह हि भगवतश्छद्मस्था-द्यवस्थात्रयेऽपि ग्रन्थकर्तुर्नमस्कारः कर्तुमभिमतस्ततश्च प्राप्तभवार्णवतीरमिति तीरासन्नमपि तीरमुपचाराद् यथा गङ्गासमीपोऽपि देशो गङ्गेति, तदनेन छद्मस्थावस्थैव विवक्षिता । यतः प्रतिपन्नानुत्तरविरतिर्मतिश्रुतावधिमनःपर्यवज्ञानसम्पन्नः सुतीव्रतरतपःसंयमानुष्ठानरतिस्त-स्यामप्यवस्थायां संसाराम्भोधितटवर्त्येव वर्तते भगवान् । दुःखदवनीरं जिनेश्वरमित्याभ्यां च केवल्यवस्था सूचिता । तत्र हि निर्जितदुर्जयान्तरारिवारः प्रतिहतघनघातिकर्मा धर्ममुपदिशति । प्रातिहार्याद्यैश्वर्यं च शेषजिनेभ्योऽधिकमधितिष्ठति । काञ्चनगौरशरीरमित्यवस्थाद्वयेऽपि तुल्यमुभयत्रापि सशरीरत्वाद् । शिवाम्रतरुकीरमित्यनेन न तु सिद्धावस्थेति सर्वं सुस्थम् । अन्ये त्वन्यथा समादधति प्राप्तमुपलब्धं पूर्वमसज्ज्ञानक्रियाभ्यासाद्भवार्णवतीरं येनेत्यनेनानादि-सिद्धमतव्युदासः । तथा दुःखदवनीरमित्यनेन संहारादिकर्तृपरपरिकल्पिताप्तप्रतिक्षेपः । शिवाम्रतरुकीरमिति प्रतिनियतसिद्धस्थानोपदर्शनेन यत्कैश्चिदुक्तम् –

गुणसत्वान्तरज्ञानान्निवृत्तप्रकृतिक्रियाः ।
मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिताः ।। [ ]

इत्यादि, तन्निरस्यति, काञ्चनगौरशरीरमित्यनेन त्वशरीरमुपदेष्टारं प्रत्याचष्टे, तदुक्तं कैश्चित्–

---

१. नमस्कार उक्तः T,B,C २. द्वितीयगाथया त्वभिधेयप्रयोजने साक्षादभिहिते । सम्बन्धस्तु सामर्थ्यगम्यः, तत्र सम्यक्त्वस्वरूपमभिधेयम्, प्रयोजनं च द्वेधा, अनन्तरपरम्पर भेदात्, तत्राचार्यस्यानन्तर प्रयोजनं तुच्छमतिसत्वानुग्रहः । श्रोतृणां तु सम्यक्त्वस्वरुपावगमः, परम्परं तूभयेषामपि निःश्रेयसावाप्तिः। सम्बन्धस्तु शास्त्र O,T,B,C

अपाणिपादो ह्यमनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति विश्वं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराविदः ।। [ ] इति ।

जिनेश्वरमित्यमुना तु सरागसिद्धस्य प्रतिबन्धः, यदाहुः केचन –

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ।। [ ]

इति । स्तुतिलक्षणं चेदम्, तत्किल स्तोतव्यस्य स्वार्थपरार्थसम्पत्ती सोपाये वक्तव्ये, तत्र सिवंबतरुकीरमित्यनेन स्वार्थसम्पत्तिः, दुहदवनीरमित्यनेन परार्थसम्पत्तिः, जिणेसरमित्यमुना तु द्वयोरप्युपायः प्रतिपादित इत्यलं विस्तरेणेति गाथाद्वयार्थः ।।१, २।।

चक्रे० : सम्प्रति सङ्क्षेपेणेति यदुक्तं तत्रोपपत्तिमाहुः –

देव० : इदानीं सङ्क्षेपेणेति यदुक्तं तत्रोपपत्तिमाह –

सुयसायरो अपारो आउं थोवं[१] जिया य दुम्मेहा ।
तं किंपि सिक्खियव्वं जं कज्जकरं च थोवं च ।।३।।

चक्रे० : श्रुतसागरः सिद्धान्तोदधिर्महत्वसाधर्म्यादपारोऽदृश्यपर्यन्तः, **आयु**र्जीवितं **स्तोकम्, जीवाश्च दुर्मेधसः** स्वल्पबुद्धयः, महामतयो हि जीवाः स्तोकायुषोऽप्यऽपारमपि सिद्धान्तमधीयेरन्न चैतदस्ति, तस्मा**त्तत्किमपि शिक्षणीयम**भ्यसनीयं **यत्कार्यकारि चै**हिकामुष्मिकार्थप्रसाधकम्, **स्तोकं च** स्वल्पं च, इह चकारौ तुल्ययोगार्थौ, द्वयोरप्यनयोर्विशेषणयोः समकक्षतां द्योतयतः ।।३।।

देव० : श्रुतसागरोऽपार इत्यादिकारणसद्भावात्समस्तप्रवचनाध्ययनाद्यसमर्थेन तत्किमपि शिक्षणीयं यत्कार्यकारि च स्तोकं चेति गाथासमासार्थः । अक्षरार्थः पुनरेवं-श्रुतमेव सागरः समयमहोदधिर्गाम्भीर्यसाधर्म्यादपारोऽदृश्यपरकूलः । **तथायु**र्जीवितं **स्तोक**मल्पं दुःषमानुभावाद्, तदपि क्षणभङ्गुरमुपक्रमणसद्भावात् । तदुक्तम् –

शस्त्रं व्याधिर्विषं च ज्वलनजलभयव्यालवैतालशोकाः,
शीतोष्णक्षुत्पिपासागलविवरमरुत्मूत्रविष्टानिरोधाः ।
नानाक्षुद्रोपघाताप्रचुरभुजिररुः श्रान्तिगात्राभिघाताः;
विघ्नान्येतानि सद्यश्चिरमपि घटितं जीवितं संहरन्ति ।।

१. थोउं T,C थोअं P

जीवाः प्राणिनः पुन**र्दुर्मेधसः** स्वल्पबुद्धयो दुःषमानुभावादेव तथा च दुःषमास्वरूपम् –

विज्जाण य परिहाणी पुप्फफलाणं च ओसहीणं च ।
आउयसुयरिद्धीणं संठाणुच्चत्तधम्माणं ।। [तित्थो. प० ९१७]

ततश्च **तत्किमपि शिक्षणीय**मभ्यसनीयं **यत्किम्** ? **कार्यकारि च,** ऐहिकामुष्मिकार्थप्रसाधकम्। तथा **स्तोक**मल्पं च । चकारौ[१] विशेषणद्वयस्य तुल्यकक्षतां लक्षयतः । तदनेन विशेषावश्यकादिग्रन्थेषु विस्तरतः प्रोक्तेऽपि सम्यक्त्वस्वरूपे संक्षिप्तमिदं सुतरां प्रकरणमुपादेयमिति सूचयतीति गाथार्थः ।।३।।

चक्रे० : इह स्तोकं च कार्यकारि चेदं सम्यक्त्वप्रकरणम्, ततस्तदेवाभ्यसनीयम्, तस्य च सम्यक्त्वस्य लाभप्रकारमाहुः –

देव० : इह च लब्धात्मलाभस्य वस्तुनः स्वरूपनिरूपणमुपपत्तिमदिति प्रथमं तावत्सम्यक्त्वलाभप्रकारमाह –

मिच्छत्तमहामोहंधयारमूढाण इत्थ जीवाणं ।
पुन्नेहिं कह वि जायइ दुलहो सम्मत्तपरिणामो ।।४।।

चक्रे० : मिथ्यात्वमेव महान् दुरुच्छेदत्वेन गुरु**र्मोहो** मिथ्यात्वमोहनीयम्, स ए**वान्धकारः** सद्दर्शनतिरोधायकत्वेन, तेन **मूढानां** निर्विवेकीभूताना**मत्र** संसारे **जीवानां पुण्यैः** पुण्यहेतुभिः शुभाध्यवसायविशेषैः **कथमपि** ग्रन्थिभेदादिना महता कष्टेन **दुर्लभः सम्यक्त्वपरिणामो जायत** उदाययननृपस्येव सम्पद्यत इत्यर्थः ।।४।।

देव० : महांश्चासौ दुरुच्छेदत्वेन गुरुस्थितिकत्वेन च मोहश्च महामोहः, मिथ्यात्वं विपर्यासहेतुस्तच्चासौ महामोहश्च **मिथ्यात्वमहामोहो** मिथ्यात्वमोहनीयमिति हृदयम्, स एवा**न्धकारः** सद्दर्शननिरोधकत्वेन, तेन **मूढा** विवेकविकलास्तेषां **जीवानामिति** सम्बन्धः । **'इत्थ'**त्ति इहास्मिन् संसारे **पुण्यैः** पुण्यप्रकृतिभिः पञ्चेन्द्रियजातित्रसबादरपर्याप्तप्रभृतिभिर्हेतुभूताभिस्तदभावे सम्यक्त्वलाभायोगात् । **कथमपी**त्यनेन कष्टप्राप्यत्वप्रकारमाह, तथाहि - सप्तानां ज्ञानावरणादिकर्मप्रकृतीनां स्थितौ यथाप्रवृत्तिकरणेन पल्यकादिदृष्टान्ततः कोटीकोटेरभ्यन्तरीभूतायां तल्लाभसम्भवाद्, यदाह –

---

१. प्रथमश्चकारोऽवधारणे स च भिन्नक्रमे योजित एव, द्वितीयस्तु समुच्चय इति गाथार्थः । T,B,C

सत्तण्हं पयडीणं अब्भिंतरओ य कोडाकोडीणं ।
काऊण सागराणं जइ लहइ चउण्हमन्नयरं ।। [ ]

जायत उत्पद्यते **दुर्लभो** दुष्प्रापोऽनेन कृतग्रन्थिभेदस्याप्यनन्तानुबन्धिनामुदयनिरोधेनैव तदवाप्तिं सूचयति । यदभिहितम् –

पढमिल्लुयाण उदए नियमासंजोयणाकसायाणं ।
सम्मदंसणलंभं भवसिद्धीयावि न लहंति ।। [ ] त्ति ।

सम्यक्त्वं चासौ परिणामश्च **सम्यक्त्वपरिणाम**स्तत्त्वश्रद्धानाध्यवसायोऽनेनात्मपरिणाम एव सम्यक्त्वमित्युक्तं भवति, एतच्चोपरितनगाथायां न्यक्षेण [१]वक्ष्यतीति गाथार्थः ।।४।।

चक्रे० : अथ सम्यक्त्वस्वरूपमाहुः –

देव० : अथ [२]सम्यक्त्वस्वरूपमेवाह –

देवो धम्मो मग्गो साहू तत्ताणि चेव सम्मत्तं ।
तव्विवरीयं मिच्छत्तदंसणं देसियं समए ।।५।।

चक्रे० : देवो धर्मो मार्गः साधवस्तत्त्वान्येव सम्यग्भावः शुद्धतमात्मपरिणामरूपः **सम्यक्त्वम्** । इहोपचारादेवादितत्त्वविषयं श्रद्धानमेव सम्यग्भावे [भावस्य] जनकत्वात् सम्यक्त्वमिति लक्ष्यते, आयुःशब्देनेव घृतम् । **तद्विपरीतं** देवादितत्त्वश्रद्धानविपरीतं **मिथ्यात्वदर्शनं देशितं** कथितम्, **समये** सिद्धान्त इति द्वारगाथार्थः ।।५।।

देव० : देवो धर्मो मार्गः साधवस्तत्त्वानि चैव, विषयविषयिणोः कथञ्चिदभेदादेतद्विषयं श्रद्धानं **सम्यक्त्वं** समञ्चति सम्यगवैपरीत्येनावगच्छति देवादितत्त्वमिति सम्यग्ज्ञानमात्मा तस्य भावः सम्यक्त्वम्, सम्यक्त्वमोहनीयकर्माणुक्षयक्षयोपशमोपशमसमुत्थात्मपरिणामरूपम् । उक्तं हि – 'से य सम्मत्ते पसत्थसम्मत्तमोहणीयकम्माणुवेयणोवसमखयखओवसमसमुत्थेपसमसंवेगाइ-लिंगे सुहे आयपरिणामे पण्णत्ति'त्ति । चः समुच्चये, एवोऽवधारणे । तस्यैव फलं दर्शयति– **तव्विवरीयमि**त्यादि तेषु देवादिषु विषये विपरीतम्, भावप्रधानत्वान्निर्देशस्य विपर्यासोऽतद्रूपेषु तद्रूपताबुद्धिस्तद्रूपेष्वतद्रूपताबुद्धिश्च, यदिवा तद्विपरीतं देवादिश्रद्धानविपरीतमर्थस्तु स एव । **मिथ्यात्वदर्शनं** वितथावबोधो **देशितं** कथितं **समये** सिद्धान्ते । ननु च तत्त्वार्थश्रद्धानं

१. वक्ष्याम इति T,B,C २. तदेवाह A

सम्यक्त्वमित्येतदेव वाच्यम्, देवसाध्वोर्जीवतत्त्वे, धर्ममार्गयोश्च शुभाश्रवे संवरे चान्तर-भावादिदमेव च ग्रन्थान्तरेष्वपि[१] सम्यक्त्वस्वरूपमुपलभ्यत इति । सत्यम्, तथापि देवादीनां धर्मसर्वस्वभूतत्वात् तद्विपर्यासे च सर्वानुष्ठानवैफल्यात् प्रतिदिनपूज्यत्वानुष्ठेयत्वाश्रयणीय-त्वोपास्यत्वलक्षणोपयोगाच्च पृथगुपादानमिति द्वारगाथासमासार्थः ।।५।।

**** नवपदप्रकरणे-३ ****

व्याख्यातानि नामतो नव द्वाराणि, साम्प्रतं 'यथोद्देशं निर्देश' इति न्यायान्मिथ्यात्वमेवाद्यद्वारेण व्याचिख्यासुराह –

देवो धम्मो मग्गो साहू तत्ताणि चेव सम्मत्तं ।
तव्विवरीयं मिच्छत्तदरिसणं देसियं समए।।

देवो धर्मो मार्गः साधवस्तत्त्वानि चैव सम्यक्त्वं, जिनागमाभिहितरूपाणि सर्वाणीति विशेषणपदं चकारेणानुक्तसमुच्चयार्थेन सूचितम्, एवकारोऽवधारणार्थः, स च चकारसूचितविशेषणपदेन संबध्यते, ततोऽयमर्थः–यथाऽवस्थितस्वरूपाण्येव देवादीनि सम्यक्त्वं न विपरीतरूपाणीति, ननु चैतद्विषयो यो रुचिपरिणामः स सम्यक्त्वमुच्यते, कथमेतान्येव सम्यक्त्वमित्युक्तम् ? सत्यम्, विषयविषयवतोर-भेदोपचारवृत्त्या देवादिविषयो रुचिपरिणामो देवादिशब्दैर्विवक्षितोऽतो देवादीनि सम्यक्त्वमित्युक्तम्, एषां च स्वरूपमिदम् –

'यस्याष्टादश दोषाः क्रुधादयः क्षयमुपागताः सर्वे । मुक्तिप्रदः स देवो विज्ञेयः केवलज्ञानी ।।

यत्र प्राणिदया सत्यमदत्तपरिवर्जनम् । ब्रह्मचर्यं च सन्तोषो, धर्मोऽसावभिधीयते ।।

ज्ञानदर्शनचारित्रपरिपालनलक्षणः । अक्षेपमोक्षनगरप्रापको मार्ग इष्यते ।।

दशविधयतिधर्मरताः समविगणितशत्रुमित्रतृणमणयः । जीवादितत्त्वविज्ञास्तीर्थकरैः साधवः कथिताः ।।

तापच्छेदकषैः शुद्धः सुवर्णमिव यद्भवेत् । युक्तिसिद्धान्तसिद्धत्वात्तत्तत्त्वमभिधीयते ।।

अथवा 'सूचनात्सूत्र'मितिवचनाद्देवधर्ममार्गसाधुतत्त्वेषु देवाद्यध्यवसायस्यैव देवादिशब्दैर्विवक्षितत्वाद्देवो धर्मो मार्गः साधुस्तत्त्वानि चैव सम्यक्त्वमित्युक्तम्, ननु च मिथ्यादर्शनस्वरूपमभिधित्सितं तत्किमर्थमप्रस्तुतं सम्यक्त्वस्वरूपमुक्तम् ?, सत्यम्, सम्यक्त्वमिथ्यात्वयोः शीतोष्णस्पर्शयोरिव परस्परविरोधित्वात् सम्यक्त्वस्वरूपे ज्ञाते तद्विरोधिमिथ्यात्वस्वरूपं सुज्ञानं भवतीति ज्ञापनार्थम्, अत एवाह–**'तव्विवरीयं मिच्छत्तदरिसणं देसियं समये'** त्ति तस्मात् सम्यक्त्वस्वरूपे ज्ञाते देवधर्ममार्गसाधुतत्त्वेषु यथाऽवस्थित-रुचिपरिणामरूपाद्विपरीतम्–अन्यथा, यथारागादियुक्तोऽपि देवो नास्ति वा देवस्तथा चोक्तम् –

१. अन्यत्रापि T,B,C

पत्ती पत्ती पाणिउ पाणिओ, डूंगरु हूंता कक्करु आणिओ ।
कक्करु अग्गइ वज्जइ तूरा, देक्खु न माइ विगोया पूरा ।। इति
प्राणिव्यपरोपणादिनाऽपि धर्मो, नास्ति वा धर्मः, तदुक्तम् -

केण दिट्ठु परलोओ जेण धम्मिण धणु दिज्जइ, काइं देवदाणविहिं अत्थसंचओ परिकिज्जइ ।
पियमूढओ जणु सव्वु पहु जो नवि धणु रक्खइ, धम्मट्ठाणकयतणओ साओ अज्जवि नवि चक्खइ।।

इति, मोक्षस्याज्ञानादिकः, नास्ति वा कश्चिदिति, आरम्भपरिग्रहादिप्रवृत्ता मुत्कलचारिणो मुनयो, यदुक्तं–

खंतपियंतवि सुरओ रमंतवि, अलिओ मुहुलु चक्कु पूयंतवि ।
इमं वयंति सिद्धं सुरलोयह, मत्थइ पाओ दिवि पसु लोयह ।। त्ति ।

न सन्ति वा केचन, यत उक्तम् -

स्त्रीमुद्राझषकेतनस्य महतीं सर्वार्थसम्पत्करीम्,
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलाकाङ्क्षिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः;
केचित्पञ्चशिखीकृताश्च जटिनः कापालिकाश्चापरे ।। इति,

वैशेषिकसाङ्ख्यादिप्रणीतान्यपि तत्त्वानि, न वा कानिचिद्, इत्यादिरूपं मिथ्यात्वदर्शनं **देशितं** कथितम्, क्व ? **समये** सिद्धान्ते, अत एव केनचित्सम्यग्दृष्टिना मूढमिथ्यादृष्टिचेष्टितान्यवलोक्य खेदः कृतो, यथा–

रागी देवो दोसी देवो मामिसुत्तंपि देवो, मज्जे धम्मो मंसे धम्मो जीवहिंसाए धम्मो ।
सत्ता मत्ता कंतासत्ता जे गुरू तेवि पुज्जा, हा हा कट्ठं नट्ठो लोओ अट्टमट्टं कुणंतो ।।

इति गाथार्थः ।।३।।

१ - देवतत्त्वम्

चक्रे० : सम्प्रति यथोद्देशं निर्देश इति देवतत्त्वं विवृण्वन्ति –

देव० : व्यासार्थं तु समस्तग्रन्थेन स्वयमेव वक्ष्यति, तत्र यथोद्देशं निर्देश इति न्यायात्प्रथमं तावद्देवतत्त्वं विवृणोति –

चउतीसअइसयजुओ अट्ठमहापाडिहेरकयसोहो ।
अट्ठदसदोसरहिओ सो देवो नत्थि संदेहो ।।६।।

चक्रे० : इयं सूत्रेणैव वक्ष्यमाणार्थेति न प्रतन्यते ।।६।।

देव० : चतुर्भिरधिकास्त्रिंशच्चतुस्त्रिंशत्, ते च त अतिशय्यते विशेष्यत एभिरितरशास्तृभ्यो भगवानित्यतिशयाश्चोत्कर्षास्तैर्युतः सहितस्तथाष्टमहाप्रातिहार्यकृतशोभ इति, प्रतिहारो राजदौवारिकस्तस्य कर्म प्रातिहार्यं, तच्च सततसन्निधानवर्तिना तन्माहात्म्यवृद्धिसम्पादनम्, तदिव यानि देवैर्विधीयन्ते तानि तथा, महान्ति च तानि प्रातिहार्याणि चेति सामान्यव्युत्पत्तावपि महातिशयाः परिगृह्यन्त अष्ट च तानि महाप्रातिहार्याणि च वक्ष्यमाणानि तैः कृतशोभः प्राप्तत्रिलोकाभ्यधिकश्रीः, तथाष्टादशभिर्दोषैर्दूषणैर्वक्ष्यमाणै रहितो विप्रमुक्तो यः स एव देव आप्तो भवतीति शेषः, नास्त्यत्र सन्देहोऽस्यैव दृष्टेष्टाविरुद्धाविसंवादिवचनत्वविश्वसनीयत्व-लक्षणाप्तलक्षणयोगादिति गाथार्थः ।।६।।

** अभिधानराजेन्द्रकोषे-'देव' शब्दे-६ **

चउतीसअइसयजुओ अट्ठमहापाडिहेरकयसोहो ।
अट्ठदसदोसरहिओ सो देवो नत्थि संदेहो ।।

तत्र सकलत्रिभुवनातिशायिसर्वाऽऽश्चर्यनिधानभूतसर्वैश्वर्यनिवेदनपरभुवनजननयनाऽऽनन्दविधायकानन्यजनसाधारण**चतुस्त्रिंशदतिशयैर्युतः** समन्वितो यः स देव इति प्रकृतम् । **अष्टमहाप्रातिहार्यैर**शोकाऽऽदिभिः **कृता** विहिता **शोभा** यस्य सोऽपि देवः । **अष्टादशदोषैर**ज्ञानादिभी **रहितो** विवर्जितो यः स देवः । अयमत्र भावार्थः – यो हि देवो वा खेचरो वा वैक्रियाऽऽदिलब्धिमन्नरो वेत्थम्भूतस्फीतिमानपि यद्यष्टादशदोषरहितो न भवति न **स देव** इति नात्र संशयः **संदेह** इति गाथार्थः ।।६।।

चक्रे० : तत्र सविभागमतिशयानेव स्तवद्वारेणाहुः –

देव० : अथ सविभागमतिशयानेव स्तवद्वारेणाह –

चउरो जम्मप्पभिई एक्कारसकम्मसंखए जाए ।
नवदस य देवजणिए चउतीसं [१]अइसए वंदे ।।७।।

चक्रे० : गतार्था, केवलं **कर्मसङ्क्षयो** घातिकर्मक्षयो ज्ञेयः, ते चाम्यतिशयाः–

निरामयमलस्वेदं सुगन्धि वपुरर्हताम् ।
श्वासोऽब्जगन्धो निर्विस्रे पाण्डुरे रुधिरामिषे ।।

दृश्यौ नाहारनीहारौ जन्मतोऽतिशया इमे ।
क्षेत्रे योजनमात्रेऽपि मान्त्यसङ्ख्याः सुरादयः ।।

वाणी योजनगा श्रोतृस्वस्वभाषाऽनुवादिनी ।
भामण्डलं पृष्ठभागे जितमार्तण्डमण्डलम् ।।

न योजनशते साग्रे मारिदुर्भिक्षविग्रहाः ।
वैराऽतिवृष्ट्यऽवृष्टीति रुजोऽमी कर्मघातजाः ।।

दुन्दुभिश्चमराश्छत्रत्रयं रत्नमयध्वजः ।
सिंहासनं सांघ्रिपीठं धर्मचक्रं पुरो दिवि ।।

स्वर्णाब्जानि पदन्यासे कण्टकाः स्युरधोमुखाः ।
वप्रत्रयमशोकद्रुश्चातुरूप्यं द्रुमानतिः ।।

कचश्मश्रुनखाऽवृद्धिः पक्षिणोऽपि प्रदक्षिणाः ।
ऋतुषट्केन्द्रियार्थाऽऽनुकूल्यं गन्धाम्बुवर्षणम् ।।

१. अतिसए T,C

निशीथेऽप्यन्तिके देवकोटिर्वाताऽनुकूलता ।
पुष्पवृष्टिश्चेति दैव्याश्चतुस्त्रिंशदिमेऽखिलाः ।। [ ] ।।७।।

देव० : पाठसिद्धा, नवरं सम्यक् क्षयः सङ्क्षयः सर्वघात इत्यर्थः, कर्मणां सङ्क्षयः **कर्मसङ्क्षयः,** स च घातिकर्मणामेवेति ज्ञेयम्, ते चामी –

तेषां च देहोद्भूतरूपगन्धो निरामयः स्वेदमलोज्झितश्च ।
श्वासोऽब्जगन्धो रुधिरामिषे तु गोक्षीरधाराधवले ह्यविस्रे ।।

आहारनीहारविधिस्त्वदृश्यश्चत्वार एतेऽतिशयाः सहोत्थाः ।
क्षेत्रे स्थितिर्योजनमात्रकेऽपि नृदेवतिर्यग्जनकोटिकोटेः ।।

वाणी नृतिर्यक्सुरलोकभाषासंवादिनी योजनगामिनी च ।
भामण्डलं चारु च मौलिपृष्टे विडम्बिताहर्पतिमण्डलश्रीः ।।

साग्रे च गव्यूतिशतद्वये रुजो वैरेतयो मार्यतिवृष्ट्यवृष्टयः ।
दुर्भिक्षमन्यस्वकचक्रतो भयं स्यान्नैत एकादश कर्मघातजाः ।।

खे धर्मचक्रं चमराः सपादपीठं मृगेन्द्रासनमुज्ज्वलं च ।
छत्रत्रयं रत्नमयध्वजोऽह्रिन्यासे च चामीकरपङ्कजानि ।।

वप्रत्रयं चारु चतुर्मुखाङ्गता चैत्यद्रुमोऽधोवदनाश्च कण्टकाः ।
द्रुमानतिर्दुन्दुभिनाद उच्चकैर्वातोऽनुकूलः शकुनाः प्रदक्षिणाः ।।

गन्धाम्बुवर्षं बहुवर्णपुष्पवृष्टिः कचश्मश्रुनखाप्रवृद्धिः ।
चतुर्विधामर्त्यनिकायकोटिर्जघन्यभावादपि पार्श्वदेशे ।।

ऋतुनामिन्द्रियार्थानामनुकूलत्वमित्यमी ।
एकोनविंशतिर्दैव्याश्चतुस्त्रिंशच्च मीलिताः ।। [ ] इति ।।७।।

**** सप्ततिशतस्थानप्रकरणे-९३ ****

अथ चतुर्विंशतिजिनानामतिशयानाह –

जम्मप्पभिई चउरो जिणाण इक्कार घाइकम्मखओ ।
सुरविहिअइगुणवीसं चउतीसं अइसया उ इमे ।।

'जम्मप्पभिई चउरो' त्ति जन्मप्रभृति चत्वारः । **'जिणाण इक्कार घाइकम्मखओ'** त्ति जिनानामेकादशातिशया घनघातिकर्मक्षयाद्भवन्ति। **'सुरविहिअइगुणवीसं'** ति सुरैः कृता अतिशया एकोनविंशतिर्भवन्ति । **'चउतीसं अइसया उ इमे'** त्ति सर्वेऽप्येकीकृताश्चतुस्त्रिंशदतिशया भवन्ति इमे वक्ष्यमाणा इति गाथार्थः ।।९३।।

चक्रे० : सम्प्रति प्रातिहार्याण्याहुः –

देव० : सम्प्रति प्रातिहार्याण्याह –

[१]कंकिल्लि कुसुमवुट्ठी दिव्वज्झुणि चामरासणाइं च ।
भावलय भेरिछत्तं जयंति जिणपाडिहेराइं ।।८।।

चक्रे० : स्पष्टार्था, नवरं दिव्यध्वनिर्नृदेवतिर्यग्भाषासंवादी योजनगामी स्वामिनो देशनानिनादः । **'पाडिहेराइं'**ति प्रतीहारस्य कर्म प्रातिहार्यं यथा प्रतीहारः सदा संनिहितो भवति तथा समवसरणाभावेऽपि प्रातिहार्याणि सदा संनिहितानि भवन्तीत्यतिशयमध्योक्तान्यपि पृथगुक्तानि । विभक्तिलोपादिकं चात्र सर्वत्र प्राकृतत्वात् ।। ८।।

देव० : 'जयंति' शेषाप्तमहिमानमधःकुर्वते, कानि ? कङ्केल्लिप्रभृतीनि **जिनप्रातिहार्याणी**ति सम्बन्धः । तत्र **कङ्केल्लि**र्दिनकरकरप्रसरावारकोऽशोकवृक्षः, एतन्मानं च –

बत्तीसं धणुहाइं चेइयरूक्खो उ वद्धमाणस्स ।
सेसाणं तु जिणाणं ससरीरा बारसगुणाओ ।। [विचारसार-१६३]

कुसुमवृष्टिः सुरकरविमुक्ताधःस्थितवृन्तजानुदध्नपञ्चवर्णसुगन्धिपुष्पवर्षः, **दिव्यध्वनिः** सुरनरशबरतिर्यग्जन्तुजातस्वस्वभाषापरिणामरमणीयः, सङ्ख्यातीतपरिषत्प्राणियुगपदनेकसंशयापहारचतुरः, क्षीरेक्षुद्राक्षाद्यधिकतरमा[२]धुर्यवानायोजनगामी देशनानिनादः । **चामरे** त्रि[३]भुवनैश्वर्यसंसूचके शरच्चन्द्रमरीचिनिचयगौरे प्रकीर्णके । **आसनम**मेयमहिमाविर्भावकम्, स[४]मुच्छलत्पञ्चवर्णमणिकिरणकदम्बकर्बुरितदिगन्तरं सिंहासनम् । **भावलयं** निर्जितमार्तण्डमण्डलं मौलिपृष्ठप्रतिष्ठितं पृष्ठतः संवर्त्तितशरीरप्रभाजालम् । **भेरी** पुरतो व्योम्नि शब्दायमानः प्रतिरवभरितभुवनोदरो दुन्दुभिः । **छत्रमे**कदेशे समुदायोपचाराज्जगत्त्रयैकप्रभुत्वाविर्भावनचतुरा

---

१. कंकेल्लि A,C २. सौहित्यकृदायोजनगामी T,B,C ३. निर्मुक्तसङ्गेषु साम्राज्यसंसूचके T,B,C ४. मणिरत्नप्रभापटसमुच्छलदनेकाखण्डलकोदण्डखण्डं सिंहासनम् T,B,C

पार्वणचन्द्रमण्डलनिभा उत्तराधर्यस्थितातपत्रत्रयी । इह कङ्केल्लिरित्यत्र प्राकृतवशाद्विभक्तिलोपो, भावलयभेरीछत्रमित्यत्र समाहारद्वन्द्वः, शेषं सुगमम् । समस्तासमस्तनिर्देशश्च बन्धानुलोम्यादेवमन्यत्रापि[१] यथासम्भवमूह्यमिति आह– किमर्थमतिशयान्तर्गतत्वेऽपि प्रातिहार्याणां पृथगुपादानमिति, सत्यम्, इतरातिशयेभ्यो वैशिष्ट्यख्यापनार्थं तच्च समस्तत्रिभुवनाद्भुतवैभवसूचकत्वं प्राकृतलोकेनाप्यतिशयरूपतया प्रतिपद्यमानत्वं वाऽत एव प्रतिकृतावप्यमीषां सहविधानमिति गाथार्थः ।।८।।

*** प्रवचनसारोद्धारे- ४४० ***

साम्प्रतं 'अट्ठ महापाडिहेराइं'ति एकोनचत्वारिंशत्तमं द्वारमाह –

कंकिल्लि कुसुमवुट्ठी देवज्झुणि चामराऽऽसणाइं च ।
भावलय भेरिछत्तं जयंति जिणपाडिहेराइं ।।

तत्र प्रतिहारा इव प्रतिहाराः सुरपतिनियुक्ता देवास्तेषां कर्माणि कृत्यानि प्रातिहार्याणि, 'वर्णदृढादिभ्यः ष्यञ्ञे'ति कर्मणि ष्यञ् तान्यष्टौ, तद्यथा– १-उल्लसद्बहलपाटलपल्लवजालसर्वकालविकसदसमानकुसुमसमूहविनिःसरदविरलपरमपरिमलोद्गारभरसमाकृष्यमाणभ्रमद्भ्रमरनिकुरम्बरणरणारावशिशिरीकृतप्रणमद्भव्यजननिकरश्रवणविवरोऽतिमनोरमाकारशालिविशालशालः **कङ्केल्लि**तरुः अशोकतरुर्जिनस्योपरि देवैर्विधीयते । तथा २-जलजस्थलजविकुर्वणाविरचितानां पञ्चवर्णानां विकस्वराणामधःकृतवृन्तानामुपरिमुखाणां **कुसुमानां** पुरुषजानुद्वय**संवृष्टिः** क्रियते । तथा ३-सरसतरसुधारससहोदरः सरभसविविधदेशापहृतमुक्तापरव्यापारप्रसारितवदनैः कुरङ्गकुलैराकुलाकुलैरुत्कर्णैराकर्ण्यमानः सकलजनानन्दप्रमोददायी **दिव्यो ध्वनि**र्वितन्यते । तथा ४-कमनीयकदलीकाण्डप्रकाण्डतन्तुमण्डलीरुचिरमरीचिचिकुरनिकुरम्बडम्बरितातिजात्यविचित्रपवित्रनिःसपत्नरत्नविसरविनिःसरत्किरणानिकुरम्बजालेन दिशि दिशि संसृत्यमाणेन्द्रचापकान्तकाञ्चनमयोद्दण्डदण्डरमणीया चारु**चामर**श्रीर्विस्तार्यते । तथा ५-अतिभास्वरसटापाटलबन्धुरस्कन्धबन्धविकटप्रकटदंष्ट्राकरालसजीवायमानसिंहरूपालङ्कृतमनेकप्रकाण्डरत्नखण्डविनिर्यद्वर्यकिरणावलिविलुप्यमानविलसत्तमस्काण्डडम्बरं सिंहासनं चारुतरं विरच्यते । तथा ६-शरत्कालविलसदखण्डमयूखमण्डलप्रचण्डचण्डमरीचिमण्डलमिव दुरालोकं तीर्थकरकायतः प्रकृतिभास्वरात्तदीयनिरुपमरूपाच्छादकमतुच्छं प्रभापटलं सम्पिण्ड्य जिनशिरसः पश्चाद्भागे मण्डलायमानं **भामण्डलमा**तन्यते । तथा ७-तारतरविस्फारभाङ्कारभरितभुवनोदरविवरा **भेरयो** महाढक्काः क्रियन्ते । तथा ८-भूर्भुवःस्वस्त्रयैकसाम्राज्यसंसूचकं शरदिन्दुकुन्दकुमुदावदातं प्रलम्बमानमुक्ताफलपटलावचूलमालामनोरमं **छत्र**त्रयमतिपवित्रमासूत्र्यते, इत्यष्टौ **प्रातिहार्याणि** जिनेश्वराणां **जयन्ती**ति ।।४४०।।

१. यथा सम्भवमूह्यम्, अतिशयान्तर्गतत्वेऽपि चामीषां पृथगुपादानं प्रातिहार्येऽपि व्यपदेशान्तरेणागमे रूढत्वादिति गाथार्थः A

चक्रे०: अधुना सार्द्धगाथयाऽष्टादशदोषानुक्त्वा तदुज्झितस्वामिनं गाथादलेन प्रणमन्ति –

देव० : अधुना सार्द्धगाथया दोषानभिधाय तदपगमेन भगवन्तं गाथादलेन नमस्कुरुते –

अन्नाणकोहमयमाणलोहमायारई य अरई य ।
निद्दासोयअलियवयणचोरियामच्छरभयाइं ।।९।।
पाणिवहपेमकीडापसंगहासा य जस्स इइ दोसा ।
अट्ठारस वि पणट्ठा नमामि देवाहिदेवं तं ।।१०।।

चक्रे० : १-**अज्ञानम**यथावस्थितबोधः, २-**क्रोधः** कोपः, ३-**मदो** जातिलाभकुलैश्वर्य-बलरूपतपःश्रुतैरष्टधा, ४-**मानो** दुरभिनिवेशारोहः, ५-**लोभो** गार्द्धयम्, इह प्राणाति-पाताद्याश्चत्वारो मुख्यतयैवोक्ताः परिग्रहस्तु नोक्तस्ततोऽसौ गृद्धिस्वभावत्वादत्रैवान्तर्भाव्यः, ६-**माया** शाठ्यम्, ७-**रति**रिष्टशब्दादिविषयप्राप्तौ मनःप्रह्लत्तिः, ८-तद्विपरीता त्वऽ**रतिः**, ९,१०,११,१२-**निद्राशोकाऽलीकवचनचौर्याणि** प्रतीतानि १३-**मत्सरः** परगुणाऽसहिष्णुता द्वेष इत्यर्थः, १४-**भयमि**हपरलोकाऽऽदानाकस्मादाऽऽजीवमरणाश्लोकभयरूपं सप्तविधम्, १५-**प्राणिवधः** प्राणिनां मनोवाक्कायैरतिपातनम्, १६-**प्रेम** स्नेहो राग इत्यर्थः, १७-**क्रीडा-प्रसङ्गो**ऽब्रह्मासेवनम्, १८-**हासो** विस्मयादिषु वक्त्रविकासात्मकः, चः समुच्चये शेषं स्पष्टम् ।।१०।।

देव० : १-यथास्थितवस्तुग्राहि ज्ञानम्, ततोऽन्यद**ज्ञानं** संशयविपर्ययादिकम्, तत्र किमयं स्थाणुः पुरुषो वेति संशयः, शुक्तिशकले रजतबुद्धिर्विपर्ययः, २-**क्रोधः** प्रतीतः, ३-**मदः** कुलबलैश्वर्याद्युपाधिरहङ्कारः, ४-**मानो** दुरभिनिवेशारोहः, ५-**लोभो** गार्द्धयम्, परिग्रहश्च गृद्धिस्वभावत्वादत्रैवान्तर्भवति, ६-**माया** शाठ्यम्, ७-**रति**रिष्टशब्दादिविषयप्राप्तौ मनःप्रह्लत्तिः, ८-तद्विपरीता **त्वरतिः**, ९-**निद्रा** स्वापः, १०-**शोक** इष्टवस्तुविरहसमुद्भवश्चित्तसन्तापः, ११-**अलीकवचनं** भूतनिह्नवासद्भूतोद्भावनविपरीतभाषणनिन्दाभेदाच्चतुर्द्धा, तत्र भूतनिह्नवो नास्त्यात्मेत्यादि, असद्भूतोद्भावनं सर्वव्यापी श्यामाकतण्डुलमात्रो वेति, विपरीतभाषणं गामश्वं वदतः, निन्दावचनं चौरस्त्वमित्यादि, १२-**चौर्यं** परस्वापहारः, १३-**मत्सरः** परगुणासहिष्णुता द्वेष इति यावत्, १४-**भयं** सप्तविधम्, तद्यथा-इहलोकभयं यन्मनुष्यो मनुष्याद् बिभेति १, परलोकभयं यन्मनुष्यः सिंहादेः २, आदानभयमादीयते स्वीक्रियत इत्यादानं द्रव्यम्, ततो मा ममैतच्चौरदाया-ददयोऽपहरेयुरित्येवंरूपम् ३, अकस्माद्भयं बाह्यनिमित्तमन्तरेण यदन्धकारादावुत्पद्यते ४

आजीविकाभयमाजीविका वृत्तिस्ततो भयम्, कथमहं दुर्भिक्षादौ वर्तिष्य इति ५, मरणभयं प्रतीतम् ६, अश्लोकभयं यद्यहमिदमकार्यमाचरिष्यामि तदा ममाप्रसिद्धिर्भविष्यतीत्येवंरूपम् ७, तथा १५-**प्राणिवधः** प्राणिनो जीवास्तेषां मनोवाक्कायैरतिपातनम्, १६-**प्रेम** स्नेहो राग इति यावत्, १७-**क्रीडाप्रसङ्गो** मैथुनम्, १८-**हासो** विस्मयादिषु वक्त्रविकासात्मकः, चः समुच्चये ।

इह च यद्यपि मत्सरः क्रोधमानात्मकः, प्रेम च मायालोभरूपं, तथापि तयोः पृथगुपादानं कथञ्चित्सामान्यस्य विशेषेभ्योऽन्यत्वख्यापनार्थम् । तथेहाज्ञानेन[१] ज्ञानावरणदर्शनमोहनीययोरपगमः सूचितः । निद्रया तु दर्शनावरणस्य, क्रोधादिभिः कषायमोहस्य, रत्यादिभिर्नोकषायमोहस्य, प्राणिवधालीकचौर्यक्रीडाप्रसङ्गलोभैश्चारित्रमोहस्य, अमीषां चापगमेऽन्तरायस्याप्यवश्यमपगमोऽवगन्तव्यः, तस्य ज्ञानदर्शनावरणाभ्यामेकसमयेन सह क्षपणीयत्वात्, तदियता घातिकर्मणामभाव इति तात्पर्यम् । तथा चान्यैरपीत्थमेवोच्यते यथा –

अन्तरायदानलाभवीर्यभोगोपभोगगाः ।
हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ।।
कामो मिथ्यात्वमज्ञानं निद्रा चाविरतिस्तथा ।
रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी ।। [अभि.चिन्ता० ७२, ७३] इति ।

इत्युल्लेखेन यस्याष्टादशापि दोषाः प्रणष्टाः प्रलयं गताः, **नमामि** नमस्करोमि **देवाधिदेवं तम्,** दीव्यन्ति वचनगोचरातिक्रान्तवैभवातिशयेन क्रीडन्तीति देवा भवनपत्यादयस्तेष्वाधिक्येन परमानन्दवीर्यज्ञानावाप्त्या दीव्यति द्योतते शोभत इति देवाधिदेवस्तमिति । इह च गुणोत्कर्षं दोषाभावं च प्रतिपादयन् ये प्राकृतपुरुषनिर्विशेषाः प्रबलाज्ञानतिमिरान्तरिततत्त्वदृष्टयः कोपप्रसादविडम्बितजगज्जना अनिरुद्धाश्रवद्वारा इष्टानिष्टविषयप्राप्तिनिबन्धनहर्षविषादाकुलितचेतसश्चक्रचापशूलगदादिशस्त्रविहस्तहस्तनिष्कारणजगज्जन्मस्थेमविगमविहितबालकेलयः शश्वदङ्गनाङ्गपरिष्वङ्गरङ्गभाजो हास्यलास्यगीतादिव्यसनावेदितनीचवृत्तयः पशुपक्षिमेषादिवाहनाध्यासीनवपुषः सन्मार्गस्खलनोपजातजगद्विश्रुताऽवाच्यताविशेषास्ते देवा न भवन्तीत्यावेदयतीति गाथाद्वयार्थः ।।९, १०।।

१. तथेहाज्ञाननिद्राभ्यां ज्ञानावरणदर्शनावरणदर्शनमोहनीयानामपगमः सूचितः T,B,C

** प्रवचनसारोद्धारे-४५१, ४५२ संबोधसित्तर्याम्-४, ५ **

एकचत्वारिंशत्तमं द्वारमाह –

अन्नाणकोहमयमाणलोहमायारई य अरई य ।
निद्दासोयअलियवयणचोरियामच्छरभया य ।।
पाणिवहपेमकीलापसंगहासा य जस्स इय दोसा ।
अट्ठारस्सवि पणट्ठा नमामि देवाहिदेवं तं ।।

'अन्नाणे'त्यादिगाथाद्वयम्, **अज्ञानं** संशयानध्यवसायविपर्ययात्मकं मौढ्यं, **क्रोधः** कोपः, **मदः** कुलबलैश्वर्यरूपविद्यादिभिरहङ्कारकरणं परप्रधर्षणानिबन्धनं वा, **मानो** दुरभिनिवेशामोचनं युक्तोक्ताग्रहणं वा, **लोभो** गृद्धिः, **माया** दम्भः, **रति**रभीष्टपदार्थानामुपरि मनःप्रीतिः, **अरति**रनिष्टसम्प्रयोगसम्भवं मनोदुःखम्, **निद्रा** स्वापः, **शोक**श्चित्तवैधुर्यम्, **अलीकवचनं** वितथभाषणम्, **'चोरिका'** परद्रव्यापहारः, **मत्सरः** परसम्पदसहिष्णुता, **भयं** प्रतिभयः, **प्राणिवधः** प्राण्युपमर्दः, **प्रेम** स्नेहविशेषः, **क्रीडाप्रसङ्गः** क्रीडायामासक्तिः, **हासो** हास्यम्, **इति यस्य दोषा अष्टादशापि प्रणष्टा देवाधिदेवं तमिति** ।। ४५१, ४५२।।

** संबोधसप्ततिकायाम्-४, ५ **

७-**रतिः** पदार्थानामुपरि प्रीतिः, च पुन**ररतिर**प्रीतिः ।
१६-**क्रीडा** स्त्रीविलासो द्यूतादिश्च, १७-**प्रसङ्गः** स्त्र्यादीनां संयोगः ।।

चक्रे० : ईदृक्स्वरूपो देवस्तद्विपरीतस्त्वदेव इति निश्चितमतेरङ्गिनो देवाधिदेवनामान्याहुः –

देव० : एवमवधारितस्वरूपो देवः पुनः किमभिधान इति जिज्ञासायां तन्नामधेयान्याह –

तस्स पुणो नामाइं तिन्नि जहत्थाइं समयभणियाइं ।
अरिहंतो अरहंतो अरुहंतो भावणीयाइं ।।११।।

चक्रे० : स्पष्टा ।।११।।

देव० : तस्य पुनर्वर्णितस्वरूपस्य भगवतो **यथार्थानि,** न पुनर्मण्डपादिवन्निरन्वयानि, **समयभणितानि** सूत्रोक्तानि **त्रीणि नामानि भावनीयानि** । केनोल्लेखेन ? **अरिहंता अर्हन् अरुहन्नि**[१]ति, इति शब्दस्याध्याहारः, इति गाथार्थः ।।११।।

---

१. अरोहन्निति T,C

चक्रे० : नाम्ना यथार्थत्वमेवाहुः –

देव० : यथार्थत्वमेव व्याचष्टे –

अट्ठविहं पि य कम्मं अरिभूयं होइ सव्वजीवाणं ।
तं कम्ममरिं हंता अरिहंता तेण वुच्चंति ।।१२।।

चक्रे० : एषाऽपि स्पष्टैव ।।१२।।

देव० : **अष्टविधमपि** ज्ञानावरणादिभेदतोऽष्टप्रकारमपि, अपिशब्दादुत्तरप्रकृत्यपेक्षयाऽनेकप्रकारमपि, **च**शब्दोऽवधारणे भिन्नक्रमस्ततश्चाष्टविधं **कर्मैवारिभूतं** शत्रुभूतं **भवति, सर्वजीवानां** सर्वानर्थहेतुत्वादिति भावः । **तत्कर्म अरिं हन्तारो,** यतो घ्नन्तीत्येवं साधवो हन्तारस्तु निकृते पश्चाद् द्वितीयासमासोऽ**रिहंतारस्तेनोच्यन्त** इति ।।१२।।

**** आवश्यकनिर्युक्तौ-९२० ****

साम्प्रतं प्रकारान्तरतोऽरय आख्यायन्ते, ते चाष्टौ ज्ञानावरणादिसंज्ञाः सर्वसत्त्वानामेवेति, आह च –

अट्ठविहं पि य कम्मं अरिभूयं होइ सव्वजीवाणं ।
तं कम्ममरिं हंता अरिहंता तेण वुच्चंति ।।

अष्टविधमप्यष्टप्रकारमपि, अपिशब्दादुत्तरप्रकृत्यपेक्षयाऽनेकप्रकारमपि, चशब्दो भिन्नक्रमः, स चावधारणे, ज्ञानावरणादि, ततश्चाष्टविधं कर्मैवाऽ**रिभूतं** शत्रुभूतं भवति **सर्वजीवानां** सर्वसत्त्वानामनवबोधादिदुःखहेतुत्वादिति भावः, पश्चार्द्धं पूर्ववत्, एवंविधा अरिहन्तार इति गाथार्थः ।।९२०।।

चक्रे० : तथा –

देव० : तथा –

अरहंति[१] वंदणनमंसणाइं अरहंति पूयसक्कारं ।
सिद्धिगमणं च अरहा अरहंता[२] तेण वुच्चंति ।।१३।।

चक्रे० : **अर्हन्ति वन्दननमस्करणे** तत्र वन्दनं स्तवनम्, नमस्करणं प्रणामस्तथाऽ**र्हन्ति पूजासत्कारम्,** तत्र पूजा वस्त्रमाल्यादिजन्या सत्कारोऽभ्युत्थानादिसम्भ्रमः । **सिद्धिगमनं**

१. अरिहंति T,C २. अरिहंता T,C,K

चाऽर्हारित्यत्र प्रतीत्यध्याहारात् सिद्धिगमनं प्रति योग्यास्तेनार्हन्त **उच्यन्ते** । असकृत् क्रियोपादानं चातिशयख्यापनार्थम् ।।१३।।

देव० : अर्हन्ति वन्दननमस्करणे, तत्र वन्दनं शिरसा, नमस्करणं वाचा, तथाऽ**र्हन्ति पूजासत्कारमत्र** द्वन्द्वैकवद्भावः । तत्र पूजा वस्त्रमाल्यादिजन्या, सत्कारोऽभ्युत्थानादिसम्भ्रमः, सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां प्राणिन इति **सिद्धि**र्लोकान्तक्षेत्रलक्षणा । तथा च **भगवद्भद्रबाहुस्वामिपादाः**–'इह बोंदिं चइत्ता णं तत्थ गंतूण सिज्झइ ।' तद्गमनं च प्रतीति शेषः, अर्हा योग्याः, प्राकृतशैल्या अर्हन्ती**त्यर्हाः**, यद्वाऽर्हन्ती**त्यर्हन्तस्तेनोच्यन्त** असकृत्क्रियोपादानं चातिशयख्यापनार्थम् । दृश्यते चायं न्यायो यथा –

जयइ सुयाणं पभवो तित्थयराणं अपच्छिमो जयइ ।❖
जयइ गुरू लोगाणं जयइ महप्पा महावीरो ।। [नन्दीसूत्र-२] इति।।१३।।

**** आवश्यकनिर्युक्तौ-९२१ ****

अथवा –

अरिहंति वंदणनमंसणाइं अरिहंति पूअसक्कारं ।
सिद्धिगमणं च अरिहा अरहंता तेण वुच्चंति ।।

'अर्ह पूजायाम्' अर्हन्तीति 'पचाद्यच्' कर्तर्यर्हाः, **किमर्हन्ति ?-वन्दननमस्करणे,** तत्र वन्दनं शिरसा नमस्करणं वाचा, तथाऽ**र्हन्ति पूजासत्कारम्,** तत्र वस्त्रमाल्यादिजन्या पूजा, अभ्युत्थानादिसम्भ्रमः सत्कारः, तथा **सिद्धिगमनं** चार्हन्ति सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां प्राणिन इति सिद्धिर्लोकान्तक्षेत्रलक्षणा, वक्ष्यति च-'इह बोंदिं चइत्ता णं तत्थ गंतूण सिज्झइ' तद्गमनं च **प्रत्यर्हा** इति, **'अरहंता तेण वुच्चंति'** प्राकृतशैल्या अर्हास्तेनोच्यन्ते, अथवाऽर्हन्तीत्यर्हन्त इति गाथार्थः ।।९२१।।

चक्रे० : तथा –

देव० : तथा –

अच्चंतं [१]दड्ढंमि बीयंमि न अंकुरो जहा होइ ।
दड्ढंमि कम्मबीए न रुहइ भवअंकुरो वि तहा ।।१४।।

चक्रे० : पाठसिद्धैव, केवलं दग्धकर्मबीजत्वात् पुनर्भवे **न रोहन्ती**त्यरोहन्त इति तात्पर्यम् ।।१४।।

१. दड्ढमी T,C,P,K ❖ तत्र प्रथमा गाथात्वियम् - जयइ जगजीवजोणीवियाणओ जगगुरू जगाणंदो ।
जगणाहो जगबंधू जयइ जगप्पियामहो भयवं ।।

देव० : अत्यन्तं सर्वात्मना **दग्धे बीजे नाङ्कुरो यथा भवति,** शुक्लध्यानानलेन **तथा दग्धे कर्मबीजे न रोहति[१] भवाङ्कुरः** । अयमभिप्रायः – दग्धकर्मबीजत्वान्न रोहन्तीत्यरोहन्त इति गाथात्रयार्थः ।।१४।।

** श्रावकप्रज्ञप्तौ-३९६ **

दड्ढंमि जहा बीए न होइ पुण अंकुरस्स उप्पत्ती ।
तह चेव कम्मबीए भवंकुरस्सावि पडिकुट्ठा ।।

दग्धे यथा बीजे शाल्यादौ **न भवति पुनरङ्कुरस्योत्पत्तिः** शाल्यादिरूपस्य **तथैव कर्मबीजे** दग्धे सति **भवाङ्कुरस्याप्युत्पत्तिः प्रतिकुष्टा** निमित्ताभावादिति ।।३९६।।

चक्रे० : सम्प्रत्यस्यैव भगवतः सर्वथाऽऽराध्यत्वोपदेशमाहुः –

देव० : सम्प्रत्यस्यैव भगवतः सर्वथाऽऽराध्यत्वोपदेशमाह –

तं नमह तं पसंसह तं झायह तस्स सरणमल्लियह ।
मा किणह कणयमुल्लेण पित्तलं इत्तियं भणिमो ।।१५।।

चक्रे० : तमरिहन्तारमर्हन्तमरोहन्तं वा **नमत** शिरसा, **तं प्रशंसत** स्तुत वचसा, **तं ध्यायत** पिण्डस्थपदस्थरूपातीततया मनसा । **तस्ये**ति द्वितीयास्थाने षष्ठी, ततश्च रागादिभीरवस्तं **शरणं** त्रातार**मालीयध्वमा**श्रयत । मुहुस्तच्छब्दोपादानं तत्रैव देवबुद्धिः कार्येत्यादरख्यापनार्थम् । किमित्येवमित्याहुः – **मा क्रीणीत कनकमूल्येन पित्तलामेतावद्भणामः।** अयमभिप्रायः – वस्तूनां नामवर्णादिसाम्येऽपि महदन्तरमिति न तत्र भ्रान्तितः कनकमूल्यतुल्यं नमनप्रशंसन-ध्यानादिभिः पित्तलातुल्यसरागदेवानाराधयतेत्युपदेशसर्वस्वम् । तथा च –

अक्कसुरहीण छीरं कक्कररयणाइं पत्थरा दो वि ।
एरंडकप्परुक्खतरुणो पुण अंतरं गरुयं ।। [ ]
पंथसरिसा कुपंथा सुवन्नसरिसाणि पित्तलाईणि ।
धम्मसरिसो अहम्मो कायव्वो नित्थ मइमोहो ।। [ ] इति गाथार्थः ।।१५।।

देव० : तं देवं[२] **नमत** शिरसा, **तं प्रशंसत** स्तुत वचसा, **तं ध्यायत** पिण्डस्थपदस्थ-रूपातीतरूपतया मनसा, **तस्ये**ति सुपां सुपो भवन्तीति न्यायात् षष्ठ्याः स्थाने द्वितीया, ततश्च

१. भवति T,B,C २. अरिहन्तारमर्हन्तमरोहन्तं वा नमत T,B,C

तं श्रृणोत्याश्रितजनस्य विघ्नव्रातमिति **शरणं** त्रातारम्, भावसाधनो वा शरणशब्दस्तदा तु तस्येति कर्तरि षष्ठ्येव, **आलीयध्वमा**श्रयध्वं दुष्कृतगर्हा सुकृतानुमोदनापूर्वकं प्रपद्यध्वम्, तस्यैव कर्मशत्रुसन्त्रस्तजगत्परित्राणैकव्यापृतत्वाद्, असकृत्तच्छब्दोपादानं तत्रैव देवत्वबुद्धिर्विधेयेत्याद-रख्यापनार्थम् । किमित्येवमित्याह-**मा क्रीणीत** मा विनिमयध्वं मा गृह्णीतेति यावत्, **कनकमूल्येन** स्वर्णपण्येन **पित्तलां** प्रतीता**मेतावद्भणामः** । अयमभिप्रायः-वस्तूनां नामवर्णादिसाम्येऽपि महदन्तरमिति न तत्र भ्रान्तितः कनकमूल्यतुल्यनमनप्रशंसनध्यानादिभिः पित्तलातुल्यसरागदेवानाराधयतेत्युपदेशसर्वस्वम् । तथा च –

अक्कसुरहीण छीरं कक्कररयणाइं पत्थरा दो वि ।
एरंडकप्परुक्खतरुणो पुण अंतरं गरुयं ।। [ ]
पंथसरिसा कुपंथा बहुं च कणयसरिसं न य सुवन्नं ।
धम्मसरिसो अहम्मो कायव्वो नित्थ मइमोहो ।। [नानाचित्तप्र० १२]

इति गाथार्थः ।।१५।।

चक्रे० : तं नमतेत्याद्युक्तं तच्च नमनादिकं भगवतः परमपदस्थस्य प्रतिमायामेव सा चायतने स्थाप्येति तद्विधापनोपदेशमाहुः –

देव० : अन्यदपि तं प्रति भक्तिकृत्यमाह –

मेरुव्व समुत्तुंगं हिमगिरिधवलं लसंतधवलधयं ।
भवणं कारेयव्वं विहिणा सिरिवीयरायस्स ।।१६।।

चक्रे० : सुगमा ।।१६।।

देव० : सुगमा, नवरमिदमुत्कर्षाभिधानं समृद्ध्यपेक्षं धनरहितस्य तु यादृशं तादृशमपि भक्त्या कुर्वतः पुण्यमेव । यदुक्तम् –

यस्तृणमयीमपि कुटीं कुर्याद्दद्यात्तथैकपुष्पमपि ।
भक्त्या परमगुरुभ्यः पुण्योन्मानं कुतस्तस्य ।। [उपदेशतरङ्गिणी-२८]

हिमगिरिधवलमिति शेषवर्णोपलक्षणं च, ईक्ष्यते च 'सव्वरयणमएहिं' इत्यादि । **धवलध्वज**प्रतिपादनं तु वर्णान्तरयुक्तपताकानिरासार्थमिति ।।१६।।

चक्रे० : विधिनेत्युक्तमथ तमेवाहुः –

देव० : विधिनेत्युक्तमथ विधिमेवाह –

जिणभवणकारणविही सुद्धा भूमीदलं च कट्ठाई ।
भियगाणऽतिसंधाणं[१] सासयवुड्ढी य जयणा य ।।१७।।

चक्रे० : जिनभवनकारणविधिः शुद्धा निशल्या पराऽप्रीतिकरहिता च **भूमिर्दलं च काष्टे**ष्टिकोपलादि शुद्धं स्वभावनिष्पन्नमुचितक्रयेण तत्कारिभ्यो गृह्यत इति शेषः । तथा **भृतकानां** सूत्रधारादीनाम**नतिसन्धानम**वञ्चनं यथोक्तवेतनाधिकतरदानं तथा **स्वाशयस्य** शुभाध्यवसायस्य स्वकीयाध्यवसायस्य वा **वृद्धिः** । यथा –

पिच्छिस्सं इत्थ अहं वंदणगनिमित्तमागए साहू ।
कयपुन्ने भगवंते गुणरयणनिही महासत्ते ।। तथा
पडिबुज्झिसंति इहं दट्ठूण जिणिंदबिंबमकलंकं ।
अन्ने वि भव्वसत्ता काहिंति तओ परं धम्मं ।।
ता एयं मे वित्तं जमित्थमुवओगमेइ अणवरयं ।
इय चिंताऽपरिवडिया सासयवुड्ढी य मोक्खफला ।।

[पञ्च० ११२६, ११२७, ११२८]

तथा **यतना** जलगालनादिरूपा **च**शब्दाः समुच्चयार्था इति गाथार्थः ।।१७।।

देव० : जिनभवनकारणविधिरयं भवतीति शेषः, तथाहि– **शुद्धा** निर्दोषा **भूमि**र्वसुधा, सा च द्रव्यतो भावतश्च, तत्र द्रव्यतः शिष्टजनोचितप्रदेशस्थाऽशिवकाङ्गारास्थ्यादिशल्यरहिता च । भावतस्तु सकारणपराप्रीतिकरणरहिता, अप्रदेशे दोषा हि दुष्टजनोपघातात्प्रतिदिनं वृद्धेरसम्भवः, साधूनां च चैत्यवन्दनार्थमनागमनम्, आगमने तु वेश्याषिङ्गादीनां चेष्टादर्शनवचनश्रवणादिभिश्चित्तविप्लुतेर्धर्मभ्रंशः शासननिन्दा च भवति, यथैवंविधा एवैते यन्मद्यापणवेश्यापाटकद्यूतखेलकमत्स्यबन्धपाटकादिषु जिनायतनानि विधापयन्ति, कलहश्च तैः सह सम्पद्यते, ततश्चात्मनस्तेषां च दारुणः कर्मबन्ध इति । शिवकादियुक्तायां पुनरनिवृत्त्यर्थहान्यनर्था-

१. भियगाणइसंधाणं A,T,C

पत्तिकार्यासिद्ध्यनुदयादयो बहवो दोषाः पराप्रीतिकयुक्ता वाऽधर्महेतुत्वेन धर्मार्थिना दूरतस्त्याज्याः, यदाह –

धम्मत्थमुज्जएणं सव्वस्सापत्तियं न कायव्वं ।
इय संजमोऽवि सेओ इत्थ य भयवं उदाहरणं ।। [पञ्चा॰ ७-१४]

तथा **दलं चो**पादानकारणम्, किम्भूतम् ? **काष्ठादि** दारुपाषाणेष्टिकाप्रभृति शुद्धमिति प्रक्रमः। तच्च यद्देवतोपवनतद्भवनादेर्नानीतम्, तदानयने हि जिनभवनस्यानेतुर्वा सा प्रद्विष्यते । तथा स्वयं चेष्टकापचनवृक्षच्छेदादिभिर्यन्न कारितम्, द्विपदचतुष्पदोपघातलक्षणाविधिना च यन्नानीतम्, तथाहि –

दलमिष्टिकादि तदपि च शुद्धं तत्कारिवर्गतः क्रीतम् ।
उचितक्रयेण यत्स्यादानीतं चैव विधिना तु ।। [षोडशकप्र॰ ८७]

तथा **भृतकानां** सूत्रकारप्रभृतीनां तद्वेतनापेक्ष**मनतिसन्धानम**वञ्चनमपिच समर्गलतरमकालहीनं च तत्तेषां दातव्यम् । एवं हि हृष्टा सन्तः सविशेषं कर्मसूद्यमं कुर्वन्ति, जिनधर्मबहुमानाच्च बोधिबीजादि प्राप्नुवन्ति, तथा **स्वाशयस्य** शोभनाध्यवसायस्य स्वकीयाध्यवसायस्य वा **वृद्धि**र्वर्धनं स्वाशयवृद्धिः सा च यथा –

पिच्छिस्सं इत्थ अहं वंदणगनिमित्तमागए साहू ।
कयपुन्ने भगवंते गुणरयणनिही महासत्ते ।। तथा –
पडिबुज्झिस्संति इहं दट्ठूण जिणिंदबिंबमकलंकं ।
अन्ने वि भव्वसत्ता काहिंति तओ परं धम्मं ।।
ता एयं मे वित्तं जमित्थमुवओगमेइ अणवरयं ।
इय चिंताऽपरिवडिया सासयवुड्ढी य मोक्खफला।। [पञ्चा॰ ७-२६, २७, २८]

तथा **यतना च** गुरुदोषत्यागेनेतरदोषाश्रयणम्, सा च शुद्धदलग्रहणजलगालनादिरूपा, तस्या एव सर्वक्रियासु प्राधान्यात्, यदाह –

जयणा य पयत्तेणं कायव्वा पसत्थसव्वजोगेसु ।
जयणा उ धम्मसारा जं भणियं वीयरायेहिं ।।

जयणा उ धम्मजणणी जयणा धम्मस्स पालणी चेव ।
तव्वुड्ढीकरी जयणा एगंतसुहावहा जयणा ।। [पञ्चा० ७-२९, ३०]

इति चशब्दाः समुच्चयार्थाः, इह भूम्यादीनि जिनभवनविधेरङ्गानीत्यङ्गाङ्गिनोरभेदोपचाराज्जिनभवनविधिः शुद्धा भूमिरित्यादि सामानाधिकरण्येनोक्तमिति गाथार्थः ।।१७।।

* पञ्चवस्तौ-१११२ *

तत्र -

जिणभवणकारणविही सुद्धा भूमी दलं च कट्ठाई ।
भिअगाणऽतिसंधाणं सासयवुड्ढी समासेणं ।।

जिनभवनकारणविधिरयं द्रष्टव्यः, यदुत - **शुद्धा भूमि**र्वक्ष्यमाणया शुद्ध्या, तथा **दलं च काष्ठादि** शुद्धमेव, तथा **भृतकानतिसन्धानं** कर्म्मकराव्यंसनम्, तथा **स्वाशयवृद्धिः** शुभभाववर्द्धनं **समासे**नैष विधिरिति द्वारगाथासमासार्थः ।।१११२।।

* पञ्चाशके-७/९ *

एवं जिनभवनकारणाधिकारी सप्रसङ्गोऽभिहितोऽथाधिकृतमेव जिनभवनविधिमुपदर्शयन्नाह -

जिणभवणकारणविही सुद्धा भूमी दलं च कट्ठाई ।
भियगाणइसंधाणं सासयवुड्ढी य जयणा य ।।

जिनभवनकारणविधिरुक्तशब्दार्थः । किंविध इत्याह-**शुद्धा** निर्दोषा, काऽसौ ? **भूमिः** क्षेत्रम्। तथा **दलं चो**पादानकारणम् । किंभूतम् ? **काष्ठादि** दारुपाषाणप्रभृति शुद्धमिति प्रक्रमः । तथा भृतकानां कर्मकराणामनतिसन्धानमवञ्चनं **भृतकानतिसन्धानम्** । तथा स्वाशयस्य शोभनाध्यवसायस्य, स्वकीयाध्यवसायस्य वा, वृद्धिर्वर्धनं **स्वाशयवृद्धिः** । सा **च** । तथा **यतना च** यथाशक्ति गुरुदोषत्यागेतरदोषाश्रयणम् । सा च । चशब्दाः समुच्चयार्थाः । इह भूम्यादीनि जिनभवनविधेरङ्गानीत्यङ्गाङ्गिनोरभेदोपचाराज्जिनभवनविधिर्भूम्यादीनीति समानाधिकरणेनोक्तमिति द्वारगाथासमासार्थः ।।९।।

चक्रे० : अथ तत्केन कारयितव्यमित्याहुः –

देव० : उक्तो जिनभवनकारणविधिः, तथैतत्केन कारयितव्यमित्याह –

अहिगारिणा इमं खलु कारेयव्वं विवज्जए दोसो ।
आणाभंगाउ च्चिय धम्मो आणाए पडिबद्धो ।।१८।।

चक्रे० : इह **खलु**रेवकारार्थस्ततश्चाधिकारिणैव वक्ष्यमाणस्वरूपेणेदं जिनवेश्म **कारयितव्यम्, विपर्यये**ऽनधिकारिणि कारयितरि **दोषः** । कस्माद् ? **आज्ञाभङ्गादेव**, आज्ञा-जिनागमस्तद्भङ्गोऽन्यथाकरणं तस्माद् । अथ कथमाज्ञाभङ्गस्य दोषहेतुत्वमित्याहुर्**धर्म आज्ञायाः प्रतिबद्धः** स्वाधीनः ।।१८।।

देव० : अधिकारिणैव वक्ष्यमाणस्वरूपेणेदं जिनवेश्म, **खलु**रेवकारार्थो योजित एव, **कारयितव्यम्, विपर्यये**ऽनधिकारिणि कारयितरि, दूष्यते-अशुभकर्मोपादानेन विकृतिं नीयतेऽनेनात्मेति **दोषो** दूषणम्, कस्मादित्याह– **आज्ञाभङ्गादेव,** आङिति स्वस्वभावाव-स्थानात्मिकया मर्यादयाऽभिव्याप्त्या वा ज्ञायन्तेऽर्था अनयेत्याज्ञा भगवदभिहितागमस्तस्या भङ्ग इव भङ्गोऽन्यथाकरणात्तस्मात् । अथ कथमाज्ञाभङ्गस्य दोषहेतुत्वमित्याह– **धर्म आज्ञया, प्रतिबद्धो** व्याप्तस्तदविनाभावित्वात्, ततश्च यद्यदविनाभूतं न तत्तद्विना भवति, यथाग्निना विना धूमस्तथा, आज्ञाऽविनाभूतश्च धर्म इति गाथार्थः।।१८।।

**** पञ्चाशके-७/२ ****

जिनभवनकारणविधानं वक्ष्य इत्युक्तम्, जिनभवनं च येन कारयितव्यं तमादौ तावन्निरूपयन्नाह –

अहिगारिणा इमं खलु कारेयव्वं विवज्जए दोसो ।
आणाभंगाउ च्चिय धम्मो आणाए पडिबद्धो ।।

अधिकारिणा तत्कारणयोग्यतावतैव **इदं** जिनभवनम्, **खलु**रवधारणे तस्य च प्रयोगः प्रागुपदर्शित एव, **कारयितव्यं** विधापयितव्यम् । अथ किमिति अधिकारिणैवेत्युच्यते ? इत्याह—**विपर्यये** विपरीतत्वेऽनधिकारिकारिण इत्यर्थः । **दोषो** दूषणमशुभकर्मबन्धलक्षणम् । ननु संसारसरित्तरणतरकाण्ड-कल्पद्रव्यस्तवविधावपि कथं दोष इत्याह— **आज्ञाभङ्गादेवा**ऽऽप्तवचनोल्लङ्घनादेव, आज्ञा चैवं द्रव्यस्तवं प्रति व्यवस्थिता –

अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे दव्वथए कूवदिट्ठंतो ।।

अथाज्ञाभङ्गेऽपि कथं दोष इत्याह – **धर्मो** द्रव्यस्तवादिरूपः, **आज्ञायामा**प्तवचने **प्रतिबद्धो** नियतो वर्तते यतोऽतस्तद्भङ्गे दोष एव धर्माभावलक्षण इति गाथार्थः।।२।।

चक्रे० : एतदेव सविशेषमाहुः –

देव० : एतदेव सविशेषमाह –

तित्थगराणा मूलं नियमा धम्मस्स तीए वाघाए ।
किं धम्मो किमहम्मो मूढा नेयं वियारंति[१] ।।१९।।

चक्रे० : स्पष्टा ।।१९।।

देव० : तीर्थकरः शास्ता **तस्याज्ञा** वर्णितस्वरूपा **मूलं** मूलकारणं **नियमान्निश्चयतो धर्मस्य** यतिश्रावकभेदभिन्नस्य, **तस्या** आज्ञाया **व्याघाते** व्यतिक्रमे **किं धर्मः किमधर्म** इति काकुप्रयोगादधर्म एव भवतीत्याकूतम् । **मूढाः** प्रबलमोहोपहतविवेकदृष्टयो **नेदं विचारयन्ति** विवेचयन्तीति गाथार्थः ।।१९।।

** उपदेशपदे-६८० **

तित्थगराणा मूलं णियमा धम्मस्स तीए वाघाए ।
किं धम्मो किमधम्मो णेवं मूढा वियारंति ।।

तीर्थकराज्ञा भगवदर्हदुपदेशो **मूलं** कारणं **नियमाद**वश्यंभावेन **धर्मस्य** यतिगृहस्थसमाचारभेदभिन्नस्य । अतीन्द्रियो ह्यसौ । न चान्यस्यासर्वदर्शिनः प्रमातुरुपदेश एतत्प्रवृत्तौ मतिमतां हेतुभावं प्रतिपत्तुं क्षमते, एकान्तेनैव तस्य तत्रानधिकारित्वात्, जात्यन्धस्येव भित्त्यादिषु नरकरितुरगादिरूपालेखन इति । **तस्या**स्तीर्थकराज्ञाया **व्याघाते** विलोपे किमनुष्ठानं **धर्म्मः**, अथवा **किमधर्म्मो** वर्त्तते ? अन्यत्राप्युक्तम्–

आणाए च्चिय चरणं तब्भंगे जाण किं न भग्गंति । आणं च अइक्कंतो कस्साएसा कुणइ सेसं ? ।।

इति नियामकाभावान्न विवेचयितुं शक्यते यदुतैतदनुष्ठानं धर्मः, इदं चाधर्म इति । **न नैवैवम**नेन प्रकारेण **मूढा** हिताहितविमर्शविकला **विचारयन्ति** मीमांसन्ते ।।६८०।।

चक्रे० : बुद्धिमद्भिर्यद् ज्ञेयं तदाहुः –

देव० : पर्यवसितमेवार्थमाह –

आराहणाए[२] तीए पुन्नं पावं विराहणाए उ ।
एयं धम्मरहस्सं विन्नेयं बुद्धिमंतेहिं ।।२०।।

चक्रे० : एषाऽपि स्पष्टैव।।२०।।

१. वियारिंति T,C वियारेंति A, २. आराहणाइ A,T,C

देव० : आराधनया श्रद्धानानुष्ठानरूपसेवया **तस्या** आज्ञायाः किम् ? **पुण्यम्, विराधनयाऽऽ-**राधनाविपरीतया पुनः **पापं** दुष्कृतं जायत इति शेषः । आज्ञाया एव धर्मनिमित्ततां प्रति पुरस्करणायाह- **एतद**नन्तरोक्तमाज्ञाराधनाविराधनारूपं विधिनिषेधद्वारेण **धर्मरहस्यं** कुशलकर्मगुह्यं **विज्ञेयं** ज्ञातव्यं **बुद्धिमद्भि**र्यतः-पारलौकिकेषु विधिष्वाज्ञात एव प्रवृत्तिनिवृत्ती भवतः, प्रत्यक्षादीनां तत्राप्रवृत्तेः, अनाप्तवचनस्य च व्यभिचारित्वादिति गाथार्थः।।२०।।

**** पञ्चाशके-७/३ ****

आज्ञाप्रतिबद्धत्वमेव धर्मस्य दर्शयन्नाह -

आराहणाइ तीए पुण्णं पावं विराहणाए उ ।
एयं धम्मरहस्सं विण्णेयं बुद्धिमंतेहिं ।।

आराधनया पालनया । पञ्चमीसप्तम्योर्वैकवचनं व्याख्येयम्, **तस्या** आज्ञायाः **पुण्यं** शुभकर्म भवति । पुण्यं च धर्म एव, तद्धेतुकत्वात्पुण्यस्य । **पापम**शुभं कर्म भवति **विराधनया तु** बाधया पुनः । आज्ञाया एव धर्मनिमित्ततां प्रति पुरस्करणायाह-**एतद**नन्तरोक्तमाराधनाविराधनारूपं विधिनिषेधद्वारेण **धर्मरहस्यं** कुशलकर्मगुह्यं **विज्ञेयं** ज्ञातव्यं **बुद्धिमद्भिः** पण्डितैः, यतः पारलौकिकेषु विधिष्वाज्ञात एव प्रवृत्तिनिवृत्ती भवतः, प्रत्यक्षादीनां तत्राप्रवृत्तेः, अनाप्तवचनस्य च व्यभिचारित्वादिति, आह च- यस्मात्प्रवर्तकं भुवि निवर्तकं चान्तरात्मनो वचनम् । धर्मश्चैतत्संस्थो मौनीन्द्रं चैतदिह परमम् ।। इति गाथार्थः ।।३।।

चक्रे० : सम्प्रति प्रस्तुतमधिकारिणमेवाहुः -

देव० : सम्प्रति प्रस्तुतमधिकारिणमाह -

अहिगारी उ गिहत्थो सुहसयणो वित्तसंजुओ कुलजो ।
अक्खुद्दो धिइबलिओ मइमं तह धम्मरागी य ।।२१।।

चक्रे० : सुगमा, नवर**मक्षुद्रो**ऽकृपणोऽक्रूरो वा । **धृतिबलिको** धृतिबलहीनो हि पश्चात्तापेन धर्मं हन्यात् ।।२१।।

देव० : अधिकारी तु योग्यः पुनर्जिनभवनविधौ **गृहस्थो**ऽगारी, न तु साधुः, विशेषप्रतिज्ञा-रूढत्वात्तस्य, यदुक्तम् -

अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणो दव्वथए कूवदिट्ठंतो।। [आव.निर्यु. भा॰ १९४]

सोऽपि न[१] सामान्य इत्यत आह-**शुभस्वजनो**ऽसंक्लिष्टबान्धवः, अशुभस्वजनो हि स्वजनानां लोकधर्मविरुद्धचारित्वेन न शुभभाववृद्धिमवाप्नोति, न च प्रवचनं प्रभावयितुमलम्, एतद्द्वयार्थमेव हि स्फुटं जिनभवनारम्भो विवेकिनाम् । सोऽपि **वित्तसंयुतो** द्रव्यपतिः, अनीदृशस्य हि तदारब्धमपि न सिद्ध्यति, तदसिद्धौ च खेदभाजनं भवति, पराभ्यर्थनाद्वारेण तत्साधयन्नपि जनहास्यो भवति, 'अहो जिनभवनकरणव्याजेनायं कुटुम्बं पुष्णाति' इति सम्भावनाहेतुत्वात्, सोऽपि **कुलजः** प्रशस्यकुलजातोऽनिन्द्यकुलजातो वा, अन्यथाविधेन हि विहितं तन्नात्यन्तं लोकादेयं स्यात् । **सोऽप्यक्षुद्रो**ऽकृपणः, कृपणो ह्यौचित्येन द्रव्यव्ययकरणाशक्तत्वान्न तत्साधनाय शासनप्रभावनाय चालम्, अथवाऽक्षुद्रोऽक्रूरः, क्रूरेण हि परोपतापित्वाज्जनद्वेष्येण कृतं तदायतनं तन्मत्सरेण जनद्वेष्यं स्यात् । सोऽपि **धृतिबलिको** धृतिर्मनःसमाधानं तदेव बलं सामर्थ्यं तदस्यास्तीति धृतिबलिकः, धृतिबलविहीनो हि द्रव्यव्यये पश्चात्तापान्न पुण्यभाजनं भवति । सोऽपि **मतिमान्** बुद्धियुक्तो मतिविहीनो ह्यनुपायप्रवृत्तेर्न दृष्टादृष्टफलभाग्भवति **तथेति** समुच्चये, सोऽपि **धर्मरागी** श्रुतचारित्रधर्मानुरक्तः, धर्माननुरागी हि उक्तगुणकलापोपेतोऽपि न जिनभवनविधाने प्रवर्त्तते, प्रवृत्तावपि नाभिप्रेतफलसिद्धिभागिति नासावधिकारी । **च**कारो गुरुपूजाकरणरत्यादिगुणसंग्राहकस्तथाहि -

गुरुपूयाकरणरई सुस्सूसाइगुणसंगओ चेव ।
नायाहिगयविहाणस्स धणियमाणापहाणो य।। [पञ्चा॰७-५] इति गाथार्थः ।।२१।।

* *द्रव्यसप्ततिकायाम्*-५, ६ *

अथ 'एषां वृद्धौ वक्ष्यमाणं सत् फलमुदेति' इति वृद्धिद्वारनिरूपणार्थं चैत्यकारणाऽधिकारिगुणोपलक्षणेन पञ्चाशकगाथाभ्यामादौ सामान्यतस्तदधिकारिणं निरूपयति -

अहिगारी य गिहत्थो सुहसयणो वित्तमं जुओ कुलजो ।
अखुद्दो धिइबलिओ मइमं तह धम्मरागी य ।।

---

१. नाविशिष्ट A

गुरुपूआकरणरई सुस्सूसाइगुणसंगओ चेव ।
णायाऽहिगयविहाणस्स धणियमाणापहाणो य ।।

'अहिगारि०' त्ति, 'गुरुपूअ०' त्ति । अत्रोत्सर्गत ईदग्गुणो गृहस्थः प्रा**योऽधिकारी** देवादिद्रव्य-वृद्धिकर्ता जिनैरुक्तः तद् यथा कीदृग् **गृहस्थः** ? १-**सुखस्वजनो**ऽनुकूलकुटुम्बादिवर्गसहितः २-**वित्तवान्** न्यायार्जितऋद्धिमान्, ३-**युक्तो** राजसत्कारादियोग्यः, 'प्रत्यनीकादिनाऽपरिभूतः' इति यावत्, ४-**कुलजः** सद्वंश्यः, कृतप्रतिज्ञादिनिर्वाहकः ५-**अक्षुद्रो** दानशौण्डः, ६-**धृतिबलिकश्चित्तसमाधान-**लक्षणसामर्थ्ययुक्, ७-**मतिमान्** स्वतः प्रशस्तधीमान्, तथा ८-धर्मासक्तः, ९-गुरुभक्तिरतः 'पूजनीयसेवा-परायणः' इत्यर्थः, १०-**शुश्रूषादिगुणैः संगतो** विवेकी इत्यर्थः, ११-**ज्ञाता** विद्वान्, प्रस्तुत**विधानस्य** चैत्यद्रव्यादिवृद्धिविध इत्यर्थः। १२-**आज्ञाप्रधान** आगमपरतन्त्रः, अयं भावः-ईदृशः श्रद्धावतः सानुबन्ध-सत्फलाश्चैत्यद्रव्यादिवृद्धिव्यवहाराः सुसाध्याः स्युः, तत्प्रतिकूला भक्षणादिदोषा अपि निवार्याः स्युः । विसदृशस्तु दुःसाध्या एव। ततो यस्य यथा सामर्थ्यं स तत्र तथा प्रवर्तत इति ।।५, ६।।

**** पञ्चाशके-७/५ ****

xxx तथा गुरवः पूज्या लौकिका लोकोत्तराश्च, लौकिकाः पित्रादयो वयोवृद्धाश्च, लोकोत्तरास्तु धर्माचार्यादयस्तेषां पूजाकरणे यथोचितविनयाद्यर्चाविधौ रतिरासक्तिर्यस्य स तथा, **गुरुपूजाकरणरतो** वा, एवंविधो हि जनप्रियत्वेन ससहायतया समारब्धसाधनसमर्थो भवति । तथा **शुश्रूषादिगुणसङ्गत एव च,** शुश्रूषा श्रोतुमिच्छा, तदादयोऽष्टौ गुणाः, तद्यथा –

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । उहापोहोऽर्थविज्ञानं तत्त्वज्ञानं तु धीगुणाः ।।

तैः समन्वित एव च, चैवशब्दौ समुच्चयावधारणार्थौ नियोजितावेव, एवंविधो हि शास्त्रसंस्कृत-बुद्धित्वेनोपायज्ञतयेप्सितार्थसाधको भवति । अस्यैव विशेषमाह–**ज्ञाता** विद्वान्, कस्येत्याह–**अधिकृतविधानस्य** जिनभवनकारणविधेः, एवंविधेन हि क्रियमाणं तद्विवक्षितार्थसाधकं भवति, तथा **धनिकमत्यर्थमाज्ञाप्रधान**श्चागमपरतन्त्रश्च । एतेन हि तत्कारितं लोकोत्तरक्रियत्वेन निर्वाणाङ्गं भवति, **च**शब्दः समुच्चयार्थः । xxx

चक्रे० : अधिकारिणा निर्मापिते जिनगेहे किं कार्यमित्याहुः –

देव० : अधिकारिणा निर्मापिते जिनवेश्मनि यद्विधेयं तदाह –

निप्फाइऊण एवं जिणभवणं सुंदरं तहिं बिंबं ।
विहिकारियमह विहिणा पइट्ठविज्जा लहुं चेव ।।२२।।

चक्रे० : सुगमैव, नवरमयं जिनबिम्बकारणविधिः –

सम्मान्य सूत्रधारं प्राग्वस्त्राद्यैः विभवोचितम् ।
मूल्यमर्प्य विलोभस्य तस्य शुद्धेन चेतसा ।। [ ]

प्रतिष्ठाविधिः संक्षेपतश्चायम् –

चैत्यान्तः शोभने लग्नेऽधिवास्योचितपूजया ।
स्थाप्यं बिम्बं जिनेन्द्रस्य पञ्चमङ्गलपूर्वकम् ।। [ ] ।।२२।।

देव० : निष्पाद्य निर्मा**प्यैवमु**क्तनीत्या **जिनभवनम्,** ततः **सुन्दरं** मनोनयनानन्ददायि **तत्र** जिनभवने **बिम्बं** मृदूपलपित्तलरूप्यस्वर्णरत्नादिमयीं प्रतिमां प्रक्रमाज्जिनस्यैव **विधिकारितं** शास्त्रनीतिविधापितम्, विधिश्च यथा –

जिणबिंबकारणविहि काले संपूइउण कत्तारं ।
विहवोचियमूल्लप्पण-मणहस्स सुहेण भावेण ।। [पञ्चवस्तु-११३०]

अस्या लेशतो व्याख्या–काले तदुचितावसरे सम्पूज्य सन्मानयित्वा कर्तारं सूत्रधारं विभवोचितमूल्यं स्वसमृद्ध्यनुरूपवेतनमनघस्यानौचित्येन द्रव्याग्राहकत्वेन लोभादिदोषरहितस्य शुभेन भावेनोदारतया प्रवर्धमानप्रशस्ताध्यवसायेनेति ।

तारिसयस्साभावे तस्सेव हियत्थमुज्जओ नवरं ।
नियमेइ बिंबमुल्लं जं उचियं कालमासज्ज ।। [पञ्चवस्तु-११३१]

तादृशस्येत्यनघस्य तस्यैव हितार्थमुद्यतो मा बिम्बार्थकल्पितद्रव्यभक्षणतः संसारगर्ते निपतेदसाविति नियमयति बिम्बमूल्यम्, यथेयता द्रव्येण[१] यद्बिम्बं विधातव्यं भवतेति, कालमासाद्येति क्वचित्[२] काले कियद् बिम्बमूल्यं स्यादिति ।

१. द्रव्येणेयद् बिम्बं A २. क्वचिदपि काले कियदपि बिम्बमूल्यं A

अथानन्तरं **विधिना** सूत्रोक्तनीत्या प्रतिस्थाप्यानुरूपतया तिष्ठत्यास्ते बिम्बम्, ततस्तदधिकारी[१] **प्रतिष्ठापयेल्लघु** शीघ्रम्, 'चिय चेव एवार्थे' इति वचनाच्च**चेवे**त्यवधारणे, ततश्च जिनभवन-निष्पत्त्यनन्तरमेव बिम्बस्थापनं विधेयम्, यदुक्तम् –

निष्पन्नस्यैवं खलु जिनबिम्बस्य[२]ोदिता प्रतिष्ठा तु ।
दशदिवसाभ्यन्तरत इति । प्रतिष्ठाविधिश्च सङ्क्षेपत आह –
निष्फन्नस्स य सम्मं तस्स पइट्ठावणे विही एसो ।
सट्ठाणे सुहजोगे अहिवासणमुचियपूयाए ।। [पञ्चवस्तु-११३२]

व्याख्या–स्वस्थाने यत्र तद्भविष्यति, शुभयोगे प्रशस्तचन्द्रनक्षत्रलग्नादिसम्बन्धे, अधिवासनं प्रतिष्ठाकल्पप्रसिद्धमुचितपूजया विभवानुसारत इति, ततश्च –

चिइवंदणथुइवुड्ढी उस्सग्गो साहु सासणसुराए ।
थयसरण पूयकाले ठवणा मंगलगपुव्वा उ ।।१।। [पञ्चवस्तु-११३३]

व्याख्या–चैत्यवन्दना विधेया स्तुतिवृद्धिः प्रवर्धमानस्तुतिपाठ इत्यर्थः, कायोत्सर्गः कार्यः, साधु असम्मूढतया, कस्याः ? शासनसुरायाः प्रवचनदेवतायाः, तत्र स्तवस्मरणं चतुर्विंशतिस्त-वानुचिन्तनं कार्यम्, ततः पूजा जातिपुष्पादिना जिनबिम्बस्य, ततः काले प्रतिष्ठालग्नस्याभिमतांशे स्थापना प्रतिष्ठा मङ्गलकपूर्वा तु पञ्चनमस्कारपूर्वैवेति । उक्तं च समुद्राचार्यप्रतिष्ठाकल्पे –

पज्जत्तमिमेणं चिय मायालोभेहिं विप्पमुक्कस्स ।
पंचनमुक्कारेणं असेसपावोहमलणेणं ।। [ ]
सव्वत्थभावमंगल पंचनमुक्कारपुव्विया किरिया ।
कायव्वा जिणबिम्बाण सव्वभावेण य पइट्ठा ।। [ ]

विस्तरस्तु ग्रन्थान्तरादवसेय इति गाथार्थः ।।२२।।

**** पञ्चवस्तौ-११२९ ****

व्याख्याताऽधिकृतद्वारगाथा, एष तावत्समासतो जिनभवनकारणविधिः, अत्रान्तरकरणीयमाह –

णिप्फाइअ जयणाए जिणभवणं सुंदरं तहिं बिंबं ।
विहिकारिअमह विहिणा पइट्ठविज्जा असंभंतो ।।

निष्पाद्य यतनया परिणतोदकादिग्रहणरूपया **जिनभवनं** जिनायतनं **सुन्दरं तत्र** भवने **बिम्बं**

१. तदन्यस्तदधिकारी T, C २. जिनबिम्बोदिता A

भगवतः **विधिकारितं** सदथ **विधिना** वक्ष्यमाणेन **प्रतिष्ठापयेदसम्भ्रान्तो**ऽनाकुलः सन्निति गाथार्थः ।।११२९।।

** पञ्चाशके-७/४३ **

उक्तं यतनाद्वारम्, तदुक्तौ चोक्तो जिनभवनकारणविधिः, अथ तदुत्तरविधिमाह –

णिप्फाइऊण एवं जिणभवणं सुंदरं तहिं बिंबं ।
विहिकारियमह विहिणा पइट्ठवेज्जा लहुं चेव ।।

निष्पाद्य निर्माप्य, **एव**मनन्तरोक्तविधिना **जिनभवनं** प्रतीतम्, ततः **सुन्दरं** शोभनं **तत्र** जिनभवने **बिंबं** प्रतिमां प्रक्रमाज्जिनस्यैव, **विधिकारितं** शास्त्रनीतिविधापितम् । **अथा**नन्तरं **विधिना** शास्त्रनीत्या **प्रतिष्ठापयेल्लघु** शीघ्रमेव । यदुक्तम् –

निष्पन्नस्यैवं खलु जिनबिम्बस्योदिता प्रतिष्ठा तु । दशदिवसाभ्यन्तरतः सा च त्रिविधा समासेन ।।

इति । **चैवे**त्यवधारणार्थः, इति गाथार्थः ।।४३।।

चक्रे० : अथ जिनभवनस्यैव निर्मापणविधिविशेषकृतौ भेदावाहुः –

देव० : अथ जिनभवनस्यैव निर्मापणविधिविशेषकृतौ भेदावाह –

अहिगारिणा विहीए कारवियं जं न साहुनिस्साए ।
तमनिस्सकडं अट्ठावइव्व सेसं तु निस्सकडं ।।२३।।

चक्रे० : अधिकारिणा विधिना कारितं यत्र साधुनिश्रया यत्याश्रयेण यदुत ममात्र गुरवः स्थास्यन्ति व्याख्यानादि वा करिष्यन्ति **तदनिश्राकृतं** जिनभवनम्, **अष्टापद इव** भरतचक्रवर्ति-कारिताष्टापदगिरिशिखरवर्त्तिजिनभवनवत्, **शेषं** तूक्तविपर्ययविहितं **निश्राकृतमि**त्यर्थः।।२३।।

देव० : अधिकारिणा वर्णितेन **विधिना** वर्णितेनैव, स्त्रिया निर्देशः प्राकृतत्वात्, **कारितं** विधापितं **यत्र साधुनिश्रया** यत्याश्रयेण, यदुत विवक्षिताचार्यपदे[१] प्रतिबद्धमिदमिति **तद-निश्राकृतं** जिनभवनमिति प्रकृतमत्र दृष्टान्तमाह – **अष्टापद इव** भरतचक्रवर्तिकारिताष्टापद-गिरिशिखरवर्तिजिनभवनवत्, **शेषं** तूक्तविपर्ययविहितं[२] **निश्राकृतमि**ति गाथार्थः ।।२३।।

---

१. ममात्र गुरवः स्थास्यन्ति व्याख्यानादि वा करिष्यन्तीति T,B,C २. पुनरुक्त० T,B,C

चक्रे० : अथार्हद्बिम्बं प्रतिष्ठाय किं कार्यमित्याहुः –

देव० : अथ प्रस्तुतबिम्बस्थापनानन्तरं किं विधेयमित्याह –

कुसुमक्खयधूवेहिं दीवयवासेहिं सुंदरफलेहिं ।
पूया[१] घयसलिलेहिं अट्ठविहा तस्स कायव्वा ।।२४।।

चक्रे० : सुगमा, नवरं '**अट्ठविह**'त्ति अष्टविधेत्युपलक्षणम्, वस्त्राऽऽभरणाद्यैरनेकधापि पूजा भवति, सा च तस्यार्हद्बिम्बस्य प्राग्भवे नलदमयन्तीभ्यामिव कुसुमाद्यैरनेकप्रकारापि[२] कार्येत्यर्थः।।२४।।

देव० : इह सुन्दरशब्दः फलशब्देन सह समस्तोऽपि पूजाप्रकारेषु शेषेष्वपि योज्यः,अष्टौ विधाः प्रकारा यस्यां **साष्टविधा पूजा, तस्य** जिनबिम्बस्य **कर्तव्ये**ति सम्बन्धः, काभिः पुनस्ताभिरित्याह- १-**कुसुमानि**[४] जलस्थलजानि मनोहरपुष्पाणि तैर्बिम्बाङ्गोपाङ्गेषु विचित्ररचनादि कार्यम्, २-**अक्षता** अखण्डोज्ज्वलाः शालितण्डुलादयस्तैर्दर्पणाद्यष्टमङ्गलालिखनम्, ३-**धूपाः**[५] प्रचुरपरिमलोद्गारा अगर्वादिरूपास्तदुत्क्षेपणम्, ४-**दीपा**स्तमःस्तोमैकप्रतीपास्तदुद्बोधनम्, ५-**वासाः**[६] सौरभ्यवासिताशाश्चन्दनचूर्णादयस्तैर्विच्छुरणम्, ६-**फलानि** माधुर्यपेशलानि नारङ्गादीनि तङ्कौकनम्, ७-**घृते**त्युपलक्षणं सर्वसरससारनैवेद्योपहारः, ८-**सलिलानि** मधुर-निर्मलानि तदुपन[य]नमिति, सर्वत्र व्यक्त्यपेक्षया बहुवचनमिह च राजप्रश्नीयोपाङ्गादिष्वधिका अपि प्रकाराः केचिदुपलभ्यन्ते, ते तु यथासम्भवमेतेष्वेवान्तर्भावयितव्या इति गाथार्थः ।।२४।।

**** अभिधानराजेन्द्रकोषे 'चेइय' शब्दे-३ ****

जिनप्रतिमापूजाविधिमाह –

कुसुमऽक्खयधूवेहिं दीवयवासेहिं सुंदरफलेहिं ।
पूया घयसलिलेहिं अट्ठविहा तस्स कायव्वा ।।

कुसुमाक्षतधूपैः पुष्पशाल्याद्यखण्डतण्डुलकृष्णागुरुसारधूपैः, **दीपः प्रदीपो,** गन्धाः सुगन्धिसारद्रव्य-

---

१. पूआ P,K, २. सपर्या M, ३. पुनरष्टभिर्विधाभिरित्याह T,B,C, ४. जलस्थलजानि नीरक्रयपरिगृहितानि तैर्विच्छित्तिवैचित्र्यम्, A, चम्पकशतपत्रिकादीनि T,B,C, ५. धूपाश्च कर्पूरागरुचन्दनादयस्तैस्तथादीपाश्च प्रतीता C, B ६. वासाश्च तैस्तथा पवित्रमापवित्रमभेदैः सुन्दरफलैर्नालिकेराम्रबीजपूरादिभिरिह च कृतसमासोऽपि सुन्दरशब्दः प्रत्येकमभिसम्बध्यते, तथा घृतानि च सर्पींषि सलिलानि च जलानि तैः, सर्वत्र व्यक्त्यपेक्षया बहुवचनमिह च क्वचिद् बहुतरा अपि प्रकारा उपलभ्यन्ते T,B,C

निष्पन्नानेकभेदभिन्नास्तैः, **सुन्दरफलैः** पवित्रसुगन्धिमनोहरातिवर्णाढ्यनारङ्गाम्रबीजपूरकादिभिः, **पूजा** सपर्या, **घृतं** सर्पिः, उपलक्षणं चैतत्-समस्तनैवेद्यपक्वान्नादेः । **सलिलं** जलम्, ताभ्याम्, **अष्ट**विधा-ऽष्टभेदा । उपलक्षणं चैतत्-काञ्चनरत्नवप्रादेः । **तस्य** मिश्रामिश्रादिभेदभिन्नजिनभवनमध्यगत-भावार्हद्गुणगणाध्यारोपणसहार्हद्बिम्बस्य **कर्त्तव्या** कार्या भवतीति गाथार्थः ।।२४।।

चक्रे० : इह च केचित्कस्याश्चित्प्रतिमायाः पूजामाहुरिति तन्मतान्याहुः -

देव० : इह च केचित्कस्याश्चित्प्रतिमायाः पूजनमाहुरिति तन्मतान्याह -

गुरुकारियाए केई अन्ने सयकारियाए तं बिंति ।
विहिकारियाए अन्ने पडिमाए पूयणविहाणं ।।२५।।

चक्रे० : गुरवो मातापितृपितामहादयस्तैः **कारितायाः केचिदन्ये स्वयंकारितायाः, विधिकारितायास्त्वन्ये प्रतिमायास्तत्पूजाविधानं ब्रुवन्ति** । परं मतान्येवैतानि कार्यपक्ष-स्त्वर्हत्प्रतिमां दृष्ट्वा पूजयेदन्यथाऽवज्ञा स्यात् ।।२५।।

देव० : गुरवो मातृपितृपितामहादयस्तैः **कारितायाः केचिदन्ये स्वयंकारिताया विधिकारितायास्त्वन्ये प्रतिमाया**स्तत्पूर्वाभिहितं **पूजाविधानं ब्रुवन्ति** कर्तव्यमिति शेषः । अवस्थितपक्षस्तु गुर्वादिकृतत्वस्यानुपयोगित्वान्ममत्वाग्रहरहितेन सर्वप्रतिमा अविशेषेण पूजनीयाः, सर्वत्र तीर्थकृदाकारोपलम्भेन तद्बुद्धेरुपजायमानत्वाद्, अन्यथा हि स्वाग्रहवशादर्हद्-बिम्बेष्वप्यवज्ञामाचरतो दुरन्तसंसारपरिभ्रमणलक्षणो बलाद्दण्डः समाढौकते । न चैवमविधि-कृतामपि पूजयतस्तदनुमतिद्वारेणाज्ञाभङ्गलक्षणदोषापत्तिरागमप्रामाण्यात् तथाहि -

सीलेहमंखफलए इयरे चोइंति तं नु माईसु ।
अभिजोइंति सवित्तिसु अणित्थकेडंतदीसंता ।। [ ]
निस्सकडमनिस्सकडे वा वि चेईए सव्वहिं थुई तिन्नि।
वेलं व चेइयाणि वि णाउं एक्केक्किया वा वि ।। [चैत्य.म.भा॰ १६४]

इति गाथार्थः ।।२५।।

चक्रे० : अथ पूजागतमेव विधिशेषमाहुः –

देव० : अथ पूजागतमेवोपदेशशेषमाह –

सुत्तभणिएण विहिणा गिहिणा निव्वाणमिच्छमाणेण ।
लोगुत्तमाण पूया निच्चं चिय होइ कायव्वा ।।२६।।

चक्रे० : सूत्रभणितेन विधिना न स्वमतिकल्पितेन यतः –

समतिपवित्ती सव्वा आणाबज्झत्ति भवफला चेव ।
तित्थयरुद्देसेण वि न तत्तओ सा तदुद्देसा ।। [पञ्चा० ८-१३] विधिश्च –

काले सूइभूएणं विसिट्ठपुप्फाइएहिं विहिणा उ ।
सारथुइथोत्तगरुई जिणपूया होइ विन्नेया ।। [पञ्चा० ४-३]

शेषं स्पष्टम् ।।२६।।

देव० : चियेत्येवार्थे यथासम्भवं योज्यम्, **सूत्रभणितेनैव विधिना,** यतः –

समतिपवित्ती सव्वा आणाबज्झत्ति भवफला चेव ।
तित्थयरुद्देसेण वि न तत्तओ सा तदुद्देसा ।। [पञ्चा० ८-१३] विधिश्च –

काले सूइभूएणं विसिट्ठपुप्फाइएहिं विहिणा उ ।
सारथुइथोत्तगरुई जिणपूया होइ विन्नेया ।। [पञ्चा० ४-३]

गृहिणैव न त्वनगारेण, तस्यानधिकारित्वाद्, एतेनाधिकारी प्रत्यपादि, **निर्वाणमेवेच्छता,** यतः– 'नरविबुहेसरसोक्खं' इत्यादि, किञ्चार्थान्तरस्यान्यथापि प्राप्यत्वात्, लोकः सामान्येन भव्यसत्वलोकः सजातीयोत्कर्ष एवोत्तमत्वोपपत्तेस्तस्य सकलकल्याणैकनिबन्धनतया भव्यत्वभावेनोत्तमा अर्हन्तस्तेषां **पूजा नित्यमेव भवति कर्तव्येति** गाथार्थः ।।२६।।

**** श्रावकप्रज्ञप्तौ-३५० ****

सुत्तभणिएण विहिणा गिहिणा निव्वाणमिच्छमाणेण ।
लोगुत्तमाण पूया निच्चं चिय होइ कायव्वा ।।

सूत्रभणितेनागमोक्तेन **विधिना** यतनालक्षणेन **गृहिणा** श्रावकेन **निर्वाणमिच्छता** मोक्षमभिलषता **लोकोत्तमाना**मर्हदादीनां **पूजा** अभ्यर्थनादिरूपा **नित्यमेव भवति कर्तव्या** ततश्च न युक्तः प्रतिषेध इति ।।३५०।।

**** पञ्चाशके-४/४६ ****

अथ पूजाविधिमुपसंहरंस्तद्विषयमुपदेशमाह –

सुत्तभणिएण विहिणा गिहिणा णिव्वाणमिच्छमाणेणं ।
तम्हा जिणाण पूजा कायव्वा अप्पमत्तेणं ।।

सूत्रभणितेनागमोक्तेन **विधिना** विधानेन पूजा कर्तव्येति सम्बन्धः। केनेत्याह–**गृहिणा** गृहस्थेन साधोरनधिकारित्वात् । किंविधेनेत्याह–**निर्वाणं** निर्वृति**मिच्छता** वाञ्छता निर्वाणव्यतिरिक्तस्य फलस्योपायान्तरेणापि सुलभत्वात् । **'तम्ह'** त्ति तस्माज्जिनानां कृतकृत्यत्वेनानुपकारेऽपि पूजकस्योपकारी भवति, तथा जिनपूजायामप्रवर्तनं मोहादेव, तस्माद्धेतो**र्जिनाना**मर्हतां **पूजा**ऽर्चनं **कर्तव्या** विधेया **ऽप्रमत्तेना**प्रमादवता प्रमादपरिहारेणेति यावत् । इति गाथार्थः ।।४६।।

चक्रे० : विधिनेत्युक्तमथ तमेव पुरस्कुर्वन्तः प्राहुः –

देव० : विधिनेत्युक्तमथ विधिमेव पुरस्कुर्वन्नाह –

आसन्नसिद्धियाणं विहिपरिणामो उ होइ सयकालं ।
विहिचाउ अविहिभत्ती अभव्वजियदूरभव्वाणं ।।२७।।

चक्रे० : सुगमैव, केवलं **विधि**रागमोक्तः क्रियाकल्पः । **'सयकालं'** ति सदाकालं **'विहिचाउ'** त्ति विधित्यागः ।।२७।।

देव० : आसन्ना स्वल्पकालप्राप्यतया समीपवर्त्तिनी **सिद्धि**र्मुक्तिर्येषां ते यथा तेषामेव **विधिः** समयभाषया सर्वक्रियासु सूत्रोक्तो न्यायस्तस्य **परिणामो** रुचिः । **तु**रेवार्थो योजित एव **भवति**। **सदाकालमि**ति लोकरूढ्या सर्वकालार्थे **विधित्यागोऽविधिभक्ति**श्चाविधिसेवा, जीवशब्दस्यान्ते सम्बन्धा**दभव्यदूरभव्य**जीवानां भवतीत्यत्रापि योगः । तत्राभव्या मुक्तिगमनायोग्याः, दूर उपार्धपुद्गलपरावर्त्तात्परतो भव्यत्वं येषां ते दूरभव्या इति गाथार्थः ।।२७।।

चक्रे० : तथा –

देव० : तथा –

धन्नाणं विहिजोगो विहिपक्खाराहगा सया धन्ना ।
विहिबहुमाणी धन्ना विहिपक्खअदूसगा धन्ना ।।२८।।

चक्रे० : गतार्था ।।२८।।

देव० : धर्मधनमर्हन्तीति **धन्या**स्तेषां **विधियोग**स्तदधिगमरूपः सम्बन्धः, **विधिपक्षाराधका** विधिमार्गानुष्ठायिनः **सदा धन्या** एव, तेषां हि शिवसुखसाधने मुख्यवृत्त्यैव प्रवृत्तत्वात् तथा **विधिबहुमानिनो**ऽपि **धन्या**स्ते हि यद्यप्यत्यन्तविषयासक्ततयाऽज्ञानितया वा तदनुष्ठाने न प्रवर्तन्ते, तथापि तदनुष्ठातॄन्प्रति बहुमानतो मार्गानुपातिनः, यदाह –

जञ्चिय गुणपडिवत्ती सव्वन्नुमयम्मि जायइ विसुद्धा ।
तञ्चिय जायइ बीयं बोहिए तेण णाएणं ।। [ ]

तथा **विधिपक्षादूषका** अपि **धन्याः** । अप्रतिषिद्धमनुमतमिति न्यायेन किञ्चिदक्लिष्टाध्यवसायित्वेन[१] तेषामपि मनागाराधकत्वाद्, उक्तं च –

विहिअपओसो जेसिं आसन्ना तेवि सुद्धिपत्तत्ति ।
खुद्दमिगाणंपुण सुद्धदेसणा सीहनायसमा ।। [पञ्चाशक-३/४८] इतिगाथार्थः।।२८।।

**** हितोपदेशप्रकरणे-१६६ ****

अथ किमर्थमयमियान् विधिविधाने किलादर इति चेत् ? तदाह –

धन्नाणं विहिजोगो विहिपक्खाराहगा नरा धन्ना ।
विहिबहुमाणी धन्ना विहिपक्खअदूसगा धन्ना ।।

विधिशब्दोऽत्र सर्वत्र समयोक्तयुक्तिवाची, अतो **धन्यानां** सुचरितसुकृतानामेव परिपूर्णो **विधियोगः** संपद्यते । तथा तस्य **विधिपक्षस्याराधका** यथोक्तकारिणश्च **नरा धन्याः** । तथा येषां तथाविधकुसामग्रीसङ्गमेन विधियोगविधिपक्षसमाराधनलक्षणं द्वितयं नोपपद्यते, केवलं विधौ बहुमानमनुमोदनं विदधति, तेऽपि **विधिबहुमानिनो धन्या** एव । अथ कथञ्चित् कर्म्मगुरुत्वादिना विधिबहुमानविधानमात्रस्याप्यसम्भवः केवलमदूषकत्वमात्रमेव विधिपक्षस्य येषां तेऽपि **धन्या** एव । विधिहीना विध्यनाराधका विध्यबहुमानिनो विधिपक्षदूषकाश्च नराः सर्वथाऽप्यधमा एवेति, कथं माऽस्तु विशुद्धधियां विधावादरः ? इति ।।१६६।।

१. अध्यवसायत्वेन T,B,C

चक्रे० : अथ विधिपक्षमुपसंहरन्तः पूजानन्तरं वन्दनं कार्यमिति तदुपदेशमाहुः –

देव० : अथ विधिपक्षमुपसंहरन् 'पूयाए उवरि वंदणं नेयं' इति वचनमनुवर्तमानो वन्दनोपदेशमाह –

इय आगमविहिपुव्वं भत्तिभरुल्लसियबहलरोमंचा ।
तं भुवणवंदणिज्जं वंदह परमाए भत्तीए ।।२९।।

चक्रे० : इति हेतो**रागमविधिपूर्वं भक्तिभरोल्लसितबहलरोमाञ्चा** आन्तरप्रीत्यातिशयोद्गत-बहलपुलका**स्तं** तीर्थकरं तद्बिम्बं वा **भुवनवन्दनीयं वन्दध्वं** भो भव्या इति शेषः, **परमया भक्त्या** प्रकृष्टया प्रदक्षिणादानादिकया कायप्रतिपत्त्येत्यर्थः ।।२९।।

देव० : इति हेतो**रागमविधिपूर्वं भक्तिभरोल्लसितबहलरोमाञ्चा** आन्तरप्रीत्यतिशयोद्गत-बहलपुलका**स्तं** तीर्थकरं प्रस्तुतबिम्बं वा **भुवनवन्दनीयं** वन्द्यत्वे हेतुरयं **वन्दध्वं** नमस्कुरुत भो भव्या इति शेषः **परमया भक्त्या** प्रकृष्टया कायप्रतिपत्त्या, अनेन बहुमानभक्तिविरहेण वन्दमानोऽपि द्रव्यवन्दनत्वेन न तथाविधनिर्जराभाग्भवतीत्यावेदयतीति गाथार्थः ।।२९।।

चक्रे० : आगमोक्तमेव वन्दनविधिमाहुः –

देव० : वन्दनविधिमेवाह –

पंचविहाभिगमेणं पयाहिणतिगेण पूयपुव्वं च ।
पणिहाणमुद्दसहिया विहिजुत्ता वंदणा होइ ।।३०।।

चक्रे० : पञ्चविधाऽभिगमेन प्रदक्षिणात्रिकेण विशेषितोऽनेन दशत्रिकाणि सूचितानि । इह विशेषणे तृतीया । **पूजापूर्वं च** पूर्वं पूजां कृत्वेत्यर्थः **प्रणिधानमुद्राभ्यां सहिता विधियुक्ता वन्दना भवति ।** इह दशत्रिकान्तर्गतत्वेऽपि पूजाप्रणिधानमुद्राणां पृथगादानं सर्वत्रिकाऽसम्भवेऽपि सम्भवित्रिकाऽवश्यकर्तव्यतादर्शनार्थम् ।।३०।।

देव० : पञ्चविधाऽभिगमेन तथा **प्रदक्षिणात्रिकेण,** अनेन च दशत्रिकाणि सूचितानि । **पूजार्चा पूर्वा** प्रथमा यस्मिंस्तत्तथाऽध्याहार्यविधियमानेति क्रियाविशेषणमिदम्, **चः** समुच्चये, **प्रणिधानमुद्राभ्यां सहिता,** सहितशब्दश्चेह कृतसमासोऽपि पूर्वत्रापि तृतीयान्तपदाभ्यां योज्यः,

एवंविधा **विधियुक्ता वन्दना भवति** । [१]इह च प्रदक्षिणाशब्दसम्बद्धमपि त्रिकपदं व्याख्यानात्पूजाप्रणिधानमुद्रास्वपि योज्यम्, एतावता च शेषत्रिकषट्कमपि सूचितम्, वक्ष्यति च 'तिन्नि निसीहिए' इत्यादीति गाथार्थः ।।३०।।

चक्रे० : पञ्चविधाऽभिगममेवाहुः –

देव० : पञ्चविधाऽभिगममेवाह –

दव्वाण सचित्ताणं विउसरणमचित्तदव्वमणुसग्गो[२] ।
मणएगत्तीकरणं अंजलिबंधो य दिट्ठिपहे ।।३१।।
तह [३]एगसाडएणं उत्तरसंगेण जिणहरपवेसो ।
पंचविहोऽभिगमो इय अहवा वि य अन्नहा [४]एस ।।३२।।

. **चक्रे०** : पूजोपकरणं मुक्त्वा **सचित्तद्रव्याणां** विभूषागतपुष्पताम्बूलादीनां **व्युत्सर्जनं** परित्यागः । तथा**ऽचित्तानां** कटककेयूरादीना**मनुत्सर्गः** । तथा **मनस एकत्वीकरणं** धर्मैकालम्बनताकरणम्, तथा**ऽञ्जलिबन्धः** शिरसि करकोशन्यासो **दृष्टिपथे** लोचनगोचरे सति स्वामिनीत्यर्थः।।३१।।

तथैकशाटकेनैकपरिधाने**नोत्तरासङ्गे**नोत्तरीयकृतेन प्रतीतेन **जिनगृहप्रवेशः, इत्यु**क्तप्रकारेण **पञ्चविधोऽभिगमोऽथवाऽन्यथैष** पञ्चविधाभिगमः । **अपि चे**ति समुच्चये ।।३२।।

देव० : द्रव्याणां वस्तूनां **सचित्तानां** पुष्पताम्बूलादीनां **व्युत्सर्जनं** परित्यागः, एतत्पुनः पूजोपकरणं विमुच्येति ज्ञेयम्, तथा**ऽचित्तद्रव्याणां** कटककेयूरादीना**मनुत्सर्गो**ऽपरिहारो मकारोऽत्र प्राकृतप्रभवः । तथैकस्मिन् वस्तुन्यवस्थिततत्परिणामात्मनोऽप्येकम्, तस्य भावस्तत्त्वम्, ततो नानावस्तुसञ्चारित्वेनानेकत्वस्य सत एकत्वस्य करणमेकत्वीकरणं **मनस एकत्वीकरणमिति** समासः, अन्तःकरणस्यैकालम्बनताविधानमित्यर्थः । तथा**ऽञ्जलिबन्धः** शिरसि करकुड्मलन्यासो **दृष्टिपथे** लोचनगोचरेऽवतीर्णे भगवतीति शेषः । **चः** समुच्चये ।

---

१. इह च दशत्रिकान्तर्गतत्वेऽपि पूजाप्रणिधानमुद्राणां पृथगुपादानं कदाचित्कथञ्चित्कस्यचित् त्रिकस्य असम्भवेऽपि शेषसम्भवित्रिकाणामवश्यकर्त्तव्यता दर्शनार्थमिति गाथार्थः T,B,C २. परिभोगो P, K. ३. एग साडिएणं T,C. ४. एसा A.एसो. T,C

तथैकः शाटको यत्रासावेकशाटकस्तेन, अनेनानेकवस्त्रनिषेधमाह, उत्तरस्मिन्नुपरितने काय आसङ्गो वस्त्रविन्यासविशेषलक्षणः सम्बन्धस्तेन **जिनगृहे प्रवेशो**ऽर्हन्मन्दिरान्तर्गमनम्, एतच्चार्थवशात्सप्तम्यन्तं कृत्वा प्राक्तनेष्वपि चतुर्षु योजनीयम् । इह च **'एगसाडएणं उत्तरासंगेण'**ति पदं पुरुषस्यैव, स्त्रियास्तु 'विणओणयाए गायलट्ठीए' इति पञ्चममभिगमपदं दृश्यम्, व्यक्तञ्चैतत् **पञ्चविधो**ऽभि आभिमुख्येन प्रस्तावाज्जिनस्य गम्यतेऽनेनेत्य**भिगम इति** पूर्वदर्शितप्रकारेण भवतीति शेषः । **अपि** चेत्यभ्युच्चये**ऽथवाऽन्यथा** विशिष्टपुरुषापेक्ष**यैष** पञ्चविधोऽभिगम इति गाथाद्वयार्थः ।।३१, ३२।।

**** सङ्गाचारभाष्ये-२० ****

तत्र चैत्ये प्रविशन् पञ्चविधाभिगमं करोति, इत्येतत्सम्बन्धायातं द्वितीयं 'अभिगमपणगं'ति द्वारं विवृण्वन्नाह –

सच्चित्तदव्वमुज्झणमच्चित्तमणुज्झणं मणेगत्तं ।
इगसाडिउत्तरासंग अंजली सिरसि जिणदिट्ठे ।।

सचित्तद्रव्याणां स्वाङ्गाश्रितानां कुसुमताम्बूलादीना**मुज्झनं** परित्यागः, **अचित्तानां**–कटककुण्डलकेयूरहारादीनां द्रव्याणामित्यत्रापि योज्यम**नुज्झनम**परित्यागः, **मनऐकाग्र्यं** रागद्वेषाभावेन मनःसमाधिरनन्योपयोगितेतियावत्, **एकशाटकउत्तरासंगः**, एकः–एकसंख्यो न द्व्यादयः शाटको देशान्तरप्रसिद्धः पृथुलपटादिरूपो यत्र स उत्तरासंग उपरितनं वस्त्रम्, प्रावरणवस्त्रमित्यर्थः, उक्तं च आचाराङ्गचूर्णौ–'एगसाडो, यदुक्तं भवति-एगपावरणु'त्ति तेन कृत्वा उत्तरासंग-उत्तरीयकरणं' कल्पचूर्णावप्युक्तं–'उत्तरिज्जं नाम पावरणं,' क्वचित् उत्तरिज्जं नाम पंगुरणमिति पाठः, एवं च एगेण पंगुरणवत्थेण उत्तरासंगो किज्जइ इति भणियं होइ,' अनेन च निवसनवस्त्रेणोत्तरासङ्गकरणनिषेधमाह', निवसनवसनस्यान्तरीयशब्दवाच्यत्वात्, तथा च कल्पनिशीथचूर्णौ 'अंतरिज्जं नाम नियंसणं'ति, एकग्रहणं पुनरुत्तरासङ्गेऽनेकवस्त्रनिषेधार्थम्, न तु सर्वथोपरितनप्रावरणवस्त्रस्य, एवं च परिहितैकवस्त्रो द्वितीयेन वस्त्रेणोत्तरासंगं कुर्यादित्युक्तं भवति, यदुक्तं पंचाशकवृत्तौ–'एकवस्त्रपरिधान एकेन चोपरितनवस्त्रेण कृतोत्तरासंग' इति, मार्कण्डेयपुराणेऽप्युक्तम्–नैकवस्त्रेण भुञ्जीत, न कुर्याद्देवतार्चनम्' इत्यादि, एतच्च पुरुषमाश्रित्योक्तम्, स्त्री तु विशेषप्रावृताङ्गी विनयावनततनुलतेति, तथा चागमः–"विणओणयाए गायलट्ठीए"त्ति, एतावता शक्रस्तवादावप्यासां शिरस्यञ्जलिन्यासो न युज्यते, हृदादिप्रसक्तेः, यत्तु करयल जाव कट्टु एवं वयासीत्युक्तं द्रौपदीप्रस्तावे तद् भक्त्यर्थं न्युञ्छादिवदञ्जलिमात्रभ्रमणसूचनपरम्, न च पुरुषैः सर्वसाम्यार्थम्, न च तथास्थितस्यैव सूत्रोच्चारख्यापनपरम्, अन्यत्रापि नृपादिविज्ञापनादावप्यादौ तथा

भणनादित्याद्युक्तप्रायम्, परिभाव्यमत्रागमाद्यविरोधि, वृद्धसंप्रदायात्तु संप्रति स्त्रीणां वस्त्रत्रयं विना देवार्चा कर्तुं न कल्पते, तथा अन्यैरप्युक्तं-'न कञ्चुकं विना कार्या, देवार्चा स्त्रीजनेन च' इति ४, **अञ्जलि**बन्धश्च कार्यः **शिरसि** मस्तके **जिने दृष्टे** जिनबिम्बदर्शने सतीति गाथार्थः ।।२०।।

चक्रे० : तमेवाहुः –

देव० : तमेवाह –

अवहट्टु रायककुहाइं पंच वररायककुहरूवाइं ।
खग्गं छत्तोवाणह मउडं तह चामराओ य ।।३३।।

चक्रे० : अपहत्य मुक्त्वा **राजककुदानि** नृपचिह्नानि । **'पंचवररायककुहरूवाणि'** वररागककुभं रूपयन्तीति वररागककुभरूपाणि प्रबलरागादिकथकानीत्यर्थः, **खड्गछत्रोपानन्मुकुटा**ख्यान्येकत्वं प्राकृतत्वात्, **तथा चामरे च** ।।३३।।

देव० : अपहत्य मुक्त्वा **राजककुदानि** नृपचिह्नानि कति ? **पञ्च** किं सामान्यनृपचिह्नानि ? नेत्याह-**वरराजककुदरूपाणि,** बद्धमुकुटनरेन्द्रलक्षणस्वरूपाणि तान्येवाह–**खड्गं** कृपाणम्, **छत्रोपानन्मुकुटमिति** द्वन्द्वैकवद्भावः । तत्र छत्रमातपत्रम्, उपानहौ पादुके, मुकुटं किरीटं **चामरे च** प्रतीते । स्त्रीत्वमत्र प्राकृतवशाद्, राजादेर्जिनगृहप्रवेश इत्युत्तरक्रियाप्रक्रमः । चकारः पूर्वाभिगमपरिग्रहार्थ इति गाथार्थः ।।३३।।

**** सङ्गाचारभाष्ये-२१ ****

इय पंचविहाभिगमो अहवा मुञ्चंति रायचिह्नाइं ।
खग्गं छत्तोवाणह मउडं चमरे अ पंचमए ।।

इति पूर्वोक्तप्रकारेण **पञ्चप्रकारोऽभिगमो** भवति, उक्तं च श्रीपञ्चमाङ्गे–"पंचविहेण अभिगमेणं अभिगच्छइ, तंजहा – १-सच्चित्ताणं दव्वाणं विउसरणयाए २-अचित्ताणं दव्वाणं अविउसरणयाए ३-एगसाडएणं उत्तरासंगकरणेणं ४-चक्खुप्फासे अंजलिपग्गहेण ५-मणसो एगत्तीभावकरणेण" क्वचित्तु 'अचित्ताणं दव्वाणं विउसरणयाए'त्ति पाठः, तत्राचित्तानां छत्रादीनां व्यवसरणेन व्युत्सर्जनेनेत्यर्थः, अन्यत्राप्युक्तम्-

पुप्फतंबोलमाईणि, सचित्ताणि विवज्जए । छत्तवाहणमाईणि, अचित्ताणि तहेव य ।। त्ति

एतदर्थप्रतिपादनार्थमाह–**'अहवे'**त्यादि, यद्वा यो महर्द्धिको राजादिश्चैत्यं प्रविशति स **पञ्चविधाभिगम**समये **राजचिह्नान्यपि मुञ्चती**त्यत आह–अहवेत्यादि, अथवा विकल्पान्तरसूचकः, न केवलं **सचित्तान्येव**

द्रव्याणि मुच्यन्ते, किं तर्हि ?, अचित्तान्यपि द्रव्याणि मुच्यन्ते–दूरीक्रियन्ते, कानि ? राजचिह्नानि–राजलक्षणानि, तान्येवाह–१-**खड्गः** कृपाणः, २-**छत्रं** आतपत्रः, ३-**उपानहौ** पादुके, ४-**मुकुटं** किरीटः, ५-**चामरा**-बालव्यजनानि **पञ्चमका** इति, तथा च सिद्धान्तः –

अवहट्टु रायककुहाइं पंच वररायककुहभूयाइं । खग्गं छत्तोवाणह मउडं तह चामराओ य ।। त्ति

चक्रे० : सम्प्रति पूर्वसूचितत्रिकाण्याहुः –

देव० : सम्प्रति पूर्वसूचितदशत्रिकाण्याह –

तिन्नि निसीहि य तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूया य तहा अवत्थतियभावणं चेव ।।३४।।

तिदिसिनिरिक्खणविरई तिविहं भूमीपमज्जणं चेव ।
वन्नाइतियं मुद्दातियं च तिविहं च पणिहाणं ।।३५।।

चक्रे० : १-सावद्यव्यापारनिषेधेन निर्वृत्ता **नैषेधिक्यस्तास्तिस्त्रो** द्वारे मध्ये गर्भगृहे च। २-दक्षिणाद्दक्षिणहस्तादारभ्य प्रगतं यासु क्रियासु ताः **प्रदक्षिणाः** प्रसिद्धा**स्तिस्त्रश्च**। ३-**त्रयश्चैव प्रणामा** भूमौ मूर्ध्नाश्लेषणरूपाः ४-**त्रिविधा पूजा च। तथा** ५-**अवस्थात्रिकभावनं चैव** वक्ष्यमाणम् ।।३४।।

तथा ६-**तिस्त्रो दिश** ऊर्ध्वाधस्तिर्यग्लक्षणास्त**न्निरीक्षणविरति**र्जिनबिम्बसन्मुखमेवावलोकनीयमिति हृदयम् । ७-**त्रिविधं भूमिप्रमार्जनम्,** चरणयोरधोऽन्तराले **च** । ८-**वर्णादित्रिकम्,** ९-**मुद्रादित्रिकं च**, १०-**त्रिविधं च प्रणिधानं** वक्ष्यमाणस्वरूपम् । एतानि च त्रिकाणि प्रायेणोक्तक्रमेणैव कार्याणि ।।३५।।

देव० : सावद्यव्यापारनिषेधेन निर्वृत्ता **नैषेधिक्यस्तास्तिस्त्रो** द्वारे मध्ये गर्भगृहे च, दक्षिणाद्दक्षिणहस्तादारभ्य[१] प्रगतं यासु क्रियासु ताः **प्रदक्षिणाः** प्रतीता[२]**स्तिस्त्रः**, **चः** समुच्चये, अत्र च सूत्रे क्वचिदनुपलम्भादिति प्रलपन्तः स्थापनार्हत्प्रदक्षिणां प्रति विप्रतिपद्यन्ते केचन, तच्चायुक्तम्, साक्षादर्हति प्रतिपादितत्वेन तद्बिम्बेष्वपि तद्बुद्धिजनकेषु युज्यमानत्वात्, यदि चागमानभिहितत्वेन न विधीयेरंस्तदा चैत्याश्रयेण पञ्चविधाभिगमस्याप्यनभिहितत्वान्न विधेयता स्यात्, विधीयते चासौ । किं च जीवाभिगमसूत्रे विजयदेववक्तव्यतायां प्रतिमाप्रदक्षिणाया अपि

१. दक्षिणात् प्रदक्षिणीय A,T,B,C २. आचरणप्रसिद्धाः T,B,C

साक्षादभिहितत्वात् । तथाहि- 'तएणं से विजए देवे चउहिं सामाणियसाहस्सीहिं जाव अन्नेहिं य बहूहिं वाणमंतरेहिं देवेहिं देवीहिं य सद्धिं संपरिवुडे सव्वड्ढीए सव्वजुईए जाव निग्घोसनाइयरवेणं जेणेव सिद्धाययणे तेणेव उवागच्छइ, उवगच्छइत्ता सिद्धाययणं अणुप्पयाहिणी करेमाणे करेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसइ'त्ति ।

एतद्व्याख्या च-ततो देवपरिवृतः सिद्धायतनमागच्छति त्रिःप्रदक्षिणां करोतीति । तस्मादविदितसिद्धान्तयुक्तेरिदं वच इत्युपेक्षणीयमिति । तथा त्रयः प्रकर्षेण भक्त्यतिशयेन नमनानि भूमौ मूर्ध्नाश्लेषलक्षणानि **प्रणामास्तिस्रो** विधाः प्रकारा यस्यां सा, तथा **पूजा**र्चा वक्ष्यमाणा **अवस्थात्रिकभावनमपि** वक्ष्यमाणमेव ।

तथा **तिस्रश्चो**र्ध्वाधस्तिर्यग्लक्षणास्ता **दिशश्च** तासां **निरीक्षणविरतिः**, जिनबिम्ब-सन्मुखमेवावलोकनीयमिति हृदयम् । तिस्रो विधा वारा लक्षणा यस्य तत्तथा चरणयोरधोऽन्तराले चेत्यर्थः, **भूमिप्रमार्जनम् । वर्णादित्रिकं मुद्रात्रिकं त्रिविधं च प्रणिधानं** वक्ष्यमाणस्वरूपम्, अव्ययानि सर्वाणि समुच्चयार्थान्येतानि च त्रिकाणि प्रायो भणितक्रमेणैव कर्त्तव्यानीति गाथाद्वयार्थः ।।३४, ३५।।

**** प्रवचनसारोद्धारे-६६, ६७ ****

तिन्नि निसीहि य तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूया य तहा अवत्थतियभावणं चेव ।।

१-चैत्यगृहे च प्रविशन् नैषेधिकीत्रयं करोति-जिनगृहस्य द्वारभागे मध्यप्रदेशे गर्भगृहदेशे च, तत्र प्रथमा गृहादिविषये कायकार्याणां व्यापाराणां निषेधेन निर्वृत्ता नैषेधिकी, द्वितीया तद्विषय एव वचनव्यापारविधेयानां कार्याणां निषेधेन निर्वृत्ता, तृतीया तु गृहादिविषय एव मनसा चिन्तनीयानां कार्याणां निषेधेन निर्वृत्तेति सम्प्रदायः, सूत्रकारेण तु नैषेधिकीत्रितयं विवृण्वता-'घरजिणहरजिणपूयावावारच्चायओ निसीहितिगं' इत्युक्तम्, तत्राप्ययमर्थः-प्रथमनैषेधिक्यां गृहादिगतसकलसावद्यव्यापारपरम्पराप्रतिषेधः प्रतिपादितः, द्वितीयनैषेधिक्यां जिनगृहविषयपाषाणादिघटापनप्रभृतिसर्वसावद्यव्यापारपूरः प्रत्यषेधि, तृतीयनैषेधिक्यां तु पुष्पफलपानीयप्रदीपप्रमुखपदार्थसार्थसमानयनादिरूपो जिनपूजाविषयोऽपि सावद्य-व्यापारश्चैत्यवन्दनावसरे प्रत्यषेध्यत, जिनपूजां कृत्वा तृतीया नैषेधिकी विधीयत इति भावः । तथा सर्वत्रिकाणि सूत्रकारेण न विवृतानि, किन्तु विषमतराणि कानिचिदेवाऽस्माभिश्चाविवृतानामपि संक्षेपेण स्वरूपं निरूप्यते, २-यथा **तिस्रः प्रदक्षिणा** ज्ञानादित्रयाराधनाय जिनप्रतिमादेर्दक्षिणभागादारभ्य

सृष्टिक्रमेणैव कर्तव्याः, सर्वं हि प्रायेणोत्कृष्टं वस्तु कल्याणकामैर्दक्षिणभाग एव विधेयमिति, ३-तदनन्तरं प्रतिमादिसम्मुखं भक्त्यतिशयख्यापनाय शिरसा भूमिपीठस्पर्शनरूपा**स्त्रयः प्रणामा** विधेयाः, ४-**'तिविहा पूय'**त्ति सूत्रकृद्विवृणोति-'पुप्फक्खयत्थुईहिं तिविहा पूया मुणेयव्वा' इति, पुष्पैर्विचित्रैः सुगन्धिभिरक्षतैः-शालितण्डुलादिभिः स्तुतिभिश्च लोकोत्तरसद्भूततीर्थकृद्गुणवर्णनपराभिः संवेगजनिकाभिस्त्रिविधा पूजा ज्ञातव्येति। अत्र च गाथायां पुष्पादीन्युपलक्षणभूतान्येव श्रीभगवतः पूजाविधौ प्रतिपादितानि, ततो निःसपत्नरत्नसुवर्णमुक्ताभरणादिभिरलङ्करणं विचित्रप्रवित्रवस्त्रादिभिः परिधापनं पुरतश्च सिद्धार्थक-शालितण्डुलादिभिरष्टमाङ्गलिकालेखनं तथा प्रवरबलिजलमङ्गलदीपदधिघृतप्रभृतिपदार्थढौकनं भगवतश्च भालतले गोरोचनामृगमदादिभिस्तिलककरणं तत आरात्रिकाद्युत्तारणं, यदाहुः पूर्वगणभृतः -

गंधवरधूयसव्वोसहीहिं उदगाइएहिं चित्तेहिं । सुरहिविलेवणवरकुसुमदामबलिदीवणेहिं च ।।

सिद्धत्थयदहिअक्खयगोरोयणमाइएहिं जहलाभं । कंचणमुत्तियरयणाइदामएहिं च विविहेहिं ।।

पवरेहि साहणेहिं पायं भावोऽवि जायए पवरो । न य अन्नो उवओगो एएसि सया य लट्ठयरो ।। इति।

[गन्धवरधूपसर्वौषधिभिरुदकादिकैश्चित्रैः । सुरभिविलेपनवरकुसुमदामबलिदीपैश्च ।।

सिद्धार्थकदध्यक्षतगोरोचनादिभिर्यथालाभम् । काञ्चनमौक्तिकरत्नादिदामभिश्च विविधैः ।।

प्रवरैः साधनैः प्रायो भावोऽपि जायते प्रवरः । न चान्य उपयोग एतेषां सकाशाच्च लष्टतरः।।]

एवं भगवन्तं पूजयित्वा ऐर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिदण्डकैश्चैत्यवन्दनं विधाय स्तोत्रैरुत्त-मैरुत्तमकविविरचितैर्भगवतो गुणोत्कीर्तनं कुर्यात्, स्तोत्राणां चोत्तमत्वमेवमभिहितम्, यथा –

पिण्डक्रियागुणगतैर्गम्भीरैर्विविधवर्णसंयुक्तैः । आशयविशुद्धिजनकैः संवेगपरायणैः पुण्यैः ।।

पापनिवेदनगर्भैः प्रणिधानपुरस्सरैर्विचित्रार्थैः । अस्खलितादिगुणयुतैः स्तोत्रैश्च महामतिग्रथितैः ।। इति । यथा-

नानन्दोदकलेशलम्पटपुटं स्निग्धेऽपि बन्धौ जने, न क्रोधारुणिमास्पदं कृतबहुक्लेशेऽपि शत्रौ क्वचित् ।

ध्यानावेशविलोकिताखिलजगल्लक्ष्मीं क्रियाद्वश्चिरम्, चक्षुर्युग्ममयुग्मबाणजयिनः श्रीवर्धमानप्रभोः ।।

कृत्वा हाटककोटिभिर्जगदसद्दारिद्र्यमुद्राकथम्,
हत्वा गर्भशयानपि स्फुटमरीन्मोहादिवंशोद्भवान्।
तप्त्वा दुष्करमस्पृहेण मनसा कैवल्यहेतुं तपस्;
त्रेधा वीरयशो दधद्विजयतां वीरस्त्रिलोकीगुरुः ।।

यथा वा-संसारमारवपथे पतितेन नाथ ! सीमन्तिनीमरुमरीचिविमोहितेन ।
दृष्टः कृपारसनिधिस्त्वमतः कुरुष्व तृष्णापनोदवशतो जिन ! निर्वृत्तिं मे ।।

इत्यादिस्वरूपैः स्तोत्रैर्गुणोत्कीर्तनरूपा पूजा श्रीभगवतो विधेया, न पुनर्व्रीडामङ्गलातङ्कदायिभि-रेवंविधैर्यथा –

उत्तिष्ठन्त्यारतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा,
धृत्वा चान्येन वासो विगलितकबरीभारमंशं वहन्त्याः।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः;
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ।। तथा–
शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिम्,
क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम्।
विश्वं स्रक्ष्यति वक्ष्यति क्षितिमपामीशिष्यते शिष्यते;
नागै रागिषु रंस्यतेऽत्स्यति जगन्निर्वेक्ष्यति द्यामिति ।।

उपलक्षणत्वाच्च त्रिविधपूजाया अष्टप्रकाराऽपि सकलजनानन्ददायिन्यर्हतां पूजा विज्ञेयेति, यदुक्तम्–

वरगंधधूपचोक्खक्खएहिं कुसुमेहिं पवरदीवेहिं । नेवेज्जफलजलेहि य जिणपूआ अट्ठहा होइ।।

[वरगन्धधूपचोक्षाक्षतैः कुसुमैः प्रवरदीपैः । नैवेद्यफलजलैश्च जिनपूजाऽष्टधा भवति ।।] इति । ५-'**अवत्थतियभावणं चेव**'त्ति व्याचष्टे-'होई'त्यादि, जिने छद्मस्थकेवलिसिद्धत्वलक्षणमवस्थात्रितयं यथास्वरूपं भावनीयमिति भावः, तत्र छद्मस्थावस्थैवं भगवतो भावनीया, यथा–

'विस्फूर्जन्मदवारिवारणघटं रङ्गत्तुरङ्गोद्भटं, हर्षोल्लासिविलासिनीव्यतिकरं निःसीमसम्पद्भरम् ।
राज्यं प्राज्यसुखं विमुच्य भगवान्निःसङ्गतां योऽग्रहीद्धन्यैरेष जनैरचिन्त्यमहिमा विश्वप्रभुर्वीक्ष्यते ।।
धर्मध्याननिबद्धबुद्धिरसुहृद्भक्तेष्वभिन्नाशयो, जाग्रज्ज्ञानचतुष्टयस्तृणमणिस्वर्णोपलादौ सदृक् ।
निःसङ्गं विहरन्निदानरहितं कुर्वन् विचित्रं तपः, सत्पुण्यैरवलोक्यते त्रिजगतीनाथः प्रशान्ताकृतिः।। इत्यादि।

कैवल्यावस्था पुनरेवं भावनीया, यथा–

'रागाद्युत्कटशत्रुसंहृतिकरं यद्विक्रमक्रीडितम्, लोकालोकविलोकनैकरसिकं यज्ज्ञानविस्फूर्जितम् ।
मूलोन्मूलितविश्वसंशयशतं यद्भारतीवल्गितम्, धन्यैरेव जनैर्जगत्त्रयगुरुः सोऽयं समालोक्यते ।।
अहो विहितसंमदा त्रिभुवने विभूतिर्विभोरहो कृतमहोत्सवा ! त्रिजगतीदृशामाकृतिः ।
अहो वचनचातुरी मुषितकल्मषा देहिनामहो वशितविष्टपं सुगुणवेष्टितं चेष्टितम् ।।

सिद्धावस्थाऽप्येवं त्रिजगतीपतेर्भावनीया, यथा –

यस्य ज्ञानमनन्तमप्रतिहतं ज्ञेयस्थितौ दर्शनम्,
दोषत्यक्तमनन्तमुत्तमतमोऽनन्तः सुखानां चयः ।
वीर्यस्यानुपमः स कोऽपि महिमाऽनन्तस्त्रिलोकाद्भुतः;
सिद्धत्वे प्रथितः प्रभुः स भगवान् धन्यैः सदा ध्यायते ।।६६।।

तिदिसिनिरिक्खणविरई तिविहं भूमीपमज्जणं चेव ।
वन्नाइतियं मुद्दातियं च तिविहं च पणिहाणं ।।

६-**त्रिदिग्निरीक्षणविरति**र्यस्यां दिशि तीर्थकृत्प्रतिमा तत्सम्मुखमेव निरीक्षणं विधेयं न पुनरन्यदिक्त्रय-सम्मुखम्, चैत्यवन्दनस्यानादरतादिदोषप्रसङ्गात्, तथा ७-चैत्यवन्दनं कर्तुकामेन सत्त्वादिरक्षणनिमित्तं सम्यक् चक्षुषा निरीक्ष्य निजचरणनिक्षेप**भूमेः प्रमार्जनं** त्रिवारं विधेयम्, तच्च गृहिणा वस्त्राञ्चलेन यतिना तु रजोहरणेनेति । ८-**'वन्नाइतियं'**इति विवृणोति-'वन्नत्थालंबणओ वन्नाइतियं वियाणेज्ज'त्ति वर्णा-अकारककारादयोऽर्थः शब्दाभिधेयमालम्बनं प्रतिमादिरूपमेतस्मिंस्त्रितयेऽप्युपयुक्तेन भवितव्यम्, तत्रालम्बनं यथा-

'अष्टाभिः प्रातिहार्यैः कृतसकलजगद्विस्मयः कान्तकान्तिः,
सिञ्चन् पीयूषपूरैरिव सदसि जनं स्मेरदृष्टिप्रपातैः ।
निःशेषश्रीनिदानं निखिलनरसुरैः सेव्यमानः प्रमोदात्;
अर्हन्नालम्बनीयः स्फुरदुरुमहिमा वन्दमानेन देवः ।। इत्यादि ।

९-**'मुद्दातिगं'** चेति व्याचष्टे-जिनमुद्रा योगमुद्रा मुक्ताशुक्तिमुद्रा चेति मुद्रात्रयं ज्ञातव्यम्। १०-**'तिविहं च पणिहाणं'** इति विवृणोति-'कायमणोवयणनिरोहणं च तिविहं च पणिहाणं' इति कायमनोवचना-नामकुशलरूपाणां निरोधनं नियन्त्रणं शुभानां च तेषां करणमिति, तत्र कायं सुसंवृतं कृत्वा विहितकरकुशेशयकोशो मनसि तमेवाचिन्त्यचिन्तामणिचारुचरितं वन्द्यमानमर्हन्तं निवेश्य निजमधुरिमा-धरीकृतमधुमाधुर्यया वाचैवं प्रणिधानमाधत्ते, यथा -

जय त्रिजगतीपते शरण ! देहिनां श्रीजिनप्रसादवशतस्तव स्फुरतु मे विवेकः परः ।
भवेद्भवविरागिता भवतु संयमे निर्वृत्तिः परार्थकरणोद्यमः सह गुणार्जनैर्जायताम् ।। इत्यादि।।६७।।

चक्रे० : विधिवन्दनामुपसंहरन्तस्तत्फलमाहुः -

देव० : विधिवन्दनामुपसंहरंस्तत्फलमाह -

इय दहतियसंजुत्तं वंदणयं जो जिणाण तिक्कालं ।
कुणइ नरो उवउत्तो सो पावइ सासयं ठाणं ।।३६।।

चक्रे० : स्पष्टा, केवल**मुपयुक्त**स्तदेकाग्रो भाववन्दनया फलं लभते । यदाह -

वंदंतो सम्मं चेइयाइं सुहज्झाणपगरिसं लहइ ।
तत्तो य कम्मनासं पणट्ठकम्मो य निव्वाणं ।। [ ] ।।३६।।

देव० : स्पष्टा, नवर**मुपयुक्तो**ऽवहितो वर्णितविधावेव सोपयोगस्यैव भाववन्दनाभ्युपगमेन फलावाप्तेः । यदाह –

वदंतो सम्मं चेइयाइं सुहज्झाणपगरिसं लहइ ।
तत्तो य कम्मनासं पणट्ठकम्मो य निव्वाणं ।। [ ] इति ।।३६।।

** प्रवचनसारोद्धारे-६८ **

इय दहतियसंजुत्तं वंदणयं जो जिणाण तिक्कालं ।
कुणइ नरो उवउत्तो सो पावइ निज्जरं विउलं ।।

'तिन्नि निसीही'त्यादि गाथात्रयम्, अत्रैतद्गाथाद्वयप्रतिपादितानि **दश** च तानि **त्रिकाणि** च तैः **संयुक्तं** 'तियदहसंजुत्त'मिति पाठे त्रिकाणां दशकं तेन संयुक्तमिति व्याख्येयम्, **वन्दनकं यः** कश्चिद्भव्यो **जिनानां**-तीर्थकृतां **त्रिकालं** त्रिसन्ध्यं **करोत्युपयुक्तः** सोपयोगः सन् **स प्राप्नोति** सर्वकर्मक्षयकरीं मोक्षलक्ष्मीविधायिनीं च **निर्जरां विपुलामिति,** कुत्रापि 'सो पावइ सासयं ठाणं' इति पाठः, तत्रापि शाश्वतं स्थानं मोक्षमित्यर्थः ।।६८।।

चक्रे० : अथ १-पूजा२-अवस्था३-वर्णादि४-मुद्रा५-प्रणिधानत्रिकाणि सार्द्धगाथाद्वयेनाहुः –

देव० : अथ १-पूजा २-अवस्था ३-वर्णादि ४-मुद्रा ५-प्रणिधानत्रिकाणि सार्द्धेन गाथाद्वयेन विवृणोति –

पुप्फाऽऽमिसथुइभेया तिविहा पूया [१]अवत्थतिययं तु ।
होइ छउमत्थकेवलिसिद्धत्तं भुवणनाहस्स ।।३७।।
वन्नाइतियं तु पुणो वन्नत्थालंबणस्सरूवं तु ।
मणवयणकायजणियं तिविहं पणिहाणमवि होइ ।।३८।।
मुद्दातियं तु इत्थं विन्नेयं होइ जोगमुद्दाई ।
हरिभद्दसूरिविरइयगंथम्मि इमं जओ भणियं ।।३९।।

चक्रे० : पुष्पामिषस्तुतिभेदात्त्रिविधा पूजा, तत्र पुष्पग्रहणेन गन्धधूपस्नपनविलेपन-वस्त्राभरणादीन्युपलक्ष्यन्ते । आमिषं नैवेद्यमनेनाप्यखण्डाक्षतफलजलघृतप्रदीपादीनि । स्तुतिः श्लोकवृत्यात्मिका । **अवस्थात्रिकं तु छद्मस्थकेवलिसिद्धत्वाख्यं भवति भुवननाथस्य** छद्मस्थावस्था केवल्यवस्था सिद्धत्वावस्था **चे**त्यर्थः ।।३७।।

१. अवत्थतियगं तु P,K

वर्णादित्रिकं च **पुनर्वर्णार्थालम्बनस्वरूपम्**, वर्णा व्यक्ताः शुद्धाश्चोच्चार्याः, अर्थो वर्णार्थश्चिन्त्य आलम्बनं जिनबिम्बम् । **मनोवचनकायजनितं प्रणिधानमपि त्रिविधं भवति**, संवेगरसानुविद्धं चित्तस्थैर्यं मनःप्रणिधानम्, आलापसम्पत्सत्यापनयुक्तसूत्रोच्चारणं वचन-प्रणिधानम्, निभृताङ्गोपाङ्गत्वं कायप्रणिधानम् ।। ३८।।

मुद्रात्रिकं पुन**रत्र** चैत्यवन्दनायां **विज्ञेयं भवति, योगमुद्रादि** योगमुद्रा, जिनमुद्रा मुक्ता-शुक्तिमुद्राख्यम् । क्व तदित्याशङ्कायां वृद्धसाम्मत्यदर्शनायाह – **हरिभद्रसूरिविरचितग्रन्थे** पञ्चाशकाख्य **इदं यतो भणितम्** ।।३९।।

देव० : पुष्पामिषस्तुतिभेदात् त्रिविधा पूजा, [१]ननु पूर्वमष्टधा बहुधा च पूजोक्ता, इयं तु त्रिधेति कथं न विरोधः ? उच्यते, तेषु त्रिषु भेदेष्वष्टानामवशिष्टानां च भेदानामन्तर्भावो विवक्षावशात्, तथाहि-पुष्पोपादानात् स्नपनसमालभनमण्डनगन्धधूपवस्त्राभरणाद्यङ्गपूजासङ्ग्रहः, आमिषं नैवेद्यं तच्च तण्डुलफलपक्वान्नखण्डशर्करेक्षुजलदीपनृत्यवाद्यस्वस्तिकरङ्गावलीतोरणा-द्यग्रपूजोपलक्षणम्, स्तुतिग्रहणादेकादिसप्तान्तश्लोकाष्टकचतुर्विंशतिकाद्वात्रिंशिकापञ्चाशि-काष्टोत्तरशतश्लोकबहुविधगीतादिस्तवनविधिपरिग्रहः । **अवस्थात्रिकं तु भवति भुवननाथस्ये**ति योगः, किं तदित्याह -**छद्मस्थश्च केवली च सिद्धश्च** तेषां भावस्तत्त्वम्, छद्मस्थावस्था केवल्यवस्था सिद्धावस्था चेत्यर्थ इति।।३७।।

वर्णादित्रिकं तु पुनरित्यव्ययं पुनः शब्दार्थे भवतीति योगः, **वर्णार्थालम्बनस्वरूपम्, तु**रेवकारार्थः, तत्र वर्णा व्याविद्धव्यत्याम्रेडितत्वादिदोषरहितान्यक्षराण्यर्थस्तदभिधेयम्, आलम्बनं जिनबिम्बमेतानि स्वरूपं यस्य तत्तथा तथा **मनोवचनकायजनितं प्रणिधानमपि त्रिविधं भवति,** तत्र संवेगरसानुविद्धमन्तःकरणस्थैर्यं मनःप्रणिधानम्, प्रतिकुञ्चितादिदोषरहितसूत्रोच्चारणं वचनप्रणिधानम्, निभृताङ्गोपाङ्गत्वं कायप्रणिधानमिति ।।३८।।

तथा **मुद्रात्रिकं** पुन**रित्थमित्य**नुस्वारस्य प्राकृतप्रभवत्वादत्र चैत्यवन्दनायां **विज्ञेयं भवति योगमुद्रादि,** योगमुद्रा जिनमुद्रा मुक्ताशुक्तिमुद्रालक्षणम् । कुतः पुनरिदमित्याशङ्कायां वृद्ध-सम्मतमुपदर्शयितुकाम उत्तरार्धमाह – सुगमा, नवरं **हरिभद्रसूरिविरचितग्रन्थे** पञ्चाशकाख्य इति ।।३९।।

१. तत्र पुष्पाणि जलस्थलजानि, गन्धधूपागरुस्नपनविलेपनवस्त्राभरणादीनां पुष्पप्रकाराणामुपलक्षणं चेदम्, आमिषं नैवेद्यमनेनाप्यखण्डाक्षतफलजलघृतप्रदीपादीनि नैवेद्यप्रकाराण्युपलक्ष्यन्ते । स्तुतिरेकद्वित्र्यादिश्लोकमाना । गम्भीरातिशयोक्तिस्तवदण्डककुलकादीनि स्तुतिप्रकाराण्येतदप्युपलक्षयतीति । T,B,C.

** सङ्गाचारभाष्ये-११, १४ **

पूजां च कुर्वतो भगवतोऽवस्थात्रिकं भावनीयमिति पञ्चमं तत् त्रिकं पर्यायाभ्यामाह -

भाविज्ज अवत्थतियं पिंडत्थ-पयत्थ-रूवरहियत्तं ।
छउमत्थ-केवलित्तं सिद्धत्थं चेव तस्सत्थो ।।

भावितार्था, ननु च-

पिण्डस्थं च पदस्थं च, रूपस्थं रूपवर्जितम् । ध्यानं चतुर्विधं ज्ञेयं, संसाराणर्वतारकम्।।

इति चतुर्धा ध्यानवेदिभिर्ध्यानमुच्यते, अत्र त्ववस्थात्रिकेण ध्यानत्रयमुक्तम्, अतोऽत्र चतुर्थं ध्यानं कथं स्याद् ? उच्यते, रूपस्थध्यानं हि जिनबिम्बादिदर्शनतः प्रथममेव सञ्जायते, यत उक्तम् -

पश्यति प्रथमं रूपं स्तौति ध्येयं ततः पदैः । तन्मयः स्यात्ततः पिण्डे, रूपातीतः क्रमाद्भवेत् ।।

इति स्यादेव यथोक्तध्यानसिद्धिः । अथ भव्यजनानुग्रहाय किञ्चिद् ध्यानचतुष्टयभावनोच्यते -

पूजादिषु देहस्थं यथास्थमूर्त्तिं जिनादिकं मनसा । तद्रूपं चात्मानं यद् ध्यायेत् तदिह पिण्डस्थम् ।।
मन्त्रादिषु गुरुदेवस्तुतौ तथा पावनापरपदेषु। हृत्पद्मादिपदेषु च यद् ध्यानं तत्पदस्थमिह ।। तत्र-
विघ्नविपक्षयशिवशान्तिपुष्टिकवित्वचरितादिषु सितानि । क्षोभे विद्रुमवर्णान्याकृष्टावरुणवर्णानि ।।
वश्ये रक्तान्यसितानि मारणे मोहने तु नीलानि । स्तम्भे पीतानि द्वेषणेऽर्द्धनीलार्धरक्तानि ।।
धूम्राण्युच्चाटनके राजावर्त्तकनिभानि परविजये । मरकतभानि भयहृतौ ध्यायेन् मन्त्राक्षराणि सदा ।।
स्वर्णादिप्रतिमास्थितमर्हद्रूपं यथास्थितं पश्येत । सप्रातिहार्यशोभं यत् तद् ध्यानमिह रूपस्थम् ।।
सिद्धममूर्त्तमलेपं सदा चिदानन्दमयमनाधारम् । परमात्मानं ध्यायेद् यद्रूपातीतमिह तदिदम् ।।
स्वर्णादिबिम्बनिष्पत्तौ कृते निर्मदनेऽन्तरा । ज्योतिष्पूर्णे च संस्थाने रूपातीतस्य कल्पना ।।
विभवश्च शरीरं च बहिरात्मा निगद्यते । तदधिष्ठायको जीवस्त्वन्तरात्मा सकर्म्मकः ।।
निरातङ्को निराकांक्षो निर्विकल्पो निरञ्जनः । परमात्माऽक्षयोऽत्यक्षो ज्ञेयोऽनन्तगुणोऽव्ययः ।।
यथा लोहं सुवर्णत्वं प्राप्नोत्यौषधियोगतः । आत्मध्यानात्तथैवात्मा परमात्मत्वमश्नुते ।।
लिङ्गत्रयविनिर्मुक्तं सिद्धमेकं निरञ्जनम् । निराश्रयं निराहारमात्मानं चिन्तयेद् बुधः ।।११।।

अथ वर्णादित्रयमित्यष्टमं त्रिकं गाथापूर्वार्द्धेन भाष्यकृद् विवृण्वन्नाह -

वन्नतियं वन्नत्थालंबणमालंबणं तु पडिमाई ।

वर्णत्रिकमुच्यते, किमित्याह-**वर्णार्थालम्बनानि,** तत्र वर्णाः स्तुतिदण्डादिगतान्यक्षराणि, ते च स्फुटं संपदच्छेदसुविशुद्धान्यूनातिरिक्ता उच्चार्याः, यदवाचि भाष्ये -

थुइदंडाई वन्ना उच्चरियव्वा फुडा सुपरिसुद्धा। सरवंजणाइभिन्ना सपयच्छेया उचियघोसा।।

अर्थश्च तेषामेवाभिधेयः, स यथापरिज्ञानं चिन्त्यः, न्यगादि च –

चिंतेयव्वो सम्मं तेसिं अत्थो जहापरिन्नाणं । सुन्नहियत्तमिहरहा उत्तमफलसाहगं न भवे ।।

आलम्बनं तु स्वयमेव भाष्यकृद् व्याख्यानयति–**आलंबनं तु पडिमादि**त्ति, आलम्बनं पुनर्देवान् वन्दमानस्य चन्द्रनरेन्द्रस्येवाश्रयणीयम्, किं तत् ? प्रतिमादि, आदिशब्दाद् भावार्हदादिपरिग्रहः, यदभाणि-

भावारिहंतपमुहं सरिज्ज आलंबणंपि दंडेसु । अहवा जिणबिंबाई जस्स पुरो वंदणारद्धं ।।

इति प्रतिपादितं वर्णादित्रिकमित्यष्टमं त्रिकम्, अथ नवमं मुद्रात्रिकं नामतो गाथोत्तरार्धेनाह –

जोगजिणमुत्तसुत्ती मुद्दाभेएण मुद्दतियं ।।

मुद्राशब्दः पृथग् योज्यते, ततश्च **योग**मुद्रा**जिन**मुद्रा**मुक्ताशुक्ति**मुद्राभेदान्**मुद्रात्रिकं** भवतीत्यर्थः ।।१४।।

चक्रे० : तद्भणितमेव गाथापञ्चकमाहुः –

देव० : अथ तद्भणितमेव गाथापञ्चकेनाह –

पंचंगो पणिवाओ थयपाठो होइ जोगमुद्दाए ।
वंदण जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ।।४०।।
दो जाणू [१]दोन्नि करा पंचमगं होइ उत्तमंगं तु ।
सम्मं संपणिवाओ नेओ पंचंगपणिवाओ ।।४१।।
[२]अन्नोन्नंतरियंगुलिकोसागारेहिं दोहिं हत्थेहिं ।
पिट्ठोवरिकुप्परसंठिएहिं [३]तह जोगमुद्दत्ति ।।४२।।
चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ ।
पायाणं उस्सग्गो एसा पुण होइ जिणमुद्दा ।।४३।।
मुत्तासुत्तीमुद्दा समा जहिं दो वि गब्भिया हत्था ।
ते पुण निलाडदेसे लग्गा अन्ने अलग्गत्ति ।।४४।।

चक्रे० : पञ्चाङ्गानि भूस्पर्शानि यत्र स **पञ्चाङ्गः**, **प्रणिपातः** प्रणामः, शक्रस्तवस्यादावन्ते च

१. दुन्नि P,K. २. अन्नुन्नंतरियंगुलि P,K. ३. पिट्ठुवरिकोप्पर P,K पेट्टोवरिकुप्पर A

भवति स्तवपाठः शक्रस्तवादिपठनं **योगमुद्रया** । **वन्दनं** 'अरिहंतचेइयाणं' इत्यादि दण्डकपाठो **जिनमुद्रया,** इयं च पादाश्रिता योगमुद्रा च हस्ताश्रितेत्युभयोरप्यत्र प्रयोगो ज्ञेयः, **प्रणिधानं** शुभार्थप्रार्थनारूपं 'जय वीयराय' इत्यादि पाठात्मकं **मुक्ताशुक्तिमुद्रया**।।४०।।

पञ्चाङ्गप्रणिपातव्याख्यात्री **'दो जाणू दुन्निकरे'**ति गाथा सुगमा ।।४१।।

योगमुद्रामाहुः – अन्योन्यस्यान्तर्विचालमिताः प्राप्ता अङ्गुल्यो ययोस्तावन्**योन्यान्तरिताङ्गुली,** तौ च तौ **कोशाकारौ** च कमलकोरकाकृती ताभ्यां **द्वाभ्यां हस्ताभ्याम्** । **'पिट्ठुवरि कोप्पर संठिएहिं'** ति प्राकृतत्वाच्छब्दव्यत्यये पेट्टोपरि संस्थितकूर्पराभ्याम्, **तथे**ति प्रणिपातापेक्षया समुच्चये । योगो हस्तयोर्योजनविशेषः समाधिर्वा तत्प्रधाना मुद्राऽङ्गन्यासविशेषो विघ्नविघातनक्षमो **योगमुद्रा, इत्ये**वंप्रकारेत्यर्थः ।।४२।।

अथ जिनमुद्रामाहुः – **चत्वार्यङ्गुलानि पुरत ऊनानि** किञ्चिन्न्यूनानि **पश्चिमतः** पश्चाद्भागे **यत्र** मुद्रायां **पादयोरुत्सर्गः** परस्परपरित्यागः संसर्गाभावोऽन्तरमित्यर्थः । **एषा पुनर्भवति जिनमुद्रा** जिनानामर्हतां कृतकायोत्सर्गाणां स्वयं वा जिना विघ्नजेत्री मुद्रा जिनमुद्रेति ।।४३।।

मुक्ताशुक्तिमुद्रा गाथा स्पष्टा, नवरं समौ नान्योन्यान्तरिताङ्गुलितया विषमौ । **'गब्भिय'**त्ति गर्भितावुन्नतमध्याविति गाथापञ्चकार्थः ।।४४।।

देव० : तत्र पञ्चाङ्गान्येव यथाविवक्षितव्यापारवन्ति यत्र स **पञ्चाङ्गप्रणिपातः,** प्रणिपातदण्डकपाठस्यादाववसाने च प्रणामो भवति कर्तव्य इति शेषः । यद्यपीह पञ्चाङ्गप्रणिपात इत्युक्तं तथापि पञ्चाङ्गमुद्रया प्रणिपात इति द्रष्टव्यम्, मुद्राणामेवाधिकृतत्वात् । तदुक्तं च– 'पञ्चाङ्ग्या अपि मुद्रात्वमङ्गविन्यासविशेषरूपत्वाद्योगमुद्रावदिति ।' तथा **स्तवपाठः** शक्रस्तवादिस्तवपठनं **भवति**[१] कर्तव्य इति शेषः । कयेत्याह – **योगमुद्रया** वक्ष्यमाणलक्षणया ।

ननु चतुर्विंशतिस्तवादेरेव पाठो योगमुद्रया विधेयः, न तु शक्रस्तवस्य, तं हि 'समाकुञ्चितवामजानुर्भूविन्यस्तदक्षिणजानुर्ललाटपट्टघटितकरकुड्मलः पठती'ति **जीवाभिगमादिष्व**भिधीयत इति । सत्यम्, केवलं नानन्तरोक्तविशेषणयुक्त एव तं पठतीति नियमोऽस्ति, पर्यङ्कासनस्थः शिरोविनिवेशितकरकोरकस्तं पठतीत्यस्यापि **ज्ञाताधर्मकथादिषु** दर्शनात् तथा **हरिभद्राचार्येणापि** चैत्यवन्दनवृत्तौ 'क्षितिनिहितजानुकरतलो भुवनगुरौ विनिवेशितनयनमानसः प्रणिपातदण्डकं पठति'इत्यस्य विध्यन्तरस्याभिधानात्, ततोऽस्य पाठे विविधविधिदर्शनात्सर्वेषां

१. कर्तव्यमिति A

च तेषां प्रमाणग्रन्थोक्तत्वेन विनयविशेषभूतत्वेन च निषेद्धुमशक्यत्वाद्योगमुद्रयापि शक्रस्तवपाठो न विरुद्ध्यते विचित्रत्वान्मुनिमतानाम्, न चैतानि परस्परमतिविरुद्धानि, सर्वैरपि विनयस्य दर्शितत्वादिति । तथा **'वंदण'**त्ति इहानुस्वारलोपो द्रष्टव्यस्तेन वन्दनं 'अरिहंतचेइयाणं' इत्यादि दण्डकपाठेन जिनबिम्बादिस्तवनं **जिनमुद्रयो**पदेक्ष्यमाणलक्षणया, इयं च पादाश्रिता योगमुद्रा च हस्ताश्रितेत्युभयोर्वन्दने प्रयोगः । तथा **प्रणिधानं** शुभार्थप्रार्थनारूपम्, विशिष्टचित्तैकाग्रतागर्भं 'जय वीयराय' इत्यादिपाठरूपं **मुक्ताशुक्त्या** निर्देक्ष्यमाणमुद्रया कर्तव्यमिति गाथार्थः ।।४०।।

अथ पञ्चाङ्गप्रणिपातादीनां व्याख्यानायाह – **द्वे जानुन्य**ष्ठीवन्तौ **द्वौ करौ** हस्तौ, पञ्चममेव **पञ्चमकं भवति** वर्तत **उत्तमाङ्गं तु** शिर एवेत्यनेन पञ्चाङ्ग इति व्याख्यातम्, अथ प्रणिपात-व्याख्यानाय आह – एतैरेव पञ्चभिरङ्गैः **सम्यग**भक्तितो भून्यासतो यः **संप्रणिपातः** प्रणामोऽसौ **ज्ञेयो** ज्ञातव्यः **पञ्चाङ्गप्रणिपातः** पूर्वोक्तनिर्वचन इति ।।४१।।

योगमुद्रास्वरूपमाह–**अन्योऽन्येन** परस्परेणा**न्तरिता** व्यवहिता **अङ्गुल्यः** करशाखा ययोस्तौ, तथा तौ च तौ **कोशाकारौ** च कमलकोरकाकृती उभयजोडनेनान्योन्यान्तरिताङ्गुलि-कोशाकारौ ताभ्यां, **द्वाभ्यां हस्ताभ्याम्,** किंभूताभ्याम् ? **पेट्टस्यो**[१]**दरस्योपर्यू**र्ध्वभागे **कूर्पराभ्यां** कुहणिका[२]भ्यां **संस्थितौ** व्यवस्थितौ यौ तौ तथा ताभ्याम्, पेट्टो[३]परिकूर्परसंस्थिताभ्याम्, **तथा** तेन प्रकारेणाचरणगम्येनाथवा पञ्चाङ्गप्रणिपातापेक्षया समुच्चयार्थस्तथाशब्दः । योगो हस्तयो-र्योजनविशेषः समाधिर्वा, तत्प्रधाना मुद्रा अङ्गन्यासविशेषा विघ्नविशेषव्यपोहनसमर्था **योगमुद्रा** भवतीति गम्यते । **इति**शब्दो योगमुद्रालक्षणसमाप्तिसंसूचक उपप्रदर्शनार्थो वा, इत्येवंप्रकारा योगमुद्रेत्यर्थः ।।४२।।

अथ जिनमुद्रामाह – **चत्वारी**तिसङ्ख्या **अङ्गुलानि** प्रतीतानि, तानि च स्वकीयान्येव **पुरतो**ऽग्रतस्त**थोनानि** किञ्चिदूनानि चत्वार्येवाङ्गुलानि **यत्र** यस्यां मुद्रायां **पश्चिमतः** पश्चिम-भागेऽथ **पादयो**श्चरणयो**रुत्सर्गः** परस्परपरित्यागः संसर्गाभावोऽन्तरमित्यर्थः, **एषा**सौ, **पुनः**शब्दो योगमुद्रापेक्षया जिनमुद्राया वैलक्षण्यप्रतिपादनार्थः, **भवति** संपद्यते जिनानामर्हतां कृतकायो-त्सर्गाणां सत्का, जिना वा विघ्नजेत्री मुद्रा अङ्गन्यासविशेषो **जिनमुद्रे**ति ।।४३।।

अथ मुक्ताशुक्तिमुद्रामाह–मुक्ताशुक्तिरिव **मुक्ताशुक्तिर्मुद्रा** प्रतीता सा भवतीति वाक्यशेषः, **समौ** नान्योऽन्यान्तरिताङ्गुलितया विषमौ **यस्यां** मुद्रायां भवतः, ततः **गर्भिता**विव गर्भितावुन्नत-मध्यौ, न तु नीरन्ध्रौ **हस्तौ** पाणी, इहैव लक्षणशेषमाह – **तौ** मुक्ताशुक्तिविधायकौ हस्तौ, **पुनः-**

१. पिट्टत्ति A २. कफणिकाभ्यां A ३. उदरोपरि A

शब्दो लक्षणान्तरत्वद्योतनार्थः । **ललाटदेशे** भाललक्षणे शरीरभागे **लग्नौ** सम्बद्धौ कार्यौ, **अन्ये** त्वपरे पुनराचार्या **अलग्ना**वसम्बद्धौ ललाटदेश ए**वेत्ये**तदाहुरिति शेष इति । ननु प्रणिधानं मुक्ताशुक्त्येत्युक्तम्, तच्च किल वन्दनान्ते क्रियते, अतः शेषा वन्दना प्रणिधानविरहितैव करणीयेति प्राप्तमित्यत्रोच्यते यदेतद्वन्दनान्ते प्रणिधानं तत्प्रार्थनागर्भोपयोगरूपम्, यत्पुनर्वन्दनायां तत्तदेकाग्रतारूपमतस्तत्सर्वत्र वन्दनायां विधेयमिति गाथापञ्चकार्थः ।।४४।।

**** प्रवचनसारोद्धारे-७२, ७३ ****

तत्र मुद्रात्रयमध्ये यस्या यत्र व्यापारस्तां तत्र दर्शयति –

पंचंगो पणिवाओ थयपाढो होइ जोगमुद्दाए ।
वंदण जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ।।

'पंचंगे'त्यादि पञ्चाङ्गानि–अवयवा विवक्षितव्यापारवन्ति यत्र स **पञ्चाङ्गः प्रणिपातः**–प्रणिपातदण्डकपाठस्यादाववसाने च प्रणामो भवति कर्तव्य इति शेषः, यद्यपीह पञ्चाङ्गः प्रणिपात इत्युक्तं तथापि पञ्चाङ्गमुद्रया प्रणिपात इति द्रष्टव्यम्, मुद्राणामेवाधिकृतत्वात्, युक्तं च पञ्चाङ्ग्या अपि मुद्रात्वमङ्गविन्यासविशेषरूपत्वाद्योगमुद्रावदिति । तथा **स्तवपाठः** शक्रस्तवादिरूपो **भवति योगमुद्रया, वन्दनं** चैत्यवन्दनं 'अरहंतचेइयाणं' इत्यादिकं **जिनमुद्रया,** अनुस्वारश्चात्र लुप्तो द्रष्टव्यः, इयं च पादाश्रिता योगमुद्रा हस्ताश्रितेत्युभयोरपि चैत्यवन्दने व्यापारः, **प्रणिधानं** 'जय वीयराये'त्यादिकं **मुक्ताशुक्ति**मुद्रयेति।।७२।।

अथ पञ्चाङ्गप्रणिपातलक्षणनिरूपणापूर्वकमेतासामेव मुद्राणां लक्षणं दर्शयति –

दो जाणू दुन्नि करा पंचमगं होइ उत्तमंगं तु ।
संमं संपणिवाओ नेओ पंचंगपणिवाओ ।।

'दो जाणू' इत्यादि, तत्र पञ्चभिरङ्गैः **सम्यक्** समीचीनतया प्रकर्षेण निपतनं **संप्रणिपातो ज्ञेयः पञ्चाङ्गप्रणिपातः,** तत्र कानि पञ्चाङ्गानीति दर्शयति-**द्वे जानुनी द्वौ करौ पञ्चमकं भवत्युत्तमाङ्गं** च, तुशब्दः-समुच्चयार्थचशब्दार्थः।।७३।।

**** सङ्गाचारभाष्ये-१५, १६, १७ ****

आसां स्वरूपमाह –

अन्नुन्नंतरि अंगुली कोसागारेहिं दोहिं हत्थेहिं ।
पिट्ठोवरिकुप्परिसंठिएहिं तह जोगमुद्दति ।।

चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ ।
पायाणं उस्सगो एसा पुण होइ जिणमुद्दा ।।
मुत्तासुत्ती मुद्दा जत्थ समा दोऽवि गब्भिया हत्था ।
ते पुण निलाडदेसे लग्गा अन्ने अलग्गत्ति ।।

उभयकरजोडनेन परस्परमध्यप्रविष्टाङ्गुलिभिः कृत्वा पद्मकुड्मलाकाराभ्यां तथोदरस्योपरि कुहणिकया व्यवस्थिताभ्यां योगो-हस्तयोर्योजनविशेषस्तत्प्रधाना मुद्रा, **योगमुद्रा** इत्येवंस्वरूपा भवतीति गम्यम् ।।१५।।

चत्वार्यङ्गुलानि स्वकीयान्येव **पुरतोऽग्रतस्तथोनानि** किञ्चिदूनत्वार्येवाङ्गुलानि **यत्र** मुद्रायां **पश्चिमतः** पश्चाद्भाग एवं **पादयोरुत्सर्गः** परस्परसंसर्गत्यागोऽन्तरमित्यर्थ **एषा पुनर्भवति** जिनानां कृतकायोत्सर्गाणां सत्का जिना वा विघ्नजेत्री मुद्रा **जिनमुद्रेति** ।।१६।।

मुक्ताशुक्तिरिव मुद्रा हस्तविन्यासविशेषो **मुक्ताशुक्तिमुद्रा,** सा चैवम्-**समौ** नान्योऽन्यान्तरिताङ्गुलितया विषमौ, **द्वावपि,** न त्वेको, गर्भिताविव **गर्भितावुन्नतमध्यौ,** न तु नीरन्ध्रौ, चिप्पिटाविव्यर्थः, **हस्तौ** पुनरुभयतोऽपि सोल्लासौ करौ भालमध्यभागे **लग्नौ** सम्बद्धौ कार्याविव्येके सूरयः प्राहुः, **अन्ये** पुनस्तत्रा**लग्नावि**त्येव वदन्ति, तत्र मध्यमभागमध्यवर्त्याकाशगताविव्यर्थः ।।१७।।

चक्रे० : अथ व्याख्यातशेषत्रिकस्वरूपं निरूप्य तदाचरणफलमाहुः -

देव० : अथ व्याख्यातशेषत्रिकार्थस्वरूपं निरूप्य तदाचरणफलमाह -

पयडो सेसतियत्थो तत्तो नाऊण एय तियदसगं ।
सम्मं समायरंतो विहिचेइयवंदगो होइ ।।४५।।

चक्रे० : प्रकटार्था ।।४५।।

देव० : प्रकटः स्पष्टः **शेषत्रिकाणां** नैषेधिकीत्रिकादीनामर्थः । **'तत्तो'** इति द्वित्वं प्राकृतत्वात्, ततः पूर्वेषां विवरणादमीषां च प्राकट्याज्**ज्ञात्वा**धिगम्**यैतत् त्रिकदशकं सम्यग्**यथावत्**समाचरन्** विदधानो[१] विधिना सूत्रक्रमेण[२] चैत्यानामर्हत्प्रतिमानां वन्दको **विधिचैत्यवन्दको भवति,** तदन्यस्तु यथाकथञ्चिल्लोकप्रवाहतो वन्दमानोऽप्यविधिचैत्यवन्दक इत्यावेदितं भवतीति गाथार्थः ।।४५।।

१. 'श्रुतत्वात्त्रिकदशकमेव' इत्यधिकं पदं सर्वादर्शेषु दृश्यन्ते २. सूत्रोक्तेन M

चक्रे० : समाप्तश्चैत्यवन्दनाविधिरधुना स एव कस्य कतिवारा भवतीत्याहुः –

देव० : अवसितश्चैत्यवन्दनाविधिरधुना स एव कस्य कतिवारा भवतीत्याह–

साहूण सत्तवारा होइ अहोरत्तमज्झयारम्मि ।
गिहिणो पुण चिइ[१]वंदण तिय पंच व सत्त वा वारा ।।४६।।

चक्रे० : सुगमा ।।४६।।

देव० : सुगमा ।।४६।।

**** प्रवचनसारोद्धारे-८९ ****

ननु ज्ञातस्तावच्चारुचैत्यवन्दनविधिः, परमेवंविधविधिविशुद्धं चैत्यवन्दनमहोरात्रमध्ये साधुभिः श्रावकैश्च कियतीर्वारा विधीयत इति ?, तत्राह –

साहूण सत्तवारा होइ अहोरत्तमज्झयारंमि ।
गिहिणो पुण चिइवंदण तिय पंच य सत्त वा वारा ।।

'साहूण सत्त वारे'त्यादि, **साधूनां सप्तवारा अहोरात्रमध्ये भवति** चैत्यवन्दनम्, **गृहिणः** श्रावकस्य **पुनश्चैत्यवन्दनं** प्राकृतत्वाल्लुप्तप्रथमैकवचनान्तमेतत् **तिस्रः पञ्च सप्त वा वारा** इति ।।८९।।

चक्रे० : अथ कथं यतेः सप्तवाराश्चैत्यवन्दनेत्याहुः –

देव० : अथ कथं यतेः सप्तवाराश्चैत्यवन्दनेत्याह –

पडिकमणे चेइयहरे भोयणसमयंमि तह य संवरणे ।
पडिकमण-सुयण-पडिबोहकालियं सत्तहा जइणो ।।४७।।

चक्रे० : एषाऽपि प्रकटैव, नवरं '**पडिबोह**'त्ति प्रतिबोधः प्रातरुत्थानम्, गृहिणः पुनस्त्रयः पञ्च सप्त वा वारा एतद्गाथानुसारतः ज्ञेयास्तथाहि –

पडिक्कमओ गिहिणो वि हु सत्तविहं पंचहा उ इयरस्स ।
होइ जहन्नेण पुणो तीसु वि संझासु इय तिविहं ।। [प्रव.सारो० ९१] ।।४७।।

देव० : प्रतिक्रमण इत्युक्तेऽपि प्रतिक्रमणान्त इति दृश्यम्, ततश्च प्रतिक्रमणान्ते, प्रातरावश्यकान्ते, **चैत्यगृहे** जिनमन्दिरे, **भोजनसमये** जेमनकाले, **तथा चे**ति समुच्चये, **संवरणे** समयशब्दस्याऽत्रापि सम्बन्धाद्भोजनोर्ध्वं प्रत्याख्यानसमये विधीयमानमिति शेषस्तथा प्रतिक्रमणं

१. चियवंदण P वंदणगं K

च दिनान्तावश्यकम्, स्वपनं च शयनम्, प्रतिबोधश्चोत्थानम्, तेषां कालस्तत्र भवं **प्रतिक्रमण-स्वपनप्रतिबोधकालिकं सप्तधा यते**श्चैत्यवन्दनं भवतीति योगः । गृहिणः पुनस्त्रयः पञ्चसप्त वा वारा एतद्गाथानुसारतोऽवसेयाः, तथाहि –

पडिकमओ[१] गिहिणो वि हु सत्तविहं पंचहा उ इयरस्स ।
होइ जहन्नेण पुणो तीसु वि संझासु इय तिविहं ।। [प्रव.सारो॰ ९१]

इति गाथार्थः ।।४७।।

** प्रवचनसारोद्धारे-९० **

तत्र साधूनामहोरात्रमध्ये कथं तत्सप्तवारा भवतीत्याह –

पडिक्कमणे चेइहरे भोयणसमयंमि तह य संवरणे ।
पडिक्कमणे सुयण-पडिबोहकालियं सत्तहा जइणो ।।

'पडिक्कमणे'त्यादि, १-प्राभातिक**प्रतिक्रमण**पर्यन्ते, २-तत**श्चैत्यगृहे,** तदनु ३-**भोजनसमये, तथा चेति** समुच्चये ४-भोजनानन्तरं **च संवरणे** संवरणनिमित्तं प्रत्याख्यानं हि पूर्वमेव चैत्यवन्दने कृते विधीयते, तथा ५-सन्ध्यायां **प्रतिक्रमण**प्रारम्भे, तथा ६-**स्वाप**समये, तथा ७-निद्रामोचनरूप**प्रतिबोधकालिकं** च **सप्तधा** चैत्यवन्दनं भवति, **यते**र्जातिनिर्देशादेकवचनं यतीनामित्यर्थः।।९०।।

** यतिदिनचर्यायाम्-६३ **

अथ चैत्यनमस्करणप्रस्तावात् साधोः कियन्ति चैत्यवन्दनानीत्याह –

पडिकमणे चेइहरे भोअणसमयंमि तहय संवरणे ।
पडिकमण सुअण-पडिबोहकालियं (इय) सत्तहा जहणो ।।

साधोः प्रथमा चैत्यवंदना **प्रतिक्रमणे** रात्रिप्रतिक्रमणे, द्वितीया **चैत्यगृहे** जिनभवने, तृतीया **भोजनसमये** चारवेलायां, चतुर्थी **संवरणे** कृतभोजनः साधुः सततं चैत्यवंदनं करोति, पञ्चमी **प्रतिक्रमणे** दैवसिकप्रतिक्रमणे, षष्ठी **शयने** संस्तारककरणसमये, सप्तमी **प्रतिबोधकाले** निद्रापरित्यागे, एताः सप्त चैत्यवन्दना **यतिनो** ज्ञातव्याः, यदाहुः –

साहूणं सत्त वारा होइ अहोरत्तमज्झयारंमि । गिहिणो पुण चियवंदण तिय पंच य सत्त वा वारा ।।

पडिकमओ गिहिणोऽवि हु सत्तविहं पंचहा उ इयरस्स ।
होइ जहन्नेण पुणो तीसुवि संझासु इय तिविहं ।।६३।।

१. पडिकमणो A

चक्रे० : चैत्यवन्दनासङ्ख्याविधिरुक्तः, स च प्रायो जिनगृहे कार्य इति सम्बन्धेन तद्गतमेव विधिविशेषोपदेशमाहुः –

देव० : यावत्कृत्वश्चैत्यवन्दना विधेयेत्यभिहितम्, सा च प्रायो जिनवेश्मनि कर्तव्येति सम्बन्धेन तद्गतमेव विधिशेषोपदेशमाह –

जिणमंदिरभूमीए दसगं आसायणाण वज्जेह ।
जिणदव्वभक्खणे रक्खणे य दोसे[१] गुणे मुणह ।।४८।।

चक्रे० : स्पष्टा, नवरं चकारादुपेक्षणे चेति ज्ञेयम् ।।४८।।

देव० : जिनमन्दिरभूमावर्हद्गृहजगत्यामायं सम्यक्त्वादिलाभं शातयन्ती**त्याशातना**स्तासां **दशकं वर्जयत** परिहरत । तथा **जिनद्रव्यभक्षणे रक्षणे च** यथासङ्ख्यं **दोषान् गुणां**श्चकारादुपेक्षणे दोषान्**मुणता**वबुध्यध्वमिति गाथार्थः ।।४८।।

चक्रे० : किं तदाशातनादशकमित्याहुः –

देव० : किं तदाशातनादशकमित्याह –

तंबोल-पाण-भोयणोपाणह-थीभोग-सुयण-निद्दुवणं[२]।
मुत्तुच्चारं जूयं वज्जे जिणमंदिरस्संतो[३] ।।४९।।

चक्रे० : प्रतीतार्था, केवलमुपलक्षणमेतत्पर्यस्तिकाचसूरिचिहुरविचरणचरणप्रसारणावष्टम्भाट्टहासखिङ्गचेष्टादिकमपि वर्जनीयम् ।।४९।।

देव० : ताम्बूलं च प्रतीतम्, **पानं** च जलादेः, **भोजनं** चाभ्यवहार, **उपानहौ** च पादुके, **स्त्रीभोगश्च** मैथुनम्, **स्वपनं** च शयनम्, **निष्ठीवनं** च खेलश्लेष्माद्युज्झनमिति समाहारस्तथा **मूत्रं** च प्रश्रवण**मुच्चार**श्च वर्चः, समाहारोऽत्रापि, **द्यूतं** दुरोदरमुपलक्षणं चैतत्पर्यस्तिकाचसूरिचिहूरविचरणचरणप्रसारणावष्टम्भाट्टहासखिङ्गचेष्टादे**र्वर्जये**त्परिहरे**ज्जिनमन्दिरस्यान्तर्म**ध्ये । इह चतुरशीत्याशातनाः केचनामनन्ति, तथाहि –

खेलं-केलि-कलिं-कला-कुललयं-तंबोल-मुग्गालयम्,
गाली-कंगुलिया-सरीरधुवणं-केसे-नहे-लोहियम् ।

१. दोसगुणे T,C २. निद्दुयणं A,P,K ३. मंदिरभूमीएस्संतो P, K

भत्तोसं-तय-पित्त-वंत-दसणे-विस्सामणं-दामणम्;
दंत-च्छी-नह-गंड-नासिय-सिरो-सोय-च्छवीणं मलम् ।।
मंतं-मीलण-लिक्खयं-विभजणं-भंडार-दुष्ठासणम्,
छाणी-कप्पड-दालि-पप्पड-वडी-विस्सारणं नासणम् ।
अक्कंदं-विकहं-सरच्छघडणं-तेरिच्छसंठावणम्;
अग्गीसेवणं-रंधणं-परिखणं-निस्सीहियाभंजणम् ।।
छत्तो-वाणह-सत्थ-चामर-मणोऽणेगंत-मब्भंगणम्,
सच्चित्ताणमचाय-चायमजिए-दिट्ठीइ नो अंजली ।
साडेगुत्तरसंगभंग-मउडं-मोलिं-सिरोसेहरम्;
हुड्डा-जिंडुहगिड्डियाइरमणं-जोहार-भंडक्कियम् ।।
रेकारं-धरणं-रणं-विवरणं वालाण-पल्हत्थियम्,
पाऊ-पायपसारणं-पुडपुडी-पंकं-रओ-मेहुणम् ।
जूया-जेमण-जुज्झ-विज्ज-वणिजं-सिज्जं-जलं-मज्जणम्;
एमाईयमवज्जकज्जमुज्जुओ वज्जे जिणिंदालये ।। [प्रव.सारो॰ ४३३-३६]

व्याख्या-१-खेलं मुखश्लेश्मोज्झनम्, २-केलिमान्दोलनजलादिविषयाम्, ३-कलिं मिथो वाक्कलहम्, ४-कलत्ति पाठादिकलाग्रहणम्, ५-कुललयंति गण्डूषम्, ६-ताम्बूलं प्रतीतम्, स्वादिमाहारोपलक्षणं चैतत्, ७-उग्गालयंति ताम्बूलनिर्यासरसयोरुज्झनम्, ८-गालित्ति उच्छिष्ट-वचनम्, ९-कंगुलियत्ति मूत्रपुरीषे, १०-सरीरधुवणंति केवलजलेन कंठस्नानम्, ११-केसित्ति भद्राकरणम्, १२-नहित्ति नखपरिकर्मम्, १३-लोहियंति रक्ताकर्षणम्, १४-भक्तोसंति खादि-माहारम्, १५-तयत्ति पामादिषु त्वगवयवोज्झनम्, १६-पितत्ति पित्तच्छर्दिः, १७-वंतत्ति आहारो-च्छालम्, १८-दसणत्ति दन्तपातनम्, १९-विश्रामणमङ्गसंवाहनम्, २०-दामनं कुदण्डकादिना पशुसंयमनम्, २१-दंतत्ति दन्ताः, २२-अच्छित्ति अक्षिणी, २३-नहत्ति नखाः, २४-गंडत्ति कपोलौ व्रणानि वा, २५-नासियत्ति घ्राणम्, २६-सिरत्ति शिरः, २७-सोयत्ति श्रवणे, २८-छवित्ति त्वक् तासां मलत्ति मलोज्झनम्, २९-मन्त्रमधर्म्यमालोचनम्, ३०-मीलनं मल्लगणादिमेलापकम्, ३१-लेख्यकं पुस्तकादिलिखनमायव्ययादिप्रत्यवेक्षणं वा, ३२-विभजनं दायादादेर्मिथः साधारण-

वस्तूनाम्, ३३-भाण्डागारं कोशम्, ३४-दुष्टासनं मञ्चिकागब्दिकादि, ३५-छाणित्ति छगण-स्थापनम्, जलगालनमित्यन्ये, ३६-कप्पड, ३७-दालि, ३८-पप्पड, ३९-वडित्ति प्रतीतानि तद्विस्तारणं ४०-नाशनं भयेष्वाश्रयणम्, ४१-आक्रन्दम्, ४२-विकथे प्रतीते, ४३-सरत्थघडणंति शस्त्रोपकरणघटनम्, चैत्योपकरणघटने तु न दोषः, ४४-तिर्यक्संस्थापनमबद्धचतुष्पदधारणम्, ४५-अग्निसेवनम्, ४६-रन्धने प्रतीते, ४७-परीक्षणं रूप्यकरत्नादेः, ४८-नैषेधिकीभञ्जनम्, ४९-छत्रम्, ५०-उपानत्, ५१-शस्त्रम्, ५२-चामराणि प्रतीतानि, नवरमुपानहौ चर्ममय्यौ । ५३-मणो-णेगंतत्ति चेतसोऽसमाहितत्वम्, ५४-अभ्यञ्जनं तैलाद्यैः, ५५-सचित्तानां पुष्पादीनामत्यागम्, ५६-त्यागमजीवस्य स्वर्णादेः, ५७-दृष्टौ भगवद्दर्शनेऽञ्जलेरबन्धनम् । ५८-एकशाटकोत्तरा-सङ्गभङ्गं प्रतीतम्, ५९-मुकुटं स्वर्णादिमयम्, ६०-मौलिं शिरसि वासोवेष्टनम्, ६१-शिरःशेखरं पुष्पापीडम्, ६२-हुड्डां प्रसिद्धाम्, ६३-जिंडुहगिड्डियाइरमणंति कन्दुकादिक्रीडाः, ६४-जोहारत्ति लोकस्थित्या मिथःपादपतनादि वन्दनकदानस्यैव विहितत्वात्, ६५-६६-भण्डक्रिया-रेकारौ गतार्थौ, ६७-धरणं चौराधमर्णादेः, ६८-रणं शस्त्राशस्त्रि, ६९-विवरणं वालानां व्यक्तम्, केशपरिकर्मोपलक्षणं चैतत्, ७०-पर्यस्तिकां ख्याताम्, परिकरबन्धाद्युपलक्षणमिदम्, ७१-पादुकां काष्टादिमयीम्, ७२-पादप्रसारणं व्यक्तम्, मुखप्रसारणाद्युपलक्षणं चैतत्, तेन जृम्भाट्ट-हासादिसंग्रहः, ७३-पुडपुडित्ति सुविदितम्, ७४-पंकंति पङ्कलिप्तांह्रिगमनमंह्रिलग्नपङ्कापनयनं वा, ७५-रजश्चरणरेणुप्रमार्जनम्, रजस्वलागमनमित्यन्ये, ७६-मैथुनं प्रतीतम्, ७७-जूयंति यूकामत्कुणाद्युत्सारणम्, ७८-जेमनमशनाहारम्, ७९-युद्धं मल्लादीनाम्, ८०-विज्जत्ति वैद्यकम्, ८१-वाणिज्यं प्रतीतम्, ८२-सिज्जंति शयनम्, ८३-जलं पानाहारम्, ८४-मज्जनं शिरःस्नानम्, एमाइयंति अभक्त्यङ्गानां भूयस्त्वादेवंजातीयाविधयः कति सङ्ख्यायन्ते ? उज्जुउत्ति प्रयतो वर्जयेदिति सर्वत्र योज्यं यथासम्भवम्, विभक्तिलोपपरिणामादिकं प्राकृतत्वादिति वृत्तचतुष्ट-यार्थः ।।४९।।

* सङ्गाचारभाष्ये-६१ *

संप्रति 'दसआसायणचाउ'त्ति चतुर्विंशं द्वारं व्याचिख्यासुराह –

तंबोल पाण भोयणुपाणह मेहुन्न सुअण निट्ठुवणं ।
मुत्तुच्चारं जूअं वज्जे जिणणाहजगईए (मंदिरस्संतो) ।।

१-**ताम्बूलं** पूगपत्रादि चैत्ये नाऽऽस्वादयेद् न चोद्गीर्यात्, एतेन स्वादिमाहारनिषेधः, २-**पानं** जलादेर्न कार्यम्, हस्तपादमुखाङ्गक्षालनाभ्यङ्गोद्वर्त्तनादेर्वा पानं रक्षणं कार्यम्, कुरुकुचादीनां च, ३-**भोजनम्**-

अभ्यवहरणमोदनादेर्भक्तौषधफलादेश्च न विधेयम्, ४-चैत्ये चतुर्विधोऽप्याहारस्त्याज्य इत्युक्तं भवति, एतेन चोपभोगो निषिद्धः, तस्य सकृद् भोग्यत्वादन्तरुपयोगिरूपं वा परिभोगं निषेधयति, **उपानहौ** पन्नद्धे पादुके च न परिदध्यात्, ५-**मैथुनं** मिथुनकर्म्म सुरतं करस्पर्शादिकां हास्यक्रीडां नासेवेत, ६-**स्वपनं** भूमौ शय्यादिषु च न कुर्यात्, ७-**निष्ठीवनं** थूत्करणम्, दन्ताक्षिनखनासिकास्यशिरःश्रोतत्वगादिमलपङ्क्त्याद्युपलक्षणं चैतत्, ८-९ **मूत्रोच्चारं** लघुनीतिबृहन्नीतिं नाचरेद्, आभ्यां च वातपित्तत्वगस्थिरक्ताद्यपवित्रवस्तुनिषेधमाह, १०-**द्यूतं** चतुरङ्गशारिनालिकाष्टापदत्रिपदीनवत्रिकदुद्दागन्दुकादिकं **वर्जयेज्जिनमन्दिरस्यान्तो** देवगृहमध्ये। अत्र चैतैर्भोगाभिधानतृतीयाशातनाभेदैर्बृहद्भाष्योक्ता सप्रभेदाऽवज्ञादिकापञ्चप्रकाराऽप्याशातना प्रभावती-देवीवत् त्याज्येति प्रदर्शितम्, समानजातित्वाद् मध्यग्रहण आद्यन्तयोरपि ग्रहणाच्च, तच्च भाष्यम् -

जिणभवणंमि अवण्णा पूयाइअणायारो तहा भोगो । दुप्पणिहाणं अचियत्ती एया आसायणा पंच ।।

तत्थ अवन्नाऽऽसायण पल्हत्थियदेवपट्टिदाणं च । पुडुपुडिपायपसारणदुट्ठासणसेवण जिणग्गे ।।

जारिसतारिसवेसो जहा तहा जंमि तंमि कालंमि । पूयाइ कुणइ पुन्नो अणायरासायणा एसा ।।

भोगो तंबोलाई कीरंतो जिणगिहे कुणइऽवस्सं । नाणाइयाण आयस्स सायणं तो तमिह वज्जे ।।

रागेण व दोसेण व मोहेण व दूसिया मणोवित्ती । दुप्पणिहाणं भन्नइ जिणविसए तं न कायव्वं ।।

धरणरणरुयणविगहातिरिबंधणरंधणाइ गिहकिरिया । गावीविज्जवणिज्जाइ चेइए चउऽणुचियवित्ती ।।

चक्रे० : निष्कारणमयत्नश्चाऽवग्रहपरिभोगेऽप्याशातनैव, इदमेव विवक्षवस्तावदवग्रह-स्वरूपमाहुः –

देव० : तथा निष्कारणमयत्नतश्चावग्रहपरिभोगेऽप्याशातनैव, इदमेव विवक्षुस्तावदव-ग्रहस्वरूपमाह –

सत्थावग्गहु तिविहो उक्कोसजहन्नमज्झिमो चेव ।
उक्कोस सट्ठिहत्थो जहन्न नव सेस विच्चालो ।।५०।।

चक्रे० : पाठसिद्धा, नवरं '**सत्थावग्गहु**' त्ति शास्त्युपदिशति तत्त्वमिति शास्ता तीर्थकृत् तस्यावग्रह आभाव्यभूप्रदेशः ।।५०।।

देव० : शास्त्युपदिशति तत्त्वमिति **शास्ता** तीर्थकृत्, तस्य**ावग्रह** आभाव्यभूप्रदेश-स्त्रि**विध**स्त्रिप्रकारो भवतीति शेषः, त्रैविध्यमेवाह—**उत्कृष्टो जघन्यो मध्यमश्चै**वेति समुच्चये, कः कियानित्याह—**उत्कृष्टः षष्ठिहस्तो,** विभक्तिलोपाज्**जघन्यो नव**त्ति हस्तशब्दलोपान्नवहस्तः, **शेषो**ऽनयोर्मध्यवर्ती '**विच्चालो**'त्ति देश्यो मध्यम इत्यर्थः, इति गाथार्थः ।।५०।।

** सङ्गाचारभाष्ये-२२ **

संप्रति द्विदिक्स्थितैरपि मूलबिम्बस्य कियत्यवग्रहाद् देवा वन्दनीया इत्याशङ्कायां चतुर्थमवग्रहद्वारं गाथोत्तरार्द्धेनाह –

नवकर जहन्नु सट्ठिकर जिट्ठु मज्झुग्गहो सेसो ।।

मूलबिम्बाद् **नव** हस्ताज्**जघन्यो** जघन्योऽवग्रहः, जघन्यतोऽप्युच्छ्वासनिश्वासादिजनिताशातना-परिहाराय नवहस्तबहिःस्थितैर्देववन्दना कार्या, **षष्टिश्च** हस्तान् **ज्येष्ठ** उत्कृष्टोऽवग्रहः, तत्परत उपयोगासम्भवात्, **मध्ये** मध्यमे **शेषो** नवकरेभ्य ऊर्ध्वं षष्टेश्चार्वागवग्रहो मूलबिम्बवन्दनास्थाना-भ्यन्तरालभूभाग इति । अन्यैः पुनर्द्वादशभेदोऽयमुक्तः । तथा च पञ्चस्थानकेऽभिहितम् –

उक्कोससट्ठि- पंना- चत्ता- तीसा- दसट्ठ- पणदसगं ।
दस- नव- ति- दु- एग- ढ्ढं जिणुग्गहं बारसविभेयं ।। ति।

एतावता चार्धहस्तादारभ्य षष्टिहस्तेभ्यश्चार्वाग् गृहचैत्ये चैत्यगृहे वा यथा जिनबिम्बस्याशातना न भवति तथा यथासमयमवग्रहबहिःस्थितैरमिततेजःखेचरेश्वरवद् देववन्दना कार्येत्युक्तं भवति ।।२२।।

चक्रे० : ततश्च –

देव० : ततश्च –

[१]गुरुदेवुग्गहभूमीए जत्तओ चेव होइ परिभोगो ।
इट्ठफलसाहगो [२]सइ अणिट्ठफलसाहगो इहरा ।।५१।।

चक्रे० : गुरूणां देवस्य चावग्रहभूमौ यत्नत एवाशातनाभीरुतया संलीनाङ्गोपाङ्गत्वलक्षणं प्रयत्नेन **भवति परिभोगो** वैयावृत्त्य पूजाद्यर्थं निषदनोत्थानचङ्क्रमणादिरूप **इष्टफलसाधको** निर्वृतिप्रापकः । **'सय'**त्ति सदा । **इतरथाऽनिष्टफलसाधको** दुर्गतिजनकः । अथ देवतत्त्व-विचारणायां को नाम गुरोरिह प्रस्तावः ? सत्यमवग्रहसाम्यात्तदवग्रहप्रमाणं चैवम् –

आयप्पमाणमित्तो चउद्दिसिं होइ अवग्गहो गुरुणो ।
अणणुन्नायस्स सया न कप्पई तत्थ पविसेउं ।। [प्रव.सारो० १२६] ।।५१।।

देव० : [३]गुरवो धर्मोपदेशका आचार्यादयो **देव**श्चार्हंस्तेषा**मवग्रहभूमिस्त**स्या यत्नत आशातना-भीरुतया संलीनाङ्गोपाङ्गत्वलक्षण**प्रयत्नेन, चेवे**त्यवधारणे, **परिभोगो** वैयावृत्त्यपूजादिकृते निषदनोत्थानचङ्क्रमणादिरूप **इष्टफलं** निर्वृत्तिप्राप्तिलक्षणम्, तस्य **साधको भवतीति** योगः

१. गुरुदेवोग्गहभूमीए T,C गुरुदेवुग्गहभूमीइ P, K २. सय P, K ३. गुरुर्धर्मोपदेशको देवश्चार्हंस्तयोः A

'**सइ**'त्ति सदा सर्वकालं यत्नत एव परिभोग इत्यनेनैतद्योज्यम् । व्यतिरेकमाह- **अनिष्टफल-साधको** दुर्गतिजनक **इतरथा**ऽयत्नतः । अथ देवतत्त्वविचारणायां को नाम गुरोरिह प्रस्तावः ? सत्यम्, अवग्रहसाम्यात्, तदवग्रहप्रमाणं चेत्थम् -

आयप्पमाणमित्तो चउद्दिसिं होइ अवग्गहो गुरुणो ।
अणणुन्नायस्स सया न कप्पई तत्थ पविसेउं ।। [प्रव.सारो० १२६] इति ।

एवमप्याराध्यतरत्वेन देवशब्दस्य यथा प्रागुपादानं युज्यते न विवक्षया गुरूणां पूज्यतरत्वात्, न हि सद्गुरूपदेशं विना देवस्याप्यभिगम इति भाव इति गाथार्थः ।।५१।।

* *पञ्चाशके-१२/२३* *

अथ कस्मादवग्रहप्रवेशे नैषेधिकी विधेयेत्यत आह -

गुरुदेवोग्गहभूमिए जत्तओ चेव होंति परिभोगो ।
इट्ठफलसाहगो सइ अणिट्ठफलसाहगो इहरा ।।

गुरुदेवावग्रहभूम्या आचार्यदेवाधिदेवाश्रयभुवो **यत्नत एव** आशातनापरिहारप्रयत्नेनैव । चैवशब्दोऽवधारणे। **भवति** वर्तते **परिभोगः,** स च किम्भूत इत्याह-**इष्टफलसाधक** ईप्सितार्थनिष्पादकः, कर्मक्षयहेतुरित्यर्थः । **सकृत्**सर्वदा, उक्तव्यतिरेकमाह-**अनिष्टफलसाधकः** कर्मबन्धहेतुरित्यर्थः, **इतरथा**ऽन्यथाऽप्रयत्नत इत्यर्थः, गुरुदेवावग्रहभूमेः परिभोग इति प्रकृतम्, तत्र गुर्ववग्रहस्वरूपमावश्यकेऽभिहितं यथा-'आयप्पमाणमेत्तो चउद्दिसिं होइ उग्गहो गुरुणो'त्ति देवावग्रहस्तु न क्वापि ग्रन्थे दृष्टः केवलं भण्यमानः श्रुतः, यथा -

सत्थोग्गहो उ तिविहो उक्कोसजहण्णमज्झिमो चेव । उक्कोसो सट्ठिहत्थो जहन्न नव सेस विच्चालो ।। इति गाथार्थः ।।२३।।

चक्रे० : उक्तमेवार्थं किञ्चित्सविशेषमाहुः -

देव० : उक्तमेवार्थं किञ्चित्सविशेषमाह -

निट्ठीवणादकरणं असक्कहा अणुचियासणाई य ।
आययणंमि अभोगो इत्थ य देवा उदाहरणं ।।५२।।

चक्रे० : निष्ठीवनादेरकरणम्, आदिशब्दाद्दन्तधावनचरणक्षालनशरीरमलोज्झनादे-**रसत्कथा** स्त्रीकथादिका तस्या अप्यकरणमिति योज्यम् । **अनुचितासनादिश्च** षष्ठीस्थाने

प्रथमा । ततश्चानुचितासनादेर्मसूरकाऽऽसन्दकादेरादिशब्दाच्चन्दनकुसुमकुङ्कुमकस्तूरिकादेर-**भोगो**ऽनासेवन**मायतने** जिनगृहे । **अत्र चार्थे देवा उदाहरणं** दृष्टान्तः ।।५२।।

देव० : निष्ठीवनमादिर्यस्य दन्तधावनवदनक्षालनशरीरमलोज्झनादेस्त**न्निष्ठीवनादि,** तस्या-**ऽकरणम्,** क्व ? **आयतने** जिनवेश्मनि, तथाऽ**सत्याऽ**शोभना **कथा** स्त्रीभक्तादीनाम-सत्कथा, विभक्तिलोपात्तस्या अकरणमितीहापि सम्बध्यते। त**थानुचितासनं** मसूरकासन्दकादि तदादिर्यस्य तूलीगब्दिकापल्यङ्काद्यासनं तस्याप्यकरणमितीहापि सम्बध्यते **चः** समुच्चये, **अभोगो**[१]ऽवस्थानादिपरिहारः । **अत्र चा**स्मिन् पूर्वोक्तेऽर्थे **देवा** भवनपत्यादय **उदाहरणं** निदर्शनमिति गाथार्थः ।।५२।।

**** उपदेशपदे-४१० ****

अभोगमेव दर्शयति –

निट्ठीवणाइकरणं असक्कहा अणुचियासणादी य।
आयतणम्मि अभोगो एत्थं देवा उयाहरणं ।।

निष्ठीवनादिकरणमिह निष्ठीवनं मुखश्लेष्मपरित्यागः, आदिशब्दाद् मूत्रपुरीषताम्बूलकर्णनासिकादिमलप्रोज्झनग्रहः । **असत्कथा** स्त्रीभक्तचोरजनपदादिवृत्तान्तनिवेदनलक्षणा। **अनुचितासनादि चा**नुचितमासनं गुरुजनासनापेक्षयोच्चं समं वा, आदिशब्दात् पर्यस्तिकादिबन्धग्रहः । एतत्सर्वं, किमित्याह-**आयतने** जिनगृहेऽ**भोगो** वर्त्तते । इह नञ् कुत्सार्थः, यथाऽत्र –

जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए ।
भण्णइ तह णाणंपि हु मिच्छद्दिट्ठिस्स अण्णाणं ।। [वि.आ.भा० ५२०]

इति । ततः कुत्सितो भोगश्चैत्यगृहोपजीवनमभोगः, चैत्याशातनाफलत्वेन तस्य दुर्गतिहेतुत्वात् । **अत्र** भोगपरिशुद्धौ **देवा** भवनपत्यादय **उदाहरणम्** ।।४१०।।

**** श्राद्धदिनकृत्ये-१२३ ****

xxx असत्कथानुचितासनानामाशातनान्तर्गतत्वेऽपि पृथग्ग्रहणमेषां महावज्ञास्पदत्वेनाति-शयवर्जनख्यापनार्थम् । x x x

१. अभोगोऽनासेवनं कर्तव्य इति शेषः T, C

चक्रे० : एतदेवाहुः –

देव० : एतदेवाह –

देवहरयम्मि देवा विसयविसमोहिया वि न कया वि ।
अच्छरसाहिं पि समं हासखिड्डाइ[१] वि कुणंति ।।५३।।

चक्रे : अक्षरार्थः सुगमस्तत्त्वार्थस्त्वयम् – यदि तावदत्यन्तविषयिणः सततोऽविरताश्च देवा अप्यसच्चेष्टापरिहारेण संवृतात्मानो जिनभवनादौ तिष्ठन्ति ततो विरताविरतैः सुतरां तत्परिहारेण स्थेयमिति ।।५३।।

देव० : देवगृहमेव **देवगृहकं** तस्मिन् **देवाः** पूर्वोक्ताः, विषीदन्ति धर्मं प्रति नोत्सहन्त एषु, विषिण्वन्ति वाभिष्वजन्ते जन्तव एष्विति विषयाः, यद्वाऽऽसेवनकाले मधुरत्वेन, परिणामे चातिकटुकत्वेन विषस्योपमां यान्तीति **विषयाः** शब्दादयस्त एव **विषम्,** तेन विशेषेण नितान्तलोलुपत्वलक्षणेन **मोहिता अपि** मूर्च्छिता अपि **कदाचिदपि न कुर्वन्ती**ति सम्बन्धः, किम् ? **हासखिड्डाद्यपि,** आस्तां तत्सम्भोगादि, तत्र हासोऽट्टहासः, खेड्यं क्रीडनम्, यद्वा हासपूर्वं खेड्यं हासखेड्यं कौकुच्यकरणम्, काभिः ? **अप्सरोभिरपि समं** देवीभिरपि[२], इदमत्र हृदयम्–यदि तावदत्यन्तविषयिणः सततविरताश्च देवा अप्यसच्चेष्टापरिहारेण संवृतात्मानो जिनभवनादौ तिष्ठन्ति तदा विरताविरतैः सुतरां तत्परिहारेण तत्र स्थातुं युज्यत इति गाथार्थः ।।५३।।

**** उपदेशपदे-४११ ****

एतदेव भावयति –

देवहरयम्मि देवा विसयविसविमोहिया वि न कयाइ ।
अच्छरसाहिं पि समं हासक्खेडाइ वि करेंति ।।

देवेत्यादि । **देवगृहके** नन्दीश्वरादिगतचैत्यभवनरूपे **देवा** जिनजन्ममहिमादिषु सन्तो **विषयविषमोहिता अपि** दुष्टचारित्रमोहोदयाद् **न** नैव **कदाचित्** कस्यामपि वेलाया**मप्सरोभिरपि** स्वप्राणाधिकप्रेमपदप्राप्ताभिः **समं** सहासखेलाद्यपि, इह **हासः** प्रतीत एव, **खेला** क्रीडा, **आदि**शब्दाच्चित्रसूचीवचनग्रहः, **अपि**शब्दाच्च संभोगादिस्थूलशेषापराधावरोधो दृश्यः, **कुर्वन्ति** विदधति । यदत्राप्सरोग्रहणं तत् तासां हासक्रीडादि-स्थानत्वेन ताभिः सह तेषां हासादिपरिहारस्य दुष्करत्वख्यापनार्थमिति ।।४११।।

१. हासखेड्डाइ Z २. देववेश्यादिभिरपि A

चक्रे० : आशातनादशकं वर्जयेतेति व्याख्यातमधुना जिनद्रव्यभक्षणेत्यादि व्याख्यातुं रूपकचतुष्टयमाहुः❖ –

देव० : आशातनादशकं वर्जयतेति व्याख्यातमधुना जिनद्रव्यभक्षणेत्यादि व्याचिख्यासुः[१] श्लोकं गाथाद्वयं ❖चाह –

भक्खेइ जो उवेक्खेइ[२] जिणदव्वं तु सावओ ।
पन्नाहीणो भवे जो उ लिप्पई पावकम्मुणा ।।५४।।
आयाणं जो भंजइ पडिवन्नधणं न देइ देवस्स ।
नस्संतं समुवेक्खइ सो वि हु परिभमइ संसारे ।।५५।।
चेइयदव्वं साहारणं च जो दुहइ मोहियमईओ ।
धम्मं व सो न याणइ अहवा बद्धाउओ नरए ।।५६।।

चक्रे० : तत्र **जिनद्रव्यं भक्षयति** स्वयम्, तुशब्दस्य समुच्चयार्थत्वादन्यैर्भक्ष्यमाण**मुपेक्षते** च। तथा **प्रज्ञाहीनः** स्वल्पेन बहुना वाऽर्थेन कार्यसिद्धिमजानानो मन्दमतितया यथाकथञ्चिद्द्रव्य-व्ययकारी लेख्यकूटश्च **यो भवेद्य**त्तदोर्नित्यसम्बन्धात्स **लिप्यते पापकर्म्मणा** ।।५४।।

तथा **'आयाणं जो भंजइ'**त्ति गाथा सुगमा, नवरं **'नस्संतं समुवेक्खइ'** त्ति सामर्थ्ये सतीति ज्ञेयम् ।।५५।।

चैत्यद्रव्यं प्रतीतम्, **साधारणं च** सप्तक्षेत्रोपयोगि, **यो मोहितमतिः** पापकर्म्मा **द्रुह्यति** भक्षयति दोग्धि वा तत्कालान्तरभोगादिना, **धर्मं वा** सर्वज्ञप्रणीतं **स न जानाति,** न हि जानन् जिनद्रव्यं भक्षयति । **अथवा** भक्षणकालात्प्राग् **नरके बद्धायुष्क**स्ततो भक्षयति ।।५६।।

देव० : भक्षयति[३] भुनक्ति **यः श्रावकः** श्रावकग्रहणं चास्य जानतो भक्षणे गरीयान् दोष इति ज्ञापनार्थम्, यावताऽन्योऽपि पापकर्मणा लिप्यत एव, वक्ष्यमाण तुशब्दस्य समुच्चयार्थस्येह सम्बन्धा**दुपेक्षते** वान्यैर्विलुप्यमानम्, किमेतैः स्वजनादिभिर्मम विरोधितैरित्युदास्ते, किमित्याह– **जिनस्य** स्थापनार्हतो **द्रव्यं** पूजार्थनिर्माल्याक्षयनिधिस्वरूपम्, तथा **तु**शब्दोऽपिशब्दार्थो भिन्नक्रमश्च, ततः **प्रज्ञाहीनो**ऽप्यल्पेन बहुना वार्थेन कार्यसिद्धिमजानानो मन्दमतितया

❖ अत्र चक्रे० व्याख्यायां रूपकचतुष्टयमाहु इत्यनेन पद्यचतुष्कं व्याख्यातं,
देव० व्याख्यायां तु श्लोक गाथाद्वयं चाह इत्यनेन पद्यत्रिकं व्याख्यातम् ।

१. व्याचिख्यासू रूपकचतुष्टयमाह T,C २. उविक्खेइ A उवक्खेइ P,K, ३. तत्र भक्षयति भुनक्ति विद्रवतीत्यर्थो । यः कश्चिद् श्रावक इति संटङ्कः C,T

यथाकथञ्चिद् द्रव्यव्ययकारी लेख्यकूटश्च **यो भवेत्,** यत्तदोर्नित्यसम्बन्धात् स **लिप्यते** श्लिष्यते **पापकर्मणा**ऽशुभप्रकृतिरूपेण लिप्यत इत्यनेन च तज्जनितकर्मणो दृढबन्धत्वमाहेति ।।५४।।

तथा '**आयाणं**'ति आदानमायदानम्, प्राकृतत्वाद्यलोपः, राजाऽमात्यादिवितीर्णं क्षेत्रगृहहट्ट-ग्रामादि **यो भनक्ति** लुम्पति, तथा **प्रतिपन्नधनं** म्रियमाणे पित्रादौ स्वयं वा धर्मनिमित्त-मेतावद्दास्यामीति कल्पितद्रव्यं **न ददाति** न वितरति **देवाय,** चतुर्थ्यर्थे षष्ठीयम्, तथा [१]**नश्यदा**यदानादिकमेव प्रलीयमानं तच्चिन्तकभक्षणादिना केनचित्प्रकारेण, यो यत्करिष्यति स तत्फलमवाप्स्यतीति बुद्ध्या **समुपेक्षते,** न प्रतिजागर्ति सामर्थ्ये सतीत्यध्याहार्यम्, **सोऽपि** न केवलं भक्षकादयः, **हु**रेवकारार्थः, **परिभ्रमत्ये**व संसरत्येव **संसारे** चतुर्गतिके, अप्रतिषिद्ध-मनुमतमिति न्यायतस्तस्याप्यनुमतिप्रसङ्गादिति ।।५५।।

तथा **चैत्यद्रव्यं** प्रतीतम्, **साधारणं च** जीर्णचैत्योद्धारादिनिमित्तमेकत्रमीलितं सप्तक्षेत्रोपयोगि वा, **यः** पापकर्मा **द्रुह्यति** भक्षयति, वाशब्दोऽप्यर्थे, **धर्मम**पि सर्वज्ञप्रणीतं **स न जानाति,** न खलु तीर्थप्रवृत्त्यादिहेतुचैत्यादिद्रव्यरक्षाप्रतिपादकं तद्भक्षकाणां दुर्विपाकाभिधायकं च जिनवचनं विदन्नेवं प्रवर्तते, ननु विदित[२]वचना अप्येवं प्रवर्तमाना दृश्यन्त एवेत्याह–**अथवा** भक्षणकालात् **प्राग्बद्धायुष्को नरके,** स हि जानन्नपि फलमकृत्यान्न विरमतीति रूपक[३]त्रयार्थः ।।५६।।

** द्रव्यसप्ततिकायाम्-१३ **

एवं चैत्यद्रव्यादिवृद्धिं कुर्वतः कस्यचिदनाभोगादिना चैत्यद्रव्यादिविप्रणाशोऽपि स्याद्, अतः पुनः कर्तृद्वारेण, मुख्यवृत्त्या गाथात्रयेण तद्भेदानाह –

भक्खेइ जो उविक्खेइ जिणदव्वं तु सावओ ।
पण्णाहीणो भवे जो य लिप्पइ पावकम्मुणा ।।

'भक्खेइ०' इति व्याख्या– कण्ठ्या, नवरम् १-भक्षणम् – देवद्रव्यस्य तदुपचारस्य वा, **तु**शब्दात्, ज्ञानद्रव्यादेश्च, स्वयमुपजीवनम्, २-उपेक्षणम्–तदेव परस्य कुर्वतः शक्तितोऽनिवारणम्, ३-प्रज्ञाहीनत्वम्–अङ्गोद्धारादिना देवद्रव्यादिदानम्, यद् वा मन्दमतितया स्वल्पेन बहुना वा धनेन कार्यसिद्ध्यवेदकत्वात् । यथा कथञ्चिद् द्रव्यव्ययकारित्वं कूटलेख्यकृतत्वं च ।।१३।।

---

१. नश्यद् श्रुतत्वादायदानादि T,C नश्यत् शुभतत्वादायदानादि A २. विदितजिनवचना T,C ३. 'रुपकत्रयार्थः' इति T,C प्रतिषु नास्ति

* संबोधसित्तर्याम्-६८ *

अथ भक्षणवदुपेक्षाऽपि दोषायैवेति तामनर्थहेतुत्वेनाह –

भक्खेइ जो उवक्खेइ जिणदव्वं तु सुसावओ ।
पण्णाहीणो भवे सो उ लिप्पई पावकम्मुणा ।।

तु पुनरर्थे, स चाग्रे योक्ष्यते । कश्चिन्निःशूकोऽनन्तभवभ्रमणहेतुर्जिनद्रव्योपभोगमजानानो **जिनद्रव्यं भक्षयति । यः** पुनः **सुश्रावको** जिनधर्मवासितचेतस्कतया शोभनश्राद्धस्तं जिनद्रव्यभोक्तार**मुपेक्षत** अवजानाति, यदि जिनद्रव्यमसौ भक्षयति तदा मम किं यातीति देवद्रव्यरक्षणाय न यतते, दोषदर्शनादिभिर्न निवारयतीत्यर्थः । **सः** श्राद्धः स्वयं तद्द्रव्योपयोगाभावेऽप्युपेक्षणात्परभवे **प्रज्ञाहीनो** बुद्धिरहितो मूर्खो **भवेत्**। **तु** पुनः **पापकर्मणा लिप्यत** अशुभकर्मणाऽऽश्लिष्टो जायते ।।६८।।

* संबोधसप्ततिकायाम्-६९ *

xxxतु पुन**रुपेक्षति** तत्प्रति निरादरं करोति, तेन द्रव्येण निजकुटुम्बलाभार्थं व्यापारं करोति । xxx

* द्रव्यसप्ततिकायाम्-१५ *

आयाणं जो भंजइ पडिवण्णधणं ण देइ देवस्स ।
गरहंतं चोविक्खइ सो वि हु परिभमइ संसारे ।।

आयाणमिति० **आदानं** तृष्णाग्रहग्रस्तत्वात्, देवाऽऽदिसत्कं भाटकं **यो भनक्ति,** तथा यः पर्युषणादिषु चैत्यादिस्थाने देयतया **प्रतिज्ञातं धनं न दत्ते,** तथा **गर्हन्तमी**र्ष्यादिवशाद्दुर्वाक्येन दूषयन्तमविनीतं यो **वोपेक्षते,** तथा सति, कदाचित्तद्वाक्यश्रवणाद् महेन्द्रपुरीयश्राद्धवद् ग्लानीभूय, देवादिद्रव्यरक्षादौ शक्तिमानप्युदासीनो भवतीत्यर्थः। यतः 'एतदेव महत्पापं धर्मस्थानेऽप्युदासिता ।' इति ।।१५।।

* उपदेशपदे-४१४ *

भणितमेव दर्शयति –

चेइयदव्वं साहारणं च जो दुहति मोहियमतीओ ।
धम्मं व सो न याणति अहवा बद्धाउओ पुव्विं ।।

चैत्यद्रव्यं चैत्यभवनोपयोगि धनधान्यादि काष्ठपाषाणादि च, तथा **साधारणं च** द्रव्यं, तथाविधव्यसनप्राप्तौ शेषद्रव्यान्तराभावे जिनभवनजिनबिम्बचतुर्विधश्रमणसङ्घजिनागमलेखनादिषु धर्मकृत्येषु, सीदत्सु सत्सु यदुपष्टम्भकत्वमानीयते, तत्र **यो द्रुह्यति** विनाशयति । कीदृशः सन्नित्याह– **मोहितमतिको** लोभातिरेकेण मोहमानीता मोहिता मतिरस्येति समासः । **धर्म्मं वा** जिनप्रणीतं **स न जानाति।** अनेन च तस्य मिथ्यादृष्टित्वमुक्तम् । **अथवा** जानन्नपि किञ्चिद् धर्म्मं **बद्धायुष्को** नरकादिदुर्गतौ **पूर्वं** चैत्यद्रव्यादिचिन्ताकालात् प्रागिति ।।४१४।।

* *श्राद्धदिनकृत्ये*-१२६ *

देवद्रव्यवक्तव्यतां सदृष्टान्तमभिधाय साम्प्रतं तस्य साधारणद्रव्यस्य च तुल्यदोषोद्भावयिषयाह –

चेइयदव्वं साहारणं च जो दुहइ मोहियमईओ ।
धम्मं च सो न याणइ अहवा बद्धाउओ नरए ।।

'चेइय०' **चैत्यद्रव्यं** प्रसिद्धम् । **साधारणं च** चैत्यपुस्तकापद्गतश्रावकादिसमुद्धरणयोग्यमृद्धिमच्छ्रावककृतसमुद्गकरूपम् । ते द्वे अपि **यो द्रुह्यति** विनाशयति दोग्धि वा व्याजव्यवहारादिना तदुपयोगमुपभुङ्क्ते, **मोहितमतिकः** क्लिष्टकर्मोदयान्मूढीकृतचेतस्कः । **'धम्मं च'** इति प्राग्वदिति ।।१२६।।

देव : आस्तां श्रावकः, साधुनाऽपि तद्विनाशे नोपेक्षा विधेया, यतः –

चेइयदव्वविणासे तद्दव्वविणासणे दुविहभेए ।
साहू [१]उविक्खमाणो अणंतसंसारिओ भणिओ ।।५७।।

चक्रे : तथा **चैत्यद्रव्यस्य** सुवर्णादे**र्विनाशे** । तथा **तद्द्रव्यविनाशने** तस्य चैत्यस्य द्रव्यमुपकारकं दारूपलेष्टिकादि, तस्य विनाशने जायमाने **द्विविधभेदे** द्विप्रकारभेदे । नूतनलग्नोत्पाटितविनाश्यद्वैविध्यात्, मूलोत्तरभेदाद्वा । तत्र मूलं स्तम्भकुम्भिकाद्युत्तरं तु छादनादि । स्वपक्षपरपक्षजनितविनाशनभेदाद्वा ।

स्वपक्षः श्रावकादिः, परपक्षो मिथ्यादृष्ट्यादिः, अपि शब्दस्याध्याहारादास्तां श्रावकः **साधु**रपि सर्वसावद्य विरतो यतिर**प्युपेक्षमाण** औदासीन्यं कुर्वाणो**ऽनन्तसंसारिको भणितस्**तीर्थकृद्गणधरैः। न चैवं यतेर्यतित्वस्य हानिस्तस्य हि नव्यमादानिकमुत्पादयतो हानिः स्याद्, अग्रेतनं तु विलुप्यमानं रक्षतो विशेषतस्तत्पुष्टिरेव । यस्मादागमोऽप्येवमेवास्ते – यदाह –

चोएइ चेइयाणं खेत्तहिरन्ने व गामगावाई ।
मग्गंतस्स उ जइणो तिगरणसोही कहं नु भवे ? ।।
भन्नइ इत्थ विभासा जो एयाइं सयं विमग्गेज्जा ।
तस्स न होई सोही अह कोइ हरेज्ज एयाइं ।।
तत्थ करंतु उवेहं जा सा भणिया उ तिगरणविसोही ।
सा य न होइ अभत्ती य तस्स तम्हा निवारेज्जा ।।

---

१. उवेक्खमाणो. Z

सव्वत्थामेण तहिं संघेण य होइ लग्गियव्वं तु ।
सचरित्तऽचरित्तीण य सव्वेसिं होइ कज्जं तु ।।

[पञ्चकल्पभाष्य-१५६९-१५७२] इति गाथाचतुष्टयार्थः ।।५७।।

देव० : चैत्यं पञ्चधा, साधर्मिकचैत्यं यथा वारत्तकसाध्वादीनाम्, मङ्गलचैत्यं गृहद्वार-देशादिनिकुट्टितप्रतिमारूपम्, शाश्वतं नन्दीश्वरादिव्यवस्थितम्, भक्तिचैत्यं भक्त्याकृतं जिनायतनम्, तच्च साधुनिश्रया कृतं निश्राकृतं तदनिश्रयाकृतं त्वनिश्राकृतम् । इह तु सामान्येन जिनायतनं गृह्यते, तस्य **द्रव्यं** हिरण्यसुवर्णादिरूपम्, तस्य **विनाशे** जायमाने, तथा **तद्द्रव्य-विनाशने** तस्य चैत्यस्य द्रव्यमुपकारकं दारूपलेष्टकादिवस्तु तस्य विनाशने सम्पद्यमाने, **द्विविधभेदे** नूतनलग्नोत्पाटितविनाश्यदैविध्याद् द्विप्रकारभेदे, मूलोत्तरभेदाद्वा, तत्र मूलं स्तम्भ-कुम्भिकादि, उत्तरं तु छादनादि, स्वपक्षपरपक्षजनितविनाशद्वैविध्याद्वा द्विविधभेदे, यदाह–

जुग्गं अईयभावं मूलुत्तरभावओ अहव कट्ठं ।
जाणाहि दुविहभेयं सपक्खपरपक्खमाई[१] वा ।। [ ]

स्वपक्षः श्रावकादिः, परपक्षो मिथ्यादृष्ट्यादिः । **साधुर्यति**रुपेक्षमाणश्चैत्यद्रव्यादिविनाशमेवा-**नन्तसंसारिको भणित**स्तीर्थकृद्गणधरैरिति । अथ त्रिधा प्रत्याख्यातसावद्यस्य यतेश्चैत्यद्रव्यादि-चिन्तायां को नामाधिकार इति चेदुच्यते–यदि राजाऽमात्याद्यभ्यर्थनपुरस्सरगृहहट्टग्रामादिकायदाना-दिविधिनाऽनवरतमुत्पादयति तदा भवति भवद्विवक्षितार्थसिद्धिः, यदा तु केनचिद्यथाभद्रकादिना धर्माद्यर्थं प्राग्वितीर्णमन्यद्वा जिनद्रव्यं विलुप्यमानं रक्षति तदा नाऽभ्युपेतार्थहानिरपि तु विशेषतः पुष्टिरेव, सम्यग्जिनाज्ञाऽऽराधनाद्, यथाहि जिनभवनं नवमकारयतोऽपि पूर्वकृतं तु तत्प्रतिपन्थि-निग्रहेणापि रक्षतो न प्रायश्चित्तं नापि प्रतिज्ञाभङ्ग इति । आगमोऽप्येवमेव व्यवस्थितः, यदाह–

चोएइ चेइयाणं खेत्तहिरन्ने व गामगावाई ।
मग्गंतस्स उ जइणो तिगरणसोही कहं नु भवे ?।।
भन्नइ इत्थ विभासा जो एयाइं सयं विमग्गेज्जा ।
तस्स न होई सोही अह कोइ हरेज्ज एयाइं ।।
तत्थ करंतु उवेहं जा सा भणियाउ तिगरणविसोही ।
सा य न होइ अभत्ती य तस्स तम्हा निवारेज्जा ।।

१. माइं वा T,C

सव्वत्थामेण तहिं संघेण य होइ लग्गियव्वं तु ।
सचरित्तऽचरित्तीण य सव्वेसिं होइ कज्जं तु ।।

[पञ्चकल्पभा० १६६९-१६७२] इति गाथार्थः ।।५।।

** उपदेशपदे-४१५ **

तथा –

चेइयदव्वविणासे तद्दव्वविणासणे दुविहभेए ।
साहू उवेक्खमाणो अणंतसंसारिओ भणिओ ।।

इह **चैत्यद्रव्यं** क्षेत्रहिरण्यग्रामवनवास्त्वादिरूपं तत्तत्समयवशेन चैत्योपयोगितया सम्पन्नं तस्य **विनाशे** चिन्तानियुक्तैः पुरुषैः सम्यगप्रतिजागर्यमाणस्य स्वत एव परिभ्रंशे सम्पद्यमाने, तथा **तद्द्रव्यविनाशने** चैत्यद्रव्यविलुण्टने परैः क्रियमाणे । कीदृशे इत्याह–**द्विविधभेदे** वक्ष्यमाणविनाशनीयद्विविधवस्तुविषयत्वेन द्विप्रकारे । **साधुः** सर्वसावद्यव्यापारपराङ्मुखोऽपि यति**रुपेक्षमाणो** माध्यस्थ्यमवलम्बमानोऽनन्त-**संसारिकोऽ**परिमाणभवभ्रमणो भवति, सर्वज्ञाज्ञोल्लङ्घनात् । उक्तं च पञ्चकल्पभाष्ये, यथा –

चोएइ चेइयाणं खेत्तहिरण्णाइं गामगावाइं । मग्गंतस्स हु जइणो तिगरणसुद्धी कहं नु भवे ? ।।
भण्णइ एत्थ विभासा जो एयाइं सयं विमग्गेज्जा । न हु तस्स होइ सुद्धी अह कोइ हरेज्ज एयाइं ।।
सव्वत्थामेण तहिं संघेणं होइ लग्गियव्वं तु । सचरित्ताचरित्तीणं एवं सव्वेसिं सामन्नं ।।

इति ।।४१५।।

** श्राद्धदिनकृत्ये-१२७ **

xxx **उपेक्षमाणो** देशनादिभिरनिवारयन् xxx

चक्रे० : सम्प्रति जिनद्रव्यप्रभावाविष्करणपूर्वकं भक्षण-रक्षण-वर्धनफलोपदर्शनाय गाथात्रयमाहुः –

देव० : इह च प्रेक्षावत्प्रवृत्तेः फलेप्साव्याप्तत्वादिति जिनद्रव्यप्रभावाविष्करणपुरस्सरं भक्षण-रक्षण-वर्द्धनफलोपदर्शनाय गाथात्रयमाह –

जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।
भक्खंतो जिणदव्वं अणंतसंसारिओ होइ ।।५८।।
जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।
रक्खंतो जिणदव्वं परित्तसंसारिओ होइ ।।५९।।

जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।
वड्ढंतो जिणदव्वं तित्थयरत्तं लहइ जीवो ।।६०।।

चक्रे० : जिनप्रवचनवृद्धिकरं ज्ञानदर्शनगुणानामुपलक्षणत्वाच्चारित्रगुणानां च **प्रभावकम्** । न हि जिनशासनवृद्धिश्चैत्यालयं विना स्यान्न च तद्द्रव्यं विना प्रत्यहं प्रतिजागर्तुं जीर्णं विशीर्णं वा पुनरुद्धर्तुं पार्यते । तथा तेन पूजार्थद्रव्येण पूजादिषु श्रावकैः क्रियमाणेषु ज्ञानदर्शनचारित्रगुणा दीप्यन्ते । यस्मादज्ञानिनोऽपि 'अहो तत्त्वानुगा बुद्धिरेषाम्' इत्युपबृंहयन्तः क्रमाज्ज्ञानादिगुणलाभभाजः स्युः । तस्मादेवंविधं **जिनद्रव्यं भक्षयन्ननन्तसंसारिको भवती**ति तीर्थच्छेदकत्वेन सकलज्ञानादिगुणघातकत्वात् । **रक्षंश्च *परीतसंसारिकः**, अनेकार्थत्वाद्धातूनामिति दानार्थोऽपि दाधातुः परिपूर्वोऽत्र सङ्ख्यावचनः, तेन परीतः परिमितीकृतः संसारो जिनद्रव्यरक्षकत्वेनोद्धृतप्रवचनत्वादाराधितज्ञानादिगुणत्वाच्च येन स परीतसंसारिकस्तथा **वर्धयन्** स्वधनप्रक्षेपादिना **तीर्थंकरत्वं लभते जीवो**ऽर्हति वात्सल्यात्प्रवचनप्रभावकत्वाच्च यदागमः –

अरिहंत सिद्ध पयवण गुरु थेर बहुस्सुए तवस्सीसुं ।
वच्छल्लया य एसिं अभिक्खनाणोवओगे य ।।
दंसणविणए आवस्सए य सीलव्वए निरइयारो ।
खणलव तवच्चियाए वेयावच्चे समाही य ।।
अपुव्वनाणगहणे सुयभत्ती पवयणे पभावणया ।
एएहिं कारणेहिं तित्थयरत्तं लहइ जीवो ।। [आव. नि॰ १७९-१८१]

पूर्वार्द्धे च गाथात्रयेऽप्येकालापकेन भणनं जिनद्रव्यस्यातिशयख्यापनार्थम् ।।५८, ५९, ६०।।

।। इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृत्तौ समर्थितं प्रथमं देवतत्त्वम् ।।

देव० : जिनप्रवचनमार्हतशासनम्, तस्य **वृद्धिकरं** तत्सन्तानाव्यवच्छित्तिहेतुतया तथा **प्रभावकं** दीपकं **ज्ञानदर्शनगुणानामु**पलक्षणत्वाच्चारित्रगुणानां च, न खलु जिनप्रवचनवृद्धिर्जिनवेश्मविरहेण भवति, न च तद् द्रव्यव्यतिरेकेण प्रतिदिनं प्रतिजागरयितुम्, जीर्णं विशीर्णं वा पुनरुद्धर्तुं पार्यते, तथा तेन पूजामहोत्सवादिषु श्रावकैः क्रियमाणेषु ज्ञानदर्शनचारित्रगुणाश्च दीप्यन्ते, यस्मादज्ञानिनोऽपि 'अहो तत्त्वानुगामिनी बुद्धिरेतेषाम्' इत्युपबृंहयन्तः क्रमेण ज्ञानदर्शन-

* प्राकृत 'परित्त' इत्यस्य संस्कृत छाया 'परीत' भवति ।

चारित्रगुणलाभभाजो भवन्तीति गर्भार्थः । ततश्चैवंविधं **जिनद्रव्यं भक्षयन्ननन्तसंसारिको भवति,** तीर्थोच्छेदकत्वेन ज्ञानादिसकलगुणघातकत्वादिति । शेषं सुगमम्, नवरं **'परित्तसंसारिओ'**त्ति परि समन्तादितः खण्डितो जिनद्रव्यरक्षणपरत्वेनोपगृहीतप्रवचनत्वादाराधितज्ञानादिगुणत्वाच्च । स चासौ संसारश्च, स विद्यते यस्य स परीतसंसारिकः । तथा **'वड्ढंतो'**त्ति उचितांशप्रक्षेपादिना कलान्तरप्रयोगादिना वा वृद्धिमुपनयंस्**तीर्थकरत्वं लभते जीवः** । अर्हद्वात्सल्यादुक्तन्यायेन प्रवचनप्रभावकत्वाच्च, यदाह –

चेइयकुलगणसंघे उवयारं कुणइ जो अणासंसी ।
पत्तेयबुद्धगणहर तित्थयरो वा तओ होइ ।। [उपदेशपद-४१९]

जिनप्रवचनेत्याद्यालापकस्य चासकृद्वणनं गमिकसूत्रत्वादिति गाथार्थः ।।५८, ५९, ६०।।

।। इति श्रीदेवभद्रसूरिविरचिते दर्शनशुद्धिप्रकरणविवरणे
प्रथमं देवतत्त्वं समाप्तम् ।।श्रीरस्तु।।

**** संबोधसप्ततिकायाम्-६८ ****

अथ क्षेपकगाथाद्वयेन जिनद्रव्यभक्षणफलमाह –

जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।
भक्खंतो जिणदव्वं अणंतसंसारिओ होइ ।।

जिनप्रवचनस्य जिनोक्तसिद्धान्तस्य **वृद्धिकरः,** पुनर्ज्ञानदर्शनगुणानां **प्रभावकः** पुमानपि **जिनद्रव्यं भक्षयन्** सन्**ननन्तसंसारिको भवति,** अनन्तः संसारो विद्यते यस्य सोऽनन्तसंसारिकः, अथवाद्यं विशेषणद्वयं द्रव्यस्य व्याख्येयं प्राग्वत् ।।६८।।

**** उपदेशपदे-४१७ ****

अथ चैत्यद्रव्यरक्षाफलमभिधातुमाह –

जिणपवयणवुड्ढिकरं पभावगं णाणदंसणगुणाणं ।
रक्खंतो जिणदव्वं परित्तसंसारिओ होइ ।।

जिनप्रवचनवृद्धिकरं भगवदर्हदुक्तशासनोन्नतिसम्पादकम्, अत एव **(प्रभावकं)** विभावनं विस्तारहेतुः । केषामित्याह–**ज्ञानदर्शनगुणानाम्**। तत्र ज्ञानगुणा वाचना-प्रच्छना-परावर्त्तना-अनुप्रेक्षा-धर्मकथालक्षणाः, दर्शनगुणाश्च सम्यक्त्वहेतवो जिनयात्रादिमहामहरूपा **रक्षंस्त्रायमाणो जिनद्रव्यं**

निरूपितरूपम्, साधुः श्रावको वा **परीतसंसारिकः** परिमितभवभ्रमणभाग् **भवतीति** । तथाहि—जिनद्रव्ये रक्षिते सति तद्विनियोगेन चैत्यकार्येषु प्रसभमुत्सर्प्पत्सु भविनो भव्याः समुद्गतोदग्रहर्षा निर्वाणावन्ध्य-कारणबोधिबीजादिगुणभाजो भवन्तीति । तथा चैत्याश्रयेण संविग्नगीतार्थसाधुभिरनवरतं सिद्धान्त-व्याख्यानादिभिस्तथा तथा प्रपञ्चयमानैः सम्यग्ज्ञानगुणवृद्धिः सम्यग्दर्शनगुणवृद्धिश्च सम्पद्यते । इति चैत्यद्रव्यरक्षाकारिणो मोक्षमार्गानुकूलस्य प्रतिक्षणं मिथ्यात्वादिदोषोच्छेदस्य युज्यत एव परीत-संसारिकत्वमिति ।।४१७।।

* *श्राद्धदिनकृत्ये*-१४३ *

xxx **परित्तसंसारिक** इत्यासन्नमुक्तिगमनादल्पभवस्थितिकः xxx

* *संबोधसित्तर्याम्*-६६ *

एते पूर्वोक्ताः सूक्ष्मभावास्तीर्थकृता प्रतिपादिता इति तीर्थकृत्त्वस्यैव कारणमाह –

जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।
वड्ढंतो जिणदव्वं तित्थयरत्तं लहइ जीवो ।।

जिनद्रव्यं देवसंबन्धिद्रव्यं **वर्धयन्** सुस्थानकलान्तरप्रयोगादिना वृद्धिं नयञ्**जीवो** भव्यसत्त्वस्**तीर्थकरत्वमा-**र्हन्त्यं **लभते** समासादयति । तीर्थकरत्वलाभस्तु देवद्रव्यवृद्धिं कर्तुरर्हत्प्रवचनभक्त्यतिशयात्सुप्रसिद्ध एव । किम्भूतं जिनद्रव्यम् ? **जिनप्रवचनवृद्धिकरम्,** कथं सति हि देवद्रव्ये प्रत्यहं जिनायतने पूजासत्कारसम्भवः, तत्र च प्रायो यतिजनसंपातस्तद्व्याख्यानश्रवणादेश्च जिनप्रवचनवृद्धिः । तथा **ज्ञानदर्शनगुणानां प्रभावकमु**त्सर्पणाकारकम् । जिनप्रवचनवृद्ध्या हि ज्ञानादिगुणानां प्रभावना भवत्येव । सोऽपि वृद्धिराज्ञयैव कर्तव्या नान्यथा । यदुक्तम् –

जिणवरआणारहियं वद्धारिंतावि के वि जिणदव्वं । बुडंति भवसमुद्दे मूढा मोहेण अन्नाणी ।।

जिनवराज्ञारहितं जिनद्रव्यं वर्धयन्तोऽपि मूढा भवसमुद्रे ब्रुडन्तीति सम्बन्धः । जिनवराणामाज्ञा-ऽऽगमस्तया रहितं मुक्तं जिनवराज्ञारहितमिति क्रियाविशेषणम् । ततश्च जिनवराज्ञारहितं यथा भवति तथा वर्धयन्तोऽपि वृद्धिं नयन्तोऽपि केऽपि मुग्धबुद्धयो जिनद्रव्यम्, आज्ञारहितं वर्धनं चैवम्–यथा श्रावकेण देवस्ववृद्धये कल्पपालमत्स्यबन्धकवधकवेश्याचर्मकारादीनां कलान्तरादिदानम् । तथा देववित्तेन वा भाटकादिहेतुकदेवद्रव्यवृद्धये यद्देवनिमित्तं स्थावरादिनिष्पादनम् । तथा महार्घाऽनेहसि विक्रयेण बहुदेव-द्रविणोत्पादनाय गृहिणा यद्देवधनेन समर्घधान्यसंग्रहणम् । तथा देवहेतवे कूपवाटिकाक्षेत्रादिविधानम्। तथा शुल्कशालादिषु भाण्डमुद्दिश्य राजग्राह्यभागाधिककरोत्पादनादुत्पन्नेन द्रव्येण जिनद्रविणवृद्धिनयनं जिनवराज्ञारहितम् । तथा चोक्तम् –

उस्सुत्तं पुण इत्थं थावरपाउग्गकूवकरणाई । उब्भूयगकरउप्पायणाइ धम्माहिगारंमि ।।

तत्र स्थावरादिनिर्मापणादीनां षट्कायारम्भासंयतवासादिना महासावद्यत्वेन निवारितत्वाद्देवार्थ-मुद्भूतकरोत्पादनस्य च लोकाप्रीतिजनकत्वेनाबोधिहेतुत्वात्, तदुक्तम् -

धम्मत्थमुज्जएणं सव्वस्सापत्तियं न कायव्वं । इय संजमो वि सेओ इत्थ य भगवं उदाहरणं ।।

सो तावसासमाओ तेसिं अपत्तियं मुणेऊणं। परमं अबोहिबीयं तओ गओ हंत काले वि ।।

तदेवं वर्धयन्तोऽप्यास्तां भक्षयन्तः, तद्भक्षणस्य महानर्थहेतुत्वात् । किम् ? इत्याह-ब्रुडन्ति मज्जन्ति भवसमुद्रे संसारवारिधौ मूढा मन्दाः, किंविशिष्टाः ? मोहेन मोहनीयकर्मणाऽज्ञानिनो विशुद्धज्ञानविकला देवद्रव्यं वर्धयन्तोऽपि भवसमुद्रे मज्जन्ति, जिनाज्ञाभङ्गहेतुत्वात्तादृशवर्धनस्य । ननु तर्हि जिनद्रव्यं वृद्धिमपि न नेयम् ? इति चेन्न, तद्वृद्धिप्रयोगस्यागमे बहुशः शुभफलहेतुत्वेनाभिधानात् -

एवं नाऊण जे दव्वं वुड्ढिं निंति सुसावया । ताणं रिद्धी पवड्ढेइ कित्ती सुक्खं बलं तहा ।।

पुत्ता य हुंति से भत्ता सोंडीरा बुद्धिसंजुया । सव्वलक्खणसंपन्ना सुसीला जणसम्मया ।।

देवद्रव्यवत्साधारणद्रव्यमपि वर्धनीयमेव, देवद्रव्यसाधारणद्रव्ययोर्हि वर्धनादौ शास्त्रे तुल्यत्वश्रुतेः, तथा चोक्तम् -

देवस्सं नाणदव्वं च साधारणधणं तहा । सावएहिं तिहा काउं नेयव्वं वुड्ढिमायरा ।। तथा -

चेइयदव्वं साहारणं च जो दुहइ मोहियमईओ । धम्मं च सो न याणइ अहवा बद्धाउओ नरए ।।

यथा जिनद्रव्यस्य वृद्धिः कर्तव्या तथा तद्रक्षणमपि विधेयम्, यदुक्तम्-

जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं । रक्खंतो जिणदव्वं परित्तसंसारिओ होइ ।। 'परीतसंसारिकः' इत्यासन्नमुक्तिगमनादल्पस्थितिकः ।।६६।।

*** उपदेशपदे-४१८ ***

xxx **वर्द्धयन्न**पूर्वापूर्वद्रव्यप्रक्षेपेण वृद्धिं नय**ञ्जिनद्रव्यम्, तीर्थकरत्वं** चतुर्वर्णश्रीश्रमणसङ्घकर्तृत्वलक्षणं **लभते जीवः** । xxx

२-धर्मतत्त्वम्

चक्रे० : व्याख्यातं देवतत्त्वम्, देवश्च भव्यावबोधाय धर्ममुपदिदेशेत्यनेन सम्बन्धेनायातं मूलद्वारगाथाक्रमप्राप्तं च धर्मतत्त्वमधुना विव्रियते । तत्रादौ गाथा –

देव० : व्याख्यातं लेशतो देवतत्त्वमिदानीं मूलद्वारगाथाक्रमप्राप्तं धर्मतत्त्वं विव्रियते, सम्बन्धश्चास्य प्राच्येन प्राग्देवस्वरूपं न्यक्षेण चचक्षे, स चासौ देवः स्वयमधिगताशेष-समीहितव्योऽपि जन्तूनां हिताय यथा यथावस्थितं धर्ममुपदिदेश तथोच्यते, तत्रादौ गाथा –

जीवदयसच्चवयणं परधणपरिवज्जणं सुसीलं च ।
खंती पंचिदियनिग्गहो य धम्मस्स मूलाइं ।।६१।।

चक्रे० : स्पष्टा, नवरं चकारात्परिग्रहविरतिग्रहः । **'खंती'** त्ति क्षान्तिः क्रोधनिग्रहः । क्षान्तिभणनाच्छेषकषायनिग्रहोऽपि ज्ञेयः । **'पंचिंदियनिग्गहो'** त्ति पञ्चानां स्वकीयेन्द्रियाणां निग्रहो विज्ञेयः, धर्मश्च द्विधा गृहिधर्मयतिधर्मभेदात् ।।६१।।

देव० : जीवितवन्तो जीवन्ति जीविष्यन्तीति च **जीवाः,** चेतनादिलिङ्गव्यङ्ग्याः पृथिव्यादयः प्राणिनस्तेषु **दया** कारुण्यम्, **सत्यवचनं** भूतहिता वाक्, **पर** आत्मव्यतिरिक्तास्तेषां **धनं** हिरण्यादि तस्य **परिवर्जनं** परिहारः, सुष्ठु शोभनं **शीलं** सदाचारश्चतुर्थव्रतं वा **चः** समुच्चये, **क्षान्तिः** क्रोधनिग्रहः, उपलक्षणं चेदं शेषकषायनिग्रहस्य, **पञ्चे**ति पञ्चसङ्ख्या**नीन्द्रियाणि** स्पर्शनरसनघ्राणचक्षुःश्रोत्रलक्षणानि करणानि, तेषां **निग्रहो** निरोधः स्वविषयप्रवृत्तावपि रागद्वेषा-करणं यदुक्तम् –

न शक्यं रूपमद्रष्टुं चक्षुर्गोचरमागतम् ।
रागद्वेषौ तु यौ तत्र तौ बुधः परिवर्जयेत् ।। [ ] इति ।

इह पञ्चेन्द्रियनिग्रहस्य मनोनिग्रहपूर्वकत्वात्तन्निग्रहोऽपि वेदितव्यः । **चः** समुच्चये, धारयति दुर्गतौ निपततो जीवानिति **धर्मः,** तथा च वाचकः –

प्राग्लोकबिन्दुसारे सर्वाक्षरसन्निपातपरिपठितः ।
धृञ्धरणार्थो धातुस्तदर्थयोगाद् भवति धर्मः ।। [ ]
दुर्गतिभयप्रपाते पतन्तमभयकरदुर्लभत्राणे ।
सम्यक् चरितो यस्माद् धारयति ततः स्मृतो धर्मः ।। [ ]

तस्य मूलानीव **मूलानि** तत्प्रतिष्ठत्वाद् धर्ममहामहीरुहस्य, सम्मतश्चायमर्थः सर्वास्तिकवादिनाम्, तथा चाहु –

अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ।
पञ्चैतानि पवित्राणि सर्वेषां धर्मचारिणाम् ।। तथा -
कषाया यस्य [१]नोच्छन्ना यस्य नात्मवशं मनः ।
इन्द्रियाणि न गुप्तानि दर्शनं तस्य जीविका ।। [ ] इति गाथार्थः ।।६१।।

चक्रे० : अभ्यस्तगृहिधर्मश्च प्रायो यतिधर्मयोग्यः स्यादित्यादौ गृहिधर्ममाहुः –

देव० : एवं सर्वसम्मतं धर्ममुपदर्श्य स्वसमयप्रसिद्धविधिना गृहियतिभेदतस्तमभिधित्सुरभ्यस्तगृहिधर्म प्रायेण यतिधर्मयोग्यो भवतीतिन्यायाद्गुणस्थानकक्रममाश्रित्य वा तावद् गृहिधर्ममाह

सम्मत्तमूलं[२]मणुव्वयपणगं तिन्नि उ गुणव्वया हुंति ।
सिक्खावयाइं चउरो बारसहा होइ गिहिधम्मो।।६२।।

चक्रे० : प्रतीतार्था ।।६२।।

देव० : सम्यक्त्वं प्राग्वर्णितस्वरूपं **तन्मूलमा**दिर्यस्य तत्तथा, अनेन सम्यक्त्वलाभव्यतिरेकेण व्रताभावं दर्शयति । यदाह –

सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ ।
चरणोवसमखयाणं सागरसंखंतरा हुंति ।। [आत्मप्रबोध-३४]

चारित्रोपशमश्रेणिक्षपकश्रेणीनां सङ्ख्यातसागरोपमाण्यन्तरं भवति । अणुनि लघूनि महाव्रतापेक्षया व्रतानि, यदिवाऽनु पश्चान्महाव्रतप्रतिपत्त्यसमर्थस्य कथनीयानि, 'जइ धम्ममसमत्थे जुज्जइ तद्देणंपि साहूणं' इति वचनात् । अणोर्वा यत्यपेक्षया गृहस्थस्य व्रतान्यनुव्रतान्यणुव्रतानि

१. नोच्छिन्ना० M २. मणुवयपणगं तिन्नि य गुणव्वयाइं च T,B,C,P, K

वा तेषां पञ्चक**मनुव्रतपञ्चकमेव** उत्तरपदस्थतुशब्दस्यैवकारार्थस्येह सम्बन्धात्तेन नामूनि मध्यमतीर्थेष्वपि महाव्रतानीव चत्वारि, यतः शैलकज्ञाते शैलकराजो नेमिनाथशिष्यस्यान्तिके पञ्चाणुव्रतिकं सप्तशिक्षाव्रतिकं श्रमणोपासकधर्मं प्रतिपन्न इत्यभिहितमिति ।

त्रीणि त्रिसङ्ख्यानि गुणायानुव्रतानामुपकाराय व्रतानि नियमा **गुणव्रतानि,** पुंस्त्वं तु 'प्राकृते लिङ्गमतन्त्रम्' इति वचनात् **भवन्ति** क्रियापदं चैतद्वचनव्यत्ययेन पूर्वत्रोत्तरत्र च सम्बध्यते । शिक्षा अभ्यासस्तत्प्रधानानि व्रतानि **शिक्षाव्रतानि,** पुनः पुनरासेवार्हाणीत्यर्थः । **चत्वारि** चतुःसङ्ख्यानि, इतिशब्दस्य लुप्तस्येह दर्शनादित्युक्तनीत्या **द्वादशधा भवति,** गृहं स्वामित्वेन विद्यते यस्य स **गृही** श्रावकस्तस्य **धर्म** इति गाथार्थः ।।६२।।

**** श्रावकधर्मविधिप्रकरणे-१३ ****

तमेव ग्राहणीयतयोदितं श्रावकधर्मं संपिण्ड्याह –

सम्मत्तमूलिया ऊ पंचाणुव्वय गुणव्वया तिण्णि ।
चउसिक्खावयसहिओ सावगधम्मो दुवालसह ।।

'सम्मत्त' गाहा व्याख्या–सम्यक्त्वं मूलं प्रथमं कारणं येषां तानि **सम्यक्त्वमूलानि,** 'कमलाकृतयो वा' इति पुँल्लिङ्गता । **तु**रवधारणे, सम्यक्त्वमूलान्येव, न हि सम्यक्त्वमन्तरेणाऽणुव्रतादिसम्भवः । तदुक्तम्–

मूलं द्वारं प्रतिष्ठानमाधारो भाजनं निधिः । द्विषट्कस्याऽस्य धर्मस्य सम्यग्दर्शनमिष्यते ।। [श्रा० प्र० सू० वृ० पृ० ९/१] **पञ्चे**ति संख्या, अणूनि लघूनि महाव्रताऽपेक्षया व्रतानि प्रतीता**न्यणुव्रतानि** । तथा **गुणव्रतानि त्रीणि,** पुँल्लिङ्गता प्राग्वत् । **चत्वारी**ति संख्या, शिक्षाऽभ्यासस्तत्प्रधानानि व्रतानि **शिक्षाव्रतानि,** पुनश्चतुःशब्देन समासः संज्ञात्वात् प्राकृतत्वाद्वा, तैः **सहितो** युक्तः **श्रावकधर्मो**ऽधिकृतो **द्वादशधा** द्वादशप्रकारो भवतीत्यध्याहारः । इति गाथार्थः ।।१३।।

चक्रे० : अथ द्वादशव्रतनामान्याहुः –

देव० : द्वादशभेदः श्रावकधर्मो भवतीत्यभिहितमथ तानेव नामग्राहमाह –

पाणिवह मुसावाए अदत्तमेहुण परिग्गहे चेव ।
दिसिभोग दंड समइय देसे तह पोसहविभागे ।।६३।।

चक्रे० : सूचकत्वात्सूत्रस्य **प्राणातिपात**विरति**मृषावाद**विरतिर**दत्तादान**विरति**र्मैथुन**विरतिः **परिग्रह**विरति**र्दिग्वि**रति**र्भोगोपभोग**विरति**रनर्थदण्ड**विरतिः **सामायिकं देशावकाशिकं पोषधोऽतिथिसंविभागश्चेति** ।।६३।।

देव० : प्राणिनो जीवास्तेषां **वधो** हिंसा प्राणवियोजनमित्यर्थः । **मृषावादोऽ**सत्यभाषणम्, **'अदत्त'**त्ति एकदेशे समुदायोपचारादददत्तादानमवितीर्णग्रहणम्, एवमुत्तरत्रापि यथासम्भवं दृश्यम्, **मैथुनम**ब्रह्मसेवनम्, **परिग्रहो** गार्ध्यमिह च सूचनात्सूत्रमिति सर्वत्र विरमणशब्दो दृश्यः, **चैवे**ति समुच्चये, **'दिसि'**त्ति दिक्परिमाणव्रतम्, **'भोग'**त्ति भोगोपभोगपरिमाणकरणम्, **'दंड'**त्ति अनर्थदण्डविरतिः, **'समइय'**त्ति सूचनात्सामायिकम्, **'देसे'**त्ति देशावकाशिकम्, **तथा** तेन व्रतस्वरूपलक्षणप्रकारेण, **पौषधं** पौषधव्रतम्, **'विभाग'**त्ति अतिथिसंविभागव्रतं विभक्तिलोप एकारश्च यथासम्भवं सर्वत्र प्राकृतत्वादित्यक्षरगमनिका, विषयविभागश्चैवम्, तद्यथा –

१-उपासकः स्थूलनिरपराधजीवानभिसन्धाय[१] द्विविधत्रिविधादिना भङ्गजालेन न हन्तीति प्रथमाणुव्रतम्, तत्र स्थूला द्वित्रिचतुष्पञ्चेन्द्रियास्तद् ग्रहणात्पृथिव्यादयो निरपराधग्रहणात्सापराधाश्चौरादयः, अभिसन्धायेति भणनादारम्भसम्भवद्वधाश्च न व्रतविषयाः, भङ्गजालं च १-द्विविधं त्रिविधेनेत्येको भङ्गः, द्विविधं कृतकारितभेदं वधम्, त्रिविधेन मनसा वाचा कायेन, एवं च भावना, वधं न करोत्यात्मना न कारयत्यन्यैर्मनसा वचसा कायेन चेति । अनुमतिस्तु सर्वत्र न प्रतिषिद्धाऽपत्यादिपरिग्रहसद्भावात्, तैर्हिंसादिकरणे च तस्यानुमतिप्राप्तेः, २-द्विविधं द्विविधेनेति द्वितीयः, द्विविधमिति प्राग्वद् द्विविधेन मनसा वचसा, यद्वा मनसा कायेन, यदिवा वाचा कायेनेति, ३-द्विविधमेकविधेनेति तृतीयो द्विविधं भावितवद्, एकविधेन मनसा यद्वा वाचा यदिवा कायेनेति, ४-एकविधं त्रिविधेनेति चतुर्थः, एकविधं करणं यद्वा कारणं त्रिविधेनेति पूर्ववद्, ५-एकविधं द्विविधेनेति पञ्चमः, ६-एकविधमेकविधेनेति षष्टः, यदाह –

दुविहं तिविहेण पढमो दुविहं दुविहेण बीयओ होइ ।
दुविहं एगविहेणं एगविहं चेव तिविहेणं ।। [प्रव.सारो० १३४२]
एगविहं दुविहेणं एक्केक्कविहेण छट्ठओ होइ । xxx ।। [प्रव.सारो० १३४३]

एते च भङ्गाः करणत्रिकेण योगत्रिकेण च विशेष्यमाणा एकोनपञ्चाशद्भवन्ति । तथाहि-१-हिंसां न करोति मनसा, २-वाचा, ३-कायेन, ४-मनसा वाचा, ५-मनसा कायेन, ६-वाचा कायेन, ७-मनसा वाचा कायेन च, एते करणेन सप्त, एवं कारणेन सप्त, अनुमत्यापि सप्त। तथा १-हिंसां न करोति न कारयति च मनसा, २-वाचा, ३-कायेन, ४-मनसा वाचा, ५-मनसा कायेन, ६-वाचा कायेन, ७-मनसा वाचा कायेन च, एते करणकारणाभ्यां सप्त, एवं करणानुमतिभ्याम्,

१. सत्वानभिसन्धाय T,B,C

कारणानुमतिभ्याम्, करणकारणानुमतिभिश्च सप्त सप्त, एवं सर्वे मीलिता एकोनपञ्चाशद्भवन्ति एते च त्रिकालविषयत्वात्प्रत्याख्यानस्य कालत्रयेण गुणिताः सप्तचत्वारिंशदधिकं शतं भवन्तीति । यदाह –

सीयालं भंगसयं पच्चक्खाणम्मि जस्स उवलद्धं ।
सो खलु पच्चक्खाणे कुसलो सेसा अकुसला उ ।। [प्रव.सारो॰ १३२८]

एत अहिंसाव्रतमाश्रित्योक्ता व्रतान्तरेष्वपि द्दष्टव्या इति ।

२-कन्यागोभूम्यलीकन्यासापहारकूटसाक्ष्यलक्षणेभ्यः स्थूलासत्येभ्यो विरतिर्द्वितीयमणुव्रतम्, तत्र कन्यालीकं कन्यां सदोषामप्यदोषां विपर्ययं वा वदतः, सर्वद्विपदालीकोपलक्षणं चैतत् । गवालीकं गामल्पक्षीरामपि बहुक्षीरां विपर्ययं वा वदतः । इदमपि चतुष्पदालीकोपलक्षणम् । भूम्यलीकं भुवं परसत्कामप्यात्मादिसत्कां विपर्ययं वा वदत एतदपि पादपाद्यपदव्यलीकोपलक्षणम्, न च वाच्यं द्विपद-चतुष्पदाऽपदग्रहणमेव कस्मान्न कृतमिति ? कन्याद्यलीकानां लोकेऽतिगर्हितत्वेन रूढत्वात्, अत एव हि न्यासापहारकूटसाक्ष्येऽपि भेदेनोपात्ते, न्यासापाहारो न्यासीकृतसुवर्णाद्यपलापः, कूटसाक्ष्यं प्रमाणीकृतस्य लञ्चामत्सरादिना कूटं वदतः । एतानि पञ्च क्लिष्टाशयसमुत्थत्वात् स्थूलासत्यानीति ।

३-सचित्ताचित्तमिश्रभेदाच्चोरव्यपदेशनिबन्धनस्थूलादत्तपरस्वाद्विरतिस्तृतीयमणुव्रतम्, सूक्ष्मं तृणजलेन्धनदन्तशोधनादि नात्रावरुध्यते ।

४-स्वदारसन्तोषः परदारवर्जनं वा चतुर्थम्, परदाराः परकलत्राणि नारीदेवीतिरश्चीरूपाणि, तेषां वर्जनम्, स्त्रियास्तु स्वभर्तृव्यतिरिक्तसर्वपुरुषवर्जनमिति ।

५-क्षेत्रवास्तुरूप्यस्वर्णधनधान्यद्विपदचतुष्पदकुप्यलक्षणस्य नवविधपरिग्रहस्य परिमाणकरणं पञ्चममणुव्रतम् । क्षेत्रं सस्योत्पत्तिभूमिः, तत् त्रिविधं सेतुकेतूभयभेदात्, सेतु यदरघट्टादिजलेन सिच्यते, केतुक्षेत्रमाकाशोदकनिष्पाद्यसस्यम्, उभयमुभयजलनिष्पाद्यसस्यम् । वास्तु गृहादि ग्रामनगरादि च, गृहादि त्रिविधम्, खातं भूमिगृहादि, उच्छ्रितं प्रासादादि, खातोच्छ्रितं भूमिगृहस्योपरि गृहादिसन्निवेशः, रूप्यस्वर्णे स्पष्टे, धनं गणिमधरिममेयपरीक्ष्यलक्षणम्, उक्तं च –

गणिमं जाईफलफोफलाइ धरिमं च कुंकुमगुडाई ।
मेज्जे चोप्पडलोणाइ रयणवत्थाइ परिच्छिज्जं ।। [संबोधप्र॰ ११६९]

धान्यं व्रीह्यादि, द्विपदं कलत्रदासशुकादि, चतुष्पदं गवाश्वादि, कुप्यं कांस्य[१]-लोह-त्रपु-ताम्र-सीसकादिघटितभाण्डतूलिपल्यङ्कादिरूपः सर्वो गृहोपस्करः, एतानि पञ्चाणुव्रतानि मूलगुणा उच्यन्ते, श्रावकधर्मतरोर्मूलकल्पत्वाद् ।

दिग्व्रतादीनि तु गुणव्रतशिक्षाव्रतानि शाखाप्रशाखाकल्पत्वादुत्तरगुणाः ।

६-तत्रोर्ध्वाधस्तिर्यग्दिग्गमनपरिमाणकरणं दिग्विरतिव्रतम् ।

७-भोगोपभोगयोः शक्त्या परिमाणकरणं भोगोपभोगव्रतम्, तत्र सकृद्भोग्यस्ताम्बूलान्न-स्रगादिर्भोगः, पुनः पुनर्भोग्यो वस्त्राङ्गनाभवनादिरुपभोगः । इदं च भोगोपभोगव्रतं भोक्तुं योग्येषु परिमाणकरणेन तदितरेषु च वर्जनेन भवति । वर्जनीयानि च –

मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ।।
आमगोरससम्पृक्त-द्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ।। [योगशास्त्रप्र॰ ३-६, ७]
जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत् ।
सन्धानमपि संसक्तं जिनधर्मपरायणः ।। [योगशास्त्रप्र॰ ३-७२]

फलं मधूक-बिल्वादेः, पुष्पमरणि-शिग्रुमधूकादेः, पत्रं प्रावृषि तन्दुलीयकादेः ।

इह च भोगोपभोगकारणं धनोपार्जनमपि भोगोपभोगः, उपचारात्तत्परिमाणमपि भोगोपभोगव्रतम्, यथा श्रावकस्य खरकर्मपरिहारेण जीविका, एतच्चातिचारप्रक्रमे वक्ष्यते।

८-अर्थाय शरीरादिकृते दण्डो मनोवाक्कायैः प्राणिनां पीडनमर्थदण्डो न तथाऽनर्थदण्डः, स चतुर्द्धा, तद्यथा –

आर्तं रौद्रमपध्यानं पापकर्मोपदेशिता ।
हिंसोपकारिदानं च प्रमादाचरणं तथा ।। [योगशास्त्रप्र॰ ३-७३]

तद्विरतिस्तृतीयं गुणव्रतम् । तत्रापध्यानं वैरिमरणदेशघातनृपखेचरत्वादिप्रार्थनारूपं मुहूर्त्तात्परतो वर्जनीयम् । पापोपदेशं च वत्सतरदमनकर्षणादिकं पुत्रस्वजनादीन् विहायान्यत्र त्यजेत्, यन्त्रशस्त्राग्निहलमुशलोदूखलादीनि हिंस्रवस्तूनि च दाक्षिण्यविषयादन्यस्मै न दद्यात् ।

१. स्थालकच्चोलपल्यङ्कादि सर्वो॰ A

प्रमादाचरितं च द्यूतमद्यादिव्यसनम्, कुतूहलाद्गीतनृत्तनाटकादिनिरीक्षणम्, दोलाजलादिकेलिरनुबद्धकषायः सकलां रात्रिं स्वापो विकथा चेत्यादिकं वर्जयेदिति गुणव्रतानि ।

अथ शिक्षाव्रतानामवसरः,

९-तत्रेन्द्रियमनःसमाहितस्य द्विविधत्रिविधं त्यक्तसावद्ययोगस्य मुहूर्त्तं समभावस्थितिः सामायिकव्रतम् । अत्र च प्रतिपन्ने श्रावकोऽपि यतिरिव भवति । यदाह –

सामाइयंमि उ कए समणो इव सावओ हवइ जम्हा ।
एएण कारणेणं बहुसो सामाइयं कुज्जा।। [आव.नि॰ ८०१]

इह च श्रावकः सामायिकं कुर्वंश्चतुर्षु स्थानेषु करोति, जिनगृहे साधुसमीपे पौषधशालायां स्वगृहे वा, यत्र वा विश्राम्यति निर्व्यापारो वाऽस्ते तत्र च । स च प्रतिपत्ता द्विविधः, ऋद्धिमाननृद्धिकश्च। तत्रानृद्धिकः साधुसमीपे यदा करोति तदायं विधिः – यदि कस्मादपि भयं नास्ति, केनचिद्विवादो नास्ति, ऋणं वा न धारयति, तदा स्वगृहेऽपि सामायिकं कृत्वा पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः साध्वाश्रयं गत्वा साधून्नमस्कृत्य सामायिकं करोति 'करेमि भंते सामाइयं सावज्जं जोगं पच्चक्खामि, जाव साहू पज्जुवासामि, दुविहंतिविहेणं' इत्यादि । एवं कृत सामायिक ईर्यापथिकायाः प्रतिक्रम्य पश्चादागमनमालोच्य यथाज्येष्ठमाचार्यादीन् वन्दते, पुनर्गुरुं वन्दित्वा प्रत्युपेक्ष्य निविष्टः श्रृणोति पठति पृच्छति वा । एवं जिनभवनादिष्वपि, [यदा तु पौषधशालायां स्वगृहे वा सामायिकं गृहीत्वा तत्रैवाऽऽस्ते] केवलं तदा[१] गमनं नास्ति। यस्तु महर्द्धिकः सोऽकृतसामायिक एव सर्वविभूत्या तीर्थं प्रभावयन् जिनालयं साधुवसतिं वा गच्छति, आगतश्चासौ सामायिकं करोतीत्यादि पूर्ववत् । स च सामायिकं कुर्वन् मुकुटं कुण्डले नाममुद्रां पुष्पं ताम्बूलं प्रावारकादि व्युत्सृजतीति ।

१०-दिग्व्रतप्रतिपन्नस्य दिक्परिमाणस्य दिवारात्रौ प्रहरादौ च सङ्क्षेपणं देशावकाशिकम्, शेषव्रतविषयसङ्क्षेपणमप्यत्र द्रष्टव्यम्, तत्सङ्क्षेपस्याप्यवश्यं कर्तव्यत्वादिति ।

११-अष्टमीचतुर्दशीपूर्णिमाऽमावास्यासु देशतः सर्वतो वाऽऽहारशरीरसत्काराब्रह्मचर्यकुव्यापारपरिहारः पौषधव्रतम्, तत्राऽऽहारपौषधो देशतो विवक्षितविकृतेरविकृतेराचामाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति । सर्वतस्तु चतुर्विधस्याप्याहारस्याहोरात्रं यावत्प्रत्याख्यानम्, शरीरसत्कारपौषधश्च देशतः स्नानादेः शरीरसत्कारस्यैकतरस्याकरणम्, सर्वतस्तु सर्वस्यापि, ब्रह्मचर्यपौषधोऽपि देशतो दिवैव रात्रावेव वा, सकृदेव द्विर्वा स्त्रीसेवां मुक्त्वा ब्रह्मचर्यकरणम्,

१. तत्रागमनं A तथा गमनं T,C

सर्वतस्त्वहोरात्रं यावद् ब्रह्मचर्यपालनम् । कुव्यापारपौषधस्तु देशत एकतरस्य कस्यापि कुव्यापारस्याकरणम्, सर्वतस्तु सर्वेषामपि गृहकर्मादीनामकरणम् । इह च देशतः कुव्यापारनिषेधं यदा करोति तदा सामायिकं करोति वा न वा, यदा तु सर्वतः करोति तदा नियमात्करोत्येव, अकरणे तु तत्फलेन वञ्च्यते । सर्वतः पौषधं च पौषधशालादौ त्यक्तमौक्तिकमणिसुवर्णाद्यलङ्कारो व्यपगतमालाविलेपनवर्णकः परिहतप्रहरणः प्रतिपद्यते ।

१२-न्यायागतानां प्रासुकैषणीयानामशन-पान-खाद्य-स्वाद्यानां वस्त्रपात्रोपाश्रयादीनां चातिथेः साधोः सङ्गतो देश-काल-श्रद्धा-सत्कारादिक्रमयुक्त आत्मानुग्रहबुद्ध्या विभागो दानमतिथिसंविभागो द्वादशं व्रतम्, यदुक्तम् –

साहूण कप्पणिज्जं जं नवि दिन्नं कहिंचि किंचि तहिं ।
धीरा जहुत्तकारी सुसावगा तं न भुंजंति ।।
वसही-सयणा-ऽऽसण-भत्त-पाण-भेसज्ज-वत्थपायाई ।
जइवि न पज्जत्तधणो थोवा वि हु थोवयं देइ ।। [उपदेशमाला-२३९, २४०]

एतानि च सातिचाराणि न सम्यगित्यमीषु भोगोपभोगव्रतवर्जं पञ्चपञ्चातिचाराः परिहर्तव्याः । भोगोपभोगव्रते तु विंशतिः ।

१-तत्र प्रथमव्रते तावदमी-अतिक्रोधादिभिर्बन्धो वधश्च्छविच्छेदोऽतिभारारोपणं भक्तपाननिरोधश्चेति । १-तत्र क्रोधाद् बन्धो गो-मनुष्यादीनां प्राणप्रहाणनिरपेक्षं रज्जुदामनकादिना नियमनम्, न पुनर्यत्पुत्रादीनां विनयग्रहणार्थं चतुष्पदानां च रक्षार्थं सविक्रमणं यतनया क्रियते । २-वधो लगुडकशादिना निर्दयताडनं क्रोधादेव, न पुनर्यद् व्रतसापेक्षं शिक्षार्थं यतनया पुत्राश्वादीनां लतादवरकादिना सकृद् द्विस्त्रिर्वा ताडनमिति । ३-छविस्त्वक् शरीरं वा, तस्याश्छेदः क्रोधाल्लोभाद्वा द्विपदचतुष्पदानां हस्तपादकर्णनासिकाछेदकर्णपाटनपृष्टकर्तनादिः, न पुनश्चिकित्सार्थमरुगण्डपादवल्मीकोपहतपादादिच्छेदनमिति। ४-अधिकस्य वोढुमशक्यस्य भारस्यारोपणं क्रोधाल्लोभाद्वा, गो-करभ-रासभ-मनुष्यादेर्वहनाय यावन्तमेव सपराक्रमं वोढुं क्षमस्तावानेव भारोऽध्यारोप्य इत्यर्थः । ५-भक्तादिनिरोधश्च क्रोधान्निर्दयं भृत्याधमर्णादीनाम्, ज्वरितादीनां तु रोगचिकित्साहेतुत्वान्न दूष्यतीति । ननूपासकेन हिंसैव प्रत्याख्याता ततो बन्धादौ क दोषः ? सत्यम्, हिंसाहेतुत्वात्तत्वतस्तेऽपि प्रत्याख्याता एव न चैवं सति व्रतभङ्ग एव, यतो द्विविधं हि व्रतमन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र यदा कोपाद्यावेशान्निर्दयं बन्धादौ प्रवर्त्तते तदा विरत्यनपेक्षप्रवृतेरन्तर्वृत्त्या व्रतभङ्गो हिंसाया अभावाच्च बहिर्वृत्त्या पालनमिति देशस्य भञ्जनाद्देशस्य

पालनाच्चातिचारव्यपदेशः । एवमुत्तरेष्वपि भावना, बन्धादयश्चेहोपलक्षणमभिचारमन्त्रतन्त्र-प्रयोगादयोऽप्यतिचारतया ज्ञेया एते प्रथमव्रते ।

२-मृषावादे तु सहसाभ्याख्यानं रहोऽभ्याख्यानं स्वदारमन्त्रभेदो मृषोपदेशः कूटलेखकरण-ञ्चेति। १-सहसाऽनालोच्याभ्याख्यानमसद्दोषाध्यारोपणम्, यथा चौरस्त्वं पारदारिको वेत्यादि। २-रहसैकान्तेन हेतुभूतेनाभ्याख्यानं रहोऽभ्याख्यानम्, इदमुक्तं भवति-रहसि मन्त्रयमाणान् वीक्ष्यासत्सम्भावनयैव वदति 'एते हि इदं राजविरुद्धादिकं मन्त्रयन्ते' एतच्च हास्यक्रीडादिना ब्रूते न त्वभिनिवेशेन, तथा सति हि व्रतभङ्ग एव, यदाह –

सहसाब्भक्खणाई जाणंतो जइ करेज्ज तो भंगो ।
जइ पुणऽणाभोगाईहिंतो तो होइ अइयारो ।। [ ]

३-स्वदाराणां मन्त्रो विश्रम्भभाषणम्, तस्य भेदः प्रकाशनम्, दारग्रहणं मित्राद्युपलक्षणम् । अस्य चानुवादरूपत्वेन सत्यत्वेऽपि मन्त्रप्रकाशने लज्जादितः कलत्रादेर्मरणादिसम्भवेन तत्त्वतोऽसत्यत्वादतिचारता । ४-मृषोपदेशो विवादादौ स्वयं परेण वान्यतरातिसन्धानोपायो-पदेशः, इह स्वयमेव वदतोऽन्यं शिक्षयतः किञ्चिद् व्रतसापेक्षत्वादतिचारता । ५-कूटमसद्भूतम्, तस्य लेखः कूटलेखः, इह चासत्यभणनमेव प्रत्याख्यातमिदं तु लेखनमिति व्रतसव्यपेक्षत्वेनातिचार इति।

३-अथ तृतीयव्रते स्तेनाहृतादानं तस्करप्रयोगः विरुद्धराज्यगमनं कूटमानकरणं तत्प्रतिरूपव्यवहारश्चेति, १-स्तेनैराहृतं कुङ्कुमवस्त्रादि तस्यादानम्, तद्विक्राणक्रयेण मुधिकया वा कुर्वंश्चौर इति व्यपदिश्यते, यदाह –

चौरश्चौरापको मन्त्री भेदज्ञः काणकक्रयी ।
अन्नदः स्थानदश्चैव चौरः सप्तविधः स्मृतः ।। [ ]

इत्थं व्रतभङ्गः, वाणिज्यमेव करोमि न चौरिकामित्याशयेन व्रतसव्यपेक्षत्वादभङ्ग इति भङ्गाभङ्गरूपोऽतिचारः । २-तस्करप्रयोगश्चौराणां हरणक्रियायां प्रेरणा, यथा 'किमधुना यूयं निर्व्यापारास्तिष्ठथ ? यदि वो भक्तादि नास्ति तदाहं तद्ददामि, भवदानीतमोषस्य यदि विक्रायको नास्ति, तदाहं विक्रेष्यामि'इत्यादि, अत्रापि भङ्गसापेक्षताभ्यामतिचारता भावनीयेति । ३-विरुद्धो निजदेशस्वामिनः प्रतिपन्थी, तस्य राज्यं कटकं देशो वा, तत्र स्वस्वामिनो निषेधशासनमुल्लङ्घ्य गमनमिह च यद्यपि –

सामीजीवादत्तं तित्थयरेणं तहेव य गुरुहिं ।
एयस्स उ जा विरई अदिन्नादाणस्स सा विरई ।। [नवपदप्र० ३९]

इत्यदत्तादानलक्षणयोगात् तत्कारिणां च चौर्यदण्डयोगेन व्रतभङ्ग एव, तथापि 'वाणिज्यमेवेदं मया कृतम्, न चौर्यम्' इति भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारता । ४-मानं कुडवादि पलादि हस्तादि, तस्य कूटत्वं हीनाधिकत्वम्, हीनमानेन ददात्यधिकेन च गृह्णाति। ५-तस्य प्रस्तुतस्य व्रीह्यादेः प्रतिरूपं सदृशम्, यथा व्रीहीणां पलञ्जिः, घृतस्य वसा, तैलस्य मूत्रम्, जात्यसुवर्णकर्पूरादीनां युक्तिसुवर्णकृत्रिमकर्पूरादिस्तेन व्यवहारः । व्रीह्यादिषु पलञ्ज्यादि प्रक्षिप्य तत्तद्विक्रीणीते[१], एतौ च वञ्चनातः परधनग्रहणाद्भङ्गावेव, केवलं 'खात्रखननादिकमेव चौर्यं प्रसिद्धमियं तु वणिक्कलैव मया कृता' इति भावनातोऽतिचाराविति । यदिवा पञ्चाप्यमी व्यक्तचौर्यरूपा एव, केवलं सहसानाभोगातिक्रमव्यतिक्रमादिभिर्विधीयमाना अतिचारतया व्यपदिश्यन्ते ।

४-मैथुने पुनरपरिगृहीतागमनमित्वरपरिगृहीतागमनमनङ्गक्रीडापरविवाहकरणं कामे तीव्राभिलाषश्चेति । १-अपरिगृहीतायामनाथकुलाङ्गनायां गमनम्, तस्या लोके परदारतया रूढेस्तत्कल्पनया परस्य भर्तुरभावेनापरदारत्वाच्चातिचारः। २-इत्वरकालं या परेण भाट्यादिना परिगृहीता वेश्या तस्यां गमनम्, कथञ्चित्परदारत्वात्तस्या लोके परदारत्वारूढेश्चेति द्वितीयोऽतिचारः । एतौ च परदारवर्जिन एव, न स्वदारसन्तोषिणः, शेषास्तु द्वयोरपि । यदाह –

परदारवज्जिणो पंच हुंति तिन्नि उ सदारसंतुट्ठे ।
इत्थीए तिन्नि पंच व भंगविगप्पेहिं नायव्वा ।। [संबोधप्र० ११५७]

३-अनङ्गः कामस्तत्सम्बद्धा क्रीडा अधरदशनालिङ्गनकुचस्पर्शादिका, निधुवनमेव व्रतविषयो नैषेति भावनया स्वदारसन्तोषिणो वेश्यादौ । परदारवर्जिनः परदारेष्वनङ्गक्रीडामाचरतोऽतिचारता । ४-परेषां स्वापत्यव्यतिरिक्तानां विवाहकरणम्, कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानम्, इदं च द्विविधं त्रिविधेन प्रतिपन्नस्थूलमैथुनव्रतस्य परविवाहकरणेऽर्थतो मैथुनकारणाद् व्रतभङ्ग एव । किन्तु तद्व्रती मन्यते-विवाह एव मया विधीयते न मैथुनं कार्यते' इति सापेक्षत्वादतिचारता । न च वाच्यं स्वापत्यविवाहेऽपि समानमेतदिति, यतस्तदकरणे तेषां स्वच्छन्दचारित्वेन शासनोपघातादयो दोषाः स्युरिति । ५-कामे तीव्राभिलाषस्त्यक्तान्यकृत्य-

१. तत्तद्विक्रीणाते T,B,C

स्याहर्निशं तदेकाग्रता सुरतावसरे च तीव्ररागतया विविधाः कुचेष्टाः, श्रावको हि वेदोदयोपशान्त्यर्थमात्रं मैथुनं सेवते । मैथुनमात्रादेव चोपशान्तौ सम्भवत्यां तीव्रकामाभिलाषोऽर्थतः प्रतिषिद्धोऽतः प्रतिषिद्धाचरणाद्भङ्गः, नियमानाबाधाच्चाभङ्ग इति भङ्गाभङ्गरूपोऽतिचारः ।

स्त्रियास्तु स्वपुरुषसन्तोषपरपुरुषवर्जनयोर्न भेदः, स्वपुरुषव्यतिरेकेणान्येषां परपुरुषत्वाद्, अनङ्गक्रीडादयस्तु त्रयः स्युः पञ्च वा, कथम् ? तत्राद्योऽतिक्रमादिना परपुरुषमभिसरन्त्याः । द्वितीयः सपत्नीवारके स्वपतिं परिभुञ्जानायाः, शेषाः प्राग्वदिति ।

५-परिग्रहव्रते तु योजनात् क्षेत्रवास्तुप्रमाणातिक्रमः, प्रदानाद्रूप्यसुवर्णप्रमाणातिक्रमः, बन्धनाद्धनधान्यप्रमाणातिक्रमः, कारणाद् द्विपदचतुष्पदप्रमाणातिक्रमः, भावात् कुप्यप्रमाणातिक्रमश्चेति । १-तत्र कृतक्षेत्रवास्तुप्रमाणस्याधिकतराभिलाषे व्रतभङ्गभयात् प्राक्तनक्षेत्रादेरासन्नमपरं गृहीत्वा तस्यैकत्वकरणाय सीमावृत्तिवरण्डाद्यपनयनेन तत्तत्र योजयतः प्रथमोऽतिचारः। २-चतुर्मासाद्यवधिकृतस्वर्णरूप्यप्रमाणस्य कुतश्चिदधिकसम्पत्तौ 'पूर्णेऽवधौ पुनर्ग्रहीष्यामि'इति बुद्ध्या व्रतसापेक्षत्वादन्यस्मै ददतो द्वितीयः । ३-प्रतिपन्नधनधान्यप्रमाणस्य तदधिकलाभसम्भवे व्रतभङ्गभयाद् 'उद्गृहगतधनादिविक्रये कृते ग्रहीष्यामि' इति भावनया बंन्धनान्मूटकादि[१]रूपात्सत्यङ्कारदानादिरूपाद्वा स्वीकृत्य परस्यैव गृहे स्थापयतस्तृतीयः । ४-अङ्गीकृतद्विपदचतुष्पदप्रमाणस्य गोमहिषीवडवादेर्विवक्षितकालादर्वागेव प्रसवे आधिक्याद् व्रतभङ्गः स्यादिति कियत्यपि काले गते गर्भस्य कारणाद्गर्भस्थगवादिभावेन बहिस्तदभावेन च कथञ्चिद् व्रतातिक्रमाच्चतुर्थः । ५-कुप्यस्य या सङ्ख्या कृता यथा किल दश कच्चोलकानि मे मुत्कलानि, तस्या आधिक्यसम्भवे व्रतभङ्गभयाद्भावेन पर्यायान्तरेण भञ्जयित्वा बहुभिरपि दशैव कारयतः सङ्ख्यापूरणात्स्वाभाविकसङ्ख्याबाधनाच्च पञ्चमः । इत्यणुव्रतातिचाराः ।

इदानीं गुणव्रतेषु, **६**-तत्र दिग्विरतिव्रत ऊर्ध्वाधस्तिर्यग्दिक् प्रमाणातिक्रमाः क्षेत्रवृद्धिः स्मृत्यन्तर्धानं चेति । १-३ आद्यास्त्रयः सुबोधा एव, नवरमूर्ध्वादिदिशां गमनमाश्रित्य प्रमाणातिक्रमोऽतिचारोऽनाभोगादिनातिक्रमादिना वा। ४-क्षेत्रवृद्धिश्चैवम्- किल केनचित्सर्वदिक्षु योजनशतं दिग्व्रतमङ्गीकृतम्, कदाचिच्च प्राच्यां वाणिज्यादिनासौ योजनशतमगमत्, ततोऽपि परतः प्रभूतलाभो भवितेत्यपरस्यां नवतिं यास्यामीति विकल्प्य दशयोजनानि पूर्वस्यां वर्धयतो व्रतसापेक्षस्यातिचारः । ५-स्मृतेरन्तर्धानं विस्मृतिर्यथा पूर्वस्यां दिशि योजनशतं दिक्परिमाणं

१. मूढकादि T,C

केनचित्कृतम्, गमनकाले च स्पष्टतया न स्मरति, किं शतं परिमाणं कृतमुत पञ्चाशत्, तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः, शतमतिक्रामतो भङ्गः, सापेक्षत्वान्निरपेक्षत्वाच्चेति ।

७-भोगोपभोगव्रते, तु भोजनतस्तावदमी पञ्च । तद्यथा-सचित्ताहारः सचित्तप्रतिबद्धाहारोऽ-पक्वौषधिभक्षणं दुष्पक्वौषधिभक्षणं तुच्छौषधिभक्षणं चेति । एते च प्रत्याख्यातसचित्ताहारस्यैव द्रष्टव्याः । १-तत्र सचित्ताहारः कन्दमूलफलादिरयं चानाभोगातिक्रमादिना ज्ञेयः । २-सचित्तेन वृक्षादिना प्रतिबद्धो गोंदादिः पक्वफलादिर्वा सचित्तान्तर्बीजस्तस्याहारोऽनाभोगादिना, अथवा बीजं त्यक्ष्यामि कटाहं तु भक्षयिष्यामि, तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतोऽतिचारः । ३-अपक्वाया औषधेः कणिक्कादिरूपायाः सम्भवत्सचित्तावयवाया अपि पिष्टत्वादचेतनेयमिति सम्भावनया भक्षणम् । ४-दुष्पक्वाया वह्निना पक्वापक्वत्वेन सम्भ-वत्सचित्तावयवाया औषधेः पृथुकादेर्भक्षणम् । ५-तुच्छास्तथाविधतृप्त्यजनकत्वेनासारा औषधयः कोमलमुद्गादि फलीरूपास्तासां भक्षणम् । आह-यद्येताः सचित्तास्तर्हि प्रथमातिचार एव, अथाचित्तास्तदा किं विरुद्धम् ? सत्यम्, तद्भक्षणे तथाविधतृप्त्यजनकत्वेन निरर्थकं जीवघात-स्यैवावशिष्यमाणत्वादचेतनीकृत्याप्यासां भक्षणमर्थतः प्रतिषिद्धम्, ततः प्रतिषिद्धाचरणा-न्नियमाबाधनाच्चातिचारः, एवं रात्रिभोजनमद्यादिनिवृत्तिष्वप्यनाभोगातिक्रमादिभिरतिचारता भावनीया, एते पञ्च भोजनतः ।

कर्मतस्त्वमी कर्मादानसञ्ज्ञाः पञ्चदश श्लोकैः कथ्यन्ते तद्यथा –

अङ्गार-वन-शकट-भाटक-स्फोटजीविका। दन्त-लाक्षा-रस-केश-विषवाणिज्यकानि च ।।
यन्त्रपीडा-निर्लाञ्छनमसतीपोषणं तथा । दवदानं सरःशोष इति पञ्चदश त्यजेत् ।। तत्र-
अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता । ठठारत्वेष्टिकापाकाविति ह्यङ्गारजीविका ।।
छिन्नाछिन्नवनपत्रप्रसूनफलविक्रयः । कणानां दलनात्पेषाद् वृत्तिश्च वनजीविका ।।
शकटानां तदङ्गानां घटनं खेटनं तथा । विक्रयश्चेति शकटजीविका परिकीर्तिता ।।
शकटोक्षलुलायोष्ट्र-खराश्वतरवाजिनाम् । भारस्य वाहनाद् वृत्तिर्भवेद् भाटकजीविका ।।
सरःकूपादिखनन-शिलाकुट्टनकर्मभिः । पृथिव्यारम्भसम्भूतैर्जीवनं स्फोटजीविका ।।
दन्तकेशनखास्थित्वग्-रोम्णो ग्रहणमाकरे । त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ।।
लाक्षामनःशिलानीली-धातकीटङ्कणादिनः । विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ।।

नवनीतवसाक्षौद्र-मद्यप्रभृतिविक्रयः । द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः ।।
विषास्त्रहलयन्त्रायो-हरितालादिवस्तुनः । विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ।।
तिलेक्षुसर्षपैरण्ड जलयन्त्रादिपीडनम् । दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्त्तिता ।।
नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम् । कर्णकम्बलविच्छेदो निर्लाञ्छनमुदीरितम् ।।
सारिकाशुकमार्जार-श्वकुक्कुटकलापिनाम् । पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ।।
व्यसनात्पुण्यबुद्ध्या वा दवदानं भवेद् द्विधा । सरःशोषः सरःसिन्धु-ह्रदादेरम्बुसंप्लवः ।।

[योगशास्त्रप्र॰ ३/९९-११३]

दिग्मात्रं चेदम्, एवंजातीयानां सावद्यकर्मणां न तु परिगणनमिति एतानि चानाभोगादिना अतिचारा, आकुट्या[१] क्रियमाणानि तु भङ्गा एव ।

इह चैवं विंशतिसङ्ख्यातिचाराभिधानं व्रतान्तरेष्वपि पञ्चातिचारसङ्ख्यया तज्जातीयानां विधानां सङ्ग्रह इति ज्ञापनार्थम् । तेन स्मृत्यन्तर्धानादयो यथासम्भवं सर्वव्रतेषु द्रष्टव्याः ।

८-अनर्थदण्डविरतौ तु कन्दर्पः कौत्कुच्यं मौखर्यं संयुक्ताधिकरणता भोगोपभोगाधिक्यं चेति। १-कन्दर्पः कामः तद्धेतुस्तत्प्रधानो वा वाक्प्रयोगोऽपि कन्दर्पः, इह सामाचारी-श्रावकेण स्वस्य परस्य वा मोहोद्दीपकं न वाच्यम् । २-कौत्कुच्यं भ्रू-नयनोष्ठ-नासा-कर-चरण-मुखविकारैरनेक-प्रकारा भण्डादिविडम्बनक्रिया, एतौ द्वावपि प्रमादाचरितस्यातिचारौ । ३-मुखरोऽनालोचितभाषी वाचाटस्तस्य कर्म मौखर्यमसभ्यासम्बद्धबहुप्रलापित्वमयं च पापोपदेशस्यातिचारः । ४-अधिकरणं हलोदूखलशकटादि संयुक्तं फालादिसंयोगेन प्रगुणीकृतं तद्भावस्तत्ता श्रावकेण हि संयुक्ताधिकरणं न धारणीयम्, तथा सति हि यः कश्चिद्याचते, अन्यथा तु सुखेन परः प्रतिषेधितुं शक्यते, हिंस्रप्रदानस्य चासावतिचारः । ५-भोगोपभोगाधिक्यं स्नानीयतैलामलक-भोजन-चन्दन-कुङ्कुमकस्तूरिकावस्त्राऽऽभरणादीनामतिरिक्तानामारम्भः, प्रमादचरितस्यायमतिचारः । सर्वेऽप्यमी अनाभोगादिनैव क्रियमाणा अतिचारा, आकुट्या तु भङ्गा एव । इति गुणव्रतातिचाराः ।

अथ शिक्षाव्रतेषु, **९-**तत्र तावत्सामायिके मनोवाक्कायदुष्प्रणिधानानि ३ स्मृत्यकरणमनव-स्थितकरणं चेति । १-३ तत्र मनःप्रभृतीनां दुष्प्रणिधानमनाभोगादिना सावद्यचिन्तादिषु प्रवर्तनम् । ४-स्मृतेरकरणं प्रबलप्रमादान्नैवं स्मरति यदुत -'अस्यां वेलायां सामायिकं कर्तव्यं कृतं न कृतं

१. उपेत्य T,B,C

वा' इति, स्मृतिमूलं च मोक्षानुष्ठानम् । ५-अनवस्थितकरणं यत्करणान्तरमेव त्यजति यथाकथञ्चिद्वाऽनादृतः करोति ।

१०-देशावकाशिके पुनरानयनप्रयोगः प्रेष्यप्रयोगः शब्दानुपातो रूपानुपातो बहिः पुद्गलप्रक्षेपश्चेति । १-तत्र स्वयं गमने व्रतभङ्गः स्यादिति धिया परेण नियमितक्षेत्राद् बहिःस्थस्य पदार्थस्यात्मसमीपे प्रापणमानयनप्रयोगः । २-स्वयं गमने व्रतभङ्ग इत्याशयाद्विवक्षितक्षेत्राद्बहिः प्रयोजनाय प्रेष्यस्य व्यापारणं प्रेष्यप्रयोगः । देशावकाशिकव्रतं हि मा भूद् गमनादिभिः प्राणिघात इत्याशयेन गृह्यते, स तु स्वयं कृतोऽन्येन वा कारित इति न कश्चित्फले विशेषः, प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुण इति । ३-४ नियमविषयक्षेत्राद् बहिःस्थितं कञ्चननरं दृष्ट्वा व्रतभङ्गभयादाह्वातुमशक्नुवन् यदा स्वकीयकाशितादिशब्दश्रावणनिजरूपदर्शनव्याजेन तमाकारयति तदा शब्दानुपातरूपानुपातौ । ५-व्रतविषयक्षेत्राद्बहिर्विवक्षितजनाकारणार्थं पुद्गलस्य लोष्ट्वादेः क्षेपणं बहिष्पुद्गलक्षेपः। इहाद्यौ द्वावव्युत्पन्नस्य, अन्त्यत्रयं तु मायाविनः । इह च दिग्व्रतसङ्क्षेपणवद् व्रतान्तराणामपि सङ्क्षेपकं देशावकाशिकं किन्तु प्राणातिपातादिसङ्क्षेपेषु वधबन्धादय एवातिचाराः । दिग्व्रतसंक्षेपे तु संक्षिप्तत्वात् क्षेत्रस्यानयनप्रयोगादय इति ।

११-पौषधव्रते १-पुनरप्रत्युपेक्ष्याप्रमृज्य च स्थण्डिलभुवमुच्चार-प्रश्रवण-खेल-सिङ्घाणकादीनामुत्सर्गः। २-अप्रत्युपेक्ष्याप्रमृज्य पीठफलकादीनामादाननिक्षेपौ । ३-अप्रत्युपेक्ष्याप्रमृज्य च संस्तारकन्यासः । ४-५ स्मृत्यकरणमनवस्थितकरणञ्चेति । स्पष्टाश्चेते, नवरं प्रत्युपेक्षणं चक्षुषा निरीक्षणम्, प्रमार्जनं रजोहरणवस्त्रप्रान्तादिना विशुद्धिकरणम् । इह चाप्रत्युपेक्षणेन दुष्प्रत्युपेक्षणमप्रमार्जनेन दुष्प्रमार्जनं च संगृह्यते । नञः कुत्सार्थस्यापि दर्शनादिति ।

१२-अतिथिसंविभागव्रते तु सचित्तनिक्षेपः सचित्तपिधानं कालातिक्रमः परव्यपदेशो मत्सरश्च। १-सचित्ते पृथिव्यादावदित्सया साधुदेयस्य वस्तुनो निक्षेपः स्थापनम् । २-सचितेन कुष्माण्डफलादिना पिधानं स्थगनम् । ३-कालस्य साधूचितभिक्षासमयस्यातिक्रमोऽनागतमेव भिक्षाकालं लङ्घयित्वा वा भोजनकरणमित्यर्थः। ४-परस्यान्यस्य सम्बन्धीदं गुडखण्डादि, न मदीयमिति व्यपदेशो व्याजः। ५-मत्सरोऽसहनं साधुभिर्याचितस्य कोपनमथवा स कश्चिद्रङ्कमात्रोऽपि ददाति, अहं तु किं ततोऽपि हीन इत्यहङ्कारो वा मत्सर इति । अनाभोगातिक्रमादिभिश्चैतेऽतिचारा अन्यथा तु भङ्गाः । इत्युक्तो लेशतः सातिचारव्रतविषयो विस्तरस्त्वावश्यकादिभ्योऽवसेय इति गाथार्थः ।।६३।।

** हितोपदेशप्रकरणे-४१३ **

तान्येव नामतः प्राह –

पाणिवह-मुसावाए-अदत्त-मेहुण-परिग्गहे चेव ।
दिसि-भोग-दंड-समइय-देसे तह पोसह-विभागे ।।

साध्याहारत्वादमीषां पादानां **प्राणिवध-मृषावाद-अदत्त-मैथुना**ख्यपदचतुष्टये विरतिशब्दोऽध्याहार्यः । तथा **परिग्रहदिशिभोगा**ख्ये पदत्रये परिमाणशब्दः । तथा भीमो भीमसेन इति न्यायादेकदेशे समुदायोपचाराद् **दण्ड**शब्देनानर्थदण्डव्रतमभिधीयते । एवं **'समइय'**शब्देन सामायिकम् । **देश**शब्देन देशावकासिकम् । **पौषधं** तु स्वरूपत एव । **विभाग**पदेन चातिथिसंविभागव्रतमित्येतानि द्वादशापि गृहिव्रतानि ।।४१३।।

चक्रे० : अथ यतिधर्ममाहुः –

देव० : अथ यतिधर्ममाह –

खंती य मद्दवज्जव मुत्ती तव संजमे य बोधव्वे ।
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो।।६४।।

चक्रे० : क्षान्तिः क्षमा, **मार्दवम**स्तब्धत्वम्, **आर्जवम**कौटिल्यम्, **मुक्ति**र्निर्लोभता, **तपो**ऽनशनन्यूनोदरतादिद्वादशविधम्, **संयमः** सप्तदशभेदस्तथा च –

पुढविदगअगणिमारुय वणस्सइ बितिचउपणिंदिअजीवे ।
पेहुप्पेहपमज्जणपरिठवणमणोवईकाए ।। [दशवै. नि० ४६]

सत्यं सम्यग्भाषणम्, **शौचम**दत्तत्यागः, **आकिञ्चन्यं** निष्परिग्रहिता, **ब्रह्म च** ब्रह्मचर्यम्, **यतेरयं धर्मो बोद्धव्यः** । स चायं धर्मो द्विविधोऽपि दानशीलतपोभावभेदाच्चतुर्धा।।६४।।

देव० : क्षान्तिः क्रोधनिग्रहश्चकारोत्तरपदसमुच्चयार्थः, 'खंतिए' त्ति पाठे तु सहार्थे तृतीया, **मार्दवम**स्तब्धत्व**मार्जवम**कौटिल्यम्, **मुक्ति**र्निर्लोभता, तदियता रागद्वेषाभाव उक्तः । यदवाचि वाचकेन –

माया लोभकषायश्चेत्येतद्रागसंज्ञितं द्वन्द्वम् ।
क्रोधो मानश्च पुनर्द्वेष इति समास निर्दिष्टः ।। [प्रशमरति-३२]

ततश्चानेन सामायिकमुक्तं भवति, रागद्वेषाभावरूपत्वात्तस्य । यदाह –

जो समो सव्वभूएसु तसेसु थावरेसु य ।
तस्स सामाइयं होइ इई केवलिभासियं ।। [संबोधप्र॰ १२२१]

तपो द्वादशविधमनशनादि, तदाभ्यां गाथाभ्यामवसेयम्-

अणसणमूणोयरिया वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ।।
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उसग्गोऽवि य अब्भिंतरओ तवो होइ ।। [दशवै.नि॰ ४७, ४८]

विनेयानुग्रहायानयोः किञ्चिद् व्याख्यानमुच्यते –

तत्रानशनमाहारत्यागस्तच्चेत्वरं यावत्कथिकं च, तत्रेत्वरं चतुर्थादि षण्मासान्तम् । यावत्कथिकं तु भक्तपरिज्ञेङ्गिनीपादपोपगमनभेदात् त्रिधा, तत्राद्यं सप्रतिकर्मत्रिविधचतुर्विधाहार-त्यागनिष्पन्नम्, द्वितीयं त्वप्रतिकर्मचतुर्विधाहारत्यागनिष्पन्नमिङ्गितदेशे चङ्क्रमणाद्यपरिहारवत्, तृतीयमपि तथैव, नवरं सर्वथा परिस्पन्दवर्जितम् । ऊनोदरिका इह द्वात्रिंशत्कावलिक-माहारप्रमाणम्, तत एकेनापि कवलेन न्यूनमूनोदरता, तथाहि –

बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ ।
पुरिसस्स महिलियाए अट्ठावीसं भवे कवला ।। [प्रव.सारो॰ ८६६]
अप्पाहार-अवड्ढा-दुभाग-पत्ता तहेव किंचूणा ।
अट्ठ-दुवालस-सोलस-चउवीस-तहेक्कतीसा य ।। [ ]

वृत्तिसङ्क्षेपणं गृहभिक्षादिपरिमाणकरणम्, रसपरित्यागो रसानां दुग्धदध्यादीनां सर्वेषामन्य-तरेषां वा त्यागः, कायक्लेशः केशोत्पाटनवीरासनादिविधानशीतादिसहनादिः, संलीनता विश्रृङ्ख-लमनोवाक्कायसंवृत्तिः, प्रायो बाह्यस्यैव शरीरस्य तापनाल्लौकिकैरपि तपस्तया प्रतीयमानत्वाच्च बाह्यतपो भवतीति तथा प्रायश्चित्तमालोचनादि दशविधम्, विनयकर्म विनयनहेतुर्गुर्वादिष्व-भ्युत्थानाञ्जल्यासनदानादिरूपः प्रतिपत्तिविशेषः, वैयावृत्त्यमाचार्यादीनां दशानां भक्तादिभि-रुपष्टम्भः, यदाह –

आयरिय उवज्झाए थेर तवस्सी गिलाण सेहाणं ।
साहम्मिय कुल गण - संघ संगयं तमिह कायव्वं ।। [ ]

तथैवेति समुच्चये, स्वाध्यायः पञ्चधा वाचनादिर्ध्यानमार्त्तादि चतुर्धा, तत्राद्ययोर्भवहेतुत्वादितरयोश्च मुक्तिहेतुत्वाद्धर्म्यशुक्ले एव तपः । उत्सर्गस्त्यागः, स च द्रव्यतो गणशरीरोपध्याहारभेदाच्चतुर्धा, भावतस्तु क्रोधादित्यागरूपत्वादनेकधा, अपि चेति समुच्चये, कर्मनिर्जरणंप्रत्यन्तरङ्गत्वादभ्यन्तरकं तपो भवतीति । तथा **संयमः** सप्तदशभेदस्तथा च –

पुढविदगअगणिमारुय वणस्सइबितिचउपणिंदिअजीवे ।
पेहोपेहपमज्जण परिट्ठवणमणोवई काए ।। [दशवै.नि॰ ४६]

अस्या अर्थः – पृथिव्यादिपञ्चेन्द्रियान्तानां जीवानां मनोवाक्कायैः करणकारणानुमतितः संघट्टनपरितापनोपद्रवणपरिहाररूपो नवविधः संयमो भवति । अजीवसंयमस्तु पुस्तकदूष्यतृणचर्मपञ्चकविकटहिरण्यादीनामग्रहणरूपस्तत्र –

गंडी कच्छ वि मुट्ठी संपुडफलए तहा छिवाडी य ।
एयं पुत्थयपणयं वक्खाणमिणं भवे तस्स ।।

बाहल्लपुहुत्तेहिं गंडीपुत्थो उ तुल्लगो दीहो ।
कत्थ वि अंते तणुओ मज्झे पिहुलो मुणेयव्वो ।।

चउरंगुलदीहो वा वट्टागिति मुट्ठिपुत्थगो अहवा ।
चउरंगुलदीहो च्चिय चउरंसो होइ विन्नेओ ।।

संपुडओ दुगमाई फलगा वोच्छं छिवाडिमित्ताहे ।
तणुपत्तूसियरूवो होइ छिवाडी बुहा बिंति ।।

दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो ।
तं मुणिय समयसारा छिवाडिपुत्थं भणंतीह ।। [प्रव.सारो॰ ६६४-६६८]

अप्पडिलेहियदूसे तूली उवधाणगं च नायव्वं ।
गंडुवधाणाऽऽलिंगिणि मसूरए चेव पुत्तमए ।।

पल्हवि कोयवि पावार णवतए तह य दाढिगाली य ।
दुप्पडिलेहियदूसे एयं बीयं भवे पणगं ।।

पल्हवि हत्थुत्थरणं कोयवओ रूतपूरिओ पडओ ।
दढगालि धोय पुत्ती सेस प़सिद्धा भवे भेया ।। [प्रव.सारो॰ ६७७, ७८, ७९]

१. 'पुस्तकपञ्चकाप्रत्युपेक्ष्यदुष्प्रत्युपेक्ष्य' इति पाठो T,B,C प्रतेषु अस्ति 'पुस्तकाप्रत्युपेक्ष्य दुष्प्रत्युपेक्ष्य' इति पाठो A प्रते आस्ति ।

अत्र वृद्धसम्प्रदायः - १-हत्थच्छुरणं खुरणं खुरडं, २-कोयवओवूरठिगा, ३-पावारोसल्लेमपडओ, ४-नवउजीणं, ५-दढगालीधोलपुत्ती सदसवत्थत्ति भाणियं होइ ।

तणपणगं पुण भणियं जिणेहिं कम्मट्ठगंठिदहणेहिं ।
साली वीही कोद्दव रालग रण्णे तणाइं च ।।
अय एल गावि महिसी मिगाणमजिणं च पंचमं होइ ।
तलिया खल्लग कोसग कित्ती य बितिए य ।। [प्रव.सारो० ६७५, ६७६]

ग्रहणेऽपि संयम एव, यदाह -

दुप्पडिलेहियपणगं अद्धाणाई विवित्तगिह्णत्ति ।
घिप्पइ पुत्थयपणयं कालियनिज्जुत्तिकोसट्ठा।। [ ]

अपवादतस्तु पुस्तकपञ्चकादि १० । प्रेक्षासंयमः प्रत्युपेक्ष्य प्रमृज्य च स्थाननिषदनादिविधानम् ११, उपेक्षासंयमस्तु द्विधा व्यापारे अव्यापारे च, तत्र व्यापारोपेक्षासंयमो यत्सांभोगिकसाधून् सीदत इतरांश्च प्रावचनिककार्येषु प्रेरयति, अव्यापारोपेक्षासंयमस्तु यत्सावद्यकर्मसु सीदन्तं गृहस्थमुपेक्षते १२, प्रमार्जनासंयमः पुनर्यत्सागारिकसमक्षं पथि गच्छन् वसतौ वा प्रविशन् पादौ न प्रमार्ष्टि तदभावे च प्रमार्ष्टि १३, परिष्ठापनासंयमस्तु जीवसंसक्ताधिकानेषणीयक्षेत्रकालातिक्रान्तभक्तपानकादेरुच्चारप्रश्रवणनिष्ठीवनादेश्च विधिना त्यागः १४, मनःसंयमः पुनस्तस्यैवाकुशलस्य निरोधः, कुशलस्योदीरणम् १५, एवं वाक्संयमोऽपि १६, कायसंयमस्तु सति कार्य उपयोगतो गमनागमनादिविधानं तदभावे संवृत्तकरचरणाद्यवयवस्यावस्थानमिति १७ ।

अथ प्रकृतमभिधीयते-इह च केषुचित्पदेषु प्राकृतवशाद् विभक्तिलोपो द्रष्टव्यः । यदिवा संयमशब्दान्तः समाहारद्वन्द्वः, मुक्तिशब्दस्य च दीर्घत्वं प्राकृतप्रभवं बोधव्यमित्यग्रेऽपि सम्भत्स्यते । **सत्यं** सम्यग्वादः, **शौचं** द्रव्यतो निर्लेपता, भावतोऽनवद्यसमाचारः, स चेह प्रस्तावादस्तेयलक्षणः । किञ्चनं द्रव्यमुच्यते, नास्य किञ्चनमस्तीत्यकिञ्चनस्तस्य भाव **आकिञ्चन्यं** निर्ग्रन्थतेत्यर्थः । अथ मुक्तिशब्देनैव गतार्थमिदमिति चेन्न, संयमार्थं निर्लोभस्य वस्त्रपात्रकम्बलादि धारयतोऽपि आकिञ्चन्यप्रतिपादनार्थत्वादस्य, यदाह -

जंपि वत्थं व पायं वा कंबलं पायपुंछणं ।
तंपि संजमलज्जट्ठा धारिंति परिहरंति य (परिभुञ्जते)।।
न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा ।
मुच्छापरिग्गहो वुत्तो इई वुत्तं महेसिणा ।। [दशवै० ६-२०, २१]

ब्रह्म **ब्रह्मचर्यं** नवब्रह्मगुप्तिसनाथब्रह्मचर्यपरिपालनमित्यर्थः । **च**काराः समुच्चयार्थाः । यतेरनगारस्य धर्मो **यतिधर्मो बोद्धव्यः** । इह च संयमादिभिः पदैर्महाव्रतप्रतिपादनेन सकल-सावद्यव्यापारप्रत्याख्यानमुक्तं भवति, ततः सामायिकपुरस्सरमहाव्रतप्रतिपादनेन सम्पूर्णो यतिधर्मः प्रोक्तो भवति, तपःप्रतिपादनात्तु पूर्वार्जिताशुभकर्मनिर्जरणाच्छुद्धिरभिहितेति कृतं प्रसङ्गेनेति गाथार्थः ।।६४।।

**** आवश्यकनिर्युक्तौ 'प्रतिक्रमण' अध्ययनस्य संग्रहणिगाथायाम्-१ ****

श्रमणः प्राग्निरूपितशब्दार्थस्तस्य धर्मः क्षान्त्यादिलक्षणस्तस्मिन् दशविधे दशप्रकारे श्रमणधर्मे सति तद्विषये वा प्रतिषिद्धकरणादिना यो मयाऽतिचारः कृत इति भावना। दशविधधर्मस्वरूपप्रतिपादनायाह सङ्ग्रहणिकारः –

खंती य मद्दवज्जव मुत्ती तव संजमे य बोद्धव्वे ।
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ।।

क्षान्तिः श्रमणधर्मः क्रोधविवेक इत्यर्थः, **च**शब्दस्य व्यवहितः सम्बन्धः, मृदोर्भावो **मार्दवं** मानपरित्यागेन वर्तनमित्यर्थः, तथा ऋजुभाव **आर्जवं** मायापरित्यागः, मोचनं **मुक्तिः** लोभपरित्याग इति भावना, **तपो** द्वादशविधमनशनादि, **संयमश्चाश्रवविरतिलक्षणो बोद्धव्यो** विज्ञेयः श्रमणधर्मतया, **सत्यं** प्रतीतम्, **शौचं** संयमं प्रति निरुपलेपता, **आकिञ्चन्यं च** कनकादिरहिततेत्यर्थः, **ब्रह्मचर्यं च, एष यतिधर्मः,** अयं गाथाक्षरार्थः ।

अन्ये त्वेवं वदन्ति –

खंती मुत्ती अज्जव मद्दव तह लाघवे तवे चेव । संयम चियागऽकिंचण बोद्धव्वे बंभचेरे य ।।

तत्र लाघवम्–अप्रतिबद्धता, त्यागः संयतेभ्यो वस्त्रादिदानम्, शेषं प्राग्वत्, गुप्त्यादीनां चाऽऽद्यदण्ड-कोक्तानामपीहोपन्यासोऽन्यविशेषाभिधानाददुष्ट इति ।।१।।

**** पञ्चाशके-११/१९ ****

x x x **संयमः** पृथिव्यादिसंरक्षणलक्षणः x x x

**** प्रवचनसारोद्धारे-५५४ ****

अथ श्रमणधर्ममाह–

खंती य मद्दवज्जव मुत्ती तव संजमे य बोद्धव्वे ।
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ।।

'खंती'त्यादि, **क्षान्तिः** – क्षमा शक्तस्याशक्तस्य वा सहनपरिणामः, सर्वथा क्रोधविवेक इत्यर्थः, **मृदु-**रस्तब्धस्तस्य भावः कर्म वा **मार्दवं** नीचैर्वृत्तिरनुत्सेकश्च, ऋजुरवक्रमनोवाक्कायकर्मा तस्य भावः कर्म वा **ऽऽर्जवं** मनोवाक्कायविक्रियाविरहो मायारहितत्वमिति यावत्, मोचनं **मुक्ति**र्बाह्याभ्यन्तरवस्तुषु तृष्णाविच्छेदो लोभपरित्याग इत्यर्थः, तप्यन्ते रसादिधातवः कर्माणि वाऽनेनेति **तपः,** तच्च द्वादशविधमनशनादि, **संयम** आश्रवविरतिलक्षणः, **सत्यं** मृषावादविरतिः, **शौचं** संयमं प्रति निरुपलेपता निरतिचारतेत्यर्थः, नास्य किञ्चनं द्रव्यमस्तीत्यकिञ्चनस्तस्य भाव **आकिञ्चन्यमु**पलक्षणं चैतत् तेन शरीरधर्मोपकरणादिष्वपि निर्ममत्वमाकिञ्चन्यम्, नवब्रह्मचर्यगुप्तिसनाथ उपस्थसंयमो **ब्रह्म,** एष दशप्रकारो **यतिधर्मः,** अन्ये त्वेवं पठन्ति –

खंती मुत्ती अज्जव मद्दव तह लाघवे तवे चेव । संजम चियागऽकिञ्चण बोद्धव्वे बंभचेरे य ।।

तत्र लाघवं द्रव्यतोऽल्पोपधिता भावतो गौरवपरिहारस्त्यागः सर्वसङ्गानां विमोचनं संयतेभ्यो वस्त्रादिदानं वा, शेषं प्राग्वत् ।।५५४।।

**** अभिधानराजेन्द्रकोषे 'धम्म' शब्दे-४ ****

xxx मुक्तिपदोपादानेऽप्याकिञ्चनस्य लब्धत्वादाकिञ्चनपदोपादानं विशेषद्योतनार्थम् । विशेषश्चात्र संयमोपष्टम्भनिमित्तं किञ्चित्प्राशुकैषणीयमुपकरणं धारयन्नपि मुक्ततोपेत एव भवति । ननु पुनरतिजडताऽवष्टब्धमना दिगम्बरपरिकल्पनया मुक्तिमान्, तस्या असंयमाऽऽदिदोषदुष्टत्वेनाभिमतत्वात् तर्हि संयमोपकारायैव सकिञ्चनताऽपि भविष्यति मुक्तता, नेत्याह–सर्वथैव संयमोपघातकत्वेनातिदुष्टत्वादिति। चशब्दः समुच्चयार्थः । ब्रह्म च ब्रह्मचर्यं, स्त्रीसेवापरिहार इति गाथार्थः।। xxx

चक्रे० : अथ धर्मदायकग्राहकयोरल्पत्वमाहुः –

देव० : गृहियतिभेदाद् द्वेधाप्युक्तो धर्मोऽधुना तद्दायकग्राहकयोरल्पत्वमाह –

रयणत्थिणो वि थोवा तद्दायारो [१]वि जह उ लोगंमि ।
इय सुद्धधम्मरयणत्थिदायगा दढयरं नेया ।।६५।।

चक्रे० : अक्षरार्थः सुगमः, नवरं **'दढयरं'** ति दृढतरमित्यर्थम् । तत्त्वार्थस्त्वयम् – यथा तृणेन्धनकणलवणाद्यसारद्रव्याणां ग्राहका दातारश्च प्रभूताः प्राप्यन्ते तथैव कुधर्मग्राहिणः प्रचुरतमास्तथाविधभवाभिनन्दिनां भूयस्त्वाद्धर्मरत्नग्राहिणस्त्वल्प इति ।।६५।।

देव० : रत्नानि वैडूर्यादीनि, तान्यर्थयन्ते ते **रत्नार्थिनः स्तोका** अल्पास्तत्प्रयोजनमूल्य-पुण्यवतामल्पत्वात्तेषां रत्नानां **दातारो** विक्रेतारः स्तोका इति योगः । विनिमयाभावाद् **अपि**शब्दौ

१. य जह व लोगम्मि A

परस्परसमुच्चये, **यथैव लोके** प्रजास्वित्यनेन प्रकारेण **शुद्धः** सर्वज्ञप्रणीतत्वेनाश्रद्धेयताऽसद्भूततत्वपूर्वापरविरोधित्वादिकलङ्करहितः, स चासौ **धर्मश्च**, स एव सकलसमीहितार्थसाधकत्वा**द्रत्नं** चिन्तामणिस्तस्**यार्थिनो दायकाश्च दृढतरम**त्यर्थं स्तोका इति योगो **ज्ञेया** बोद्धव्याः । इदमत्र हृदयम्-यथा तृणेन्धनकणलवणाद्यसारद्रव्याणां ग्राहका दातारश्च प्रभूताः प्राप्यन्ते, तत्प्राप्तेरनायासलभ्यत्वात्, तथैव कुधर्मस्य ग्राहिणो दायिनश्च प्रचुरतमास्तथाविधभवाभिनन्दिनां भूयस्त्वादितरेषां च मुक्तिगमनयोग्यानामल्पीयस्त्वादिति गाथार्थः ।।६५।।

** उपदेशपदे-९११ **

एतदेव भावयति –

रयणत्थिणोऽतिथोवा तद्दायारोवि जह उ लोयम्मि ।
इय सुद्धधम्मरयणत्थिदायगा दढयरं णेया ।।

रत्नार्थिनः पद्मरागपुष्परागादिप्रस्तरखण्डाभिलाषिणो**ऽतिस्तोकाः** पञ्चषादिरूपाः, **तद्दातारोऽपि** रत्नविक्रेतारोऽपि **यथा तु** यथैवातिस्तोका **लोके** घृततैलधनधान्यादिवाणिज्यकारिणि जने । इत्येवं शुद्धधर्मरत्नार्थिक्रायका निर्वाणावन्ध्यकारणसम्यग्दर्शनादि**शुद्धधर्मरत्नार्थिनो** भव्यजीवाः, **तद्दायकाश्च** गुरवः स्वभावत एव भवोद्विग्ना लब्धागमरहस्याः, अत एव मोक्षमार्गैकरतयो **दृढतर**मत्यर्थं ज्ञेया अतिस्तोका इति ।।९११।।

चक्रे० : अथ धर्मरत्नयोग्यं गाथात्रयेणाऽऽह –

देव० : अथ धर्मरत्नयोग्यं निरूपयन् गाथात्रयमाह –

धम्मरयणस्स जोगो[१] अक्खुद्दो रूववं पगइसोमो ।
लोयप्पिओ[२] अकूरो भीरू असढो सुदक्खिन्नो[३]।।६६।।
लज्जालुओ दयालू मज्झत्थो सोमदिट्ठि गुणरागी ।
सक्कह-सुपक्खजुत्तो सुदीहदंसी विसेसन्नू ।।६७।।
वुड्ढाणुगो विणीओ कयन्नुओ परहियत्थकारी य ।
तह चेव लद्धलक्खो इगवीसगुणेहिं संजुत्तो ।।६८।।

चक्रे० : अक्षुद्रो[४] गम्भीरबुद्धिः, **रूपवान्** पञ्चेन्द्रियपटुः **प्रकृतिसोम्यो** निष्कषायः,

१-जुग्गो P,K २-लोगप्पियो P,K,Z ३-सुदक्खिन्नू A,T,C ४. धर्मरत्नस्य योग्योऽक्षुद्रोऽतुच्छो गम्भीराशयः, रूपवान्, प्रकृतिसोमः स्वभावेनैव सुधांशुवदानन्दकारी, लोकप्रियो लोकानां वल्लभः, अक्रूरः, भीरुर्जनापवादादिभ्यः, M

लोकप्रियोऽविरुद्धकारित्वात्, **अक्रूरो**ऽनिष्ठुरः, **भीरुः** पापायशोभीतः, **अशठः** सरलाशयः, **सुदाक्षिण्यः, लज्जालुः** स हि प्राणप्रहाणेऽपि न प्रतिज्ञां त्यजति, **दयालुः, मध्यस्थो** रागद्वेषरहितः, **सोमदृष्टिः** शान्तदृक्, न परवृद्धिबद्धमत्सरः, **गुणरागी** गुणबहुमानी, **सत्कथः** परपरिवादात्मोत्कर्षरहितः स चासौ **सुपक्षयुक्तश्च** सन्मार्गपक्षपाती, कार्यं कुर्वन् सुदीर्घकालमर्थमनर्थं वा भाविनं पश्यतीत्येवंशीलः **सुदीर्घदर्शी, विशेषज्ञः** कृत्याऽकृत्यवेदी, **वृद्धानुगो** वृद्धानुगामी वृद्धबुद्ध्युपजीवक इत्यर्थः, **विनीतः, कृतज्ञो** यः स्तोकोपकारकमपि बहु मन्यते, **परहितार्थकारी च, तथा चैव लब्धलक्षः** सर्वक्रियाकुशलः, इत्ये**कविंशत्या गुणैर्युक्तो धर्मरत्नयोग्यः** स्यात् । इह चैकद्वित्र्यादिगुणाभावेऽपि धर्मरत्नयोग्यत्वं मन्तव्यम् ।।६६, ६७, ६८।।

।। इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृत्तौ समर्थितं द्वितीयं धर्मतत्त्वम् ।।

देव० : धर्मरत्नस्य योग्य उचितोऽक्षुद्राद्येकविंशतिगुणैर्युक्तो भवतीति समुदायार्थः । १-तत्र **क्षुद्र**स्तुच्छो **न** तथा, गम्भीराशय इत्यर्थः, तस्य ह्यलब्धमध्यत्वेन धर्मं प्रति क्षोभयितुमशक्यत्वाद्, २-**रूपवान**हीनपञ्चेन्द्रियः सुप्रमाणसर्वावयवसम्पन्नो वा तस्यापि धर्मप्रभावकत्वात्, तथा च –

धम्मोदएण रूवं करेंति रूवस्सिणोवि जइ धम्मं ।
गब्भवओ य सरूवो पसंसिमो तेण रूवंति ।। [ ]

गब्भवओ ग्राह्यवाक्, ३-**प्रकृतिसोमः** स्वभावेनैव सुधांशुवदानन्दकारी । ४-**लोकानां** विशिष्टजनानां विनयादिगुणैः **प्रियो** वल्लभः, को हि गुणवतः प्रति प्रीतो न भवति ? यस्तु न लोकप्रियः स न केवलमात्मानम्, स्वस्य धर्मानुष्ठानमपि परैर्दूषयन् परेषां बोधिलाभभ्रंशहेतुर्भवति ५-**क्रूरो** दूरभिसन्धि**र्न** तथाऽद्रोहक इत्यर्थः । ६-**भीरु**र्जनापवादात्पापेभ्यो वा भयवान् पापानि च दृष्टादृष्टापायकारणानि कर्माणि, तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनीहलोकेऽपि सकललोकप्रसिद्धविडम्बनास्थानानि, अदृष्टापायकारणानि मद्यमांसासेवनादीनि शास्त्रनिरूपितनरकादियातनाफलानि । ७-**शठो** मायावी, **न** तथा, सरलाशय इत्यर्थोऽनुष्ठानं प्रत्यनालस्यवान् वा, ८-सुष्ठु दाक्षिण्यमस्य **सुदाक्षिण्यो**ऽत्यन्तोपरोधशीलः, ९-लज्जा वैयात्याभावः, सा विद्यते यस्य स **लज्जालुः**, स हि प्राणप्रहाणेऽपि न प्रतिज्ञा[१]मुपजहाति, यदाह-

१. प्रतिज्ञात० T, C

लज्जां गुणौघजननीं जननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ।।

१०-दया दुःखितजन्तुदुःखत्राणाभिलाषः, सा विद्यते यस्य स **दयालुः,** धर्मस्य दया मूलमिति ह्यामनन्ति सूरयः ११-मध्यस्थ आयव्ययतुलनेन समयोचितकारी, यदाह –

सुबहुं पासत्थजणं नाऊणं जो न होइ मज्झत्थो ।
न य साहेइ सकज्जं कागं च करेइ अप्पाणं ।। [उपदेशमाला-५१०]

यदिवा रागद्वेषयोरन्तरे तिष्ठतीति **मध्यस्थः,**[१] रागद्वेषरहित इत्यर्थस्तस्यैव धर्मयोग्यत्वाद् रागादिमतो धर्मायोग्यत्वाद्, यदाह –

रत्तो दुट्ठो मूढो पुव्विं कुग्गाहिओ य चत्तारि ।
एए धम्मस्सणरिहा अरिहो पुण होइ मज्झत्थो।। [ ]

१२-**सोमे** शान्ते परवृद्धिदर्शनेऽप्यदृष्टविकारे **दृष्टी** लोचने यस्य स तथा, न परवृद्धिबद्धमत्सर इत्यर्थः। १३-गुणेषु सौजन्यौचित्यादिषु स्वपरयोरुपकारकारणेष्वात्मधर्मेषु रागी, रागस्तु बहुमान-प्रशंसासाहाय्यकरणादिनानुकूला प्रवृत्तिः, **गुणानुरागिणो** हि जीवा अवन्ध्यपुण्यबीजनिषेकेणेहामुत्र च गुणग्रामसम्पदमारोहन्ति । १४-सती शोभना परपरिवादात्मोत्कर्षरहिता कथा वचनपद्धतिः **सत्कथा,** शोभनः प्रत्यक्षलोकाद्यविरुद्धः पक्षः प्रतिज्ञा **सुपक्षः,** ताभ्यां **युक्तः** समेतो गुरवस्तु सत्कथया सद्गुरूपदेशेन सुपक्षयुक्तो मिथ्यात्वमोहनीयकर्मक्षयोपशमतः सन्मार्ग-पक्षपातीति व्याचक्षते । १५-सुतरामतिशयेन दीर्घकालभावित्वाद्दीर्घमर्थमनर्थं च पश्यति पर्यालोचयतीत्येवंशीलः **सुदीर्घदर्शी** । १६-वस्त्ववस्तुनोः कृत्याकृत्ययोः स्वपरयोश्च विशेषमन्तरं जानातीति **विशेषज्ञो**ऽविशेषज्ञो हि पुरुषः पशोर्नातिरिच्यते, अथवा विशेषमात्मन एव गुणदोषाधिरोहणलक्षणं जानातीति विशेषज्ञः । यदाह –

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ।। [ ]

१७-वृद्धाः शीलज्ञानाभ्यां गुरवस्ताननुगच्छति सेवाञ्जल्यासनदानाभ्युत्थानादिभिराराधयतीति **वृद्धानुगः,** ते ह्येवमनुगम्यमाना नियमात्कल्पतरव इव सदुपदेशादिभिः फलन्ति । १८-**विनीतः**

१. मध्यस्थस्तस्यैव धर्मयोग्यत्वाद् A

पूर्वोक्तविनयसम्पन्नः, स चागर्वितया सदैव गुरुषु विनयं प्रयुञ्जानोऽनुत्तरां श्रुतादिसम्पदमासादयति, उक्तं च –

विणयाओ नाणं नाणाओ दंसणं दंसणाओ चारित्तं ।
चरणाहिंतो मुक्खो मुक्खे सोक्खं अणाबाहं ।।१८।। [गुरुवन्दनभा॰ ३१]

१९-कृतं जानातीति कृतज्ञः स एव **कृतज्ञकः,** स हि स्तोकोपकारकमपि बहुमन्यते, कृतघ्नस्य निष्कृतिरेव नास्ति, यदाह– 'कृतघ्ने नास्ति निष्कृतिः' इति । २०-परेषां हितार्थं समीहितप्रयोजनं तत्करोतीति **परहितार्थकारी,** परोपकारपरो हि पुमान् सर्वस्य नेत्रामृताञ्जनम् । **चः** समुच्चये, **तथा** तेन गुणस्वरूपलक्षणप्रकारेण, **चैवे**ति समुच्चये, २१-**लब्धलक्षः** प्रत्यासन्नमुक्तिगमनत्वेन सकलसत्क्रियासु प्राप्तकौशल्यः । गुणगुणिनोरभेदोपचारविवक्षयेत्थम्भूत**ैकविंशतिगुणयुक्तो** धर्मरत्नयोग्यो भवतीति योजितमेव । इह च धर्मलोकाबाधयैकद्वित्र्यादिगुणाभावेऽपि धर्मयोग्यत्वमुन्नेयं सुगृहीतनामधेयश्रीस्थूलभद्रचण्डरुद्राचार्यादिषु पूर्वपुरुषेषु क्वचित्तथैव दर्शनादिति गाथात्रयार्थः ।।६६,६७,६८।।

।। इति श्रीदेवभद्रसूरिविरचिते दर्शनशुद्धिप्रकरणविवरणे
द्वितीयं धर्मतत्त्वं समाप्तम् ।। श्रीरस्तु।।

**** धर्मरत्नप्रकरणे-५, ६, ७ ****

भणितमेवाह –

धम्मरयणस्स जोगो अक्खुद्दो रूववं पयइसोमो ।
लोगप्पिओ अकूरो भीरू असढो सुदक्खिन्नो ।।
लज्जालुओ दयालू मज्झत्थोसोमदिट्ठि गुणरागी ।
सक्कह-सुपक्खजुत्तो सुदीहदरिसी विसेसन्नू ।।
वुड्ढाणुगो विणीओ कयन्नुओ परहियत्थकारी य ।
तह चेव लद्धलक्खो इगवीसगुणेहिं संपन्नो ।।

अस्य गाथात्रितयस्य पूर्वसूरिप्रणीतस्यार्थः–धर्माणां मध्ये यो रत्नमिव वर्त्तते स **धर्मरत्नं** जिनप्रणीतो देशविरतिसर्वविरतिरूपः समाचारः, तस्य **योग्य** उचितो भवतीत्यध्याहारः । **एकविंशतिभिर्गुणैः संपन्न** इति, इत्युत्तरेण योगः। तानेव गुणान् गुणगुणिनोः कथञ्चिदभेद इति दर्शनाय गुणिप्रतिपादनद्वारेणाह-

१-**अक्षुद्रो** भणिष्यमाणस्वरूपः । तथा २-**रूपवान्** प्रशस्तरूपोपेतः, वतोः प्रशंसावाचित्वात्, रूपमात्राभिधान इत्रेव दृश्यते, यथा रूपिणः पुद्गलाः प्रोक्ताः' इति । तथा ३-**प्रकृत्या** स्वभावेन **सौम्यः** सुन्दरस्वभावः, प्रशान्तचित्तत्वात् । ४-**लोकप्रियः** सदाचारचारित्वात् । ५-**अक्रूरः** परदोषेक्षणादिक्रूरत्वाभावात् । ६-**भीरु** ऐहिकपारत्रिकापायेभ्यस्त्रसनशीलत्वात् । ७-**अशठः** सद्भावसारानुष्ठानत्वात् ८-**सुदाक्षिण्योऽभ्यर्थनासारत्वात्** । ९-**लज्जालुः** पापवृत्तौ शङ्कित्वात् । १०-**दयालुः** कारुणिकचित्तत्वात्। ११-**'मज्झत्थोसोमदिट्ठि'** इत्येकमेवेदं पदं, प्राकृतत्वाद्विभक्तेरलुक्, ततश्च मध्यस्था रागद्वेषविकला सौम्या वाऽक्रूरा दृष्टिर्दर्शनं यस्य स मध्यस्थसौम्यदृष्टिः यथावस्थितवस्तुतत्त्वदर्शित्वात् । १२-**गुणरागी** गुणेषु बहुमानवान्, लघुकर्मत्वात् । १३-**सत्कथो** न दुश्चारित्रचर्याकर्णनकथनरुचिः, सदाचारचारित्वात् । १४-**सुपक्षः** शोभनपरिजनस्तेन **युक्तो**ऽन्वितो धर्माविरोधिबन्धुपरिवारः इति भावः । १५-**सुदीर्घदर्शी** सुपर्यालोचितपरिणामसुन्दरकार्यकारी, बुद्धिसंपन्नत्वात् । १६-**विशेषज्ञः** सारेतरादिवस्तुवेदी न रागद्वेषमूढत्वपूर्वव्युद्ग्राहितत्ववशात् प्रतिपन्नकुग्राहैकतानमानस इति । १७-**वृद्धानुगः** परिणतमतिपुरुषच्छन्दोऽनुवर्त्ती १८-**विनीतो** गुरुजने गौरवकृत्। १९-**कृतज्ञः** स्तोकमप्युपकारमैहिकं पारत्रिकं वा न विस्मरति। तथा २०-परेषामन्येषां हितानर्थान् प्रयोजनानि कर्त्तुं शीलं यस्य स **परहितार्थकारी** प्रत्युपकारानपेक्ष इति भावः। सुदाक्षिण्यादस्य को विशेषः ? इति चेदुच्यते, सुदाक्षिण्योऽभ्यर्थित एव परोपकारं करोति, अयं पुनः स्वत एव परहितरतिरिति । **'तह चेव'** इति तथाशब्दः प्रकारार्थः, चः समुच्चये, एवोऽवधारणे । ततश्च यथैते विंशतिस्तथैव तेनैव प्रकारेण २१-लब्धलक्ष्यश्च धर्माधिकारीति पदयोगः । पदार्थस्तु लब्ध इव प्राप्त इव लक्ष्यो लक्षणीयो धर्मानुष्ठानव्यवहारो येन स **लब्धलक्ष्यः** सुशिक्षणीयत्वात् । एभिरेकविंशतिभिर्गुणैः संपन्नो धर्मरत्नयोग्य इति योजितमेव । इति द्वारगाथात्रितयाक्षरार्थः ।।५,६,७।।

**** प्रवचनसारोद्धारे-१३५६, १३५७, १३५८ ****

इदानीं 'इगवीसा सावयगुणाणं' त्येकोनचत्वारिंशदधिकद्विशततमं द्वारमाह –

धम्मरयणस्स जोगो अक्खुद्दो रूववं पगइसोमो।
लोयप्पिओ अकूरो भीरू असठो सदक्खिन्नो ।।
लज्जालुओ दयालू मज्झत्थो सोमदिट्ठि गुणरागी।
सक्कह-सुपक्खजुत्तो सुदीहदंसी विसेसन्नू।।
वुड्ढाणुगो विणीओ कयन्नुओ परहियत्थकारी य ।
तह चेव लद्धलक्खो इगवीसगुणो हवइ सड्ढो ।।

परतीर्थिकप्रणीतानां सर्वेषामपि धर्माणां मध्ये प्रधानत्वेन यो रत्नमिव वर्तते स **धर्मरत्नं** जिनोदितो देशविरत्यादिरूपः समाचारस्तस्य **योग्य** उचित ईदृक्स्वरूप एव श्रावको भवति, तद्यथा–१-**अक्षुद्र** इत्यादि,

तत्र यद्यपि क्षुद्रः तुच्छः, क्षुद्रः क्रूरः, क्षुद्रो दरिद्रः, क्षुद्रो लघुरित्यनेकार्थः क्षुद्रशब्दस्तथाऽपीह तुच्छार्थो गृह्यते तस्यैव प्रस्तुतोपयोगित्वात्, ततः क्षुद्रस्तुच्छोऽगम्भीर इत्यर्थस्तद्विपरीतोऽक्षुद्रः स च सूक्ष्ममतित्वात् सुखेनैव धर्ममवबुध्यते। २-**रूपवान्** संपूर्णाङ्गोपाङ्गतया मनोहराकारः, स च तथारूपसंपन्नः सदाचारप्रवृत्त्या भविकलोकानां धर्मे गौरवमुत्पादयन् प्रभावको भवति, ननु नन्दिषेणहरिकेशबलप्रभृतीनां कुरूपाणामपि धर्मप्रतिपत्तिः श्रूयते, अतः कथं रूपवानेव धर्मेऽधिक्रियते ? सत्यम्, इह द्विविधं रूपं-सामान्यमतिशायि च, तत्र सामान्यं संपूर्णाङ्गत्वादि, तच्च नन्दिषेणादीनामप्यासीदेवेति न विरोधः, प्रायिकं चैतच्छेषगुणसद्भावे कुरूपत्वस्याप्यदुष्टत्वात्, एवमग्रेऽपि, अतिशायि पुनर्यद्यपि तीर्थकरादीनामेव सम्भवति तथापि येन क्वचिद्देशे काले वयसि वा वर्तमानो रूपवानयमिति जनानां प्रतीतिमुपजनयति तदेवेहाधिकृतं मन्तव्यम् ३-**प्रकृत्या** स्वभावेन **सौम्यो**ऽभीषणाकृतिर्विश्वसनीयरूप इत्यर्थः, एवंविधश्च प्रायेण न पापव्यापारे व्याप्रियते सुखाश्रयणीयश्च भवति । ४-लोकस्य सर्वजनस्येहपरलोकविरुद्धवर्जनेन दानशीलादिगुणैश्च प्रियो वल्लभो **लोकप्रियः,** सोऽपि सर्वेषां धर्मे बहुमानं जनयति । ५-**अक्रूरो**ऽक्लिष्टाध्यवसायः, क्रूरो हि परच्छिद्रान्वेषणलम्पटः कलुषमनाः स्वानुष्ठानं कुर्वन्नपि न फलभाग्भवतीति । ६-**भीरु** ऐहिकामुष्मिकापायेभ्यस्त्रसनशीलः, स हि कारणेऽपि सति न निःशङ्कमधर्मे प्रवर्तते । ७-**अशठो**ऽच्छद्मानुष्ठाननिष्ठः, शठो हि वञ्चनप्रपञ्चचतुरतया सर्वस्याप्यविश्वसनीयो भवति । ८-**सदाक्षिण्यः** स्वकार्यपरिहारेण परकार्यकरणैकरसिकान्तःकरणः, स च कस्य नाम नानुवर्तनीयो भवति ? ९-**'लज्जालुओ'**त्ति प्राकृतशैल्या लज्जावान्, स खल्वकृत्यासेवनवार्तयाऽपि व्रीडते, स्वयमङ्गीकृतमनुष्ठानं च परित्यक्तुं न शक्नोति । १०-**दयालु**र्दयावान्, दुःखितजन्तुजातत्राणाभिलाषुक इत्यर्थः, 'धर्मस्य हि दया मूल'मिति प्रतीतमेव । ११-**मध्यस्थो** रागद्वेषत्यक्तधीः, स हि सर्वत्रारक्तद्विष्टतया विश्वस्यापि वल्लभो भवति । १२-**सौम्यदृष्टिः** कस्याप्यनुद्वेजकः, स हि दर्शनमात्रेणापि प्राणिनां प्रीतिं पल्लवयति । १३-गुणेषु गाम्भीर्यस्थैर्यप्रमुखेषु रज्यतीत्येवंशीलो **गुणरागी,** स हि गुणपक्षपातित्वादेव सद्गुणान् बहु मन्यते निर्गुणांश्चोपेक्षते । १४-**सत्कथाः**-सदाचारचारित्वात्सुचरित्रचर्याकथनरुचयो न तु दुश्चारित्रचर्याकथनरुचयो ये **सपक्षाः** सहाया जनास्तै**र्युक्तो**ऽन्वितो, धर्माविबन्धकपरिवार इति भावः, एवंविधश्च न केनचिदुन्मार्गं नेतुं शक्यते, अन्ये तु सत्कथः सुपक्षयुक्तश्चेति पृथग्गुणद्वयं मन्यन्ते, मध्यस्थः सोमदृष्टिश्चेति द्वाभ्यामप्येकमेवेति । तथा १५-**सुदीर्घदर्शी**सुपर्यालोचितपरिणामपेशलकार्यकारी, स किल पारिणामिक्या बुद्ध्या सुन्दरपरिणाममैहिकमपि कार्यमारभते। १६-**विशेषज्ञः** सारेतरवस्तुविभागवेदी, अविशेषज्ञस्तु दोषानपि गुणत्वेन गुणानपि दोषत्वेनाध्यवस्यति । १७-वृद्धान् परिणतमतीननुगच्छति गुणार्जनबुद्ध्या सेवत इति **वृद्धानुगः,** वृद्धजनानुगत्या हि प्रवर्तमानः पुमान् न जातुचिदपि विपदः पदं भवति । १८-**विनीतो** गुरुजनगौरवकृत्, विनयवति हि सपदि संपदः प्रादुर्भवन्ति । १९-स्वल्पमप्युपकारमैहिकं पारत्रिकं वा परेण कृतं जानाति न

निह्नुत इति **कृतज्ञः**, कृतघ्नो हि सर्वत्राप्यमन्दां निन्दां समासादयति । २०-परेषामन्येषां हितान् पथ्यानर्थान् प्रयोजनानि कर्तुं शीलं यस्य स **परहितार्थकारी**, सदाक्षिण्योऽभ्यर्थित एव करोत्ययं पुनः स्वत एव परहिताय प्रवर्तत इत्यनयोर्भेदः, यश्च प्रकृत्यैव परहितकरणे नितरां निरतो भवति स निरीहचित्ततयाऽन्यानपि सद्धर्मे स्थापयति । **तथा** २१-लब्धमिव लब्धं लक्षं शिक्षणीयानुष्ठानं येन स **लब्धलक्षः**, पूर्वभवाभ्यस्तमिव सर्वमपि धर्मकृत्यं झटित्येवाधिगच्छतीति भावः, ईदृशो हि वन्दनप्रत्युपेक्षणादिकं धर्मकर्म सुखेनैव शिक्षयितुं शक्यते, तदेवमेकविंशतिगुणसंपन्नः **श्राद्धः** श्रावको **भवती**ति ।।१३५६, १३५७, १३५८।।

* संबोधसप्ततिकायाम्-२३, २५ *

x x x ५-**अक्रूरो** भृकुट्याद्यकरणशीलः। १७-**वृद्धानुगो** वृद्धानां मातृपितॄणां गुरूणां च मार्गमनुगच्छतीति वृद्धानुगः, तन्मार्गनिसेवक इत्यर्थः x x x

* संबोधसित्तर्याम्-२३ *

x x x तत्र १-**अक्षुद्रो**ऽनुत्तानमतिः । ३-**प्रकृतिसोमः** स्वभावतोऽपापकर्मा। ५-**अक्रूरो**ऽक्लिष्टचित्तः, मत्सरादिदूषितपरिणामो न भवति । ८-**सुदाक्षिण्यः** प्रार्थनाभङ्गभीरुरिति x x x

३ - मार्गतत्त्वम्

चक्रे० : व्याख्यातं द्वितीयं धर्मतत्त्वम् । अथ मार्गतत्त्वस्याऽवसरोऽस्य च पूर्वेण सहाऽयं सम्बन्धः- धर्मः सन्मार्गानुसारेण स्यादतो मार्गं प्रतिपादयितुं शृङ्खलया तत्प्रस्तावनामाहुः –

देव० : व्याख्यातं द्वितीयं धर्मतत्त्वम् । अथ मार्गतत्त्वस्यावसरोऽस्य च पूर्वेण सहाऽयं सम्बन्धः- पूर्वं गृहिधर्मो यतिधर्मश्च प्रत्यपादि, तत्र गृहिधर्मो द्रव्यस्तवमार्गानुपाती, यतिधर्मश्च भावस्तव-मार्गानुपातीति प्रस्तावादुभयरूपमपि मार्गं प्रतिपिपादयिषुः शृङ्खलया तत्प्रस्तावनामाह –

दुलहा गुरुकम्माणं जीवाणं सुद्धधम्मबुद्धी वि ।
तीए सुगुरु तम्मि वि कुमग्गठिइसंकलाभंगो।।६९।।

चक्रे० : दुर्लभा गुरुकर्माणां जीवानां शुद्धधर्मबुद्धिरपि, आस्तां कायेनानुष्ठानम् । अथ कथञ्चिद्भवितव्यतानियोगाज्जातायामपि **तस्यां सुगुरु**र्दुर्लभः, कुतोऽपि कर्मविवरात् **तस्मिन्नपि** प्राप्ते **कुमार्गः** शिवपथप्रतिपन्थी पन्थास्तस्य **स्थिति**र्व्यवस्था सैव **सङ्कला** तस्या **भङ्गो** दुर्लभ इति।।६९।।

देव० : दुर्लभा दुष्प्रापा, **गुरुणि** क्लिष्टाध्यवसायजनितत्वेन स्थित्यादिभिर्महान्ति **कर्माणि** दर्शनचारित्रमोहनीयादीनि येषां ते, तथा तेषां **जीवानां** प्राणिनाम्, कासौ ? **शुद्धधर्मबुद्धिरपि,** तत्र शुद्धः प्रबलमोहावृतप्राणिप्रवर्त्तितागमप्रतिकूलाऽसत्प्रवृत्तिकलङ्करहितः, स चासौ धर्मश्च, तत्र बुद्धिरभिलाषः, शुद्धधर्मबुद्धिरास्तां कायेनानुष्ठानमित्यपेरर्थः, अथ कथञ्चिद्भवितव्यतानियोगा-ज्जातायामपि **तस्यां** 'धम्मणू धम्मकत्ता य' इत्यादिवक्ष्यमाणलक्षणः **सुगुरु**र्दुर्लभ इति सर्वत्र सम्बन्धनीयम् । तदभावे तस्या अपि निष्फलत्वाद्, अथ कुतोऽपि कर्मविवरा**त्तस्मिन्नपि** गुरावपि प्राप्त इत्यर्थः, कुत्सितः शिवपुरप्रतिपन्थित्वेन मार्गः पन्थास्तस्य स्थितिर्व्यवस्था, सैव संसार-चारकनिर्गमनिरोधकत्वेन सङ्कला लोहमयबन्धनं **कुमार्गस्थितिसङ्कला** तस्या भङ्ग इव

भङ्गोऽतिलङ्घनमित्यर्थः । इदमत्र हृदयम्-यद्यपि कश्चिद्विशिष्टकर्मक्षयोपशमात्सद्गुरुसम्प्रयोगाच्च समुल्लसितविवेको विशुद्धधर्मोत्साहवान् भवति, तथाप्यत्यन्तगुरुकर्मप्राग्भाराक्रान्ततया भवाभिनन्दिभिर्गौरवत्रितयप्रतिबद्धैः प्रवर्त्तितस्वाभिप्रेताचारैरागमप्रतिपन्थिभिस्तथाविधमूढजनैः सदाचारविमुखप्रभूतजनमेलनेन बलादप्यसौ कुमार्गे व्यवस्थाप्यत इति गाथार्थः ।।६९।।

चक्रे० : कुमार्गोऽपि ज्ञात एव सुनिषेधः स्यादिति तद्दर्शनायाहुः, तथाहि –

देव० : प्रस्तावनापूर्वं[१] कुमार्गमेवाह–तथाहीति निपातसमुदायोऽयमुपप्रदर्शने ।

जिणभवणे अहिगारो जइणो गिहिणोवि गच्छपडिबद्धा ।
जहतह देयं दाणं सुविहियपासे वयनिसेहो ।।७०।।
जिणभवणबिंबपूयाकरणं कारावणं जईणंपि ।
आगमपरम्मुहेहिं[२] मूढेहिं परूविओ मग्गो ।।७१।। युग्मम्

चक्रे० : अपिशब्दस्योभयत्राऽपि सम्बन्धादास्तां गृहिणः, सर्वसावद्यविरतस्य **यते**रपि **जिनभवने** वसितुं जिनद्रव्यादिकं च विचिन्तयितु**मधिकारः** । तथा – आस्तां यतयः, सावद्यारम्भरता **गृहिणोऽपि गच्छप्रतिबद्धाः** स्वस्वाचार्यवशवर्तिनः, **यथातथा** कृतक्रीताऽऽहृतादिदोषवदपि पात्राऽपात्राविचारेण **देयं दानं** यतिवेषेभ्यः । तथा **सुविहितपार्श्वे व्रतनिषेधः** 'त्वं मद्गच्छीय' इति वदन्तो मूढास्तत्पार्श्वे व्रतमादातुं न ददतीत्यर्थो मुग्धजनविप्रतारणार्थं च पठन्ति –

जा जस्स ठिई जा जस्स संतई पुव्वपुरिसकयमेरा ।
सो तं अइक्कमंतो अणंतसंसारिओ होइ ।। [सुमिणसित्तरी-५१]

एतां यतिव्यवस्थामपि मूढा गृहस्थेऽपि सम्बन्धयन्ति ।।७०।।
द्वितीयगाथा च प्रतीतार्था।।७१।।

देव० : जिनभवनेऽर्हन्मन्दिरे, उत्तरपदस्थस्यापिशब्दस्येह सम्बन्धा**द्यते**रपि त्रिधा नियमितसकलसावद्यव्यापारस्य साधोरपि, न केवलं गृहिणो**ऽधिकार**स्तन्निवासतत्कर्मद्रव्यादिचिन्तकत्वलक्षण आगमपराङ्मुखै**र्मूढै**ः प्ररूपितो मार्ग इति द्वितीयगाथान्ते सम्बन्धः । एवं सर्वत्र,

१. तत्र यादृशः कुमार्गस्तादृशमुपदर्शयितुं तथाहीत्यनेन प्रस्तावनामाह, तथाहीत्युपदर्शने निपातसमुदायः T,B,C
२. परंमुहेहिं A,T,C,Z

गृहिणोऽपि सर्वारम्भभाजो गृहस्था अपि, न केवलं साधवः, किम् ? **गच्छप्रतिबद्धा** विवक्षिताचार्यसन्तानवशवर्तिनः । **यथातथा** येन तेन कृतक्रीताहतादिदोषवतापि प्रकारेण 'दाणस्स नत्थि नासो, आहम्मिय धम्मिय दिंतस्स' इत्यादि पूर्वापरसम्बन्धशून्यवचनोद्घोषणात् पात्रापात्राविचारणेन च **देयं** दातव्यं **दानं** पिण्डवस्त्रपात्रादि यतिभ्य इति गम्यम्, सुष्ठु लोकागमाबाधितं विहितमनुष्ठानं येषां ते **सुविहिताः** सुसाधवस्तेषां **पार्श्वेऽन्तिके व्रतनिषेधश्चारित्रप्रतिपत्तिप्रतिबन्धः**, ते हि चैत्यनिवासात्तद्द्रव्यादिप्रभुत्वसामर्थ्येन राजवदाक्रम्य सहृदयमपि लोकं मुक्तमर्यादा यथाभिरुचितं व्यापारयन्ति, मुग्धजनप्रत्यायनार्थं वदन्ति[१] च –

जा जस्स ठिई जा जस्स संतई पुव्वपुरिसकयमेरा ।
सो तं अइक्कमंतो अणंतसंसारिओ होइ ।। [सुमिणसित्तरी-५१]

व्याख्यास्याः – या यस्य साधोः स्थितिः प्रव्रजनकाल उपस्थापनकाले वा, आचार्योपाध्यायादिका व्यवस्था दिग्बन्ध इत्यर्थः । तथा या यस्य सन्ततिः सन्तानो वैरशाखाचान्द्रकुलादिस्तथा पूर्वपुरुषैश्चिरन्तनगीतार्थैः कृता विहिता या, यस्येत्यत्रापि सम्बन्धः । मेरत्ति मर्यादा द्रव्यक्षेत्रकालभावपुरुषप्रतिषेध[२]रूपा, संहननधृत्याद्यपेक्षः कारणतः सूत्रातिरिक्तो जीतकल्पादिर्व्यवहारः, स तां रागादिकलुषिततयाऽतिक्रामन्ननन्तसंसारिको भवत्येव, तां च संयतव्यवस्थां सर्वारम्भप्रवृत्ते गृहस्थेऽपि मूढाः सम्बन्धयन्तीति कृतं प्रपञ्चेन, प्रकृतं प्रस्तुमः ।

तथा जिनानां भवनं च गृहं बिम्बं च प्रतिमापूजा चाऽर्चा **जिनभवनबिम्बपूजा**स्तासां **करणं** स्वयं स्वद्रव्येण परद्रव्येण वा निर्वर्तनं **कारापणं** श्रुतत्वादेतासामेवान्यैर्विधापनं **यतीनामपि,** न केवलं गृहिणाम्, **आगमपराङ्मुखैः** सिद्धान्तप्रतिकूलै**र्मूढै**र्विषयकषायाकुलितमनोवृत्तिभिः **प्ररूपितः** प्रतिपादितो **मार्गः** स्वबुद्ध्या धर्मपथ इति गाथाद्वयार्थः ।।७०, ७१।।

चक्रे० : कुमार्गता चास्य जिनवचनाधःकरणादिति दर्शयन्तः प्राहुः –

देव० : अथ कथमागमपराङ्मुखं प्ररूपितत्वमस्येत्युच्यते –

समणाणं को सारो छज्जीवनिकायसंजमो एयं ।
वयणं भुवणगुरूणं निहोडियं पयडरूवंपि।।७२।।

चक्रे० : श्रमणानां कः सारः किं प्रधानम् ? **षण्णां जीवनिकायानां संयमो** रक्षा ।

१. पठन्ति च T,C २. प्रतिषेधा A प्रतिसेवा T,C

एतद्भुवनगुरूणामर्हतां वचनं प्रकटरूपमपि स्पष्टस्वभावमपि **'निहोडियं'** 'हेडु होडु अनादरे' निहोडितं नादृतम्, यद्वा देश्योऽयमधःकृतार्थे । ते हि सर्वप्रकारैर्जिनमन्दिरव्यापारमनुतिष्ठन्तोऽनेषणीयं भक्तपानादि च गृह्णन्तो गृहस्थांश्च 'मद्गच्छीयाः' इति ममीकुर्वाणा अन्यदपि ज्योतिषनिमित्तमन्त्रतन्त्रादि प्रयुञ्जानाः षट्जीवनिकायमुपमृद्नन्तः कथं भगवद्वचो नाधःकुर्वन्ति ? इति गाथार्थः ।।७२।।

देव० : श्राम्यन्ति तपस्यन्तीति **श्रमणाः** साधवस्तेषां **कः सारः** किं प्रधानं रहस्यमिति यावदित्याह – **षड्जीवनिकायसंयमः** षट् च पृथिव्यप्तेजोवायुवनस्पतित्रसलक्षणास्ते जीवनिकायाश्च तेषां संयमो रक्षा, **एतदि**ति प्रत्यक्षपरामर्शे **वचनं** समयरूपं **भुवनगुरूणामर्हतां निहोडित**मधःकृतम्, **प्रकटरूपमपि** स्पष्टस्वभावमप्ययमर्थः । ते हि सर्वप्रकारैर्जिनमन्दिरव्यापारमनुतिष्ठन्तोऽनेषणीयं भक्तपानादि च गृह्णन्तो गृहस्थांश्च 'मद्गच्छीया एत' इति ममीकुर्वाणा अन्यदपि ज्योतिषनिमित्तमन्त्रतन्त्रादि प्रयुञ्जानाः षड्जीवनिकायमुपमृद्नन्तः कथं भगवद्वचो नाधःकुर्वन्ति ? इति गाथार्थः ।।७२।।

चक्रे० : अथ सुगृहीतनामधेयैरार्यरक्षितैरनुज्ञातत्वाच्चैत्यनिवासस्य कथमागमपराङ्मुखप्ररूपितोऽयमुच्यते ? इत्येतद्दातव्योत्तरमाहुः –

देव० : अथ सुगृहीतनामधेयैरार्यरक्षितैरनुज्ञातत्वाच्चैत्यनिवासस्य कथमागमपराङ्मुखप्ररूपितोऽयमभिधीयते ? इत्येतदनूद्य समाधिमाह –

मन्नंति चेइयं [१]अज्जरक्खिएहिमणुनायमिह केई ।
ताण मयं मयबज्झं जम्हा नो आगमे भणियं ।।७३।।

चक्रे० : स्पष्टा, नवरं **'चेइयं'**ति चैत्यनिवासायेति गम्यम् । **'मयबज्झं'**ति मतबाह्यं–आगमबहिर्भूतम् ।।७३।।

देव० : मन्यन्त अभ्युपगच्छन्ति **केचिदा**चार्याभासा इति सम्बन्धः, किं तत् ? **चैत्यमार्यरक्षितैरनुज्ञातमि**ति वाक्यं कर्म, क्व ? **इह** यतिजनविषये निवासायेति प्रक्रम**स्तेषामे**व वादिनां **मतम**भ्युगमो **मताज्जि**नशासनाद् **बाह्यं** बहिर्भूतम्, **यस्माद्धेतो**र**ागमे** सिद्धान्ते **न भणितं** चैत्यनिवासानुज्ञानमिति प्रकृतमिति गाथार्थः ।।७३।।

१. अज्जरक्खिएहिं A,T,C

चक्रे० : तर्हि किं भणितमित्याहुः -

देव० : तर्हि किं भणितमित्याह -

एयं भणियं समए इंदेणं साहुजाणणनिमित्तं ।
जक्खगुहाए दारं अन्नमुहं ठावियं तइया।।७४।।

चक्रे० : एषा स्पष्टैव, केवलं **'जक्खगुहा'** इति, गुहाऽनुरूपत्वाद् गुहा । यक्षस्य व्यन्तरस्य गुहा निवासो यक्षगुहा तस्यास्तदा वसतीकृतायाः, न तु चैत्यस्य ।।७४।।

देव० : एतदभिधास्यमानं **भणितमु**क्तं **समय** आवश्यकनिर्युक्तिचूर्ण्यादिरूपे, किम् ? **इन्द्रेण** सौधर्माधिपेन **साधूनामार्य**रक्षितशिष्याणां **ज्ञापननिमित्तं यक्षगुहाया** व्यन्तरनिवास-रूपाया **द्वारं** मुखमन्यस्यां दिशि मुखं यस्य **तदन्यमुखं स्थापितं** विहितम्, न पुनश्चैत्यस्य, **तदा** तस्मिन् काले यदा तैस्तस्यां वसतिः कृतेति गाथार्थः ।।७४।।

चक्रे० : मा भूत् तेषामनुज्ञा, परमाधाकर्म्मादिदोषरहिते तत्र निवसतां का क्षतिरित्याहुः -

देव० : माभूत्तेषामनुज्ञा, परमाधाकर्मादिदोषरहिते तत्र निवसतां का क्षतिरित्याह -

दुग्गंधमलिणवत्थस्स खेलसिंघाणजल्लजुत्तस्स ।
जिणभवणे नो कप्पइ जइणो आसायणाहेऊ ।।७५।।

चक्रे० : दुर्गन्धान्यस्नानमलसम्पर्कात्, **मलिनानि** बाह्यरजःसङ्गाद् **वस्त्राणि** यस्य स तथा तस्य । **खेलसिङ्घाणजल्लयुक्तस्य यतेर्जिनभवने न कल्पते** स्थातुमिति गम्यम् । कुतः ? **आशातनाहेतो**राशातनालक्षणात् कारणादुक्तं च -

दुब्भिगंधमलस्साऽवि तणुरप्पेस ण्हाणिया ।
दुहा वाउवहो वावि तेण ठंति न चेइए ।। [व्यवहारसूत्र-३७५४]

स्नानिताऽप्येषा तनुर्दुरभिगन्धस्राविणी किमुताऽस्नानिता । द्विधोर्ध्वमधश्च वायुवहश्चाऽपि, तेन न तिष्ठन्ति न निवसन्ति चैत्ये ।

तिन्नि वा कड्ढइ जाव थुईओ तिसिलोइया ।
ताव तत्थ अणुन्नायं कारणेण परेण वा ।। [व्यवहारसूत्र-३७५५]

यावत् तिस्रः स्तुतयस्त्रिश्लोकिकाः 'सिद्धाणं बुद्धाणं' इत्यादिगाथात्रयरूपाः कर्षति एतावता -

यावत् पूर्णां चैत्यवन्दनां करोति इति गम्यते, तावत् तत्र चैत्येऽवस्थानमनुज्ञातम् । कारणेन स्नात्रादिना व्याख्यानादिना वा 'परेण वा' त्ति परतोऽपि चैत्यवन्दनानन्तरमप्यवस्थातुं कल्पते ।

जइवि न आहाकम्मं भत्तिकयं तह वि वज्जयंतेहिं ।
भत्ती खलु होइ कया इहरा आसायणा परमा ।। [सुमिणसित्तरी-४५]

यद्यपि चैत्यं नाऽऽधाकर्म्म न साधूनां निमित्तं कृतं किं तर्हि ? भक्तिकृतमर्हद्भक्त्या निर्मितम्, तथापि तत्र निवासं वर्जयद्भिरर्हति भक्तिः खलु निश्चयेन कृता भवति । इतरथा तत्र निवासं कुर्वतामाशातना परमा, अतो न चैत्ये वस्तव्यमित्यर्थः।।७५।

देव० : दुर्गन्धान्यस्नानशरीरमलसम्पर्कान्**मलिनानि** बाह्यरजःसङ्गाद्**वस्त्राणि** यस्य स तथा तस्य, **खेलश्च** निष्ठीवनम्, **सिङ्घाणं** च नासिकामलः, **जल्लश्च** देहमल उपलक्षणत्वादन्येऽपि तथाविधा वातनिसर्गादयो मनुष्यशरीरधर्मा अवरुद्धयन्ते तै**र्युक्तो** यः स तथा तस्य **यतेर्जिन-भवने न कल्पते** स्थातुमिति गम्यम्, कुतः ? **आशातनाहेतोरा**शातनालक्षणात्कारणाद्, उक्तं च –

दुब्भिग्गंधमलस्सावि तणुरप्पेस ण्हाणिया ।
दुहा वाउवहो वावि तेण ठंति न चेइए ।। [प्रव.सारो० ४३८]
जइवि न आहाकम्मं भत्तिकयं तह वि वज्जयंतेहिं ।
भत्ती खलु होइ कया इहरा आसायणा परमा ।। [सुमिणसित्तरी-४५]
आसायणमिच्छत्तं आसायणवज्जणा य सम्मत्तं ।
आसायणा निमित्तं कुव्वइ दीहं च संसारं ।। [उपदेशमाला-४०९]

न च वाच्यं भावार्हतां समीपे साधूनामवस्थानात् स्थापनार्हत्समीपावस्थानमपि न विरुद्ध्यते, यस्मादन्य एव भावार्हतां कल्पोऽन्य एव स्थापनार्हताम्, तथाहि – भावार्हतां सर्वसंवररूपदीक्षाङ्गीकारात् सर्वमेव तत्कृत्यं यतिभिरेव कार्यम्, न गृहस्थैः, विरतिविराधनासम्भवाद् मज्जनमाल्यारोपादि च सावद्यं तेषां न विधीयते, तदुद्देशेन पाकादि च न किञ्चित्क्रियते । स्थापनार्हतां तु गृहस्था एव सर्वमनुतिष्ठन्ति, स्नपनादि च सर्वं विधीयत इति न तेषां सर्वसाम्यबुद्ध्या चैत्येऽवस्थातव्यमिति गाथार्थः ।।७५।।

चक्रे० : एवं कुमार्गं निराकृत्य [१]सुमार्गमाहुः –

देव० : इत्थमुत्पथमुन्मथ्य प्रस्तुतमार्गं प्ररूपयन्नाह –

भावत्थयदव्वत्थयरूवो सिवपंथसत्थवाहेण ।
सव्वन्नुणा पणीओ दुविहो मग्गो सिवपुरस्स ।।७६।।

चक्रे० : पाठसिद्धा, केवलं भावेन स्तवः पूजा **भावस्तवो** यतिधर्मः, भगवदाज्ञा-पालनाच्चारित्रमपि भगवत एव पूजा, यदुक्तम् —

अहिंसा सत्यमस्तेयं ब्रह्मचर्यमसङ्गता ।
गुरुभक्तिस्तपोज्ञानमष्टपुष्पी प्रचक्षते ।। [अष्टकप्र० २२]
अष्टपुष्पी समाख्याता [२]स्वर्गमोक्षप्रसाधिका ।
अहर्निशं तु साधूनां देवपूजा मताऽनया ।। [अष्टकप्र० १७]

द्रव्येण स्तवः पूजा **द्रव्यस्तवः** श्रावकधर्मः ।।७६।।

देव० : भावः परमार्थः शुभाध्यवसायो वा, तेन तद्रूपो वा स्तवः स्तोतव्यपूजनमाराधनमिति हृदयम्, **भावस्तवो** द्रव्येण द्रव्यरूपो वा, भावस्तवकारणभूतः स्तवः प्राग्वद् **द्रव्यस्तवः** । अनयोर्द्वन्द्वः, ततस्तौ **रूपं** स्वभावो यस्य स तथा, शिवस्य मोक्षस्य महापुरस्येव पन्था मार्गस्तस्मिन् सार्थवाह इव सार्थवाहस्तेन **शिवपथसार्थवाहेन,** तस्य स्वरूपमाह–**सर्वज्ञेन** सर्वविदा, तदन्यप्रणयने विसंवाददर्शनात्, **प्रणीतः** प्ररूपितो **द्विविधो** द्वौ विधौ भणितस्वरूपौ प्रकारौ यस्य स तथा, मृग्यते परमसुखाभिलाषिभिरन्विष्यते, मृज्यते वा कर्ममलापनयना-द्विशोध्यतेऽनेनात्मेति **मार्गः शिवपुरस्य** मोक्षनगरस्य, अयमाशयः – यत्प्रयोजननिष्पत्तौ भावस्यैवालम्बनं मरुदेवास्वामिनीवत्, यच्च विदिततत्त्वस्याऽविदिततत्त्वस्य वा भावेन क्रियासु प्रवर्तनं वैरस्वामिमाषतुषादिवत्, स द्विविधोऽपि भावस्तवमार्गः । तथा यद् द्रव्यत एवान्तः-करणशून्यतया गोविन्दवाचकादिवत्सदनुष्ठानम्, यच्च द्रव्येण भरतादिवज्जिनभवनादिकरणम्, स द्विविधोऽपि द्रव्यस्तवमार्ग इति गाथार्थः ।।७६।।

---

१. शुभं मार्गमित्याहुः P,K २. स्वयं मोक्ष० P,K

** अभिधानराजेन्द्रकोषे 'मग्ग' शब्दे-८ **

भावत्थयदव्वत्थयरूवो सिवपंथसत्थवाहेण ।
सव्वण्णुणा पणीओ दुविहो मग्गो सिवपुरस्स ।।

तत्र भावः शुभपरिणामः प्रधानं यत्र स्तवे स भावस्तवः । यद्वा भावेनाऽऽन्तरप्रीत्या तथाविध-कर्म्मक्षयोपशमापेक्षया सर्वविरतिदेशविरतिप्रतिपत्तिस्वभावेन स्तवो भावस्तवः, द्रव्येण वा वित्तव्ययेन जिनभवनबिम्बपूजाऽऽदिकरणरूपः स्तवो द्रव्यस्तवः, भावस्तवश्च द्रव्यस्तवश्च **भावस्तवद्रव्यस्तवौ** तयो **रूपं** स्वभावः स्तवरूपः शिवो मोक्षः पारमार्थिकनिरुपद्रवीस्थानं तस्य पन्था मार्गः **शिवपथ**स्तस्य सार्थवाह इव **सार्थवाह**स्तेन मोक्षपथनायकेनेत्यर्थः। तस्याऽपि लोकरूढ्या नानात्वे विशेषयितुमाह–**सर्वज्ञेन** सर्वविदा **प्रणीतः** प्ररूपितः, तदन्यकथने हि विसंवाददर्शनात्, **द्विविधो** द्विप्रकारो **मार्गः** पन्थाः, कस्येत्याह–शिव एव पुरं शिवनगरं तस्याऽयमाशयः । यो हि प्रयोजननिष्पत्तौ भावमेवावलम्ब्य बहिर्द्रव्यव्यतिरेकेण प्रवर्त्तते, भगवती मरुदेवी स्वामिनी यतयश्च स्वभावेन भावशुद्धाध्यवसायेन सम्यग्विदिततत्त्वा अविदिततत्त्वो वा वैरस्वामिमाषाऽऽदिवत्सदनुष्ठाने प्रवर्त्तते स द्विविधोऽपि भावस्वरूपो मोक्षमार्ग इति ।।८।।

चक्रे० : अथ भावस्तवद्रव्यस्तवयोः स्वयमेव स्वरूपमाहुः –

देव० : अथ भावस्तवद्रव्यस्तवयोः स्वयमेव स्वरूपमाह –

जावज्जीवं आगमविहिणा चारित्तपालणं पढमो ।
नायज्जियदव्वेणं बीओ जिणभवणकरणाई[१] ।।७७।।

चक्रे० : एषाऽपि पाठसिद्धैव ।।७७।।

देव० : यावज्जीवं यावत्प्राणधारणम्, न तु परपरिकल्पितद्वादशवर्षादिकालावधिनेत्यर्थः । **आगमो** गणधरादिरचिता शास्त्रपद्धतिस्तस्य **विधि**स्तेन सूत्रोक्तन्यायेनेत्यर्थः । अनेन स्वरुचिरचितानुष्ठानस्य निष्फलत्वमावेदयति । **चारित्रं** मूलोत्तरगुणरूपं तस्य **पालनं** रक्षणं सम्यग्विधानमिति यावत् । **प्रथम** आद्यो भावस्तवो भवतीति क्रिया । न्यायः स्वामिद्रोह-विश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचार-स्तेनार्जितं यद्[२] द्रव्यं तेन **न्यायार्जित**धनेन जिनभवनादिकरणमेव श्रेयस्करम्, न चान्यायार्जितेन धनेन जिनभवनादिकरणं मार्गानुयायीति सूचयति । एवं **जिनभवनकरणादिर्द्वितीयो** द्रव्यस्तवः। इह च यद्भावस्यैवालम्बनं भावस्तवः, द्रव्यत एव क्रियासु प्रवर्तनं द्रव्यस्तवश्च, तयोर्नाभिधानं तुच्छत्वादिति गाथार्थः ।।७७।।

१. करणाइं A २. विठपितं तच्च तद् द्रव्यं च तेन अनेन चान्यायार्जितधनेन जिनभवनादिकरणमपि न मार्गानुयायीति T,A,B,C

चक्रे० : अथ जिनभवनकरणादिरिति पदं विवृण्वन्ति –

देव० : अथ जिनभवनकरणादिरिति पदं विवृणोति –

जिणभवणबिंबठावणजत्तापूयाइ[१] सुत्तओ विहिणा ।
दव्वत्थय[२] त्ति नेयं भावत्थयकारणत्तेण।।७८।।

चक्रे० : जिनभवनबिम्बस्थापनयात्रापूजादि । यात्रा रथनिर्गमाऽष्टाह्निकादिका, **सूत्रत** आगममाश्रित्य, **विधिना** विधीयमान इति शेषः, **द्रव्यस्तव इति ज्ञेयं भावस्तवकारणत्वेन** भावस्तवजनकत्वेन ।।७८।।

देव० : जिनस्यार्हतो भवनं च गृहम्, बिम्बं च प्रतिमा, स्थापनं च प्रतिष्ठा, बिम्बस्यैव शोभनदिने प्रथमपूजा यात्रा च रथनिर्गमादि[३]रूपा अष्टाह्निकादिका च, पूजा च पुष्पाद्यर्चनमादिर्यस्य जिनगुणगाननर्त्तनवाद्यवादनादेस्तज्जिनभवनबिम्बस्थापनायात्रापूजादि द्रव्यस्तव इति ज्ञेयमिति योगः । तच्च न यथाकथञ्चिदित्याह–**सूत्रत** आगममाश्रित्य, तदपि **विधिना** 'जह रेहइ तह सम्मं' इत्यादिना विधानेन **द्रव्यस्तवो** भावस्तवकारणभूतपूजा **इति ज्ञेयम्** । केन हेतुनेत्याह- **भावस्तवकारणत्वेन** चरणप्रतिपत्तिरूपभावस्तवहेतुत्वाद्, द्रव्यशब्दो ह्यत्र कारणपर्यायः, इति गाथार्थः ।।७८।।

चक्रे० : अयं च द्रव्यस्तवः सावद्यरूपत्वान्न यतेर्योग्य इति प्रतिपादनायाहुः –

देव० : इह भावस्तवस्तावत् सर्वसंवररूपः साधोरेवावसीयते तत्किं द्रव्यस्तवोऽपि तस्यैवेत्याह, यदि चैदंयुगीनसाध्वाभासान् द्रव्यस्तवेऽपि प्रवर्तमानानुपलभ्य कस्यचिदधिकारिशङ्का मा भूदिति द्रव्यस्तवस्य सावद्यत्वमाविर्भावयन् यतेरनधिकारितामाह –

छण्हं जीवनिकायाणं[४] संजमो जेण पावए भंगं ।
तो जइणो जगगुरुणो पुप्फाईयं न इच्छंति।।७९।।

चक्रे० : षण्णां जीवनिकायानां संयमो येन प्राप्नोति भङ्गम्, ततो यतेर्जगद्गुरवस्तीर्थकराः **पुष्पादिकं** पुष्पाद्यर्चनमुपलक्षणत्वात् सर्वं द्रव्यस्तवं **नेच्छन्ति** नानुजानन्ति ।।७९।।

देव० : षण्णां जीवनिकायानां संयमस्त्रिधा वधविरति**र्येन** कारणेन **प्राप्नोति** लभते **भङ्गं**

१. जत्तापूयाय सुत्तउ T,C जत्तापूआय सुत्तओ P,K २. दव्वत्थउ T,C,P,K,Z, ३. रथनिर्गमाऽष्टाह्निकादि T,C ४. जीवनिकायाण T,C,Z

भ्रंशम्, **'तो'**त्ति ततो हेतो**र्यतेर**नगारस्य **जगद्गुरव**स्तीर्थकृतो **नेच्छन्ति** नानुजानन्ति पुष्पाण्यादिर्यस्मिंस्तत्**पुष्पादिकम**र्चनम्, यदिवा पुष्पादिकं पूजार्थं हस्तेन ग्रहीतुमिति शेषः, सकलद्रव्यस्तवोपलक्षणं चेदम्, उक्तं च –

छज्जीवकायसंजमो दव्वत्थए सो विरुज्झई कसिणो ।
तो कसिणसंजमविऊ पुप्फाईयं न इच्छंति ।। [उपदेशमाला-२३४]

इति गाथार्थः।।७९।।

चक्रे० : अथ विशिष्टभावस्तवहेतुः पूजा, सा कथं यतेर्निषिध्यते ? अत आहुः –

देव० : ननु सर्वसंवररूपसंयमवतापि दर्शनशुद्धिर्विधेया, सा च तीर्थकृत्पूजातो विशेषतः सम्भवति, तत्कथमसौ निषिद्ध्यते ? अत आह –

तं नत्थि भुवणमज्झे पूयाकम्मं न जं कयं तस्स ।
जेणेह परमआणा न खंडिया परमदेवस्स।।८०।।

चक्रे० : स्पष्टा, नवर**मिहे**ति प्रवचने।।८०।।

देव० : पूर्वार्धं सुगमम्, नवरमग्रे येनेति प्रयोगात्तेनेति सम्बध्यते, येन किम् ? **येनेह** भावस्तवविचारणायां परमा चासावाज्ञा च मनोवाक्कायशुद्ध्या सकलसत्त्वसंरक्षणपरा **परमाऽऽज्ञा** निर्देशः, परमत्वं चास्या निरुपमशिवसुखसाधकत्वात्, **न खण्डिता** नोल्लङ्घिता **परमदेवस्य** देवाधिदेवस्य तीर्थकृत इति यावत् । इदमेदंपर्यम्-यद्यपि साधुः पुष्पपूजादौ न प्रवर्तते तथापि सर्वप्रतिपत्तिमूलसर्वज्ञाऽऽज्ञापालनात् पूजादिविषये च देशनाद्वारेणोचितोपदेशादनुमोदनाच्चासौ दर्शनशुद्धिमान् भवत्येवेति गाथार्थः ।।८०।।

**** अभिधानराजेन्द्रकोषे 'चेइय' शब्दे-१२ ****

तं नत्थि भुवणमज्झे पूयाकम्मं न जं कयं तस्स ।
जेणेह परमआणा न खंडिया परमदेवस्स ।।

तत्किमपि नास्ति न विद्यते, **भुवनमध्ये** त्रिभुवनेऽपि, **पूजाकर्म्म** पूजाविधानम्, **यत्र कृतं** यत्र निष्पादितम्, **येन** केनचिदनिर्दिष्टनाम्ना, **इहे**ति पूजाविधानविचारे, परमोत्कृष्टाज्ञा **परमाऽऽज्ञा,** परमत्वं चाऽस्याः सकलकल्मषनिर्मूलनत्वेन सकलसुखविधायित्वात्, किम् ? **न खण्डिता** नोल्लङ्घिता कस्येत्याह– **परमदेवस्य** वीतरागस्येत्यर्थः । अयमत्राभिप्रायः – यद्यपि साधुः पुष्पपूजादौ न प्रवर्त्तते तथाऽपि

समस्तप्रतिपत्तिमूलसर्वज्ञाऽऽज्ञायाः परिपालनात्पूजादिविषये चोचितदेशनादौ प्रवर्तनादनुमोदनाच्च दर्शनशुद्धिर्भवत्येवेति। प्रयोगश्चात्र पुष्पपूजादिव्यतिरेकेणापि सर्वसंवरवत्साधुसमाजानां दर्शनशुद्धिरुपजायते, भावस्तवहेतुकत्वात्पुष्पादिपूजायाः, घटोत्पत्तौ मृत्पिण्डवत् । न चास्य हेतोर्भावस्तवोत्पत्तिहेतुत्वेऽपि दर्शनशुद्धावसिद्धतोद्भावनीयेति, भावस्तवस्य दर्शनशुद्धिव्यतिरेकेणात्यन्तासद्भावात् । अथ चेत्तं प्रयुज्यते तस्य हि भगवतः समस्तजगतीतलविख्यातकीर्त्तिसकलातिशयसंपन्नस्य त्रिभुवनोदरविवरभासुरसकलसुरासुरकिन्नरनरखेचरशेखरपरमपूजनीयस्य सर्वमपि यात्रास्नात्रविलेपाभरणगीतनृत्यपुष्पाद्यारोहणादिकं पूजाकर्म्म कृतमेव, तदविकलाज्ञाकरणतः सर्वसंवरारूढैः साधुभिरपि सकलकलङ्कविकलकेवलज्ञानोत्पत्तिदर्शनात् प्रसन्नचन्द्रमहामुनिभरतेश्वरचक्रवर्तिवदिति गाथार्थः ।।१२।।

चक्रे० : तदियता द्रव्यस्तवाद्भावस्तवो गरीयानिति निश्चितम्, परमनयोः कियदन्तरमित्याहुः –

देव० : तदियता द्रव्यस्तवाद्भावस्तवो गरीयानिति निश्चितम्, परमनयोः कियदन्तरमित्याह–

मेरुस्स सरिसवस्स य जत्तियमित्तं तु अंतरं होइ ।
भावत्थयदव्वत्थयाण[१] अंतरं तत्तियं नेयं ।।८१।।

चक्रे० : निगदसिद्धा ।।८१।।

देव० : निगदसिद्धा, नवरं '**भावत्थयदव्वत्थयाण**'त्ति बहुवचनं प्राकृतप्रभवमिति।।८१।।

**** संबोधसप्ततिकायाम्-३६ ****

अथ गाथाद्वयेन द्रव्यपूजाभावपूजान्तरमाह –

मेरुस्स सरिसवस्स य जत्तियमित्तंपि अंतरं गरुयं ।
दव्वत्थयभावत्थय अंतरं तत्तिअं नेयं ।।३६।।

मेरुगिरेः **सर्षपस्य च यावन्मात्रमन्तरं गुरुकं** गरिष्टं बहुतरं भवति, **द्रव्यस्तवभावस्तवयोः** द्रव्यस्तवो बाह्याकारेणैव विलेपनपुष्पोपहारादिकः, भावस्तवः शुभध्यानेन शक्रस्तवादिस्तुतिरूपः, ततो द्वन्द्वः, तथा तयोः, अर्थाद् द्रव्यपूजा भावपूजा च इत्येतयो**स्तावन्मात्रमन्तरं ज्ञेयम्,** भावपूजाया आधिक्यं सूचितमित्यर्थः। अत्र शाम्बपालकयोर्दृष्टान्तः, स चायम्–एकदा श्रीनेमिजिना द्वारिकायां समवसृताः, परिषन्निर्गता, कृष्णेन बहुभक्त्या वन्दिताः, ततो गृह आगत्य स्वपुत्रयोः शाम्बपालकयोरग्र उक्तम् – भवतोर्द्वयोर्मध्ये यः प्रगे प्रथमं स्वामिनं नेमिनाथं वन्दति, तस्मै अहमिमं पट्टसत्कमश्वं ददामीति श्रुत्वा शाम्बपालकौ स्वगृहे गतौ, शाम्बेन प्रगे प्रथममुत्थाय चैत्यवन्दनापूर्वकं द्वादशावर्त्तवन्दनया स्वामिनो वन्दिताः, लोभाभिभूतेन पालकेन च द्रुतमुत्थाय समवसरणे गत्वा नेमिजिना भावं विनैव वन्दिताः, उक्तं च - कृष्णं प्रत्येवं वक्तव्यं पूर्वं वयं

१. दव्वत्थयाणंतरं P,K

पालकेन वन्दिताः स्मः, आगच्छतस्तस्य मार्गे कृष्णवासुदेवो मिलितः, पालकेनोक्तम् – भो तात! मह्यमश्वं दत्त ? यतः पूर्वं मया स्वामिनो वन्दिताः सन्ति । अथ कृष्णेन स्वामिनो वन्दित्वा पृष्टाः - यूयं पूर्वं केन वन्दिताः ? स्वामिनोक्तम् – कया वन्दनया पृच्छसि ? भाववन्दनया द्रव्यवन्दनया वा ? कृष्णेनोक्तम्-भगवन् । या बहुफला तया पृच्छामि, प्रभुणोक्तम् – भाववन्दना बहुफला, तया च शाम्बकुमारेण वन्दिताः स्मः, द्रव्यवन्दनया च पालकेन वन्दिताः स्मस्तदा संतुष्टेन कृष्णेन शाम्बस्याश्वो दत्तः, पालको भर्त्सितो निष्कासितश्च, अतः सप्तमोऽभव्यः पालको जातः ।।३६।।

**** संबोधसित्तर्याम्-३७ ****

ननु द्रव्यस्तवभावस्तवयोः किमयं फले विशेषः ? इत्यत आह –

मेरुस्स सरिस्सव य जत्तियमित्तं तु अंतरं होइ ।
दव्वत्थयभावथयाण अंतरं तत्तियं नेयं ।।

मेरोः सुवर्णाचलस्य लक्षयोजनप्रमाणस्य **सर्षपस्य** कदम्बकस्य **च यावन्मात्रं** यावत्प्रमाण**मन्तरं** विभेदो **भवति,** महत्त्वे मेरोः परा कोटिरणीयस्त्वे सर्षपस्येति भावः । **तावत्प्रमाणमन्तरं द्रव्यस्तवभावस्तवयोर्ज्ञेयम्**। भावस्तवे हि षड्जीवनिकायवधासंभवान्मेरुसमानत्वम्, कालादिसामग्र्यां समग्रायां तद्भव एव तदाराधकाः सिद्धिसौधमधिरोहन्तीति । द्रव्यस्तवे च षड्जीवनिकायवधाविनाभूतत्वात्सर्षपसमत्वम्, तदाराधकाश्चाच्युतकल्पमेव यावदुत्कर्षतो यान्ति न परत इति ।।३७।।

चक्रे० : अथ कुत एतदित्याहुः –

देव० : अथ कुत एतदित्याह –

उक्कोसं दव्वत्थयं आराहिय जाइ अच्चुयं जाव ।
भावत्थएण[१] पावइ अंतमुहुत्तेण निव्वाणं ।।८२।।

चक्रे० : प्रतीतार्था, नवरम् '**उक्कोसं**'ति, अपेर्गम्यमानत्वादुत्कृष्टमपीत्यर्थः ।।८२।।

देव० : प्रतीतार्था, नवरमपेर्गम्यमानत्वादुत्कर्षमपि तत्रोत्कृष्यत इत्युत्कर्षस्तं पर्यन्त-संलेखनासम्पन्ननिरतिचारद्वादशव्रतपरिपालनलक्षणमुक्तं चात्र–'उववाओ सावगाणं उक्कोसेण अच्चुयं जाव'त्ति तथा '**अंतमुहुत्तेण**'त्ति मरुदेवास्वामिनीवदचिन्त्यशक्तित्वाद्भावस्तवस्येति गाथार्थः।।८२।।

---

१. भावत्थयेण T,C

* संबोधसित्तर्याम्-३६ *

द्रव्यस्तवभावस्तवौ हि क्रमेण श्राद्धसाधुधर्माविति तावेव विधिकृतौ यत्फलं जनयतस्तदाह –

उक्कोसं दव्वत्थय आराहिय जाइ अच्चुयं जाव ।
भावत्थएण पावइ अंतमुहुत्तेण निव्वाणं ।।

'उक्कोसं' इति, प्राकृतत्वाद्विभक्तिपरिणाम उत्कर्षेण भावश्रावको **द्रव्यस्तवं** पुष्पादिभिः समभ्यर्चन– **माराध्य** विधिवदासेव्याऽ**च्युतं** द्वादशं देवलोकं **यावद् याति** गच्छति, प्राकृतत्वाद्विभक्तिलोपः, यदुक्तं श्रीमहानिशीथे तृतीयाध्ययने –

कंचणमणिसोवाणे थंभसहस्सूसिए सुवन्नतले । जो कारवेज्ज जिणहरे तओ वि तवसंजमो अणंतगुणो ।।इति।

तवसंजमेण बहुभवसमज्जियं पावकम्ममललेवं । निट्ठाविऊण अइरा अणंतसोक्खं वए मोक्खं ।।

काउंपि जिणाययणेहिं मंडियं सवमेइणीवीढं । दाणाइचउक्केणं सड्ढो गच्छिज्ज अच्चुयं ण परओ ।। इति

तथा **भावस्तवेनो**ग्रविहारादिरूपसर्वविरतिसंयमेन क(का)रणभूतेनाऽ**न्तर्मुहूर्तेन** दीक्षास्वीकरणानन्तरं घटिकाद्वयाभ्यन्तरमेव **निर्वाणं** मोक्षं **प्राप्नोति** तावता मरणात् । 'उक्कोसं' इतिपदमत्रापि योज्यम्, स्नातकस्य जघन्यतोऽन्तर्मुहूर्तेनैव निर्वाणश्रवणात् ।।३६।।

चक्रे० : एवं च सति –

देव० : एवं च सति –

[१]मोत्तूणं [२]भावथयं दव्वथए जो पयट्टए मूढो ।
सो साहू वत्तव्वो गोयम ! अजओ अविरओ य ।।८३।।

चक्रे० : सुगमैव, केवलं **गौतम** इति भगवान् महावीरो गौतमगोत्रमिन्द्रभूतिमामन्त्रयते । अनेन चैतन्महानिशीथसूत्रं सूचयति, तथाहि –

'भयवं ! जे भावत्थयं गहाय दव्वत्थयं कुज्जा से किमालवेज्जा ? गोयमा ! असंजएइ वा, अविरएइ वा, अप्पडिहयपच्चक्खायपावकम्मेइ वा, निद्धमेइ वा, भट्ठपइन्नेइ वा, देवच्चएइ वा, देवभोइएइ वा' इत्यादि । **अयतः** षट्कायविराधनेन संयमभ्रंशाद**विरतः**, श्रावकोऽपि न लिङ्गधारित्वाद्, मार्गद्वयच्युत इति भावः ।।८३।।

---

१. मुत्तूणं T,CP,K, २. भावथयं जो दव्वथए पयट्टए A,Z भावत्थयं जो दव्वथए पयट्टइ P,K

देव० : सुगमैव, केवलं **मूढः** कृत्याकृत्यविवेकविकलः । **गौतम** इति भगवान् वर्धमानस्वामी गौतमगोत्रमिन्द्रभूतिमामन्त्रयते, अनेन चैतन्महानिशीथसूत्रं सूचयति, तथाहि –

'भयवं ! जे भावत्थयं गहाय दव्वत्थयं कुज्जा से किमालवेज्जा ? गोयमा ! असंजएइ वा अविरएइ वा, अप्पडिहयपच्चक्खायपावकम्मेइ वा, निद्धमेइ वा, भट्ठपइन्नेइ वा, देवच्चएइ वा, देवभोइएइ वा, इत्यादि । **अयतः** षट्कायविराधनेन संयमभ्रंशा**दविरतः,** श्रावकोऽपि न लिङ्गधारित्वाद्, मार्गद्वयाच्च्युत इति हृदयमिति गाथार्थः ।।८३।।

**** अभिधानराजेन्द्रकोषे 'चेइय' शब्दे-१५ ****

अतः किम् –

मोत्तूणं भावथयं जो दव्वत्थए पवट्टए मूढो ।
सो साहू वत्तव्वो गोयम ! अजओ अविरओ य ।।

यो मौढ्याद्विषयलाम्पट्याद्वा महामोहग्रस्तबहुजनप्रवृत्तिदर्शनाद्वा, **मुक्त्वा** परित्यज्य, **भावस्तवं** सर्वसावद्यनिवृत्तिलक्षणम्, **द्रव्यस्तवे** सर्वसावद्यनिबन्धनरूपे, **प्रवर्तते मूढः** परमार्थमजानानः, स **साधुर्वक्तव्यो** भणनीयः, **गौतम !** इन्द्रभूते ! **अयतोऽविरतश्च** । चशब्दादेतदपि द्रष्टव्यम्–असंयताविरताऽप्रतिहतपापकर्मा देवार्चक इति वा देवभोजक इति । अयमाशयः — यो हि भवपरम्पराभिरनेकाभिर्दुरापमक्षेपेण मोक्षसुखसाधकं सर्वसंवरस्वभावं संयमं प्राप्यापि मोहात्तस्य परित्यागेन पुष्पपूजादौ प्रवर्तते, स उभयत्र भ्रष्टतयाऽकिञ्चित्कर एवेति गाथार्थः ।।१५।।

चक्रे० : मूढ इति यदुक्तं तद् दृष्टान्तेन द्रढयति –

देव० : मूढ इति यदुक्तं तद् दृष्टान्तेन द्रढयन्नाह –

मंसनिवित्तिं काउं सेवइ 'दंतिक्कयं'ति धणिभेया ।
इय चइऊणारंभं परववएसा कुणइ बालो ।।८४।।

चक्रे० : प्रकटार्था, नवरं **परव्यपदेशाद्** देवादिव्यपदेशेन।।८४।।

देव० : मांसं पिशितं तस्य **निवृत्तिं कृत्वा** कश्चिदविवेका**त्सेवते** तदेव, कथम् ? **'दंतिक्कयं'**ति **ध्वनिभेदा**च्छब्दभेदेन, **'इय'** एवं **त्यक्त्वाऽऽरम्भमे**कग्रहणे तज्जातीयग्रहणात्परिग्रहं च **परव्यपदेशाद्देवादिव्यपदेशेन करोति** यतो **बालोऽज्ञस्तदुक्तम्** –

चइऊण य घरवासं आरंभपरिग्गहेसु वट्टंति ।
जं सन्नाभेएणं एयं अविवेगसामत्थं ।। [पञ्चवस्तु-९८] यतः –

पयईए सावज्जं संतं जं सव्वहा विरुद्धं तु ।
धणिभेयम्मिवि महुरगसीयलिगाइव्व लोयम्मि ।। [पञ्चवस्तु-१००]

इति गाथार्थः ।।८४।।

** धर्मसंग्रहण्याम्-९९१ **

अत्राह –

मंसनिवत्तिं काउं सेवइ 'दंतिक्कगं'ति धणिभेदा ।
इय चइऊणारंभं परववएसा कुणइ बालो ।।

यथा कश्चित्पुरुषो **मांसनिवृत्तिं कृत्वा** ततो विवेकविकलतया **'दंतिक्कगं'ति ध्वनिभेदाच्छ**ब्दभेदात्तदेव मांसं **सेवते, इति** एवममुना दृष्टान्तेनारम्भं **त्यक्त्वा परव्यपदेशाद्र**त्नत्रिकव्यपदेशेन **करोत्यारम्भं बालो**ऽज्ञः, मांसनिवृत्तिं कृत्वा शब्दभेदेन तदेव मांसं खादयत इवास्यापि परव्यपदेशेनारम्भं कुर्वतो ध्रुवं नियमभङ्ग इति यावत् ।।९९१।।

चक्रे० : ननु धर्मार्थितया चैत्यादिचिन्तायां प्रवर्त्तमानः कथमसौ बालः ? इति यो मन्यते, तमनुशासितुमाहुः –

देव० : ननु कथमसौ बालः ? स हि धर्मार्थितया चैत्यादिचिन्तायां प्रवर्त्तत इति यो मन्यते, तमनुशासितुमाह –

तित्थयरुद्देसेण वि सिढिलिज्ज न संजमं सुगइमूलं ।
तित्थयरेण वि जम्हा समयंमि इमं विणिद्दिट्ठं ।।८५।।

चक्रे० : स्पष्टा ।।८५।।

देव० : तीर्थकरोद्देशेनाप्यास्तामन्यथा, न **शिथिलयेन्न**[1] ह्रासयेत्**संयमं** चारित्रं **सुगतिमूलं** प्रधानमपवर्गकारणम्, किमिति **यस्मात्तीर्थकरेणापि समये** सिद्धान्त **इदं** वक्ष्यमाणमर्थतो **विनिर्दिष्टं** कथितमिति गाथार्थः ।।८५।।

** उपदेशमाला पुष्पमालायाम्-२३० **

ततो व्यवस्थितमिदम्-निश्चयव्यवहारशुद्ध्या संयम एव मनो निश्चलं विधेयम्, न तु परीषहादितर्जितैरपि गृहवासाद्यभिलाषः कार्यः, स्यादेतत्-तर्हि गृहस्थत्वमप्रतिपद्यमाना एव गृहीतेनैव यतिवेषेण संयमं शिथिलीकृत्य जिनपूजादिकं कुर्मः, अनेनापि प्रकारेण तावत् सुगतिं साधयिष्यामः, न च तीर्थकरोद्देशेनैवं क्रियमाणे संयमशिथिलीकरणमपि दोषाय सम्पत्स्यत इत्याशङ्क्याह –

१. अनादरयेत् T,B,C

तित्थयरुद्देसेणऽवि सिढिलिज्ज न संजमं सुगइमूलं ।
तित्थयरेणवि जम्हा समयम्मि इमं विणिद्दिट्ठं ।।

तीर्थकरमप्युद्दिश्य पूजाद्यारम्भप्रवृत्त्या **सुगतेः** परमनिबन्धनं **संयमं** साधुर्न **शिथिलीकुर्यात्, यस्मात्** कारणाद् यदर्थं पुष्पसंघट्टाद्यारम्भं चिकीर्षसि त्वं तेनापि **तीर्थकरेण** सिद्धान्त **इदं** वक्ष्यमाणं **निर्दिष्टमिति** गाथार्थः ।।२३०।।

** अभिधानराजेन्द्रकोषे 'चेइय' शब्दे-१७ **

ननु कथमसौ बालः ? स हि धर्म्मार्थितया तीर्थकरानुद्दिश्य प्रवर्त्ततेऽतो युक्तमेवेति यो मन्यते, तं प्रत्याह –

तित्थयरुद्देसेण वि सिढिलिज्ज न संजमं सुगइमूलं ।
तित्थगरेण वि जम्हा समयम्मि इमं विणिद्दिट्ठं ।।

तीर्थङ्करोद्देशेनापि न केवलमन्योद्देशेनेत्यऽपिशब्दार्थः । **शिथिलयेच्छिथिलं** विदध्यात्, **न** नैव, कमित्याह–**संयमं** सर्वविरतिं **सुगतिमूलं** मोक्षस्यैकान्तप्रापकम्, **तीर्थंकरेणापि** यदुद्देशेन सावद्यानुष्ठाने प्रवृत्तिर्विधीयते तेनापीत्यपिशब्दार्थः । **यस्मात्समये** सिद्धान्ते, **इदं विनिर्दिष्टं** प्रतिपादितमिति गाथार्थः ।।१७।।

चक्रे० : एतदेवाहुः –

देव० : तदेवाह –

सव्वरयणामएहिं विभूसियं जिणहरेहिं महिवलयं ।
जो [१]कारिज्ज समग्गं तओ वि चरणं महिड्ढियं।।८६।।

चक्रे० : सुगमा, नवरं **'सव्वरयणामएहिं'**ति दीर्घत्वं प्राकृतत्वात् । **महर्द्धिकम्** मेरुसर्षपोपमया गरीयः ।।८६।।

देव० : रत्नैर्वैडूर्यादिभिर्निर्वृत्तानि रत्नमयानि, सर्वाणि च सकलानि तानि रत्नमयानि च सर्वरत्नमयानि, यदिवा सर्वरत्नैर्निर्वृत्तानि **सर्वरत्नमयानि,** दीर्घत्वं प्राकृतत्वाद्, एतै**र्जिनगृहै-र्विभूषितं** मण्डितं **महिवलयं** प्रतिग्रामं प्रतिनगरं च भरतादिपृथ्वीपीठं **यः** कश्चिदतिशायि-सम्पद्भक्तिपुण्यप्राग्भारोपेतश्चक्रवर्त्त्यादिः **कारयेत्समग्रं** परिपूर्णम्, **ततोऽपि** तस्मादपि सर्वोत्तम-द्रव्यस्तवाच्**चरणं** सर्वविरतिस्वभावं **महर्द्धिकं** मेरुसर्षपोपमया गरीयः । आह च –

१. कारेज्ज T,C,Z

कंचणमणिसोवाणं थंभसहस्सूसियं सुवन्नतलं ।
जो कारिज्ज जिणघरं तओ वि तवसंजमो अहिओ ।। [उपदेशमाला-४९४]

अतस्तादृशद्रव्यस्तवाराधका अपि सर्वसंवररूपं भावस्तवमाराध्यैवाभिलषितार्थसाधका भवन्ति । ननु जिनयात्रामहोत्सवामारिघोषणमहादानादिप्रवृत्तिहेतुकत्वेन प्रवचनप्रभावना-प्रधानत्वाद् द्रव्यस्तव एव महर्द्धिकः, यतः प्रवचनप्रभावनैव दर्शनसर्वस्वम् । तदुक्तम् –

इदं दर्शनसर्वस्वमिदं दर्शनजीवितम् ।
सामर्थ्येन यदर्थेन क्रियते शासनोन्नतिः ।। [ ] इति ।

अत्रोच्यते–प्रवचनप्रभावनाङ्गान्यपि जिनयात्रादीनि, षट्कायोपमर्दपुरस्सरं विधीयमानानि न तथाविधफलसाधनाय प्रभवन्ति, षट्कायहितमेव चार्हन्तः प्रतिपादयन्ति । उत्कृष्टतपः श्रुतचारित्रधारिणश्च परमार्थतः प्रवचनप्रभावकास्तदुपदेशादेव च जिनशासनोन्नतयः सर्वाः प्रवर्तन्ते, तस्मादनिपुणमतेरयमभिप्राय इत्युपेक्षणीयः । उक्तं च –

दवत्थओ य भावत्थओ या दवत्थओ बहुगुणो त्ति बुद्धिसिया ।
अनिउणमइवयणमिणं छज्जीवहियं जिणा बिंति ।। [पुष्पमाला-२३३] तस्मात् –
अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणो दवत्थए कूवदिट्ठंतो ।। [पञ्चवस्तु-१२२४] इति गाथार्थः ।।८६।।

**** उपदेशमाला पुष्पमालायाम्-२३२ ****

अथ चारित्रपरिपालनाच्चैत्यविधापनादिकं बहुगुणम्, अत्राह –

सव्वरयणामएहिं विहूसियं जिणहरेहिं महिवलयं ।
जो कारिज्ज समग्गं तओऽवि चरणं महिड्ढीयं ।।

प्रतिग्रामं प्रतिनगरं च सकलमपि पृथ्वीतलं **सर्वरत्नमयैश्चैत्यैर्विभूषितं यः कारयेत् ततोऽपि**–'व्याख्यानतो विशेषप्रतिपत्तेः' यथोक्तचैत्यविधायककृत्यादपि, आस्तामेकचैत्यमात्रविधायकादिकृत्यात्, किमित्याह– **चरणं महर्द्धिकं** चारित्रप्रतिपालनं बहुगुणमित्यर्थः, यतः सर्वोत्कृष्टगुणादपि श्रावकादनन्तगुणविशुद्ध-गुणश्चारित्र्यागमे पठ्यते, अत एव कारितसर्वरत्नमयचैत्यभवनादयोऽपि भरतचक्रवर्त्यादयस्तद्दिनदीक्षमपि चारित्रिणं भक्तितः पञ्चाङ्गं प्रणिपतन्तीति गाथार्थः ।।२३२।।

चक्रे० : यद्येवं तत्कथं क्वचिल्लूतातन्तुजालाद्यपनयनं साधोरुक्तमित्याहुः –

देव० : यद्येवं कथमागमे क्वचिल्लूताद्यपनयनं साधोरभिहितमित्याह –

अन्नाभावे [१]जयणाए मग्गनासो हविज्ज मा तेण ।
पुव्वकयाययणाइसु ईसिं गुणसंभवे इहरा।।८७।।

चक्रे० : अन्यस्य श्रावकयथाभद्रकादे**रभावे मार्गनाश**स्तीर्थनाशो **मा भूत्तेन** कारणेन **पूर्वकृताऽऽयतनादिषु** चिरन्तनजिनभवनेषु, आदिशब्दाद् बिम्बेष्वी**षद्गुणसम्भवे** च कस्यचिज्जिनधर्मप्रतिपत्त्यादिकस्तोकगुणसम्भवे च **यतनया**ऽऽगमोक्तक्रियया लूताद्यपनयनं कार्यमिति शेषः ।।८७।।

देव० : अन्यस्य श्रावकस्य वा भद्रकादे**रभावे मार्गनाश**स्तीर्थोच्छेदो **मा भूत्तेन** कारणेन **पूर्वकृतायतनादिषु** चिरन्तनजिनभवनेषु, आदिशब्दाद् बिम्बेष्वी**षद्गुणसम्भवे** च कस्यचिज्जिनधर्मप्रतिपत्त्यादिस्तोकगुणसम्भवे च **यतनया** षट्कायोपमर्दविरहात्मिकया परैरदृश्यमानत्वरूपया च लूताद्यपनयनादिकं विधेयमिति शेषः यदुक्तम् –

सीलेह मंखफलए इयरे चोयंति तंतुमाईसु ।
अभिजोयंति सवित्तिसु अणिच्छफेडंतदीसंता ।। [ ]

व्याख्या–इतरे चैत्यवासिनस्तान् साधवः प्रेरयन्ति तन्त्वादिषु लूतापनयनादिषु विषये, कथम् ? शीलयत सज्जयत मङ्खफलकान्याजीविकाहेतुत्वसाम्याज्जिनबिम्बानि, इत्येवं स्ववृत्तिषु स्वाजीविकास्वभियोजयन्ति, यदा तु ते नेच्छन्ति तदा परैरदृश्यमाना स्वयमप्यपनयन्ति लूतादीनि ।।८७।।

**** पञ्चवस्तौ-१०२ ****

तथा चाह –

अण्णाभावे जयणाएँ मग्गणासो हविज्ज मा तेणं ।
पुव्वकयायणाइसु ईसिं गुणसंभवे इहरा ।।

अन्याभावे श्रावकाद्यभावे **यतनया**ऽऽगमोक्तया क्रियया, **मार्गनाश**स्तीर्थनाशो **मा भूदित्यर्थः**, **तेन** कारणेन **पूर्वकृतायतनादिषु** महति सन्निवेशे सच्चरितलोकाकुल अर्धपतितायतनादि**ष्वीषद्गुणसम्भवे** च कस्यचित्प्रतिपत्त्यादिस्तोकगुणसम्भवे च सत्येतदुक्तम्, **इतरथा**ऽन्यथा ।।१०२।।

१. जयणाइ P,K

चक्रे० : इतरथा पूर्वोक्तविपर्यये पुनः किमित्याहुः –

देव० : इतरथा पूर्वोक्तविपर्यये पुनः किमित्याह –

चेइअकुलगणसंघे आयरियाणं च पवयणसुए य ।
सव्वेसुवि तेण कयं तवसंजममुज्जमंतेण[१] ।।८८।।

चक्रे० : सुगमा, नवरं **कुलम्**एकाचार्यसन्ततिः, **गणः** कुलत्रयसमुदायः, **'तेण कयं'** ति तेन साधुना कृतं कृत्यमिति गम्यम् । **'तवसंजममुज्जमंतेणं'** ति तपःसंयमयोरुद्यच्छता।।८८।।

देव० : चैत्यकुलगणसङ्घेषु तथाऽऽ**चार्याणां च** तथा **प्रवचनश्रुतयोश्च,** किम् ? **सर्वेष्वपि तेन कृतं** कृत्यमिति गम्यते केनेत्याह–**तपःसंयमयोरुद्यच्छता** साधुनेति, तत्र चैत्यान्यर्हत्प्रतिमाः, कुलं चान्द्रादि, गणः कुलसमुदायः, सङ्घः समस्त एव साध्वादिसङ्घातः, आचार्याः प्रतीताः, च-शब्दादुपाध्यायपरिग्रहः, भेदाभिधानं च प्राधान्यख्यापनार्थम्, प्रवचनमर्थः, श्रुतं सूत्रमेव, चशब्दः स्वगतानेकभेदसूचक एतेषु सर्वेष्वपि स्थानेषु तेन कृतं कृत्यं यस्तपःसंयमोद्यमवान् वर्तते । इयमत्र भावना-अयं हि नियमाज्ज्ञानदर्शनसम्पन्नो भवति, अयमेव च गुरुलाघवमालोच्य चैत्यादिकृत्येष्वपि सम्यक् प्रवर्तते, यथैहिकामुष्मिकगुणवृद्धिर्भवति, विपरीतस्तु कृत्येऽपि प्रवर्तमानोऽविवेकादकृत्यमेव सम्पादयतीति गाथार्थः ।।८८।।

**** पञ्चवस्तौ-१०३ ****

चेइअकुलगणसंघे आयरिआणं च पवयणसुए अ ।
सव्वेसुवि तेण कयं तवसंजममुज्जमंतेण ।।

चैत्यकुलगणसङ्घेषु चैत्यान्यर्हत्प्रतिमाः, कुलं चान्द्रादि, परस्परसापेक्षानेककुलसमुदायो गणः, बालिका(श्राविका) पर्यन्तः सङ्घः, तथाऽऽ**चार्याणां** प्रसिद्धतत्त्वानां **प्रवचनश्रुतयोश्च** प्रवचनमर्थः, श्रुतं तु सूत्रमेव, एतेषु **सर्वेष्वपि तेन** साधुना **कृतं** यत्कर्त्तव्यम्, केन ? इत्याह–**तपःसंयमयोरुद्यच्छता** तपसि संयमे चोद्यमं कुर्वतेति गाथार्थः ।।१०३।।

१. तवसंजमउज्जमंतेण A,T,C

** उपदेशमाला पुष्पमालायाम्-२३१ **

तदेवाह –

चेइयकुलगणसंघे आयरियाणं च पवयणसुए य ।
सव्वेसुवि तेण कयं तवसंजममुज्जमंतेण ।।

चैत्ये जिनप्रतिमाऽऽयतनरूपे **कुले** विद्याधरकुलादौ, **गणे** तत्समुदायरूपे **सङ्घे** साध्वादा**वाचार्याणां च** प्रतीतानां **प्रवचने** सूत्रार्थोभयरूपे सकलद्वादशाङ्गे **श्रुते च** केवलसूत्ररूपे, एतेषु **सर्वेष्वपि** यत् किमपि निर्वर्तनपूजनादिकं कृत्यं **तत्तेन** साधुना **कृतमेव** द्रष्टव्यम्, किं कुर्वतेत्याह–**तपःसंयमयो**र्विषय **उद्यमं कुर्वता,** गृहिणोऽपि हि चारित्रावरणीयकर्मक्षयोपशमाभावात् संयमं कर्तुमशक्ताश्चैत्यनिर्वर्त्तनादिकं कृत्वा कुशलानुबन्धपरम्परया संयमं प्राप्नुवन्ति, ततो मोक्षं साधयन्ति, येन च साधुना सोऽपि मुक्तिनिबन्धरूपः संयमः प्राप्तस्तेन चैत्यनिर्वर्त्तनपूजादिकं कृतमेव द्रष्टव्यम्, तत्फलस्य सिद्धत्वात्, अपरञ्च–संयमवान् उपादेयवाक्यतया गुणदोषज्ञतादिना च प्रत्युत बहूनि शोभनानि च देशनादिद्वारेण चैत्यकुलगणादिकार्याणि करोति, तस्मात् समस्तवस्तुप्रसाधकत्वात् संयम एव यत्नो विधेयः, नान्यत्रेति गाथार्थः ।।२३१।।

चक्रे० : अथ कलिकालवशसमुल्लसितशिथिलजनाभिप्रायमुद्गीर्य निराकुर्वते –

देव० : अथ निर्मूलशठजनप्ररूपणामुद्गीर्य निराकुरुते –

केई भणंति भन्नइ सुहुमवियारो न सावगाण पुरो ।
तं न जओ अंगाइसु सुव्वइ तव्वन्नणा एवं ।।८९।।

चक्रे० : केचिद् भवाभिनन्दिनो **भणन्ति न भण्यते** न कथ्यते **सूक्ष्मविचारो** द्रव्य-भावस्तवाधिकारिविचारणादिरूपः **श्रावकाणां पुरः,** यतस्ते ज्ञाताऽशेषसमाचाराः शिथिलयति-जनमालोक्य कदाचित्सन्दिग्धधर्माणः स्युरिति **तन्न, यतोऽङ्गादिष्व**ङ्गोपाङ्गादिषु **श्रूयते तद्वर्णना एवं**प्रकारेण ।।८९।।

देव० : केचिद् भवाभिनन्दिनो **भणन्ति** प्रतिपादयन्ति, किमित्याह–**न भण्यते** न कथ्यते **सूक्ष्मविचारो** द्रव्यस्तवभावस्तवाधिकारिविचारणादिरूपः, **पुरो**ऽग्रतः, केषाम् ? **श्रावकाणाम्,** कथम् ? ते हि विदितसकलसमाचाराः कलिकालबलावलुप्तशक्तिकं प्रमादपरवशं यतिजनमवलोक्य मन्दधर्माणो मा भूवन्निति, **तदेतन्न, यतोऽङ्गादिष्व**ङ्गोपाङ्गादिषु **श्रूयते तेषां** श्रावकाणां **वर्णना** गुणोत्कीर्तनं स्वरूपकथनमिति याव**देवं** वक्ष्यमाणप्रकारेणेति गाथार्थः ।।८९।।

चक्रे० : तथाहि –

देव० : तथाहि –

लद्धट्ठा गहियट्ठा पुच्छियट्ठा विणिच्छियट्ठा य ।
अहिगयजीवाईया अचालणिज्जा पवयणाओ ।।९०।।

तह अट्ठिअट्ठिमज्जाणुरायरत्ता जिणिंदपन्नत्तो ।
एसो धम्मो अट्ठो परमट्ठो सेसगमणट्ठो ।।९१।।

सुत्ते अत्थे कुसला उस्सग्गववाइए तहा कुसला ।
ववहारभावकुसला पवयणकुसला य छट्ठाणा ।।९२।।

चक्रे० : तत्र **लब्धार्था** निरन्तरश्रवणतः, **गृहीतार्थाः** सम्यगवधारणतः, **पृष्टार्थाः** क्वचित् संशये सति, **विनिश्चितार्थास्**तत्त्वार्थोपलम्भात्, **अधिगतजीवादिकाः** ज्ञातजीवाजीवपुण्यपापाश्रवसंवरबन्धनिर्जरामोक्षतत्त्वा **अचालनीयाः प्रवचनात्** ।।९०।।

तथाऽस्थीनि चास्थिमज्जाश्च तद्गर्भरूपाः, अनुरागेण प्रस्तावाज्जिनमतप्रेम्णा रक्ता इव रक्ता वासनासाधर्म्यात्, **अस्थ्यस्थिमज्जा अनुरागरक्ता** येषां ते तथा । कथमित्याहुः, **एष** साक्षादासेव्यमानो **जिनेन्द्रप्रज्ञप्तो धर्मो**ऽर्थो वस्तुरूपतयोपादेयः **परमार्थ**स्तत्त्वभूतः परमगतिहेतुत्वात्, **शेषकः** शिवशाक्यादिप्रणीतो**ऽनर्थो** वस्तुरूप इति।।९१।।

सूत्रे स्वाध्ययनयोग्यसुव्यक्तसूत्रोच्चारणे कुशलाः, निरन्तरसिद्धान्तार्थश्रवणा**दर्थे कुशलाः, उत्सर्गापवादिके** कार्ये **कुशलाः, व्यवहारश्च**तुर्द्धा धर्मार्थकामलोकभेदात्, तत्र कुशलाः, **भावकुशला** बाह्यान्तरचेष्टाभिरभिप्रायपरिज्ञानपूर्वमभिनवधर्माणां स्थिरीकरणविधायिनः । इति शब्दाध्याहारादित्येवं षट्स्थानात्, ल्यब्लोपे पञ्चमीति षट्स्थानमाश्रित्यैतानि **षट्स्थानान्य**धिकृत्य कुशलाः **प्रवचनकुशला** भवन्तीति गाथात्रयार्थः ।।९२।।

देव० : तत्र **लब्धार्था** निरन्तरश्रवणतः, **गृहीतार्थाः** सम्यगवधारणतः, **प्रश्नितार्थाः** क्वचित्संशये सति, **विनिश्चितार्था** ऐदम्पर्यार्थोपलम्भात्, **च**कारो विशेषणसमुच्चये । **अधिगताः** स्वस्वरूपेण विदिता **जीवादयः,** आदिशब्दादजीवपुण्यपापाश्रवसंवरादयो दण्डकोक्ताः पदार्था यैस्ते तथा, अत एवा**ऽचालनीयाः** क्षोभयितुमशक्याः **प्रवचनाज्**जैनेन्द्रशासनात् ।।९०।।

तथास्थीनि चास्थिमज्जाश्च च तद्गर्भरूपाः, अनुरागेण प्रस्तावाज्जिनमतप्रेम्णा रक्ता इव रक्ता वासनासाधर्म्याद्, **अस्थ्यस्थिमज्जानुरागरक्ता** येषां ते तथा, क्तान्तस्येह परनिपातेऽभिधानात्, कथमित्याह—**एष** साक्षान्निषेव्यमाणो **जिनप्रज्ञप्तो धर्मोऽर्थो** वस्तुरूपतयोपादेयः, **परमार्थ-**स्तत्त्वभूतः परमगतिहेतुत्वात्, **शेषकः** शिवशाक्यकपिलादिप्रणीतः, विभक्तिलोपो मकारश्चेह प्राकृतत्वात्, **अनर्थो**ऽवस्तुरूपस्तदियता भगवत्यङ्गाद्युक्तदण्डकोऽर्थतः संसूचितः, स चायम्-'अहिगयजीवाजीवा उवलद्धपुन्नपावासवसंवरनिज्जरकिरिया अहिगरणबंधप्पमुखकुसला असहिज्जा देवासुरनागसुवन्नजक्खरक्खसकिन्नरकिंपुरिसगरुलगंधव्वमहोरगाइएहिं देवगणेहिं निग्गंथाओ पावयणाओ [१]अणइक्कमणिज्जा निग्गंथे पावयणे निस्संकिया निक्कंखिया निव्वित्तिगिच्छा लद्धट्ठा गहियट्ठा पुच्छियट्ठा अहिगयट्ठा विणिच्छियट्ठा अट्ठिमिंजपेमाणुरागरत्ता अयमाउसो निग्गंथे पावयणे अट्ठे अयं परमट्ठे सेसे अणट्ठे ऊसियपलिहअवंगुयदुवारावियत्तंतेउरघरप्पवेसा बहुहिं सीलवयगुणवेरमणपच्चक्खाणपोसहोववासेहिं चाउद्दसट्ठमुद्दिट्ठपुन्नमासिणीसु पडिपुन्नं पोसहं सम्मं अणुपालेमाणा समणे निग्गंथे फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसेज्जासंथारएणं पडिलाभेमाणा अहापडिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति'त्ति ।।९१।।

तथा कुशलशब्दस्योभयत्रापि सम्बन्धात् पदवाक्यादिविच्छेदप्रधानोदात्तादिघोषविशुद्धास्खलितत्वादिगुणोपेतसूत्रोच्चारणपरिज्ञानात् **सूत्रे** कुशलाः, सुगुरुसम्प्रदायतः स्वसमयपरसमयनिश्चयव्यवहारनयादिविभागेन सूत्राभिधेयस्थापना**दर्थे कुशलाः,** सामान्योक्तो विधिरुत्सर्गो यथा 'सव्वं भंते पाणाइवायं पच्चक्खामि'इत्यादि विशेषोक्तो विधिरपवादो यथा 'पुढवाइसु आसेवा'इत्यादि वक्ष्यमाणम्, ततश्च तयोर्भव**मौत्सर्गापवादिकं** कार्यमिति शेषस्तत्र तथापरिज्ञानप्रकारेण **कुशलाः**।

व्यवहारश्चतुर्धा धर्मार्थकामलोकभेदात्, तत्र धर्मे यद्देवताबिम्बविक्रयेण न जीवति, देवद्रव्यं च स्वर्णादिग्रहणकमन्तरेण न वर्धयति, नात्मनाप्यङ्गोद्धारकेण गृह्णाति, न च देवद्रव्याधीनत्वेनाधमर्णान् शरीरेण शकटबलीवर्दादिना वा वेष्ट्यादि कारयति, अर्थेऽवन्ध्यफलदायकनिरवद्यक्रयाणकसङ्ग्रहः, कामे गृहमेधिन्या मार्दवेनानुवर्त्तनम्, सदा हृदयानर्पणं च, लोके राजकुलगमनतद्विरुद्धवर्जनप्रधानजनसंसर्गजन्मश्रुतजात्यादि वृद्धसेवनादि, एवंविधे **व्यवहारे** कुशला दक्षाः, **भावकुशला** बाह्यान्तरचेष्टाभिरभिप्रायपरिज्ञानपूर्वमभिनवधर्माणां स्थिरीकरणविधायिनो लोकेऽपि पराभिप्रायकौशल्यादात्मपरानाबाधया सर्वत्र प्रवृत्तिकारिणः, इतिशब्दाध्याहारादित्येवं

१. अज्जानिग्गंथे A

षट्स्थानात्, षण्णां स्थानानां समाहारः **षट्स्थानम्,** तदाश्रित्य ल्यब्लोपे पञ्चमी, **प्रवचनकुशला** भवन्ति । चः प्राग्वर्णनापेक्षया समुच्चये, अनेन च प्रवचनकौशल्येन कृतव्रतपरिकर्मतादीन्यपराण्यपि पञ्चपदान्युपलक्ष्यन्ते, तथा चाह –

कयवयकम्मयभावो सीलत्तं चेव तह य गुणवत्तं ।
रिउमइववहरणं चिय गुरुसुस्सूसा य बोद्धव्वा ।।
पवयणकोसल्लं पुण छट्ठं ठाणं तु होइ णायव्वं ।
छट्ठाणगुणेहिं जुओ उक्कोसो सावगो होइ ।। [षट्स्थानकप्र॰ १, २]

एतद्व्याख्या तु षट्स्थानकादवसेया, तदेवमुपासकानां सूक्ष्मार्थविचारनिपुणतायाः सूत्रेऽभिधानात् सूक्ष्मविचारस्तेषां न कथ्यत इति यदुक्तं तदपास्तमिति गाथात्रयार्थः ।।९२।।

**** धर्मरत्नप्रकरणे-९२ ****

सम्प्रति तदेव प्रवचनकुशल इति षष्ठमाह –

सुत्ते अत्थे य तहा उस्सग्गववायभाववहारे ।
जो कुसलत्तं पत्तो पवयणकुसलो तओ छद्धा ।।

इह प्रकृष्टं वचनं प्रवचनमागमः, स च सूत्रादिभेदात् षोढा, अतस्तदुपाधिकं कौशलमपि षोढा, तत्सम्बन्धात् कुशलोऽपि षोढैवेत्याह–**सूत्रे** सूत्रविषये यः कुशलत्वं प्राप्त इति प्रत्येकं योजनीयम् । तथा **ऽर्थे** सूत्राभिधेये, **चः** समुच्चये, **तथा** तेनैव प्रकारे**णोत्सर्गे** सामान्योक्तौ, **अपवादे** विशेषभणिते, **भावे** विधिसारधर्मानुष्ठानकरणस्वरूपे, **व्यवहारे** गीतार्थाचरितरूपे, सूत्रे समाहारस्यैकत्वेऽपि सप्तम्या पृथग् व्याख्यानं बालावबोधनार्थम् । एतेषु **यः कुशलत्वं प्राप्तः** सद्गुरूपदेशादेव **प्रवचनकुशलः 'तउ'** त्ति स भवति **षोढा** षट् प्रकार इति गाथाऽक्षरार्थः ।।९२।।

**** अभिधानराजेन्द्रकोषे 'पवयणकुसल' शब्दे-५२ ****

अथ प्रवचनकुशल इति षष्टं भावश्रावकलक्षणं चेत्थम् –

सुत्ते अत्थे अ तहा उस्सग्गऽववाए भावे ववहारे।
जो कुसलत्तं पत्तो पवयणकुसलो तओ छद्धा ।।

१-**सूत्रे** सूत्रविषये यः कुशलत्वं प्राप्त इति प्रत्येकं योजनीयम् । श्रावकपर्यायोचितसूत्राध्येतेत्यर्थः। २-**तथाऽर्थे** सूत्राभिधेये संविग्नगीतार्थसमीपे सूत्रार्थश्रवणेन कुशलत्वं प्राप्त इत्यर्थः। ३-**उत्सर्गे** सामान्योक्तौ। ४-**अपवादे** विशेषभणिते कुशलः । अयं भावः – केवलं नोत्सर्गमेवावलम्बते, नापि केवल-

मपवादम्, किन्तूभयमपि यथायोगमालम्बत इत्यर्थः । ५-**भावे** विधिसारे धर्मानुष्ठाने करणस्वरूपे कुशलः। इदमुक्तं भवति-विधिकारिणमन्यं बहु मन्यते, स्वयमपि सामग्रीसद्भावे यथाशक्ति विधिपूर्वकं धर्मानुष्ठाने प्रवर्त्तते । सामग्र्या अभावे पुनर्विध्याराधनमनोरथान्न मुञ्चत्येवेति । ६-**व्यवहारे** गीतार्थाचरितरूपे कुशलः देशकालाद्यपेक्षयोत्सर्गापवादवेदिगुरुलाघवपरिज्ञाननिपुणगीतार्थाचरितं व्यवहारं न दूषयतीति भावः।

एसो पवयणकुसलो छब्भेओ मुणिवरेहिं निद्दिट्ठो । किरियागयाइँ छव्विहलिंगाइं भावसद्दस्स ।। एतानि भावश्रावकस्य क्रियोपलक्षणानि षडेव लिङ्गानि ।।५२।।

चक्रे० : अथ ये सिद्धान्तमपह्नुत्योन्मार्गमुपदिशन्ति साधुनिन्दां च कुर्वन्ति तेषां विश्वस्तघातित्वमाहुः –

देव० : एवं च सति ये सिद्धान्ततत्त्वमपह्नुत्योन्मार्गमुपदिशन्ति सुसाधुनिन्दां च कुर्वन्ति तेषां विश्वस्तघातित्वमाह –

पुच्छंताणं धम्मं तंपि य न परिक्खिउं समत्थाणं ।
आहारमित्तलुद्धा जे उम्मग्गं उवइसंति ।।९३।।
सुगइं हणंति तेसिं धम्मियजणणिंदणं करेमाणा ।
आहारपसंसासु य [१]निंति जणं [२]दुग्गइं बहुयं ।।९४।।

चक्रे० : पृच्छतां प्रश्नयतां भव्यानाम्, **धर्मं** गृहियतिभेदभिन्नम्, **तमपि च** कथ्यमानं **परीक्षितुमसमर्थानां** मुग्धबुद्धित्वात्, अनेन तेषामत्यन्ताऽनुकम्प्यत्वमुक्तम् । **आहारो-**ऽशनादिः, उपलक्षणं चैतद् वस्त्रपात्रपूजादेः, **तन्मात्रे** सिद्धिसुखवैमुख्यात्**लुब्धा ये** यथाच्छन्दादय **उन्मार्गम**शुद्धदानादिरूप**मुपदिशन्ति** 'मा ममैते विवेकिनः सन्तः, आधाकर्मादिदोष-दूषितमाहारादि न दास्यन्ति' अनेन च तेषामतिक्लिष्टतामाहुः, यदुक्तम् –

जह सरणमुवगयाणं जीवाणं निकिंतइ सिरे जो उ ।
एवं आयरिओ वि हु उस्सुत्तं पन्नवंतो उ ।। [उपदेशमाला-५१७]

यत्तदोर्नित्यसम्बन्धात्ते किमित्याहुः, **सुगतिं घ्नन्ति तेषां** पृच्छकानामुन्मार्गस्थापितानाम् । **धार्मिकजनः** शुद्धाहारवस्त्रपात्रोपाश्रयग्राही यतिजनस्तस्य **निन्दनं** 'मायाविन एते' इत्यादिकं **कुर्वाणाः** सप्तम्यास्तृतीयार्थत्वा**दाहारप्रशंसाभिः,** आहारार्थं कल्पद्रुमा यूयमित्यादिश्रावकप्रशंसाभिः, आहारदानमेवोत्तममित्यादिकाभिर्वा **नयन्ति जनं दुर्गतिं बहुकमिति** गाथाद्वयार्थः ।।९३, ९४।।

१. नेंति T,C णंति A २. दोगइं A,T,C

देव० : पृच्छतां धर्मं गृहियतिभेदभिन्नम्, **तमपि** च कथ्यमानं धर्मं **परीक्षितुं** विवेक्तुम- **समर्थानां** मुग्धबुद्धित्वाद्, अनेन तेषामत्यन्तानुकम्पनीयतामाह, भव्यप्राणिनामिति गम्यते, **आहारो**ऽशनादिरूपलक्षणं चैतद्वस्त्रपात्रपूजादीनाम्, **तन्मात्रे** सिद्धिसुखविमुखतया **लुब्धा** गृद्धा **ये** यथाछन्दादय **उन्मार्गमु**त्पथमशुद्धदानादिरूप**मुपदिशन्ति** कथयन्ति 'मा ममैते विवेकिनः सन्त आधाकर्मादिदोषदूषितमाहारादि न दास्यन्ति' इत्यनेन च तेषामतिक्लिष्टतामाह, यदुच्यते-

जह सरणमुवगयाणं जीवाणं निकिंतइ सिरे जो उ ।
एवं आयरिओ वि हु उस्सुत्तं पन्नवंतो उ ।। [उपदेशमाला-४१७]

यत्तदोर्नित्यसम्बन्धात्ते किमित्याह-**सुगतिं** स्वर्गापवर्गादिकां तेषां पृच्छकानां **घ्नन्ति** बाधन्त उन्मार्गस्थापितानां **तेषां** सुगतिहानेस्तन्मूलत्वात्तथा ते **धार्मिकजनस्य** कलिकालेऽपि यथाशक्ति यतमानस्य विशुद्धाहारवस्त्रपात्रोपाश्रयग्राहिणो **निन्दनं** हीलनं **कुर्वाणा** यंथैते बकवृत्तयो विप्रतारका देयग्राहकादिशुद्धिव्याजेन साधूनां दानं च निवारयन्त्यतो नैतद्वचः श्रोतव्यमिति ।

आहाराय प्रशंसा **आहारप्रशंसाः** कलिकालकल्पद्रुमाः, सङ्घपुरुषा भवन्तः, [१]भवदीयदानेनैव तीर्थं प्रवर्तते, एषणीयानेषणीयविचारणं च कार्पण्यलक्षणमित्येवंलक्षणा आहारदानमेवोत्तम- मित्यादिरूपा वा, ताभिः, सप्तमी चेयं तृतीयार्थे, **चः** पूर्वोक्तसमुच्चये **नयन्ति** प्रापयन्ति **दुर्गतिं** नैरयिक्यादिकां **जनं** लोकं **बहुकं** प्रभूतमिति गाथाद्वयार्थः ।।९३,९४।।

चक्रे० : अधुना यः शरीरसामर्थ्यादिविरहात्क्रियाशिथिलो मनाक्शुद्धचित्ततया परलोकाभि- मुखश्च तस्योपदेशमाहुः -

देव० : अधुना यः शरीरसामर्थ्यादिविरहात्क्रियाशिथिलो मनाक्शुद्धचित्ततया परलोकाभि- मुखश्च तस्योपदेशमाह -

हुज्ज हु [२]वसणप्पत्तो सरीरदोब्बल्लयाए असमत्थो ।
चरणकरणे असुद्धे सुद्धं मग्गं [३]परूविज्जा ।।९५।।

चक्रे० : हुर्वाक्यालङ्कारे, भवेद् व्यसनप्राप्त आपद्गतः, इन्द्रियार्थाशक्तो वा, वाशब्दस्या- ध्याहाराद्वार्द्धक्यरोगादिकृतेन **शरीरदौर्बल्येनाऽसमर्थो** वा क्रियां कर्तुम् । ततश्च**रणं** व्रतादि, **करणं** पिण्डविशुद्ध्यादि तस्मि**न्नशुद्धे** सातिचारमले **शुद्धं मार्गं** ज्ञानादिरूपं **प्ररूपयेत्** श्रेणिकसुतनन्दीषेणवत् ।।९५।।

१. भवद्दीयमानेन A, २. वसणुप्पत्तो T,C,Z ३. परूवेज्जा A,Z

देव० : हुर्वाक्यालङ्कारे, **भवेत्** स्याद् **व्यसनप्राप्त** आपद्गत इन्द्रियार्थाशक्तो वा, वा-शब्दाध्याहाराद्वार्धक्यरोगादिकृतया **शरीरदुर्बलतया,** लकारस्य द्वित्वं प्राकृतत्वाद्, **असमर्थो** वा स्वाध्यायप्रतिलेखनादिक्रियां कर्तुमशक्तः, ततः किं कुर्यादित्याह–**चरणं** च व्रतादि, **करणं** च पिण्डविशुद्ध्यादि तस्मिन्**नशुद्धे**ऽभिहितनीत्याऽतिचारमलकलुषित आत्मानं निन्दन् **शुद्धं** यथास्थितं **मार्गं** ज्ञानादिरूपं **प्ररूपयेदु**पदिशेत्, स हि सिद्धान्तानुरागादात्मानं निन्दन्मार्गानुपाती भवत्युक्तं च –

ओसन्नो वि विहारे कम्मं सिढिलेइ सुलहबोही य ।
चरणकरणं विसुद्धं उववूहंतो परूवेंतो ।। [निशीथसूत्र-५४३६]

इति गाथार्थः ।।९५।।

चक्रे० : एतद्विपर्यये दोषमाहुः –

देव० : एतद्विपर्यये दोषमाह –

परिवारपूयहेउं पासत्थाणं च आणुवित्तीए[१] ।
जो न कहेइ विसुद्धं तं दुल्लहबोहियं जाण ।।९६।।

चक्रे० : सुगमा, नवरं **'परिवारपूयहेउं'**ति परिवारश्च पूजा च परिवारपूजे, तयोर्निमित्तम् । यदि विशुद्धं खरतरम्, अतिताडितं मार्गं कथयिष्यामि तदा न कोऽप्यस्मान् परिवारयिष्यति, न नः कोऽपि पूजां करिष्यति कोमलमार्गरुचित्वाल्लोकस्येति।।९६।।

देव० : परिवारश्च परिच्छदः साध्वादिः, **पूजा** च वस्त्रपात्रादिभिः सत्कारस्तयोर्**हेतुं** निमित्तम्, ह्रस्वत्वं प्राकृतत्वात् । पार्श्वे ज्ञानादीनां समीपे तिष्ठन्तीति **पार्श्वस्थास्**तेषामुपलक्षणं चैतदवसन्नादीना**मनुवृत्त्या** तच्चित्तावर्जनार्थम्, **च**काराल्लोकयात्राद्यर्थं च, **यः** कश्चिल्लुब्धो[२] **न कथयति** न प्ररूपयति **विशुद्धं** मार्गमिति गम्यम् । इदमत्र हृदयम्-मनाक् शुद्धात्मापि यः शिथिलपरिवारभयाद्विज्ञातैषणीयानैषणीयाः श्रावका वा वस्त्रपात्रादिभिर्मे पूजां न विधास्यन्ति, पार्श्वस्थादयो वा कुपिताः सन्तो ग्रामादेर्निष्कासयिष्यन्तीति कृत्वा विशुद्धं न कथयति, **तं दुर्लभबोधिकं** बोधिः प्रेत्यजिनधर्मावाप्तिः सा दुर्लभा यस्य सम्यग्मार्गलोपात् स तथा, तमनन्तसंसारिकमित्यर्थो **जानीहि** बुध्यस्व हे शिष्य ! इति गाथार्थः ।।९६।।

---

१. आणुवत्तीए P,K, आणुपुव्वीए Z २. साध्वाभासो T, C

चक्रे० : ननु यद्येवं गरीयान् दोषस्तत्कथमन्यथा कथयन्तीत्याहुः –

देव० : ननु यद्येवं गरीयान् दोषस्तत्कथमन्यथा कथयन्तीत्याह –

मुहमहुरं परिणइ-मंगुलं च गिण्हंति[१] दिंति उवएसं ।
मुहकडुयं परिणइसुंदरं च विरलच्चिय भणंति।।९७।।

चक्रे० : सुगमैव, नवरं **मङ्गुलम**सुन्दरम् ।।९७।।

देव० : **मुखे** प्रारम्भ उच्चारकाले **मधुरं** प्रियः श्रोतृयादृच्छिकसमाचारानुकूल इत्यर्थस्तम् । **परिणतौ** परिपाके **मङ्गुलो**ऽसुन्दरो विपाकदारुणत्वात्, **च**शब्दस्यापिशब्दार्थत्वात्तम**प्युपदेशं गृह्णन्ति** श्रोतारो **ददति** चाऽऽचार्यादयो बहवः । **मुखकटुकं** श्रवणाप्रियं **परिणतिसुन्दर-मप्युपदेशमि**तीहापि योगः, **विरला एव भणन्ति** प्रस्तुतत्वाद् गृह्णन्ति च, यदाह –

सुलभाः पुरुषा राजन् ! अपथ्यप्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ।। [ ] इति गाथार्थः।।९७।।

चक्रे० : अथ यथावस्थितहितवादिनो वक्तुः परमोपकारितामाहुः –

देव० : अथ मुखकटुकपरिणामसुन्दरवादिनो वक्तुः परमोपकारितामाह –

भवगिहमज्झम्मि पमायजलणजलियंमि मोहनिद्दाए ।
उट्ठवइ जो सुयंतं सो तस्स जणो परमबन्धू।।९८।।

चक्रे० : **भवगृहमध्ये प्रमादज्वलनज्वलिते, मोहो**ऽज्ञानसारूप्या**न्निद्रा** तया **स्वपन्तं य उत्थापयति** प्रबोधयति **स जनो** गुर्वादि**स्तस्य परमबन्धुः** । अभयकुमार इवार्द्रक-कुमारस्य।।९८।।

देव० : भव एव गृहं जीवावस्थितिसाधर्म्याद्भवगृहम्, तस्य **मध्यम**न्तस्तत्र, किं विशिष्टे ? **प्रमादो**[२]ऽष्टधा, तद्यथा –

अज्ञानं संशयश्चैव मिथ्याज्ञानं तथैव च ।
रागो द्वेषोऽनवस्था च स्मृतेर्धर्मेष्वनादरः ।। [ ]
योगदुष्प्रणिधानं च प्रमादोऽष्टविधः स्मृतः ।

१. गेण्हंति देंति A २. प्रमादो मद्यादिरज्ञानसंशयविपर्ययरागद्वेषस्मृतिभ्रंशधर्मानादरयोगदुःप्रणिधानरूपो वा T,B,C

स एव **ज्वलनः** परिसन्तापकत्वेन, तेन **ज्वलिते** प्रदीप्ते, इह च भवस्थेषु प्राणिष्वपि स्थितः प्रमादो भव उपचर्यते । **मोह** एव चैतन्यतिरोधायकत्वा[१]**न्निद्रा** तया **स्वपन्तं** शयानं [२]मानुषमिति गम्यम्, **उत्थापयति** प्रबोधयति **यः स जनो** गुर्वादि**स्तस्य** स्वप्तुः **परमबन्धु**रात्यन्तिकैकान्तिकस्वजन इति गाथार्थः।।९८।।

चक्रे० : अधुना प्राक्प्ररूपितं शुद्धप्ररूपकमेवोपबृंहयन्ति –

देव० : अधुना प्राक्प्ररूपितं शुद्धप्ररूपकमेवोपबृंहयति –

जइवि हु सकम्मदोसा मणयं सीयंति चरणकरणेसु ।
सुद्धप्परूवगा तेण भावओ [३]पूयणिज्जत्ति।।९९।।

चक्रे० : हुरेवकारार्थः, स च तेनेत्यत्र यो लक्ष्यते । **यद्यपि स्वकर्मदोषान्मनाक् सीदन्ति चरणकरणयोः,** तथापीत्यध्याहारस्तथापि **शुद्धप्ररूपकास्तेनैव** शुद्धप्ररूपकत्वगुणेन **भावतो** निरुपचारं **पूजनीयाः, इति** प्रस्तुतप्रक्रमसमाप्तौ।।९९।।

देव० : यद्यपि हुरेवकारार्थः, स चान्ते योक्ष्यते । **स्वकर्मदोषान्नि**बिडचारित्रावरणीयकर्मोदयलक्षणा**न्मनाक्किञ्चित्सीदन्ति** मन्दायन्ते **चरणकरणयो**र्वक्ष्यमाणस्वरूपयोः, तथापीत्यध्याहारः, **शुद्धप्ररूपका** यथास्थितमार्गप्रदेशका**स्तेनैव** शुद्धप्ररूपकत्वलक्षणेन गुणेन **भावतो** निरुपचारं **पूजनीयाः** सत्कारार्हाः, **इतिः** प्रस्तुतप्रक्रमसमाप्ताविति गाथार्थः ।।९९।।

चक्रे० : इत्थं मार्गशुद्धौ प्ररूपितायां विवेकिनो यत्कुर्वन्ति तदाहुः –

देव० : इत्थं मार्गशुद्धौ प्रतिपादितायां विवेकिनो यत्कुर्वन्ति तदाह –

एवं जिया आगमदिट्ठिदिट्ठ सुन्नायमग्गा सुहमग्गलग्गा ।
गयाणुगामीण, जणाण मग्गे लग्गंति नो गड्डरियापवाहे।।१००।।

चक्रे० : **एवमु**क्तन्यायाज्**जीवा** भव्यप्राणिन **आगमदृष्ट्या दृष्टः** सामान्येन, **सुज्ञातो** विशेषेणोत्सर्गापवादतो **मार्गो** यैस्ते तथा **शुभमार्गलग्नाः, गतानुगामिनां जनानां मार्गे** गड्डरिकाप्रवाह इव **गड्डरिकाप्रवाहे** गड्डरिकाप्रवाहकल्पे **न लगन्त्या**गमोक्तमार्गमेवानुसरन्तीत्यर्थः।।१००।।

देव० : एवमुक्तन्यायाज्**जीवा** भव्यप्राणिन **आगम** एव सन्मार्गदर्शकत्वेन **दृष्टि**र्लोचनं तया

१. अज्ञानसारूप्यान्निद्रा T,B,C २. जीवमिति A ३. पूयणिज्जंति T,C,Z

दृष्टो विलोकितः सामान्यरूपेण, **सुज्ञातो** विशेषेणोत्सर्गापवादतो **मार्गो** यैस्ते तथा **शुभ-मार्गलग्नाः,** सम्यगनुष्ठानान्न **लगन्ति** न सजन्ति, क्व ? **गतानुगामिनां जनानां मार्गे,** तत्र गतमेवानुगच्छन्तीति गतानुगामिनः । न तत्त्वावलोकिनस्तेषाम्, किंविशिष्टे मार्गे ? **गड्डरिका-स्तासां प्रवाहो** नैरन्तर्यश्रेणिगमनं स इव तस्मिन्, यथा हि गड्डरिकायामेकस्यां क्वापि प्रस्थितायां विचारशून्यमन्यास्तामेवानुव्रजन्ति, एवं केचिदपरीक्षिततत्त्वाः प्रवृत्तिप्रधानलोक-प्रवृत्तमेव मार्गमनुयान्ति, विवेकिनस्तु समयतत्त्वमेवानुसरन्तीति वृत्तार्थः ।।१००।।

चक्रे० : अथ 'महाजनो येन गतः स पन्थाः' इति ज्ञाताल्लोकप्रवृत्तिरेव श्रेयसीति ये मन्यन्ते तान् प्रत्याहुः –

देव० : अथ 'महाजनो येन गतः स पन्थाः' इति न्यायाल्लोकप्रवृत्तिरेव श्रेयसीति ये मन्यन्ते तान् शिक्षयितुमाह –

नेगंतेणं चिय लोगनायसारेण इत्थ होयव्वं[१] ।
बहुमुंडाइवयणओ आणा इत्तो इह पमाणं ।।१०१।।

चक्रे० : एकान्तेनैव सर्वात्मनैव **लोक**स्याविवेकिजनस्य **ज्ञातं** दृष्टान्तः, स **सारः** प्रधानो यस्य स तथा, तद्विधेन **न भाव्यमत्र** मोक्षमार्गविचारे, कस्माद् **बहुमुण्डादिवचनतो** यदि हि लोकप्रवृत्तिरेव बलीयस्यभविष्यत् तदा नेदमागमवचनमभविष्यत्, तथाहि –

कलहकरा डमरकरा असमाहिकरा अनिव्वुइकरा य ।
होहिंति भरहवासे बहुमुण्डे अप्पसमणे य ।। [विचारसार-५०२]

इत एतस्माद्धेतो**राज्ञैव** तीर्थकृदुक्तमेव **इह** प्रामाण्यविचारे **प्रमाणम्** ।।१०१।।

देव० : एकान्तेनैव सर्वात्मनैव, क्वचिल्लोकव्यवहारस्यापि पुरस्करणीयत्वादेकान्तेनेत्युक्तं यदाह –

लोकः खल्वाधारः सर्वेषां धर्मचारिणां यस्मात् ।
तस्माल्लोकविरुद्धं धर्मविरुद्धं च संत्याज्यम् ।। [प्रशमरति-१३१] इति ।।

लोकस्याऽविवेकिनो जनस्य न्यायो व्यवहारः प्रवाह इति यावत् संसारः प्रधानो यस्य यदिवा **लोकज्ञातानि** ।

१. होअव्वं P,K

कलौ काले किलैतस्मिन् सम्मोहवशवर्त्तिनि ।
एतदेव महच्चित्रं नरायल्लिंगधारिणः ।। [ ]

इत्याद्याः कुयुक्तयः **साराणि** यस्य स तथा तद्विधेन **न भाव्यमत्र** मोक्षमार्गे विचारे, कुतः ? **बहुमुण्डादिवचनतो** यदि हि लोकप्रवृत्तिरेव बलीयस्यभविष्यत्तदा नेदमागमवचनमभविष्यत्, तथाहि-

कलहकरा डमरकरा असमाहिकरा अनिव्वुइकरा य ।
होहिंति भरहवासे बहुमुण्डे अप्पसमणे य ।। [विचारसार-५०२]

इत एतस्माद्धेतोः सावधारणत्वा**दाज्ञैव** तीर्थकृदुक्तमे**वेह** प्रामाण्यविचारे **प्रमाणं** तत्त्वमिति गाथार्थः ।।१०१।।

**** उपदेशपदे-८१२ ****

अत एवाह -

णेगंतेणं चिय लोयणायसारेण एत्थ होयव्वं ।
बहुमुंडादिवयणओ आणावित्तो इह पमाणं ।।

न नैवैकान्तेन सर्वथैव **लोक** एव पार्श्वस्थादिरूपो यदृच्छाप्रवृत्तो **ज्ञातं** दृष्टान्तं तत् **सारम**वलम्बनीयतया यस्य स तथा **तेनात्र** चारित्राराधने **भवितव्यम्** । कुत इत्याह-**बहुमुण्डादिवचनतः**

कलहकरा डमरकरा असमाहिकरा अनिव्वुइकरा य । होहिंति भरहवासे बहुमुण्डे अप्पसमणे य ।।

इति वचनात्, एतद्वचनपरिभावनेन पार्श्वस्थादीन् दृष्टान्तीकृत्य नासमञ्जसे प्रवर्त्तनीयमित्यर्थः । तथाविधापवादप्राप्तौ तु गुरुलाघवालोचनपरेण गीतार्थेन साधुना कदाचित् प्रवृत्तिसारेणापि भवितव्यमिति सूचनार्थमेकान्तेनेत्युपात्तम् ।

बहुवित्थरमुस्सग्गं बहुविहमववाय मो वियाणित्ता । लंघेऊणन्नविहं बहुगुणजुत्तं करेज्जासु ।।

अत एवाह-**आज्ञावित्तक** आज्ञैव वित्तं धनं सर्वस्वरूपं यस्य स तथा पुमा**निह** लोकोत्तराचारचिन्तायां **प्रमाणी**कर्त्तव्य इति ।।८१२।।

चक्रे० : अपि च –

देव० : अथ[१] गतानुगतिकेभ्योऽस्तयन्निवाह –

बहुजणपवित्तिमित्तं इच्छंतेहिं इहलोइओ चेव ।
धम्मो न उज्झियव्वो जेण तहिं बहुजणपवित्ती।।१०२।।

चक्रे० : स्पष्टा, नवर**मिहे**ति धर्मविचारे **लौकिक** एव शैवजैमिन्यादिसत्कः।।१०२।।

देव० : बहवश्च ते जनाश्च तेषां प्रवृत्तिः स्वरूचिविरचितमनुष्ठानम्, तदेव **बहुजनप्रवृत्तिमात्र-मा**राधनविरा**धँ**नविमर्शरहितमित्यर्थः, **इच्छद्भिर**भिलषद्भि**रिह** धर्मविचारे, लोकाः शैवजैमिनि-प्रभृतयस्तेषामयं **लौकिकः,** स **एव धर्मो नोज्झितव्यो** न मोक्तव्यः, यत**स्तस्मिन् बहुजनस्य** राजामात्यादेः **प्रवृत्तिः** । न चासौ मुच्यत इति तस्मादसङ्गत एवायं पक्ष इति गाथार्थः ।।१०२।।

**** उपदेशपदे-९१० ****

आह–यद्येवमल्प एव लोकः प्रमाणीकर्त्तव्यः स्यात्, तथा चाल्पलोकपरिगृहीतत्वेन धर्मो नात्यर्थमादेयतां नीतो भवेदिति मनसि परिभावयतो भव्यान् शिक्षयन्नाह –

बहुजणपवित्तिमेत्तं इच्छंतेहिं इहलोइओ चेव ।
धम्मो ण उज्झियव्वो जेण तहिं बहुजनपवित्ती ।।

बहुजनप्रवृत्तिमात्रं गतानुगतिकरूपं लोकरूढिमे**वेच्छद्भिरिह** धर्मचिन्तायां **लौकिकश्चैव** लोकरूढ एव **धर्मो** हिमपथज्वलनप्रवेशभृगुपातादिलक्षणो **नोज्झितव्यः, येन तत्र** धर्मे **बहुजनप्रवृत्ति**र्लक्षकोट्यादि-संख्यलोकसमाचाररूपा दृश्यते ।।९१०।।

चक्रे० : एवं स्थिते कृत्यमाहुः –

देव० : एवं स्थिते कृत्यमाह –

ता आणाणुगयं जं तं चेव बुहे[२]हिं सेवियव्वं तु।
किमिह बहुणा जणेणं हंदि न से[३] अत्थिणो बहुया ।।१०३।।

चक्रे० : यस्मात् कारणान्न बहुजनप्रवृत्तिरालम्बनाय **तस्मादाज्ञाऽनुगतमा**गमानुपाति **यद-**नुष्ठानम्, **तदेव बुधैः सेवितव्यम्** । **किमिह** धर्मविचारे **बहुना जनेन** ? **हन्दी**त्युपप्रदर्शने, **न से**

१. अपि च T,C २. बुहेण A,Z ३. सेयत्थिणो T,C,Z

तस्याज्ञाऽनुगतधर्म**स्यार्थिनः** श्रेयोऽर्थिनो वा मोक्षकाङ्क्षिणो **बहुकाः** 'सम्प्रति बहवो मुण्डा अल्पाश्च श्रमणाः' इति वचनात् ।।१०३।।

देव० : यस्मात्कारणान्न बहुजनप्रवृत्तिरालम्बनीया **तस्मादाज्ञानुगत**मागमानुपाति **यद**नुष्ठानं भवति, **तदेव बुधेन** विवेकिना **सेवितव्यमा**चरितव्यम्, तुशब्दात्तद्विसंवादि वर्जनीयमित्यर्थः । **किं** ? न किञ्चिदित्यर्थः, **इह** धर्मविचारणायां परलोकचिन्तायां वा **बहुना जनेन** । **हन्दी**त्युपप्रदर्शने हेतौ वा, **न** नैव **से** तस्याज्ञानुगतधर्म**स्यार्थिनो**ऽभिलाषुकाः श्रेयोऽर्थिनो वा मोक्षकाङ्क्षिणो **बहवः** प्रभूताः, किन्त्वल्पा एव सम्प्रतिकाले 'बहवो मुण्डा अल्पाश्च श्रमणाः' इति वचनादिति गाथार्थः ।।१०३।।

** उपदेशपदे-९११ **

ता आणाणुगयं जं तं चेव बुहेण सेवियव्वं तु ।
किमिह बहुणा जणेणं हंदि ण सेयत्थिणो बहुया ।।

तत् तस्मा**दाज्ञानुगतं** सर्वज्ञप्रवचनप्रतिबद्धं **यद**नुष्ठानं **तदेव** मोक्षाभिलाषिणा **बुधेनो**त्तमप्रकृतिना पुरुषेण **सेवितव्यम् । तुः** पादपूरणार्थः । **किमिह** धर्मकरणे **बहुना जनेन** स्वच्छन्दचारिणा लोकेन प्रमाणीकृतेन ? **हन्दी**ति पूर्ववत् । **न श्रेयोऽर्थिनो** निर्वाणाभिलाषिणो **बहवो** जना यतः ।।९११।।

चक्रे० : इत्थमनेकधा विधिमार्गसमर्थनमाकर्ण्य महामोहोपहतबुद्धयो यद्वदन्ति तदाहुः –

देव० : इत्थमनेकधा विधिमार्गसमर्थनमाकर्ण्य महामोहोपहतबुद्धयो यद्वदन्ति तदाह –

दूसमकाले दुलहो विहिमग्गो [१]तम्मि चेव कीरंते ।
जायइ तित्थुच्छेओ केसिंची कुग्गहो एसो ।।१०४।।

चक्रे० : दुःषमाकाले दुर्लभो गुरुकर्मकतया दुरापो **विधिमार्गस्तस्मिन्नेव क्रियमाणे तीर्थोच्छेदो जायते** । 'बहुभिर्विधिमार्गानुष्ठानस्य कर्त्तुमशक्यत्वाद्' **एष केषाञ्चित् कुग्रहः** ।।१०४।।

देव० : दुःषमावसर्पिण्याः पञ्चमोऽरकः, स चासौ कालश्च **दुःषमाकाल**स्तस्मिन् **दुर्लभो** दुरापः स्वकीयक्लिष्टकर्मपरिणतेरुन्मार्गप्रवृत्तलोकाद्वा **विधिमार्गः** शास्त्रानुसारिज्ञानश्रद्धानानुष्ठानरूपस्**तस्मिन्नेव क्रियमाणे,** प्राक्तनचेवशब्दस्येहापि सम्बन्धा**त्तीर्थोच्छेद** एव जिनशासनविलुप्ति**र्जायते,** शास्त्रोक्तानुष्ठानस्य प्रायेण कर्तुमशक्यत्वाद्, तदितरस्य चामार्गरूपत्वा**देष** साक्षान्निरूपितः **केषाञ्चिद**तत्त्ववेदिनां **कुग्रहः** कदभिप्राय इति गाथार्थः ।।१०४।।

१. तंमि चेव कीरंति P,K

चक्रे० : कुग्रहश्च विवेकिभिर्न कार्य इत्याहुः -

देव० : कुग्रहत्वमेव तेषां प्रकटयति -

जम्हा न [१]मोक्खमग्गे मुत्तूणं आगमं इह पमाणं ।
विज्जइ छउमत्थाणं तम्हा तत्थेव जइयव्वं ।।१०५।।

चक्रे० : सुगमा ।।१०५।।

देव० : सुगमा, केवलं करणाधीनज्ञानिनां स्वर्गापवर्गमार्गादौ प्रत्यक्षादिप्रमाणाविषयत्वे**नागमस्यैव प्रामाण्यम्,** तथाहि- न तावत्तत्र प्रत्यक्षं प्रगल्भतेऽक्षव्यापारागोचरत्वाद्, नाप्यनुमानं साध्याविनाभाविनो लिङ्गस्य कस्यचिदनुपलम्भाद्, आगमस्त्वाप्तोपज्ञत्वादव्याहतप्रचार एव, ततस्तं विमुच्यान्यथा समाचरतां कुग्रह एवावशिष्यत इति।।१०५।।

**** पञ्चवस्तौ-१७०७ ****

एतदेवाह -

जम्हा न धम्ममग्गे मोत्तूणं आगमं इह पमाणं ।
विज्जइ छउमत्थाणं तम्हा एत्थेव जइअव्वं ।।

यस्माद् न धर्म्ममार्गे परलोकगामिनि **मुक्त्वाऽऽगममेकं** परमार्थत **इह प्रमाणं** प्रत्याख्यानादि **विद्यते छद्मस्थानां** प्राणिनाम्, **तस्मादत्रैवा**ऽऽगमे कुग्रहान् विहाय **यतितव्यम्,** जिज्ञासाश्रवणश्रवणानुष्ठानेषु (जिज्ञासाश्रवणश्रमणानुष्ठानेषु) यत्नः कार्यः, नागीतार्थजनाचरणपरेण भवितव्यमिति गाथार्थः ।।१७०७।।

**** अभिधानराजेन्द्रकोषे 'आगम' शब्दे-३७ ****

मोक्षमार्गे चागमस्यैव प्रामाण्यम् -

जम्हा न मोक्खमग्गे मोत्तूणं आगमं इह पमाणं ।
विज्जइ छउमत्थाणं तम्हा तत्थेव जइयव्वं ।।

यस्मान्न नैव **मोक्षमार्गे** मोक्षे साध्ये **मोक्षागमशास्त्रं** परित्यज्येत्यर्थः, **इहेति** धर्मविचारे **प्रमाणम्-**आलम्बनमित्यर्थः, **विद्यते छद्मस्थानाम्,** अतिशयवतां हि कथं चेत्सेवातिशयवशात्प्रवर्त्तमानानामपि निर्जरालाभ एवावसीयते, तद्रहितैः पुनः सर्वथा शास्त्रमेव प्रमाणीकर्त्तव्यम् । **तस्मात्तत्रैव यतितव्यमु**द्यमः कार्य इति गाथार्थः।।३७।।

---

१. मुक्खमग्गो T,C,P,K

चक्रे० : अथाऽऽगमोक्तामेव संसारमोक्षमार्गसङ्ख्यामाहुः –

देव० : भूयोऽपि कुमार्गसन्मार्गौ भङ्ग्यन्तरेणाह –

गिहिलिंग-कुलिंगिय-दव्वलिंगिणो तिन्नि हुंति भवमग्गा ।
सुजइ-सुसावग-संविग्गपक्खिणो तिन्नि मोक्खपहा[१] ।।१०६।।

चक्रे० : गृहिलिङ्गा गृहस्थाः, **कुलिङ्गिनः** पाषण्डिनः, **द्रव्यलिङ्गिनः** पार्श्वस्थादयः, **त्रयो भवन्ति भवमार्गाः**, द्रव्यलिङ्गिनामप्युभयभ्रष्टत्वाद्भवमार्गतैव । **सुयतयः, सुश्रावकाः**, संविग्नाः सुसाधवस्तेषां पक्षेण पक्षपातेन चरन्तीति **संविग्नपाक्षिका** इति **त्रयो मोक्षपथाः** । ननु पूर्वं मोक्षमार्गद्वैविध्यमेवोक्तमधुना तु त्रैविध्यमिति कथं न विरोधः ? सत्यम्, तृतीयमार्गस्याऽप्रधानत्वादल्पत्वात्कादाचित्कत्वाच्च तत्र न विवक्षा, अत्र नु संसारमार्गत्रैविध्यप्रस्तावात् तद्भणनमित्यविरोधः, तल्लक्षणं चेदमवसेयम्, तथाहि –

संविग्गपक्खियाणं लक्खणमेयं समासओ भणियं ।
ओसन्न चरणकरणा वि जेण कम्मं विसोहंति ।।
सुद्धं सुसाहुधम्मं कहेइ निंदइ य नियमायारं ।
सुतवस्सियाण पुरओ होइ य सव्वोमराइणिओ ।।
वंदइ न य वंदावइ किइकम्मं कुणइ कारवे नेय ।
अत्तट्ठा न वि दिक्खइ देइ सुसाहूण बोहेउं ।। [उपदेशमाला-५१४,५१५,५१६]

इति गाथार्थः ।।१०६।।

देव० : गृहमेव लिङ्गं येषां ते **गृहलिङ्गा** गृहस्था एव, कुत्सितं च संसारकारणत्वात्तल्लिङ्गं च, तद्विद्यते येषां ते **कुलिङ्गिका**श्चरकादयः, द्रव्यलिङ्गं[२] भावविकलानां साधुनेपथ्यधरणम्, तद्विद्यते येषां ते **द्रव्यलिङ्गिनः** पार्श्वस्थादयः, आधार आधेयोपचारात्तदनुष्ठानानि, **त्रयस्त्रि**सङ्ख्याः किं **भवन्ति** ? **भवमार्गाः** संसारपथाः । अथ गृहिलिङ्गकुलिङ्गिनौ भवतां संसारपथौ, रजोहरणमुख-वस्त्रिकादिभगवल्लिङ्गधारिणस्तु कथम् ? अत्रोच्यते–सम्यग्ज्ञानादिविकलेन लिङ्गमात्रेण न किञ्चित् त्राणम् । तथा च –

१. मुक्खपहा T,C,P,K २. भावविकलत्वेनाप्रधानप्रव्रजितादिनेपथ्यधरणलक्षणं विद्यते T,B,C

संसारसागरंमिणं परिब्भमंतेहिं सव्वजीवेहिं ।
गहियाणि य मुक्काणि य अणंतसो दव्वलिंगाइं ।। [उपदेशमाला-५२१] किञ्चान्यत्-

अन्यलिङ्गकृतं पापं जिनलिङ्गेन शुद्ध्यति ।
जिनलिङ्गकृतं पापं वज्रलेपोपमं मतम् ।। [ ] इति ।

शोभनं सर्वसंवरप्रतिपत्तितो यतते प्रतिलेखनादिसामाचार्यामुद्यच्छतीति **सुयतिः** सुसाधुः, शोभनं श्रद्धानज्ञानवत्तया सुयतिभ्यो जिनवचनं श्रृणोतीति **सुश्रावकः** । तथा चोक्तम् –

संपत्तदंसणाई पइदियहं जइजणा सुणेई य ।
सामायारिं परमं जो खलु तं सावगं बिंति ।। [श्रावकप्रज्ञप्ति-२]

संविग्ना मोक्षकाङ्क्षिणः सुसाधवस्तेषां पक्षः परिग्रहः स विद्यते येषां ते **संविग्नपक्षिणः** पूर्ववत् **त्रयो मोक्षमार्गाः,** ननु पूर्वं मोक्षमार्गद्वैविध्यमेवोक्तमधुना तु त्रैविध्यमिति कथं न विरोधः ? सत्यम्, तृतीयमार्गस्याप्रधानत्वादल्पत्वात्कादाचित्कत्वाच्च तत्र न विवक्षा, अत्र तु संसारमार्ग-त्रैविध्यप्रस्तावात्तद्भणनमित्यविरोधः, तत्सम्भवस्तल्लक्षणं चैताभ्यो गाथाभ्योऽवसेयम् । तथाहि –

जइ न तरसि धारेउं मूलगुणभरं सउत्तरगुणं च ।
मोत्तूण तो तिभूमी सुसावगत्तं वरतरागं ।। [उपदेशमाला-५०१]

अच्चणुरत्तो जो पुण (लिंगधारणेऽत्यनुरक्तो मनाक् सशूकश्च)
न मुयइ बहुसोवि पन्नविज्जंतो (द्रव्यलिङ्गम्)
संविग्गपक्खियत्तं करेज्ज लब्भिहिसि तेण पहं ।। [उपदेशमाला-५२२] तथा -

संविग्गपक्खियाणं लक्खणमेयं समासओ भणियं ।
ओसन्नचरणकरणा वि जेण कम्मं विसोहंति ।।

सुद्धं सुसाहुधम्मं कहेइ निंदइ य नियमायारं ।
सुतवस्सियाण पुरओ होइ य सव्वोमराइणिओ ।।

वंदइ न य वंदावइ किइकम्मं कुणइ कारवे नेय ।
अत्तट्ठा न वि दिक्खइ देइ सुसाहूण बोहेउं ।। [उपदेशमाला-५१४, १५, १६]

इति गाथार्थः ।। १०६।।

** उपदेशमालायाम्-५१८, ५१९ **

तान् आत्मानं च दुर्गतौ क्षिपतीति निगमयन्नाह –

सावज्जजोगपरिवज्जणाए सव्वुत्तमो जईधम्मो ।
बीओ सावगधम्मो तइओ संविग्गपक्खपहो ।।

तस्मात् स्थितमेतत् **सावद्ययोगपरिवर्जनया** सपापव्यापारपरिहारलक्षणया हेतुभूतया **सर्वोत्तमो यतिधर्मः** साध्वाचारो मोक्षमार्ग इति शेषः, **द्वितीयः श्रावकधर्मस्तृतीयः संविग्नपक्षपथ**स्तद्धेतुत्वात् तावपि मोक्षमार्गाविति ।।५१८।।

शेषाणां का वार्त्तेत्यत आह –

सेसा मिच्छद्दिट्ठी गिहिलिंगकुलिंगदव्वलिंगेहिं ।
जह तिन्नि उ मुक्खपहा संसारपहा तहा तिण्णि ।।

शेषाः प्रोक्तव्यतिरेकिणो **मिथ्यादृष्टयो** विपरीताभिनिवेशाद् भवानुयायिन इत्यर्थः। के ते ? अत आह- **गृहिलिङ्ग-कुलिङ्ग-द्रव्यलिङ्गैः** करणभूतैर्ये वर्त्तन्ते, एवं च स्थिते किं सम्पन्नमित्याह–**यथा 'तिन्न उ'** त्ति त्रय एव **मोक्षपथाः** सुसाधु-श्रावक-संविग्नपाक्षिकलक्षणा निर्वाणमार्गाः, **संसारपथा** भवमार्गास्**तथा त्रय** एव, गृहस्थचरकादिपार्श्वस्थादिरूपा इति ।।५१९।।

चक्रे० : अथ कथं सुयत्यादयो मोक्षमार्गा भवन्ति परे च नेत्याहुः –

देव० : अथ कथं सुयत्यादयो मोक्षमार्गा भवन्त्यपरे च नेत्याह –

सम्मत्तनाणचरणा मग्गो मोक्खस्स[१] जिणवरुद्दिट्ठो ।
विवरीओ उम्मग्गो नायव्वो बुद्धिमंतेहिं ।।१०७।।

चक्रे० : सम्यग्ज्ञानचरणानि मार्गो मोक्षस्य जिनवरोद्दिष्टः, तानि च सुयत्यादिष्वेव सन्ति न गृहिलिङ्गादिषु, **विपरीत उन्मार्गो ज्ञातव्यो बुद्धिमद्भिः** ।।१०७।।

देव० : सम्यक्त्वज्ञानचरणानि, पुंस्त्वं प्राकृतप्रभवम्, **मार्गो मोक्षस्य जिनवरोद्दिष्टः** सर्वविदाख्यातोऽनेन मार्गस्याविसंवादित्वमाह तानि च सर्वथात्रैव सुयत्यादिषु, न गृहिलिङ्गादिष्विति, **विपरीतो** मिथ्यात्वाज्ञानाविरतिस्वरूप **उन्मार्ग** उत्पथो **ज्ञातव्यो बुद्धिमद्भि**रिति गाथार्थः ।। १०७।।

१. मुक्खस्स P,K

** धर्मसंग्रहण्याम्-७४९ **

तत्र स्वरूपं तावत्तस्यैवोपदर्शयन्नाह –

सम्मत्तनाणचरणा मोक्खपहो वन्निओ जिणिंदेहिं ।
सो चेव भावधम्मो बुद्धिमता होति नायव्वो ।।

यतः **सम्यक्त्वज्ञानचरणानि जिनेन्द्रैर्मोक्षपथो वर्णितस्ततः स एव बुद्धिमता भावधर्मो भवति ज्ञातव्यः ।** तस्यैव शिवगतिधारणादिलक्षणान्वर्थयुक्तत्वात् ।।७४९।।

चक्रे० : ज्ञानादीनामेव स्वरूपमाहुः –

देव० : ज्ञानादीनामेव स्वरूपमाह –

सन्नाणं वत्थुगओ बोहो सद्दंसणं च तत्तरुई ।
सच्चरणमणुट्ठाणं विहिपडिसेहाणुगं तत्थ।।१०८।।

चक्रे० : तत्र **सज्ज्ञानं वस्तूनि** जीवाजीवादितत्त्वानि, **तद्गतो बोधः** । **सद्दर्शनं च** सम्यक्त्वं **तत्त्वरुचिस्तत्त्वाऽभिलाषः** । **विधि**रुपादेयेषु, **प्रतिषेधो** हेयेषु, **तदनुगमनुष्ठानं** क्रियाकलापः **सच्चरणं** सच्चारित्रम्।।१०८।।

देव० : वस्तूनि जीवादयः पदार्थास्तेषु **गतः** स्थितो वस्त्वनुरूपः संशयविपर्ययरहित इत्यर्थो **बोधः** संवित्तिमित्याह–सत् सम्यग्ज्ञानं **सज्ज्ञानमु**च्यत इति शेषः । तथा **तत्त्वेषु** जिनप्रज्ञप्तेषु **रुचि**रभिलाषः, किम् ? **सद्दर्शनं** सम्यक्त्वमित्यर्थः । त**थानुष्ठानं** क्रियाकलापः, किंविशिष्टम् ? **विधिप्रतिषेधानुगम्, तत्र** विध्यनुगतमुपादेयेषु, प्रतिषेधानुगं हेयेषु, किम् ? **सच्चरणं** शोभनचारित्रम्, तत्रेति व्याख्याक्रमार्थः, इति गाथार्थः।।१०८।।

** योगशतके-३ **

सज्ज्ञानादिलक्षणमाह –

सण्णाणं वत्थुगओ बोहो सद्दंसणं तु तत्थ रुई ।
सच्चरणमणुट्ठाणं विहिपडिसेहाणुगं तत्थ ।।

सज्ज्ञानं सम्यग्ज्ञानं **वस्तुगतः** वस्त्वाव(स्त्वा)लम्बनो **बोधः** परिच्छेदः, निरालम्बनस्य बोधस्यासम्भवात्, सम्भवेऽपि सज्ज्ञानत्वायोगात्, मरुमरीचिकादिबोधे तथादर्शनात्, अन्यथाऽस्य सदितरत्वाभाव इति । तथा

सद्दर्शनं तु सम्यग्दर्शनं पुनस्**तत्र** वस्तुनि **रुचिः** श्रद्धा, 'तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्' [तत्त्वार्थ-१-२] इति वचनात्, अन्यथा चेयं ज्ञानात्, आवरणभेदेन क्वचित् तद्भावेऽप्यभावादिति । तथा **'सच्चरणं'** सम्यक्चारित्रम्, **अनुष्ठानं** क्रियारूपं **विधि-प्रतिषेधानुगं** विधि-प्रतिषेधावनुगच्छति, आगमानुसारीत्यर्थः । **तत्र** इति वस्तुन्येव, अस्य महाव्रतरूपत्वात्, तेषां च बाह्यविषयत्वात्, 'पढमम्मि सव्वजीवा' [आव. नि. ७९१] इति वचनात्, अन्यथा अस्याभाव इति भावनीयम् । क्रमश्चायमेषाम्, निश्चयत इत्थमेव भावात् । तथाहि–नाज्ञाते श्रद्धा, अश्राद्धस्य वाऽनुष्ठानमिति । उक्तं च–'यदि जानात्युत्पन्नरुचिस्ततो दोषान्निवर्तते।'

अन्यत्र तु सम्यग्दर्शनोपन्यास आदौ व्यवहारमतेन कर्मवैचित्र्यात् तथाभावतोऽविरुद्ध एव । इति गाथार्थः ।।३।।

चक्रे० : सच्चरणमनुष्ठानमित्युक्तमधुना सुयतिसुश्रावकविषयितया तदेव दर्शयन्ति –

देव० : सच्चरणमनुष्ठानमित्युक्तमधुना सुयतिसुश्रावकविषयितया तदेव दर्शयन्नाह –

जीव[१] म वहहु म अलियं जंपहु म अप्पं अप्पहु कंदप्पहु ।
नरहु म हरहु म करहु परिग्गहु एहु मग्गु सग्गहु अपवग्गहु।।१०९।।
पूया जिणिंदेसु रई वएसु जत्तो[२] य सामाइयपोसहेसु ।
दाणं सुपत्ते सवणं सुतित्थे सुसाहुसेवा सिवलोयमग्गो।।।११०।।

चक्रे० : आद्या चतुष्पदी सुगमा, नवरमनया प्राणिवधविरमणादीनि पञ्चमहाव्रतान्युक्तानि व्यतिक्रमभणनं तु बन्धाऽऽनुलोम्यात् ।

पूजा जिनेन्द्रेषु, रतिर्व्रतेषु स्थूलप्राणातिपातविरमणादिषु, **यत्नश्च सामायिकपौषधयोः**, अनयोश्च पृथगादानं सावद्यपरिहारेण प्रधानमोक्षाङ्गत्वात्, **दानं सुपात्रे** ज्ञानाद्याऽऽधारे साध्वादौ, अनेनाऽपात्रे दानमनर्थफलमेवेति सूचयति । यदुक्तं प्रज्ञप्त्याम्-

समणोवासगस्स णं भंते ! तहारूवं असंजय - अविरय - अप्पडिहय-पच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा असणपाण-खाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! एगंत सो पावेकम्मे कज्जइ, नत्थि से कावि निज्जरा[३] कज्जइ' त्ति ।

---

१. जीव म वहह म अलियं जंपह म कंदप्पह । नरह म हरह म करह परिग्गह एहु मग्गु सग्गह अपवग्गह T,C जीव म वहह म अलियं जंपह म अप्पं अप्पह कंदप्पह । नरह म हरह म करह परिग्गह एहु मग्गु सग्गाह अपवग्गाह P,K, २. जुत्तो A,T,C ३. निज्जरत्ति. P,K,

एवं तर्हि दीनादीनां दानं न देयमित्यापन्नम्, असङ्गतं चैतद्, अर्हताऽपि सांवत्सरिकदानस्य पात्राऽपात्रविचारपरिहारेण प्रवर्त्तितत्वात्, सत्यम्, मोक्षार्थं दानमाश्रित्याऽयं विधिरुक्तः, कृपादानं तु न क्वाऽपि जिनैर्निवारितम्, आह च –

सव्वेहिं पि जिणेहिं दुज्जयजियरागदोसमोहेहिं ।
सत्ताणुकंपणट्ठा दाणं न कहिंवि पडिसिद्धं ।। [श्राद्धदिनकृत्य-२२२]

तथा **श्रवणं** धर्माऽऽकर्णनम्, **सुतीर्थे** सुखेन तीर्यते भवोदधिरनेनेति सुतीर्थम्, तस्मिन् सुगुरुपार्श्व इत्यर्थः, **सुसाधुसेवा** सत्संगतिः, एष **शिवलोकमार्ग** इति रूपकद्वयार्थः ।। १०९, ११० ।।

देव० : आद्यं वन्दनकं नाम छन्दः सुगमम्, नवरमनेन प्राणिवधविरमणादीनि पञ्चमहाव्रतान्युक्तानि, व्यतिक्रमभणनं तु बन्धानुलोम्यादिति ।

तथा **पूजा** पूर्वोक्तशब्दार्था **जिनेन्द्रेष्व**नेनानन्यसामान्यतीर्थकृद्भक्तितः सम्यक्त्वशुद्धिरावेदिता, **रति**रासक्तिस्तद्विषयविभागविचारणानुष्ठानसुशीलतेति यावद् **व्रतेषु** स्थूलप्राणातिपातविरमणादिषु द्वादशसु, **यत्नश्च सामायिकपौषधयो**रनयोश्च व्रतान्तर्गतत्वेऽपि पृथगुपादानं सावद्यव्यापारपरिहाररूपत्वेन प्रधानमोक्षाङ्गत्वाद्, **दानं** पूजानुग्रहबुद्ध्या वितरणम्, **सुपात्रं** ज्ञानदर्शनचारित्राधारः साधुस्तस्मिन्, अनेनापात्रे दानमनर्थफलमेवेति सूचयति । यदुक्तं प्रज्ञप्त्याम् –

'समणोवासगस्स णं भंते ! तहारूवं असंजय - अविरय - अपडिहयपच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! एगंत सो पावेकम्मे कज्जइ, नत्थि से कावि निज्जरा कज्जइ'त्ति ।

एवं तर्हि दीनादीनां दानं न देयमित्यापन्नम्, असङ्गतं चैतद्, अर्हतापि सांवत्सरिकदानस्य पात्राऽपात्रविचारविरहेण प्रवर्त्तितत्वात्, सत्यम्, गुणबुद्ध्या[१] दानमाश्रित्यायं विधिरुक्तः, कृपादानं तु न क्वापि जिनैर्निवारितमित्याह च –

सव्वेहिं पि जिणेहिं दुज्जयजियरागदोसमोहेहिं ।
सत्ताणुकंपणट्ठा दाणं न कहिंवि पडिसिद्धं ।। [श्राद्धदिनकृत्य-२२२]

१. मोक्षार्थं T,B,C

तथा **श्रवणमा**कर्णनं धर्मस्येति गम्यते, क्व ? **सुतीर्थे** सुष्टु सुखेन वा तीर्यते भवोदधिरनेनेति सुतीर्थं सम्यग्ज्ञानक्रियासम्पन्नः साधुः, अनेन क्रियाविकले धर्मश्रवणनिषेधमाह, यदाह –

चारित्रेण विहीनः श्रुतवानपि नोपजीव्यते सद्भिः ।
निर्मलजलसम्पूर्णः कुलजैश्चाण्डालकूप इव ।। [ ]

सुसाधुः वर्णितस्वरूपस्तस्य **सेवा** पर्युपास्तिः, अनेनासाधुसंसर्गनिषेधमाह, यतः –

अंबस्स य निंबस्स य दुण्हंपि समागयाइं मूलाइं ।
संसग्गीइ विनट्ठो अंबो निंबत्तणं पत्तो ।। [आव.नि॰ १११६]

अयं **शिवलोकमार्गो** भवतीति रूपकद्वयार्थः ।।१०९, ११०।।

चक्रे॰ : इत्थमनेकधा सन्मार्गप्ररूपणेऽपि रागाद्युपहतचेतसां बहुतरजीवानामुन्मार्गगामित्वमालोक्य सखेदं रागादिमाहात्म्यमाहुः –

देव॰ : इत्थमनेकधा शास्त्रेषु सन्मार्गप्रतिपादनेऽपि रागाद्युपहतचेतसां बहुतरजीवानामुन्मार्गगामित्वमवलोक्य सखेदं रागादिमाहात्म्यमाह –

रागोरगगरलभरो तरलइ चित्तं तवेइ दोसग्गी ।
कुणइ कुमग्गपवित्तिं महामईणं पि हा मोहो !।।१११।।

चक्रे॰ : स्पष्टा।।१११।।

देव॰ : राग एव दारुणमरणहेतुत्वा**दुरगगरलं** सर्पविषं तस्य **भर** उत्कर्षः, किं **तरलयति** विधुरयति **चित्तं** मनस्तथा **तापयति** दुनोति प्रस्तुतत्वाच्चित्तमेव, द्वेष एव सन्तापकत्वा**दग्निर्द्वेषाग्नि**र्मत्सरानलस्तथा**करोति** विधत्ते, काम् ? **कुमार्गप्रवृत्तिं** कुदर्शनग्रहमिथ्याभिनिवेशवितथप्ररूपणानुष्ठानादिरूपां **महामतीनामपि,** आस्तां मुग्धबुद्धीनाम्, **हा** इति खेदे **मोहो**ऽज्ञानमेतेन रागद्वेषमोहोपहतानां तत्त्वोपदेशानर्हत्वमाहेति गाथार्थः ।।१११।।

चक्रे० : तथा च सति –

देव० : तथा च –

अन्नाणंधा मिच्छत्तमोहिया कुग्गहुग्गगहगहिया ।
मग्गं न नियंति न सद्दहंति चिट्ठंति न य उचियं।।११२।।

चक्रे० : **अज्ञानान्धाः** सन्मार्गाऽनवलोकात्, अन्धोऽपि कश्चिन्मनोविज्ञानेन मार्गं नाऽतिक्रामतीत्याहु**र्मिथ्यात्वेन मोहिता** दिग्मूढवद् भ्रान्तचित्ताः, तेऽपि समयाऽन्तरे सचेतनाः स्युरित्याहुः **कुग्रहो**ऽसदभिनिवेशः, स ए**वोग्रः** क्रुरो **ग्रहस्तेन गृहीता मार्गं** मोक्षपथं **न 'नियंति'** न पश्यन्ति, **न श्रद्दधति** न बहुमन्यन्ते, **न च चेष्टन्ते** न प्रवर्तन्ते, **उचितं** मोक्षमार्गाऽनुरूपमित्यर्थो यथासङ्ख्यं वा कर्तृपदानां क्रियापदैः ।।११२।।

देव० : अन्धा इवान्धा मार्गानवलोकनादज्ञानेनान्धा **अज्ञानान्धास्तथा मिथ्यात्वेन** मिथ्यात्वमोहनीयेन **मोहिता** भ्रमितास्तथा **कुग्रहो**ऽसदभिनिवेशः स ए**वोग्रग्रहो** भूतादिस्तेन **गृहीता**[१] आविष्टास्ते, किम् ? यथासङ्ख्यं **न 'नियंति'**त्ति नावलोकयन्ति **मार्गमा**त्मना, **न श्रद्दधति** न बहुमन्यन्ते परोपदिष्टमपि मार्गमेव, **न च चेष्टन्ते** व्यवहर**न्त्युचितम**नुरूपम्, मार्गस्यैव क्रियाविशेषणमिदम्, तथाहि– अज्ञानोपहतात्मनामन्धानामिव सत्त्वानां तत्त्वावलोकनविमुखीशेमुषी, मिथ्यात्ववासनाविपर्यस्तबुद्धीनां दिग्मूढानामिव तत्त्वश्रद्धानबहिःप्लवा मनोवृत्तिः कुदेवादिग्रहावेशवशंवदानामुन्मत्तानामिव सर्वतो हास्यहेतुरसमञ्जसा चेष्टेति गाथार्थः ।।११२।।

चक्रे० : इत्थमवगतमोक्षमार्गः कश्चित् सर्वविरतिं प्रपद्यते, तदशक्तस्तु तद्भावनामेवं भावयति, तद्यथा –

देव० : इत्थमवगतसम्यग्ज्ञानादिमोक्षमार्गः सुदुर्जयरागादिदोषजालादुद्विजमानः समुल्लसितवीर्यः कश्चिद्भावमार्गमेव प्रतिपद्यते, तदशक्तिमांश्च प्रतिपन्नद्रव्यस्तवः 'सर्वविरतिलालसः खलु देशविरतिपरिणामः' इति वचनात् सर्वविरतिलालसत्वं यथा भावयति तथाह –

ता कइया तं सुदिणं सा सुतिही तं भवे सुनक्खत्तं ।
जंमि सुगुरुपरतंतो[२] चरणभरधुरं धरिस्समहं।।११३।।

---

१. अवष्टब्धाः T,B,C २. परितंतो T,C,Z परत्तंतो A,P,K

चक्रे० : ततः कदा तत्सुदिनमित्यादि सुगमा, नवरं **सुगुरुपरतन्त्र**भणनाद् गुर्वायत्ताः सर्वसम्पद इत्यावेदयन्ति, यदाह –

नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ।। [विशेषा. भा॰ ३४५९]
छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखवणेहिं ।
अकरिंतो गुरुवयणं अणंतसंसारिओ होइ ।। [पञ्चा॰ ४६] ।।११३।।

देव० : [१]यस्मादेवं रागादयो विजृम्भन्ते **तत्तस्मात् कदा** कस्मिन् काले **तत्सुदिनं** प्रसन्नदिगादि, **सा सुतिथिर्**नन्दादिका, **तत्सुनक्षत्रं** पुष्यादि **भवेदि**त्याशिषि सप्तमी, सुन्दरत्वं चैतेषां सकलकल्याणनिबन्धनचरणप्राप्तिहेतुत्वाद्, **यस्मिन्** दिने तिथौ नक्षत्रे वा **सुगुरुपरतन्त्रः** सुन्दरधर्माचार्यायत्तः, शोभनत्वं चास्य –

धर्मज्ञो धर्मकर्ता च सदा धर्मपरायणः ।
सत्त्वानां धर्मशास्त्रार्थदेशको गुरुरुच्यते ।। [ ]

इत्यादिलक्षणयोगात्, तत्परतन्त्रताभणनेन च गुर्वायत्ताः सर्वसम्पद इत्यावेदयति, यतोऽभिहितम् –

नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ।। [बृहत्कल्पभा॰ ५१७३] अन्यच्च -
छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखमणेहिं ।
अकरिंतो गुरुवयणं अणंतसंसारिओ होइ ।। [पञ्चा॰ ४६]

चरणमेव दुर्वहत्वसाम्याद्भरस्तस्य **धूर्धूरा** तां **धरिष्यामि** प्रतिपत्स्येऽहमिति गाथार्थः ।।११३।।

१. यस्मादेव A

चक्रे० : अथ प्रस्तुतार्थसमर्थनायाऽभीष्टदेवतास्तुतिगर्भसम्बोधनेन मध्यमङ्गलमाविष्कुर्वन्तो मुग्धजनप्रवादतिरस्कारमाहुः –

देव० : अथ प्रस्तुतार्थसमर्थनायाऽभीष्टदेवतास्तुतिगर्भसम्बोधनेन मध्यमङ्गलमाविष्कुर्वन् मुग्धजनप्रवादतिरस्कारमाह –

सव्वत्थ अत्थि धम्मो जा मुणियं जिण ! न सासणं तुम्ह ।
कणगाउराण कणगं व ससियपयमलभमाणाणं।।११४।।

चक्रे० : सुगमा, केवलं **कनकातुराणां** धत्तूरकातुराणाम्, '**ससियपय**'त्ति ससितं सशर्करं पयः क्षीरम् ।।११४।।

।। इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृत्तौ समर्थितं तृतीयं मार्गतत्त्वम् ।।

देव० : सर्वत्र सर्वेषु कपिलशैवशाक्यादिविविधमतेषु, **अस्ति** विद्यते **धर्म** इति विवेक-विकलानामभ्युपगमो वर्तते, यावत् किम् ? **यावन्न मुणितं** नाधिगतं हे **जिन** ! विगलिताशेष-रागादिदोष ! जातौ चात्रैकवचनम्, **शासनं** द्वादशाङ्गं '**तुम्ह**'त्ति युष्माकं व्यक्त्यपेक्षया बहुवचनमनेन जातिव्यक्त्योः कथञ्चिदभेदमाह, किमिव कुत्र केषामित्याह-**कनकातुराणां** हत्पूरकफलचूर्णभावितात्मनां **कनकमिव** सुवर्णमिव सर्वत्रेष्टकाकाष्ठपाषाणादिष्वस्तीत्य-भ्युपगम इतीहापि दृश्यम्, किंविशिष्टानां तेषाम् ? सह सितया शर्करया वर्तत इति **ससितम्,** तच्च **तत्पयश्च** दुग्धं **तदलभमानानाम**प्राप्नुवतामपिबतामिति तात्पर्यमिति गाथार्थः ।।११४।।

।। इति श्रीदेवभद्रसूरिविरचिते दर्शनशुद्धिप्रकरणविवरणे तृतीयं मार्गतत्त्वं समाप्तम् ।।श्रीरस्तु ।।

४-साधुतत्त्वम्

चक्रे० : व्याख्यातं मार्गतत्त्वमधुना मूलद्वारगाथाक्रमप्राप्तं साधुतत्त्वं विव्रियते, सम्बन्धश्च पूर्वेण सहास्य पूर्वं मार्गतत्त्वमुक्तम्, तच्च साधुभिरावेद्यत इति साधुतत्त्वमुच्यते, तत्रादौ गाथा –

देव० : व्याख्यातं मार्गतत्त्वमधुना मूलद्वारगाथाक्रमप्राप्तं साधुतत्त्वं विव्रियते, सम्बन्धश्च पूर्वेण सहास्य पूर्वं मार्गतत्त्वमभिहितम्, तच्च सुतीर्थमुखात् श्रोतव्यम्, सुतीर्थं च साधुरिति प्रस्तावात्साधुतत्त्वमत्राभिधीयते, तत्रादौ गाथा –

अट्ठारस जे दोसा [१]आयारकहाए वन्निया सुत्ते ।
ते [२]वज्जंतो साहू पन्नत्तो वीयरागेहिं।।११५।।

चक्रे० : सुगमा, नवरं **सूत्रे** सिद्धान्ते, **आचारकथायां** साध्वाचारविचारणायां दशवैकालिक-षष्ठाध्ययनरूपायां वा।।११५।।

देव० : सुगमा, नवरं **सूत्रे** सिद्धान्ते सामान्येन विशेषतस्त्**वाचारकथायां** दशवैकालिक-षष्ठाध्ययने । तथा साधयति पौरुषेयीभिर्विशिष्टक्रियाभिरपवर्गमिति **साधु**र्यतिरिति।।११५।।

चक्रे० : अथ क एतेऽष्टादश दोषा इत्याहुः –

देव० : अथ क एतेऽष्टादश दोषा इत्याह –

पढमं वयाण छक्कं कायछक्कं अकप्प गिहिभायणं ।
पलियंक [३]निसिज्जा वि य [४]सिणाणसोहाविवज्जणयं।।११६।।

चक्रे० : प्रथमं पञ्च महाव्रतानि रात्रिभोजनविरतिश्चेति **व्रतानां षट्कम्,** इह च 'व्याख्यानतो विशेषप्रतिपत्तिः'इति व्रतानां विराधनानि दोषत्वेन ज्ञेयानि । एवं कायषट्केऽपि **कायानां**

१. आयारकहाइ P,K २. वज्जिंतो T,C,P,K वज्जेंतो A,Z ३. निसेज्जा A,Z ४. सिणाणं T,C

पृथ्वीकायादीनां **षट्कम्**, अथाद्यव्रतविराधनभणनेनैव कायषट्कविराधनमुक्तार्थमिति चेत्, ? सत्यम्, पृथ्व्यादीनां लोके जीवतत्त्वमप्रसिद्धमिति विशेषेणाऽऽख्यानम् ।

अकल्पो द्विविधः शिक्षकस्थापनाकल्पोऽकल्पस्थापनाकल्पश्च, तत्राद्यः –

अणहीया खलु जेणं पिंडेसणसिज्जवत्थ पाएसा ।
तेणाऽऽणियाणि जइणो कप्पंति न पिंडमाईणि ।। [अन्नायउंछकुलक-३]

उउबद्धम्मि न अनला वासावासासु दो वि नो सेहा ।
दिक्खिज्जंती सेह ट्ठवणाकप्पो इमो होइ ।। [ ]

अकल्पस्थापनाकल्पं तु स्वयमेव वक्ष्यति, दोषत्वं चाऽस्य विपर्ययाऽऽसेवनात् ।

गृहिभाजनं स्थालादि, तत्र भुञ्जानस्य दोषो यदाह –

कंसेसु कंसपाएसु कुंडमोएसु वा पुणो ।
भुंजंतो असणपाणाइं आयारा परिभस्सइ ।। [दशवै॰ ६-५१]

पल्यङ्कः प्रतीतस्तत्र शयनाऽऽसनादौ शुषिरत्वाद् दोष उपलक्षणं चैतन्मञ्चकादीनाम् । **निषद्या** समयभाषया भिक्षागतस्योपवेशनक्रिया, सा न कल्पते । **स्नानं** देशतः सर्वतो वा, उपलक्षणत्वादुद्वर्त्तनं च, यदाहुः –

वाहीओ वा अरोगी वा सिणाणं जो उ पत्थए ।
वुक्कंतो होइ आयारो जढो हवइ संजमो ।। [दशवै॰ ६-६१]

शोभा विभूषा, दशनघर्षण-नखघटन-रोमकल्पन-केशसमारचनाऽकालवस्त्रक्षालनादिरूपा, तस्या **विवर्जनम**विवर्जने दोषः, उक्तं च –

नगिणस्स वा वि मुंडस्स दीहरोमनहंसिणो ।
मेहुणा उवसंतस्स किं विभूसाए कारियं।।

विभूसा वत्तियं भिक्खू कम्मं बंधइ चिक्कणं ।
संसारसायरे घोरे जेणं भमइ दुरुत्तरे ।।२।। [दशवै॰ ६-६५, ६६]

इह चाद्यषट्कद्वयेन मूलगुणा उक्ताः, अकल्पादिषट्केन तूत्तरगुणा इति गाथार्थः ।।११६।।

देव० : प्रथममिति क्रमार्थम्, **व्रतानां** प्राणिवधविरमणादीनां रात्रिभोजनविरमणावसानानाम्, षट् परिमाणमस्य **षट्कमि**ह च व्याख्यानाद् व्रतानां विराधनानि प्रत्येकं दोषत्वेनावसेयान्येवं

कायषट्केऽपि कायानाम्, पृथिवीकायादित्रसकायान्तानां षट्कं **कायषट्कम्** । अथाद्यव्रत-विराधनाभणनेनैव कायषट्कविराधनमुक्तार्थमिति चेत्सत्यम्, विशेषरूपतयाऽस्य भणनाद्, विशेषाणां तु सामान्यात्कथञ्चिद्भिन्नत्वान्नोक्तसङ्ख्याहानिरपि । **अकल्पो** द्विविधः, शिक्षक-स्थापनाकल्पोऽकल्पस्थापनाकल्पश्च, तत्र शिक्षकस्थापनाकल्पोऽनधीतपिण्डनिर्युक्त्यादिना-ऽऽनीतमप्याहारादि न कल्पत इति, उक्तं च –

अणहीया खलु जेणं पिंडेसणसेज्जवत्थपाएसा ।
तेणाऽऽणियाणि जइणो कप्पंति न पिंडमाईणि ।। [अन्नायउंछकुलक-३]

उउबद्धंपि न अनला वासावासासु दोवि नो सेहा ।
दिक्खिज्जंती सेह ठवणाकप्पो इमो होइ ।। [ ]

अकल्पस्थापनाकल्पं तु स्वयमेव वक्ष्यति, दोषत्वं चैतस्य विपर्ययासेवनाद् । गृहिणो भाजनं **गृहिभाजनं** स्थालकरोटकादि भोजनाद्यर्थमासेव्यमानमिति गम्यम्, उक्तं च –

कंसेसु कंसपाएसु कुंडमोएसु वा पुणो ।
भुजंतो असणपाणाइं आयारा परिभस्सइ ।। [दशवै॰ ६-५१]

कांस्येषु करोटकादिषु, [१]कांस्यपात्रेषु तलिकादिषु, कुण्डमोदेषु हस्तिपादाकारेषु मृन्मयादिषु । इह जकारलोपः प्राकृतत्वात् समाहारत्वाच्चैकत्वमेवमुत्तरत्रापि । **पल्यङ्कः** प्रतीतः, शयनासन-विषयीक्रियमाण इति गम्यम्, उपलक्षणं चैतत् खट्वामञ्चकासन्दिकादीनाम्, यदाह –

आसंदीपलियंकेसु मंचमासालयेसु वा ।
अणायरियमज्जाणं आसइत्तु सइत्तु वा ।। [दशवै॰ ६-५४]

[२]आसन्दपर्यङ्कमञ्चाः प्रतीताः, [३]आसालकः समंगकसमन्वित आसनविशेषः, शुषिरत्वं चैतेषु दोषः । निषदनं **निषद्याः** समयप्रसिद्धा भिक्षागतस्योपवेशनक्रिया, यदवाचि –

गोयरग्गपविट्ठस्स निसिज्जा जस्स कप्पइ ।
इमेरिसमणायारं आवज्जइ अबोहियं ।। [दशवै॰ ६-५७]

इत्यादि, **अपिचे**ति समुच्चये, **स्नानं** मज्जनं देशतः सर्वतो वा, उपलक्षणत्वात्कल्करो-ध्वादिभिरूद्वर्त्तनं च तथा च –

१. 'कंसपात्रेषु तिलकादिषु' इति दशवैकालिकनिर्युक्त्याम् २. आसन्दपर्यङ्कौ प्रतीतौ मञ्चोऽपि रुढः T,B,C ३. 'आशालकस्तु अवष्टम्भसमन्वित' इति दशवैकालिकनिर्युक्त्याम् ।

वाहिओ वा अरोगी वा सिणाणं जो उ पत्थए ।
वुक्कंतो होइ आयारो जढो भवइ संजमो ।। [दशवै॰ ६-६१]

इत्यादि, **शोभा** विभूषा दशनघर्षण-नखघटन-रोमकल्पन-केशसमारचनाऽकालवस्त्रप्रक्षाल-नादिरूपा, तस्या विवर्जनमेव **विवर्जनकमन**नुष्ठीयमानमिति गम्यम्, अभाणि च –

नगिणस्स वावि मुंडस्स दीहरोमनहंसिणो ।
मेहुणाउवसंतस्स किं विभूसाए कारियं ।।
विभूसावत्तियं भिक्खू कम्मं बंधइ चिक्कणं ।
संसारसागरे घोरे जेणं पडइ दुरुत्तरे ।। [दशवै॰ ६-६५, ६६]

इत्यादि । इह चाद्यषट्कद्वयेन मूलगुणाः प्रतिपादिता, अकल्पादिदोषषट्केन तूत्तरगुणा इति गाथार्थः ।।११६।।

* *दशवैकालिकनिर्युक्तौ*-२६८ *

वयछक्कं कायछक्कं अकप्पो गिहिभायणं ।
पलियंकनिसेज्जा य सिणाणं सोहवज्जणं ।।

व्रतषट्कं प्राणातिपातनिवृत्त्यादीनि रात्रिभोजनविरतिषष्ठानि षड् व्रतानि, **कायषट्कं** पृथिव्यादयः षड्जीवनिकायाः, **अकल्पः** शिक्षकस्थापनाकल्पादिर्वक्ष्यमाणः, **गृहिभाजनं** गृहसम्बन्धि कांस्यभाजनादि प्रतीतम्, **पर्यङ्कः** शयनविशेषः प्रतीतः । **निषद्या च** गृहे एकानेकरूपा, **स्नानं** देशसर्वभेदभिन्नम्, **शोभावर्जनं** विभूषापरित्यागः, वर्जनमिति च प्रत्येकमभिसंबध्यते, शोभावर्जनं स्नानवर्जनमित्यादीति गाथार्थः ।।२६८।।

* *व्यवहारसूत्रम्*-४४४० *

तमेव दर्शयति –

वयछक्क कायछक्कं अकप्पो गिहिभायणं ।
पलियंक निसज्जा याऽसिणाणं सोभवज्जणं ।।

व्रतषट्कं प्राणातिपातनिवृत्त्यादिरात्रिभोजनविरमणपर्यन्तम्, **कायषट्कं** पृथिव्यादि, **अकल्प्यः** पिण्डादिकः, **गृहिभाजनं** कांस्यपात्र्यादि **पल्यङ्कः** प्रतीतः, **निषद्या** गोचरप्रविष्टस्य निषदनम्, **अस्नानं** देशतः सर्वतो वा स्नानस्य वर्जनम्, [शोभावर्जनम्] विभूषापरित्यागः । एतद् विधेयतया प्रतिषेध्यतया वा यद् यथोक्तं नाऽऽचरितं तद् आलोचयति ।।४४४०।।

चक्रे० : अकल्पस्थापनाकल्पमेव विवृण्वन्ति –

देव० : इह शेषदोषाणां सुज्ञानत्वादकल्पस्थापनाकल्पदोषे तु सति शेषदोषाणामपि सम्भवात्सप्रतिपक्षतद्विषयविभागस्य च दुर्ज्ञानत्वात्तमेव विवृणोति –

पिंडं सेज्जं[२] वत्थं पत्तं चारित्तरक्खणट्ठाए ।
अकप्पं वज्जिज्जा[३] गिण्हिज्जा कप्पियं साहू।।११७।।

चक्रे० : सुगमा, नवरं **शय्यां** वसतिम्, **अकल्पमा**धाकर्मादिदोषदुष्टम्।।११७।।

देव० : पिण्डं समयपरिभाषया चतुर्विधमाहारम्, **शय्यां** वसतिम्, **वस्त्र**मन्तरकल्पादि, **पात्र**मलाब्वादि, **अकल्प**मकल्पनीयं **वर्जयेत्**परिहरेत् । कस्मै ? **चारित्ररक्षणार्थाय** संयमपरिपालनप्रयोजनाय, तथा **गृह्णीयादु**पाददीत श्रुतत्वात्पिण्डाद्येव, किंविशिष्टम् ? **कल्पिकमा**[४]धाकर्मादिदोषरहितं **साधु**रिति गाथार्थः ।।११७।।

**** दशवैकालिकनिर्युक्तौ-६/४७ ****

एतदेव स्पष्टयति –

पिंडं सिज्जं च वत्थं च चउत्थं पायमेव य ।
अकप्पिअं न इच्छिज्जा पडिगाहिज्ज कप्पिउं ।।

'पिंडं'ति सूत्रं, **पिण्डं शय्यां च वस्त्रं च चतुर्थं पात्रमेव च,** एतत्स्वरूपं प्रकटार्थम्, **अकल्पिकं** नेच्छेत्, **प्रतिगृह्णीयात् कल्पिकं** यथोचितमिति सूत्रार्थः ।।४७।।

चक्रे० : इह च पिण्डादीनामाधाकर्मादिदोषैरकल्पिकत्वमिति तान् बिभणिषवः प्रस्तावनामाहुः –

देव० : इह च पिण्डादीनामाधाकर्मादिदोषैरकल्पिकत्वमिति तान् बिभणिषुः प्रस्तावनामाह–

जीवा सुहेसिणो तं सिवंमि तं संजमेण सो देहे ।
सो पिंडेण सदोसो सो पडिकुट्ठो इमे ते य।।११८।।

चक्रे० : जीवाः सुखैषिणस्तत्सुखमैकान्तिकं **शिवे, तच्छिवं संयमेन, स** संयमो **देहे, स** देहः **पिण्डेन** वर्तते, **स** पिण्डः **सदोष** आधाकर्मादिदोषदुष्टः **प्रतिक्रुष्टो** निषिद्धः सर्वज्ञिनैः, **ते च इमे** वक्ष्यमाणा इति गाथार्थः ।।११८।।

१. दुर्ज्ञेयत्वात्तमेव T,B,C २. सिज्जं P,K, ३. वज्जेज्जा गिण्हेज्जा A,Z ४. कल्पितम् A

देव० : जीवाः प्राणिनः **सुखैषिणः** शर्माभिलाषिणः, यदवाचि –

सव्वेवि सुक्खकंखी सव्वेवि हु दुक्खभीरुणो जीवा ।
सव्वेवि जीवियपिया सव्वे मरणाओ बीहंति ।। [ ]

तत्पुनः सुखं तात्त्विकं **शिव** एव सर्वकर्माभावमोक्ष एव, तत्पुनः[१] शिवं **संयमेन** पूर्वोक्तेन, **स** पुनः संयमो **देह** आहारभूते, शरीरमाद्यं खलु धर्मसाधनमिति वचनात्, **स** पुनर्देहः **पिण्डेन** पूर्वोक्तेन, सह दोषैः **सदोषः स** पुनः पिण्डः **प्रतिक्रुष्टः** प्रतिषिद्धः सर्वजिनैरिति गम्यते, **इमे** अनन्तरमेव वक्ष्यमाणतया प्रत्यक्षास्**ते** पुनर्दोषाः । **च** पुनरर्थे, सर्वेष्वपि च तच्छब्देषु योज्यते, तेनोचितं चैतदिति[२] गाथार्थः ।।११८।।

* *पिण्डविशुद्धिप्रकरणे-२* *

अथ जीवानां शिवसुखाबाधिपिण्डदोषभणनेनैव प्रस्तावयन्नाह –

जीवा सुहेसिणो तं सिवम्मि तं संजमेण सो देहे ।
सो पिंडेण सदोसो सो पडिकुट्ठो इमे ते य ।।

जीवाः प्राणिनस्ते किमित्याह–**सुखैषिणः** साताभिलाषिणः, उक्तं च –

सव्वे वि सुक्खकंखी सव्वे वि हु दुक्खभीरुणो जीवा । सव्वे वि जीवियपिया सव्वे मरणाउ बीहंति ।। त्ति । **'तं'** ति पुनःशब्दार्थस्य गम्यमानत्वात्, तत्पुनः सुखं स्वाभाविकं निरुपममनन्तं च **शिव** एव-सर्वकर्माभावलक्षणमोक्ष एव, यदुक्तम् –

नवि अत्थि माणुसाणं तं सोक्खं नवि य सव्वदेवाणं । जं सिद्धाणं सोक्खं अव्वाबाहं उवगयाणं ।।

संसारि(क) सुखं तु सुखमेव न भवति, विपर्यासरूपत्वात्, दुःखप्रतीकारमात्रस्य सुखबुद्ध्या ग्रहणात् । भणितं च –

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभिः, क्षुधार्त्तः सन् शालीन् कवलयति मांसादिफणितान् ।
प्रदीप्ते रागाग्नौ दहति तनुमाश्लिष्यति वधूं, प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ।। इति। **'तं'** ति उक्तन्यायात् तं पुनः शिवं जीवाः प्राप्नुवन्ति, केनेत्याह–**संयमेन**

पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः।। इति शास्त्रान्तर(नन्दीवृत्ति)प्रसिद्धेन

१. तं पुनः शिवं जीवाः प्राप्नुवन्ति केनेत्याह । संयमेन प्रागभिहितस्वरूपेण पुनः संयमो देहे काये भवति । स पुनर्देहः पिण्डेनैवाशनाद्याहारेणैव सत्तामात्रमपि धारयति । T,B,C २. भावितं चैतदत्र च सर्वत्रानुरूपक्रियाध्याहारः कार्य इति गाथार्थः । T,B,C

पुढवि-दग-अगणि-मारुय-वणस्सइ-बि-ति-चउ-पणिंदि-अजीवे ।
पेहो-प्पेह-पमज्जण-परिट्ठवण-मणो-वई-काए ।।

इत्यागमप्रसिद्धेन वा । अत्र चाद्यः संयमः प्रसिद्ध एव, द्वितीयस्तु शिष्यहितार्थं किञ्चिदुच्यते-तत्र पृथिव्यादिपञ्चेन्द्रियान्तजीवानां मनोवाक्कायैः करणकारणानुमतिभेदतः सङ्घट्टनपरितापनापद्रावण-परिहाररूपो नवविधः संयमो भवति । अजीवसंयमस्तु पुस्तका(?अ)प्रत्युपेक्ष्य दुष्प्रत्युपेक्ष्य (च पुस्तक) दूष्य-तृण-चर्मपञ्चक-विकटहिरण्यादीनामग्रहणरूपः । आह-किमेषामग्रहण एव संयम ? उत ग्रहणेऽपि ? उच्यते-अपवादतो ग्रहणेऽपि, यत उक्तम् -

दुप्पडिलेहिय दूसं अद्धाणाई विवित्तगिण्हंति । घेप्पइ पोत्थयपणयं कालियनिज्जुत्तिकोसट्ठा ।। इत्यादि। ननु ज्ञानसाधनत्वात् पुस्तकपञ्चकस्य कथं नोत्सर्गतोऽपि ग्रहणम् ? उच्यते-सत्त्वोपघातहेतुत्वात्, आह च-

जइ तेसिं जीवाणं तत्थगयाणं (तु) च सोणियं होज्जा ।
पीलिज्जंते धणियं गलिज्ज तं अक्खरे फुसिउं ।। इत्यादि ।

'तत्र गतानां' पुस्तकस्थितानाम् । प्रेक्षासंयमस्तु यत्र स्थानादिकं किञ्चिदाचरति, तत्र प्रत्युपेक्ष्य प्रमार्ज्य चाचरतीति । उपेक्षासंयमस्तु द्विधा-व्यापारेऽव्यापारे च, उपेक्षाशब्दस्य लोके तथाप्रवृत्तिदर्शनात्, तथा च वक्तारो भवन्ति-उपेक्षकोऽयमस्य ग्रामस्य चिन्तक इत्यर्थः, तथा किमिदं वस्तु विनश्यदुपेक्षसे ? न चिन्तयसीत्यर्थः, तत्र व्यापारोपेक्षासंयमो यत्साम्भोगिकसाधून् सीदन्त इतरांश्च प्रावचनिककार्ये प्रेरयति, अव्यापारोपेक्षासंयमस्तु यत्सावद्यकर्म्मसु सीदन्तं गृहिणं न प्रेरयति । प्रमार्जनासंयमस्तु यत्सागारिकसमक्षं पादौ न प्रमार्जयति, तदभावे तु प्रमार्जयतीति । परिष्ठापनासंयमस्तु जीवसंसक्तस्याशुद्धस्याधिकस्य क्षेत्रकालातिक्रान्तस्य वा भक्तादेर्विधिना यस्त्यागः । मनःसंयमस्तु तस्यैवाकुशलस्य निरोधः, कुशलस्योदीरणम्, एवं वाक्संयमोऽपि । कायसंयमस्तु सति कार्य उपयोगतो गमनागमनादिविधानम्, तदभावे तु सुसंलीनकरचरणाद्यवयवस्यावस्थानमिति । अथ प्रकृतमुच्यते-**'सो'** त्ति स पुनः संयमो **देहे** काये भवति, उद्घुष्यते च-'शरीरमाद्यं खलु धर्मसाधनं' इत्यादीति । **'सो'** त्ति स पुनर्देहः **पिण्डे**नैवाऽशनाद्याहारेणैव सत्तामात्रमपि धारयति, आबालगोपालाङ्गनादीनां प्रसिद्धं चैतत् । सह दोषैः **सदोषः, 'सो'** त्ति स पुनः पिण्डः **प्रतिक्रुष्टः** प्रतिषिद्धः, आगम इति गम्यते, **इमे**ऽनन्तरमेव वक्ष्यमाणतया प्रत्यक्षास्**ते** दोषाः, **च**शब्दः पुनः- शब्दार्थः । अत्र च गाथायां सर्वत्रानुरूपक्रियाऽध्याहारतोऽवसेया ।

यश्च निम्बं परशुना यश्चैनं मधुसर्प्पिषा । यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ।। इत्यादाविवेति गाथार्थः ।।२।।

चक्रे० : एषामेव पिण्डदोषाणां विभागेन सङ्ख्यामाहुः -

देव० : प्रस्तावितपिण्डदोषाणां सविभागं सङ्ख्यामाह -

सोलस उग्गमदोसा सोलस [१]उप्पायणाए दोसा उ ।
दस [२]एसणाए दोसा बायालीसं [३]इइ हवंति।।११९।।

चक्रे० : गतार्था ।।११९।।

देव० : **षोडशोद्गमनमुद्गम** उत्पत्तिः प्रभव इति यावत्, प्रस्तावात्पिण्डस्य, तं दूषयन्तीत्युद्गमदोषाः । तथा **षोडशोत्पादनमुत्पादनो**पार्जना निर्वर्त्तनेति यावत्, पिण्डस्यैव, तस्यामपि **दोषास्तु**रप्यर्थः । तथा **दश एषणायां** गवेषणायां **दोषाः,** सर्वमीलने यत्स्यात्तदाह- **द्विचत्वारिंशदित्ये**वमुक्तनीत्या **भवन्ती**ति गाथार्थः।।११९।।

**** पिण्डनिर्युक्तौ-६६९ ****

सम्प्रत्यस्या एवैषणायाः सकलदोषसङ्कलनमाह -

सोलस उग्गमदोसा सोलस उप्पायणाए दोसा उ ।
दस एसणाए दोसा संजोयणमाइ पंचेव ।।

सुगमा, सर्वसङ्ख्यया सप्तचत्वारिंशदेषणादोषाः । एतान् विशोधयन् पिण्डं विशोधयति, पिण्डविशुद्धौ च चारित्रशुद्धिः, चारित्रशुद्धौ मुक्तिसम्प्राप्तिः, उक्तं च -

एए विसोहयंतो पिंडं सोहेइ संसओ नत्थि । एए अविसोहिंते चरित्तभेयं वियाणाहि ।।
समणत्तणस्स सारो भिक्खायरिया जिणेहिं पन्नत्ता । एत्थ परितप्पमाणं तं जाणसु मंदसंवेगं ।।
नाणचरणस्स मूलं भिक्खायरिया जिणेहिं पन्नत्ता । एत्थ उ उज्जममाणं तं जाणसु तिव्वसंवेगं ।।
पिंडं असोहयंतो अचरित्ती एत्थ संसओ नत्थि । चारित्तंमि असंते निरत्थिया होइ दिक्खा उ ।।
चारित्तंमि असंतंमि निव्वाणं न उ गच्छइ । निव्वाणंमि असंतंमि सव्वा दिक्खा निरत्थगा ।।

तस्मादुद्गमादिदोषपरिशुद्धः पिण्ड एषयितव्य इति ।।६६९।।

**** पञ्चवस्तौ-७३९ ****

सोलस उग्गमदोसा, सोलस उप्पायणाए दोसा उ ।
दस एसणाए दोसा, बायालीसं इइ भवंती ।।

---

१. उप्पायणाय P,K २. एसणाइ P,K ३. इह P,K ईई T,C इय Z

षोडश उद्गमे दोषा आधाकर्मप्रभृतयः, **षोडश उत्पादनायां दोषाः** धात्र्यादयः, **दश** पिण्**डैषणायां दोषाः** शङ्कितादयः, **द्विचत्वारिंशदेवं भवन्ति** समुदिता इति गाथार्थः ।।७३९।।

**** प्रवचनसारोद्धारे-५६३ ****

तत्र स्वयमेवैनां गाथां प्रतिपदं व्याख्यानयन् यैर्दोषै रहितस्य पिण्डस्य विशुद्धिर्भवति तान् दोषान् सामान्येन त्रिभेदानाह –

सोलस उग्गमदोसा सोलस उपायणाय दोसत्ति ।
दस एसणाय दोसा बायालीसं इह हवन्ति ।।

षोडशोद्गमदोषा उद्गमनमुद्गमः पिण्डस्योत्पत्तिः तद्विषया आधाकर्मिकादयो दोषा उद्गमदोषाः, तथा **षोडशोत्पादनादोषा** उत्पादनमुत्पादना मूलतः शुद्धस्यापि पिण्डस्य धात्रीत्वादिभिः प्रकारैरुपार्जनं तद्विषया दोषा उत्पादनादोषाः, तथा **दशैषणादोषा** एषणमेषणा अशनादेर्ग्रहणकाले शङ्कितादिभिः प्रकारैरन्वेषणं तद्विषया दोषा एषणादोषाः, एते **चेह** त्रयोऽपि मिलिता **द्विचत्वारिंशद्भवन्ति** ।।५६३।।

चक्रे० : तत्र तावदुद्गमदोषानाहुः –

देव० : तत्र तावदुद्गमदोषानाह –

आहाकम्मुद्देसिय पूईकम्मे य मीसजाए य ।
ठवणा पाहुडियाए पाओयर कीय पामिच्चे।।१२०।।
परियट्टिए [१]अभिहडे उब्भिन्ने मालोहडे इय ।
अच्छिज्जे [२]अणिसट्ठे अज्झोयरए य सोलसमे।।१२१।।

चक्रे० : १-आधाय संकल्प्य यतिं यत्कर्म षट्कायाऽऽरम्भेण पचनपाचनादिकरणं तन्निरुक्ता**दाधाकर्म**।

२-यत् पूर्वकृतमोदनमोदकक्षोदादि साधूनामुद्देशेन दध्यादिना गुडपाकेन च संस्कृतं त**दौद्देशिकम्** ।

३-अशुचिलवेनेवाऽऽधाकर्म्माद्यंशेनाऽपि विशुद्धस्याप्यन्नादेः पूतेरपवित्रस्य करणं **पूतिकर्म**।

४-यत् स्वार्थं साध्वर्थं चाऽऽदित एवारभ्य मिश्रमेव जातं त**न्मिश्रजातम्** ।

५-साध्वर्थं कञ्चित्कालं क्षीरादेः स्थापनं **स्थापना**।

---

१. अभिहडुब्भिन्ने A,P,K २. अणिसिट्ठे A

६-प्राभृतं ढौकनं तदेवाल्पं प्राभृतिका, आगमिष्यन्त्यागता वा गुरव इति गुरूणां विशिष्टाशनाद्युपयोगार्थं परतः करणाऽर्वाक्करणादिना विवाहाद्युत्सव एव बादरः **प्राभृतिका** ।

७-तमःस्थस्याहारस्य साध्वर्थं बहिः स्थापनेन गवाक्षादिना वा प्रकाशकरणं **प्रादुष्कारः**।

८-साध्वर्थं मूल्येन क्रीयते स्म **क्रीतम्**।

९-'मेङ् प्रतिदाने' प्रमाणं प्रमितं प्रमिते साधुयोग्यं प्रमित्यं प्रतिदानयोग्यमुच्छिन्नं गृहीतमित्यर्थः, ततः साध्वर्थमुच्छिन्नं गृहीत्वा यद्दत्ते तत् **प्रामित्यं** नाम दोषः।

१०-यच्छाल्यादि कोद्रवादिनाऽन्यस्मात् परावृत्त्य दत्ते तत् **परावर्त्तितम्**।

११-स्वपरग्रामादेः साध्वर्थमानीत**मभिहृतम्**।

१२-साध्वर्थं कुतुपादेः पिधानमृत्तिकामुद्भिद्य अव्यापारकपटादुद्घाट्य वा यद्दत्ते त**दुद्भिन्नम्**।

१३-मालादपहृतं दुर्ग्राह्योपलक्षणं चैतत् तेन शिक्यादेर्भूमिगृहाद् वा साध्वर्थमानीतं **मालापहृतम्**।

१४-यदाच्छिद्य परकीयं पुत्रकलत्रादिसत्कं वा हठेनादाय स्वाम्यादिर्दत्ते त**दाच्छेद्यम्**।

१५-यदन्याननुमतं बहुजनार्थराद्धादेको दत्ते त**दनिसृष्टम्**।

१६-स्वार्थमधिश्रयणादौ साध्वागमश्रवणात् तदर्थं योऽध्यवपूरोऽधिकधान्यक्षेपः सोऽ**ध्यवपूरकः षोडशः** ।

एत उद्गमदोषाः । उद्गमे पिण्डोत्पत्तौ दोषाः साध्वर्थं गृहिणा क्रियमाणत्वादिति गाथाद्वयसङ्क्षेपार्थः ।।१२०, १२१।।

देव० : १-आधाय विकल्प्य यतिं मनसि कृत्वा सचित्तस्याचित्तीकरणमचित्तस्य वा पाको निरुक्ता**दाधाकर्म** ।

२-उद्देशः साध्वर्थं सङ्कल्पः, स प्रयोजनमस्ये**त्यौद्देशिकम्,** यत्पूर्वकृतमोदनमोदकक्षोदादि तत्साधूद्देशेन दध्यादिना गुडपाकेन च संस्कुर्वतो भवति ।

३-**पूत्य**वित्रं तस्य **कर्म,** शुद्धस्याप्याधाकर्मिकावयवेन सन्मिश्रीकरणं शुचिद्रव्यस्यैवाशुचिद्रव्येण, अत्रैकारान्तशब्दः प्रथमैकवचनान्तो द्रष्टव्यः, **चः** समुच्चये।

४-यदात्मार्थं साध्वर्थं चादित एव मिश्रं जातं पाकभावमुपगतं त**न्मिश्रजातम्**।

५-साधुदानार्थं किञ्चित्कालं क्षीरादेः स्थापनं **स्थापना**।

६-कालान्तरभाविनो विवाहादेः 'इदानीं सन्निहिताः साधवः सन्ति, तेषामप्युपयोगो भवतु' इति बुद्ध्या इदानीमेव करणम्, समयपरिभाषया **प्राभृतिका** सन्निकृष्टस्य वा विवाहादेः कालान्तरे साधुसमागमं सञ्चिन्त्योत्कर्षणं वा, एकारः[१] पादपूरणे।

७-अन्धकारव्यवस्थितस्य द्रव्यस्य वह्निप्रदीपमण्यादिना भित्त्यपनयनेन वा बहिर्निष्कास्य द्रव्यधारणेन वा प्रकटकरणं **प्रादुष्कारः,** ह्रस्वता छन्दोवशात्।

८-साध्वर्थं मूल्येन क्रीयते स्मेति **क्रीतम्** ।

९-साध्वर्थमुद्यतकं गृहीत्वा यदन्नादि दीयते त**त्प्रामित्यकमि**ह च क्वचिद्विभक्तिलोपः प्राकृतत्वादिति ।

१०-तथा स्वद्रव्यमर्पयित्वा परद्रव्यं तत्सदृशं गृहीत्वा यद्दीयते त**त्परिवर्त्तितम्**।

११-गृहग्रामादेः साध्वर्थमानीत**मभिहतम्**।

१२-कुतुपादिंस्थस्य घृतादेर्दानार्थं यन्मृत्तिकाद्यपनयनं त**दुद्भिन्नम्**।

१३-मालात्प्रसिद्धाद्, उपलक्षणं चैतद्दुर्ग्राह्यतायास्तेन शिक्यादेर्भूमिगृहाद्वाऽपहृतमानीतं साधुदानाय **मालापहृतम्, इति**र्वाक्यसमाप्तौ ।

१४-यदाच्छिद्य परकीयं हठाद् गृहीत्वा स्वामी प्रभुश्चौरो वा ददाति त**दाच्छेद्यम्**।

१५-यद् गोष्ठीभक्तादि सर्वैरदत्तमननुमतं वैकः कश्चिद्ददाति **तदनिसृष्टम्**।

१६-स्वार्थमधिश्रयणे सति साधुसमागमश्रवणात्तदर्थं पुनर्यो धान्यावापः सोऽ**ध्यवपूरकः, चः** समुच्चये ।

षोडशोद्गमदोषा इति प्रकृतमिह च दोषप्रक्रमेऽपि क्वचिद्दोषवतोऽभिधानम्, तयोरभेदविवक्षणादेवमुत्तरत्राप्यवसेयमेते च गृहस्थसम्भवाः साध्वर्थं तेन विधीयमानत्वादितिगाथाद्वयसमासार्थः ।।१२०, १२१।।

**** पिण्डनिर्युक्तौ-९२,९३ ****

आहाकम्मुद्देसिय पूईकम्मे य मीसजाए य ।
ठवणा पाहुडियाए पाओअर कीय पामिच्चे ।।

---

१. तस्य चैकारः छन्दोऽर्थः । T,B,C

परियट्टिए अभिहडे उब्भिन्ने मालोहडे इय ।
अच्छिज्जे अणिसट्ठे अज्झोयरए य सोलसमे ।।

'**आधाकर्म्मेति**' १-आधानं–आधा 'उपसर्गादात' इत्यङ् प्रत्ययः, साधुनिमित्तं चेतसः प्रणिधानम्, यथाऽमुकस्य साधोः कारणेन मया भक्तादि पचनीयमिति, आधया कर्म पाकादिक्रिया आधाकर्म्म तद्योगाद् भक्ताद्यप्याधाकर्म, इह दोषाभिधानप्रक्रमेऽपि यद्दोषवतोऽभिधानं तद्दोषदोषवतोरभेदविवक्षया द्रष्टव्यम्, यद्वा–आधाय साधुं चेतसि प्रणिधाय यत्क्रियते भक्तादि तदाधाकर्म, पृषोदरादित्वाद् यलोपः, तथा २-उद्देशम् उद्देशः यावदर्थिकादिप्रणिधानं तेन निर्वृत्तमौद्देशिकम्, तथा ३-उद्गमदोषरहिततया स्वतः पवित्रस्य सतो भक्तादेरन्यस्याविशुद्धकोटिकभक्तादेरवयवेन सह सम्पर्कतः पूतेः पूतीभूतस्य कर्म करणं पूतिकर्म्म तद्योगाद्भक्ताद्यपि **पूतिकर्म्म**, तथा ४-मिश्रेण कुटुम्बप्रणिधानसाधुप्रणिधानमीलनरूपेण भावेन जातं यद् भक्तादि त**न्मिश्रजातम्**, तथा ५-स्थाप्यते साधुनिमित्तं कियन्तं कालं यावन्निधीयत इति स्थापना, यद्वा स्थापनं साधुभ्यो देयमिति बुद्ध्या देयवस्तुनः कियन्तं कालं व्यवस्थापनं स्थापना, तद्योगाद्देयमपि **स्थापना**, तथा ६-कस्मैचिदिष्टाय पूज्याय वा बहुमानपुरस्सरीकारेण यदभीष्टं वस्तु दीयते तत्प्राभृतमुच्यते, ततः प्राभृतमिव प्राभृतं साधुभ्यो भिक्षादिकं देयं वस्तु, प्राभृतमेव प्राभृतिका, 'अतिवर्त्तन्ते स्वार्थे प्रत्ययकाः प्रकृतिलिङ्गवचनानी'ति वचनात् पूर्वं नपुंसकत्वेऽपि कप्रत्यये समानीते सति स्त्रीत्वम्, यद्वा प्र इति प्रकर्षेण आ इति साधुदानलक्षणमर्यादया भृता निर्वर्त्तिता यका भिक्षा सा प्राभृता, ततः स्वार्थिककप्रत्ययविधानात् **प्राभृतिका,** तथा ७-साधुनिमित्तं मण्यादिस्थापनेन भित्ताद्यपनयनेन वा प्रादुः प्रकटत्वेन देयस्य वस्तुनः करणं प्रादुष्करणं तद्योगाद्भक्ताद्यपि **प्रादुष्करणम्,** यद्वा प्रादुः प्रकटं करणं यस्य तत् प्रादुष्करणम्, तथा ८-**क्रीतं** यत्साध्वर्थं मूल्येन परिगृहीतम्, तथा ९-'**पामिच्चे**' इति अपमित्य भूयोऽपि तव दास्यामीत्येवमभिधाय यत् साधुनिमित्तमुच्छिन्नं गृह्यते तदपमित्यम्, इह यदपमित्य गृह्यते तदप्युपचारादपमित्यमित्युक्तंम्, तथा १०-**परिवर्त्तितं** यत्साधुनिमित्तं कृतपरावर्तम्, तथा ११-**अभिहृतं** यत्साधुदानाय स्वग्रामात्परग्रामाद्वा समानीतम्, अभि साध्वभिमुखं हृतं स्थानान्तरादानीतमभिहृतमिति व्युत्पत्तेः, तथा १२-उद्भेदनमुद्भिन्नं साधुभ्यो घृतादिदाननिमित्तं कुतुपादेर्मुखस्य गोमयादिस्थगितस्योद्घाटनं तद्योगाद्देयमपि घृता**द्युद्भिन्नम्**, तथा १३-मालाद् मञ्चादेरपहृतं साध्वर्थमानीतं यद्भक्तादि त**न्मालापहृतम्**, तथा १४-आच्छिद्यत अनिच्छतोऽपि भृतकपुत्रादेः सकाशात्साधुदानाय परिगृह्यते यत् त**दाच्छेद्यम्**, तथा १५-न निसृष्टं सर्वैः स्वामिभिः साधुदानार्थमनुज्ञातं यत् त**दनिसृष्टम्**, तथा १६-अधि आधिक्येनावपूरणं स्वार्थदत्ताद्ग्रहणादेः साध्वागमनमवगम्य तद्योग्यभक्तसिद्ध्यर्थं प्राचुर्येण भरणमध्यवपूरः, स एव स्वार्थिककप्रत्ययविधानादध्यवपूरकस्तद्योगाद्भक्ताद्य**प्यध्यवपूरकः, षोडशोद्**गमदोषाः ।।९२, ९३।।

** पञ्चाशके-१३/५,६ **

अथ तानेवाह –

आहाकम्मुद्देसिय पूतिकम्मे य मीसजाए य ।
ठवणा पाहुडिया य पाओयर कीअ पामिच्चे ।।
परियट्टिए अभिहडे उब्भिण्णे मालोहडे इय ।
अच्छेज्जे अणिसट्ठे अज्झोयरए य सोलसमे ।।

आधानमाधा प्रणिधानं तया साधुप्रणिधानेनेत्यर्थः, कर्म क्रिया पाकादिकेत्याधाकर्म इत्येक उद्गमदोषः, तद्योगाद्भक्ताद्यप्याधाकर्म । तथोद्देशनमुद्देशो यावदर्थिकादिप्रणिधानमित्युद्गमदोषः, तेनोद्देशेन निर्वृत्तं तत्प्रयोजनं वा **औद्देशिकं** भक्तादि । इह दोषप्रकमेऽपि यद्दोषवतोऽभिधानं तद् दोषदोषवतोरभेद-विवक्षणात्, एवं सर्वत्र । अनुस्वारस्य चाश्रयणमत्र प्राकृतवशात् । तथा पूत्यपवित्रं, तस्य कर्म पवित्रस्य सतोऽपवित्रभक्तादिमीलनेन करणं **पूतिकर्म,** तद्योगाद्भक्ताद्यपि पूतिकर्म। एकारान्तोऽत्र शब्दः प्रथमैकवचनान्तो दृश्यः, **च**शब्दः समुच्चये । तथा मिश्रेण गृहिसाध्वादिप्रणिधानलक्षणभावेन जातमुत्पन्नं पाकादिभावमुपगतं **मिश्रजातमन्नाद्येव, च**शब्दस्तथैव । तथा स्थाप्यते साधुदानाय कञ्चित्कालं यावन्निधीयत इति **स्थापना,** स्थापनाधर्मयोगाद्वा स्थापना भक्ताद्येव । तथा 'प्र' इति विवक्षितकालात्प्रथमतः, 'आ' इति साध्वागमनलक्षणमर्यादया च 'भृता' धारिता यका भिक्षा, सा स्वार्थिकप्रत्ययोपादानात् प्राभृतिकाऽ-थवा प्राभृतं कौशलिकम्, तदेवोपचारसाधर्म्याद्यका भिक्षा सा **प्राभृतिके**ति। **चः** समुच्चये, तस्य च दीर्घता छन्दोऽर्था। तथा प्रादुःशब्दः प्रकाशार्थः, तस्य करणं **प्रादुष्कारः,** तद्विशेषितं भक्ताद्यपि स एव । इह ह्रस्वता छन्दोऽर्था । तथा क्रीयते स्म अर्थदानेन गृह्यते स्मेति **क्रीतं** भक्तादि । तथाऽपमित्यं पुनः दास्याम्येतत्तवेत्यभिधाय यद्गृहीतं तदपमित्यकमुच्छिन्नं भक्ताद्येव । **'पामिच्चं'** इति चनिर्देशः प्राकृतत्वात्। इह च पदत्रये समाहारद्वन्द्वः, लुप्तप्रथमैकवचनं वा आद्यं पदद्वयमिति ।

तथा **परिवर्तितं** कृतपरावर्तम् । तथा अभि साध्वभिमुखं हृतमानीतं स्थानान्तरादभिहृत**मभ्याहृतमि**त्यर्थः। तथोद्भिन्नमुद्भेदनं कुशूलादेः, तद्योगाद्भक्ताद्य**प्युद्भिन्नम्** । तथा मालाद् मञ्चात्, प्रासादोपरितनभागाद्वा, अपहृतमानीतं साधवे दानायेति **मालापहृतम्। इति**रुपप्रदर्शने, **चः** समुच्चये, अयमप्युद्गमदोष इत्यर्थः । तथाऽऽच्छिद्यते पुत्रादेः सकाशाद् यत् साधुदानार्थं **तदाच्छेद्यम्** । तथा न निसृष्टं सर्वस्वामिभिर्नानुज्ञातं साधुदानाय **तदनिसृष्टम्** । तथाऽधिक्येनावपूरणमध्यवपूरः, स एवाध्यवपूरकस्तद्योगाद्भक्ताद्य**प्यध्यवपूरकः, च**ः समुच्चये । **षोडशो**द्गमदोषा भवन्ति । इति गाथाद्वयपदसंस्कारः ।।५, ६।।

चक्रे० : अथोत्पादनादोषानाहुः –

देव० : अथोत्पादनादोषानाह –

धाई दूइ निमित्ते आजीव वणीमगे तिगिच्छा य ।
कोहे माणे माया लोभे हवंति दस एए ।।१२२।।

पुव्विंपच्छासंथव विज्जामंते य चुन्नजोगे य ।
उप्पायणाए दोसा सोलसमे मूलकम्मे य ।।१२३।।

चक्रे० : १-भिक्षार्थं दातुरपत्ये क्रीडनादिकं धात्रीकर्म कुर्वतो यते**र्धात्री**पिण्डः।

२-मिथः स्वपरग्रामेषु प्रकटं छन्नं वा संदेशाऽऽख्यानं दौत्यम्, तेन लब्धो **दूती**पिण्डः।

३-निमित्तेन लाभाऽलाभादिकथनेनाऽवाप्तो **निमित्त**पिण्डः।

४-आजीवनार्थं दातुर्जात्यादेरात्मन्यारोपाल्लब्ध **आजीव**पिण्डः।

५-'वनु याचने' वन्यतेऽसाविति वनी-भिक्षा वन्या पायते रक्ष्यते वनीपः स एव **वनीपको** भिक्षाचरस्तद्वत् साधुना भिक्षार्थं दातुर्यत्र भक्तिः स्वस्यापि तद्भक्तदर्शनादाप्तो वनीपकपिण्डः ।

६-चिकित्सया वैद्यकेन वैद्यादिसूचया वा प्राप्त**श्चिकित्सा**पिण्डः।

७-१० क्रोधमानमायालोभैः प्राप्ताः **क्रोधा**दिपिण्डाः।

११-दानात् पूर्वं पश्चाद् वा संस्तवेन दातुः स्तुत्या स्वाजन्यसम्बन्धघटनया वा यद् वा पूर्वस्य जननीजनकादिविषयस्य, पश्चात् श्वश्रूश्वशुरादिविषयस्य नात्रकस्य घटनेन प्राप्तः **पूर्वपश्चात्-संस्तव**पिण्डः।

१२-**विद्यामन्त्रचूर्णयोगै**राप्ता विद्यादिपिण्डास्तत्र होमादिसाध्या विद्या।

१३-पाठसिद्धो मन्त्रः।

१४-चूर्णमञ्जनादिकम्।

१५-योगाः पादप्रलेपाद्याः। **उत्पादनायां** पिण्डोपार्जने लुब्धेन साधुना क्रियमाणे **दोषाः** ।

१६- **षोडश** पुनर्यतो गर्भस्तम्भगर्भाधानादेर्मूलप्रायश्चित्तमवाप्यते, तस्य कर्मव्यापारः, तद्विधानादाप्तो **मूलकर्म**पिण्डः ।।१२२, १२३।।

देव० : १-बालस्य क्षीरमज्जनमण्डनक्रीडनाङ्कारोपणकर्मकारिण्यः पञ्चधात्र्यः, एतासां कर्म भिक्षार्थं कुर्वतो मुने**र्धात्री**पिण्डः।

२-मिथः सन्देशकथनं दूतीत्वम्, तत्कुर्वतो भिक्षार्थं **दूती**पिण्डः।

३-अतीतानागतवर्तमानकालेषु लाभालाभादिकथनं निमित्तम्, तद्भिक्षार्थं कुर्वतो **निमित्त**पिण्डः।

४-जातिकुलगणकर्मशिल्पादिप्रधानेभ्य आत्मनस्तद्गुणत्वारोपणं भिक्षार्थ**माजीव**पिण्डः।

५-श्रमणब्राह्मणकृपणातिथिश्वानादिभक्तानां पुरतः पिण्डार्थमात्मानं तत्तद्भक्तं दर्शयतो **वनीपक**पिण्डः।

६-वमनविरेचनबस्तिकर्मादि कारयतो वैद्यभैषज्यादि वा सूचयतः पिण्डार्थं **चिकित्सा**पिण्डः।

७-विद्यातपःप्रभावज्ञापनं राजपूजादिख्यापनं क्रोधफलदर्शनं वा भिक्षार्थं कुर्वतः **क्रोध**पिण्डः।

८-लब्धिप्रशंसोत्तानस्य परेणोत्साहितस्यावमतस्य वा गृहस्थाभिमानमुत्पादयतो **मान**पिण्डः।

९-नानावेषभाषापरिवर्त्तनं भिक्षार्थं कुर्वतो **माया**पिण्डः।

१०-अतिलोभाद् भिक्षार्थं बहु पर्यटतो **लोभ**पिण्डः । भवन्ति स्यु**र्दशैते**ऽनन्तरोक्ता उत्पादनादोषा इति योगः ।

११-तथा पूर्वसंस्तवं जननीजनकादिद्वारेण, पश्चात्संस्तवं श्वश्रूश्वशुरादिद्वारेणात्मपरवयोऽनुरूपं सम्बन्धं भिक्षार्थं घटयतः **पूर्वपश्चात्संस्तव**पिण्डः।

१२-**विद्यां मन्त्रं चूर्णं योगं च** भिक्षार्थं प्रयुञ्जानस्य चत्वारो विद्यादिपिण्डास्तत्र जपहोमादिसाध्या स्त्रीदेवताधिष्ठाना वा विद्या।

१३-पाठमात्रसिद्धः पुरुषाधिष्ठानो वा मन्त्रः।

१४-चूर्णानि नयनाञ्जनादीन्यन्तर्धानादिफलानि।

१५-पादप्रलेपादयः सौभाग्यदौर्भाग्यकरा योगाः। चशब्दौ समुच्चयार्थौ, **उत्पादनायाः** पिण्डोपार्जनस्य **दोषा** दूषणान्येते पञ्चदश ।

१६-**षोडशः** पुनर्गर्भस्तम्भगर्भाधानप्रसवस्नपनमूलरक्षाबन्धनादि भिक्षार्थं कुर्वतो **मूलकर्मपिण्डः**।

चः पुनरर्थः प्रयुक्त **एवैते** च साधुप्रभवा आहारलुब्धेन तेन क्रियमाणत्वादिति गाथाद्वय-समासार्थः ।।१२२, १२३।।

* *पिण्डनिर्युक्तौ*-४०८, ४०९ *

सा च षोडशभेदा, ततस्तानेव षोडशभेदान् गाथाद्वयेनाह –

धाई दूइ निमित्ते आजीव वणीमगे तिगिच्छा य ।
कोहे माणे माया लोभे य हवंति दस एए ।।
पुव्विं पच्छासंथव विज्जा मंते य चुन्न जोगे य ।
उप्पायणाइ दोसा सोलसमे मूलकम्मे य ।।

धात्री बालकपरिपालिका, इह धात्रीत्वस्य यत्करणं कारणं वा तद्धात्रीशब्देनोक्तं द्रष्टव्यम्, तथा विवक्षणात्, एवं दूत्यपि भावनीया, नवरं **दूती** परसन्दिष्टार्थकथिका । **निमित्तम**तीताद्यर्थपरिज्ञानहेतुः शुभाशुभचेष्टादि, तथा चामुमेव निमित्तशब्दवाच्यमर्थमङ्गीकृत्य पूर्वसूरयो निमित्तशब्दस्य नैरुक्ति-शब्दव्युत्पत्तिमेवमाचक्षते, नियतमिन्द्रियेभ्य इन्द्रियार्थेभ्यः समाधानं चात्मनः समाश्रित्य यस्मादुत्पद्यते शुभाशुभातीताद्यर्थपरिज्ञानं तस्मात्तदिन्द्रियार्थादि निमित्तमिति, उक्तं चाङ्गविद्यायाम् –

इंदिएहिंदियत्थेहिं समाहाणं च अप्पणो । नाणं पवत्तए जम्हा निमित्तं तेण आहियं ।।

तच्चाङ्गादिभेदादष्टधा, तदुक्तम् –

अंगं सरो लक्खणं (च) वंजणं सुविणो तहा । छिन्नं भोमंतलिक्खा य एमेए (एए) अट्ठ वियाहिया ।।
एए महानिमित्ता उ अट्ठ संपरिकित्तिया । एएहिं भावा नज्जंती तीतानागयसंपया।।

निमित्तहेतुकं च यद् ज्ञानं तदप्युपचारान्निमित्तं तदेवेहाधिकृतम्, तथा चाङ्गादिनिमित्तहेतुकं ज्ञानमेव प्रयुञ्जानो यतिर्दोषवानग्रे वक्ष्यते । **आजीव** आजीविका । **वनीपको** भिक्षाचरस्तस्येव यत्समाचरणं तदपि वनीपकः । शब्दव्युत्पत्तिं च स्वयमेवाग्रे वक्ष्यति, **चिकित्सा** रोगप्रतिकारः । **क्रोधमानमायालोभाः** प्रतीताः । **पूर्वसंस्तवो** मात्रादिकल्पनया परिचयकरणम् । **पश्चात्संस्तवः** श्वश्र्वादिकल्पनया परिचयकरणम् । **विद्या** स्त्रीरूपदेवताधिष्ठिता ससाधना वाऽक्षरविशेषपद्धतिः । सैव पुरुषदेवताधिष्ठिता असाधना वा **मन्त्रः** । **चूर्णः** सौभाग्यादिजनको द्रव्यक्षोदः । **योग** आकाशगमनादिफलो द्रव्यसङ्घातः । एतेऽनन्तरोक्ता **उत्पादनाया दोषाः, षोडश** दोषो **मूलकर्म** वशीकरणम् । इह धात्र्या पिण्डः–धात्रीपिण्डः, किमुक्तं भवति? धात्रीत्वस्य करणेन कारणेन च य उत्पाद्यते पिण्डः स धात्रीपिण्डः । यस्तु दूतीत्वस्य करणेनोत्पाद्यते स दूतीपिण्डः । एवं निमित्तादिष्वपि भावनीयम् ।।४०८, ४०९।।

* *पञ्चाशके*-१३/१८, १९ *पिण्डविशुद्धिप्रकरणे*-५८, ५९ *

तानेव नामतो दर्शयन्नाह –

धाती दूति णिमित्ते आजीव वणीमगे तिगिच्छा य ।
कोहे माणे माया लोभे य हवंति दस एते ।।

पुव्विंपच्छासंथव विज्जा मंते य चुण्ण जोगे य ।
उप्पायणयाए दोसा सोलसमे मूलकम्मे य ।।

धयन्ति पिबन्ति तामिति **धात्री**, सा च रूढ्या क्षीरमज्जनमण्डनक्रीडनाङ्कभेदात्पञ्चधा, इह च दोषशब्दसामानाधिकरण्याद्धात्रीति निर्देशेऽपि धात्रीत्वकरणमिति द्रष्टव्यम् । पदे पदसमुदायोपचारात्, एवमन्यत्रापि । तथा **दूती** परस्परस्य संदिष्टार्थाभिधायिका स्त्री । **निमित्तमिति** निमित्तकरणम्, अतीत-वर्तमानानागतार्थसंसूचनम् । तथा आजीवो जातिकुलगणकर्मशिल्पानां गृहस्थसमानानामभिधानत उपजीवन**माजीवः** । तथा **वनीपक** इति वनीपकत्वकरणम्, तत्र वनीं दायकाभिमतजनप्रशंसोपायतो लब्धार्थरूपां पाति पालयतीति वनीपः, स एव वनीपकः । **चिकित्सा** रोगप्रतीकारः । **च**शब्दः समुच्चये । **क्रोधः** कोपः, **मानो** गर्वः, **माया** वञ्चना, **लोभश्च** लुब्धता **भवन्ति** स्युः **दशैते**ऽनन्तरोक्ता उत्पादना दोषा इति योगः ।

तथा पूर्वं दानात्प्राक् पश्चाच्च संस्तवो दातुः श्लाघा **पूर्वपश्चात्संस्तवः** । तथा **विद्या** देवताधिष्ठितः ससाधनो वाऽक्षरानुपूर्वीविशेषः, इह च विद्येत्युपादानेऽपि विद्याप्रयोग इति द्रष्टव्यम् । एवं मन्त्रादि-पदत्रयेऽपि, नवरं **मन्त्रो** देवाधिष्ठितोऽसाधनो वाऽक्षररचनाविशेषः । **चूर्णः** पादलेपादियोग्य आकाशगमनादिफलो द्रव्यचूर्णः । **योग**स्तु वशीकरणादिफलो द्रव्यसंयोगः । **च**शब्दौ समुच्चयार्थौ । **उत्पादनाया दोषाः** पिण्डोपार्जनस्य दूषणानि एते पञ्चदश । **षोडशश्च** षोडशः पुनः मूलमष्टमप्रायश्चित्तं तत्प्राप्तिनिबन्धनं कर्म व्यापारो गर्भपातादि, मूलानां वा वनस्पत्यवयवविशेषाणां कर्म **मूलकर्म** । **च**शब्दः पुनरर्थः, तत्प्रयोगश्च दर्शित एवेति गाथाद्वयसमासार्थः ।।१८, १९।।

चक्रे० : अथैषणादोषानाहुः –

देव० : अथैषणादोषानाह –

संकिय मक्खिय निक्खित्त पिहिय साहरिय दायगुम्मीसे ।
अपरिणय लित्त छड्डिय एसणदोसा दस हवंति ।।१२४।।

चक्रे० : १-**शङ्कितमा**धाकर्मादिना।

२-पृथ्व्यादिना म्रक्षिताभ्यां करमात्रकाभ्यां दीयमानं **म्रक्षितम्**।

३-**निक्षिप्तं** पृथ्वीकायादौ।

४-**पिहितं** सचित्तफलादिना।

५-दानभाजनस्थमयोग्यं सचित्ते पृथ्व्यादौ निक्षिप्य तेनैव ददतः **संहतम्**।

६-अन्धादि**दायको**ऽयोग्यस्ततोऽन्नाद्यादातुं यतेर्न कल्पते।

७-सचित्तमिश्र**मुन्मिश्रम्**।

८-न सम्यगचित्तीभूत**मपरिणतम्** ।

९-**लिप्तं** दध्यादिलेपभाक्, किलैतदपि कारणं विना न ग्राह्यम्, यदाह –

घित्तव्वमलेवकडं लेवकडेमाहु पच्छकम्माई ।

करमात्रकक्षालनादिकम्, अलेपवतो गुणमाह -

न य रसगेहिं पसंगो न य भुत्ते बंभपीडा य ।। [ ]

१०-घृतादि छर्दयन् यद्ददाति **तच्छर्दितम्**।

एषणादोषा गृहिसाधुप्रभवा एते **दश भवन्ति** । सर्वमेलने च द्वाचत्वारिंशदिति।।१२४।।

देव० : १-आधाकर्मादिशङ्काकलुषितो यदन्नाद्यादत्ते तत् **शङ्कितम्,** यं च दोषं शङ्कते तमापद्यते।

२-**म्रक्षितं** पृथिव्यादिना सचेतनेन सुराशुच्यादिना वाऽचेतनेनापि गर्हितेनारूषितं करादि, तेन दीयमानं भक्ताद्यपि तथोच्यते।

३-**निक्षिप्तं** पृथिव्युदकतेजोवायुवनस्पतिषु त्रसेषु च यदचित्तमपि स्थापितम्।

४-**पिहितं** स्थगितं सचेतनफलादिना।

५-दानभाजनस्थमयोग्यं सचित्तेषु पृथिव्यादिषु निक्षिप्य तेनैव भाजनेन ददतः **संहृतम्** ।

६-बालवृद्धपण्डकवेपमानज्वरितान्धाव्यक्तमत्तोन्मत्तकरचरणनिगडितपादुकारूढकण्डकपेषकभर्जककर्तकालोठकविङ्खकपिञ्जकदलकव्यालोडकभोजकषट्कायविराधका दातृत्वेन प्रतिषिद्धा यावत् स्त्री वेलामासवती गृहीतबाला बालवत्सा वा, एभ्योऽन्नादि ग्रहीतुं साधोर्न कल्पते।

७-देयद्रव्यं खण्डादि सचित्तेन कणादिना मिश्रं ददत **उन्मिश्रम्** ।

८-देयद्रव्यं मिश्रमचित्तत्वेनापरिणम**दपरिणतम्**।

९-**लिप्तं**[1] लेपवद्दध्यादि किलैतदपि कारणं विना न ग्राह्यम्, यदाह –

घित्तव्वमलेवकडं लेवकडेमाहु पच्छकम्माई । अलेपवतो गुणमाह –

न य रसगेहिं पसंगो न य भुत्ते बंभपीडा य। [ ]

१. लिप्तं द्रव्यादिलेपवत् T,B,C

१०-घृतादि छर्दयन् यद्ददाति **तच्छर्दितम्,** छर्दमाने घृतादौ तत्रस्थस्यागन्तुकस्य वा सर्वस्य जन्तोर्मधुबिन्दूदाहरणेन विराधनासम्भवात्।

एतेषु च प्रथमैकवचनान्तता सर्वत्र द्रष्टव्या । **एषणादोषा** एते **दश भवन्ति** । एते गृहिसाधु-प्रभवास्तथैव सम्भवात्, तथेहानुक्ता अपि पञ्च ग्रासैषणादोषाः शिष्यहितायाभिधीयन्ते–संयोजना, प्रमाणातिरिक्तता, अङ्गारः, धूमः, कारणाभावश्च ।

१-तत्र रसलोभाद् द्रव्यस्य मण्डकादेर्द्रव्यान्तरेण खण्डादिना वसतेर्बहिरन्तर्वा योजनं संयोजना।

२-धृतिबलसंयमयोगा यावता न सीदन्ति तावदाहारप्रमाणम्, अधिकाहारस्तु वमनाय मृत्यवे व्याधये वेति तत्परिहारात् प्रमाणातिरिक्ततादोषः।

३-स्वाद्वन्नं तद्दातारं वा प्रशंसन् यद्भुङ्क्ते स रागाग्निना चारित्रेन्धनस्याङ्गारीकरणादङ्गारदोषः।

४-निन्दन् पुनश्चारित्रेन्धनं दहनधूमकरणाद्धूमदोषः।

५-क्षुद्वेदनाया असहनम्, क्षामस्य च वैयावृत्त्याकरणम्, ईर्यासमितेरशुद्धिः, प्रेक्षोपेक्षादेः संयमस्य चाऽपालनम्, क्षुदातुरस्य प्रबलाग्न्युदयात् प्राणप्रहाणशङ्का, आर्तरौद्रपरिहारेण धर्मध्यान[1]-स्थिरीकरणं चेति भोजनकारणानि, तदभावे भुञ्जानस्य कारणाभावो दोषः।

एवं सर्वमीलने सप्तचत्वारिंशद्भवन्ति । एतद्विषयविभागप्रतिभेदादिविस्तरार्थिना पिण्ड-निर्युक्त्याद्यन्वेषणं विधेयम्, इह तु ग्रन्थगौरवभयान्न प्रतन्यत इति गाथार्थः ।।१२४।।

**** पिण्डनिर्युक्तौ-५२० ****

ततस्तानेव शङ्कितादीन् भेदान् प्रदर्शयति –

संकिय मक्खिय निक्खित्त पिहिय साहरिय दायगुम्मीसे ।
अपरिणय लित्त छड्डिय एसणदोसा दस हवंति ।।

शङ्कितं सम्भाविताधाकर्मादिदोषम्, **म्रक्षिप्तं** सचित्तपृथिव्यादिनाऽवगुण्डितम्, **निक्षिप्तं** सचित्तस्योपरि स्थापितम्, **पिहितं** सचित्तेन स्थगितम्, **संहृतमन्यत्र** क्षिप्तम्, **दायकं** दायकदोषदुष्टम्, **उन्मिश्रितं** पुष्पादिसम्मिश्रम्, **अपरिणतम**प्रासुकीभूतम्, **लिप्तम्, छर्दितं** भूमावावेडितम्, एते **दशैषणादोषा भवन्ति** ।।५२०।

---

१. धर्मध्यानास्थिरीकरणं T,A,C

** पञ्चाशके-१३/२६, पिण्डविशुद्धिप्रकरणे-७७ **

अथ तानेव नामतो दर्शयन्नाह –

संकिय मक्खिय णिक्खित्त पिहिय साहरिय दायगुम्मीसे ।
अपरिणय लित्त छड्डिय एसणदोसा दस हवंति ।।

शङ्कितं सम्भाविताधाकर्मादिदोषं भक्तादि । इह च प्रथमैकवचनान्तता सर्वत्र दृश्या । तथा दोषवतो निर्देशेऽपि दोषदोषवतोरभेदात् शङ्कारूप एषणादोष उक्तोऽवसेयः, तस्यैव विवक्षितत्वात्, एवं सर्वत्र। **म्रक्षितमा**रूषितम्, **निक्षिप्तं** न्यस्तम्, **पिहितं** स्थगितम्, **संहृत**मन्यत्र क्षिप्तम्, **दायको** दाता, **उन्मिश्रं** मिश्रीकृतम्, **अपरिणतं** सचेतनम्, **लिप्तं** खरण्टितम्, **छर्दितं** परिशाटितमित्येवमेत **एषणादोषाः** पिण्डग्रहणदूषणानि **दश भवन्ति** स्युः । इति गाथासमासार्थः ।।२६।।

चक्रे० : एतद्दोषविशुद्धस्यैव पिण्डस्य ग्राह्यताम्, तद्विशुद्धिविषये विशेषं चाहुः –

देव० : उक्तदोषविशुद्धस्यैव पिण्डस्य ग्राह्यताम्, तद्विशुद्धिविषये विशेषं चाह –

एयद्दोसविमुक्को जईण पिंडो जिणेहिं ऽणुन्नाओ ।
सेसकिरियाठियाणं एसो पुण तत्तओ नेओ।।१२५।।

चक्रे० : एतैरुक्तैर्दोषैर्विमुक्तो यतीनां पिण्डो जिनैरनुज्ञातः । पिण्डशुद्धेरुत्तरगुणत्वा-**च्छेषक्रियास्थितानां** मूलगुणव्यापारानुष्ठायिनां **पुनरेष तत्त्वतः** परमार्थेन **ज्ञेयः,** मूलाऽभाव उत्तरस्याऽकिञ्चित्करत्वात् ।।१२५।।

देव० : एतद्दोषविमुक्त उक्तस्वरूपद्विचत्वारिंशद्दूषणरहितो **यतीनां पिण्डो** भक्तादि-**र्जिनैरनुज्ञातो** ग्राह्यतयेति प्रक्रमः, **एष पुनर्**विशुद्धः पिण्ड**स्तत्त्वतः** परमार्थवृत्त्या **शेषक्रिया-स्थितानां** पिण्डविशुद्ध्यपेक्षया याः शेषक्रियाः स्वाध्यायप्रत्युपेक्षणादिकास्तासु ये स्थिता आश्रितास्ते तथा तेषां **ज्ञेयः,** न तु तद्विकलानामुक्तदोषपरिहारमात्रवताम्, मूलाभाव उत्तरस्या-किञ्चित्करत्वादिति भावः, इति गाथार्थः ।।१२५।।

** विंशतिविंशिकायाम्-१३/८ **

अनन्तरोक्तद्वाचत्वारिंशद्दोषपरिशुद्धपिण्डस्य भोजनविधिमाह –

एयद्दोसविमुक्को जईण पिंडो जिणेणऽणुन्नाओ ।
संजोयणाइरहिओ भोगो वि इमस्स कारणओ ।।

एतद्दोषविमुक्तोऽनन्तरोक्ताधाकर्मादिद्विचत्त्वारिंशद्दोषपरिशुद्धः **पिण्डो**ऽशनादिको **यतीनां** श्रमणानां **जिनेन** श्रीसर्वज्ञभगवताऽ**नुज्ञातो** निर्दिष्टः । **अस्य** परिशुद्धपिण्डस्य **भोगोऽपि** न केवलं ग्रहणमभ्यवहरणमपि **संयोजनादिदोषरहितो** वक्ष्यमाणसंयोजनाप्रमाणादिदोषविनिर्मुक्तः **कारणतो** वक्ष्यमाणवेदनावैयावृत्त्यादिप्रयोजनादनुज्ञात इति शेषः ।।८।।

चक्रे० : ननु गृहस्थेन भक्तिकृतमाधाकर्म गृह्णतस्त्रिधा शुद्धस्य साधोः को दोष इत्याहुः –

देव० : ननु गृहस्थेन भक्तिविहितमाधाकर्म गृह्णतस्त्रिधा शुद्धस्य साधोः को दोष इत्याह –

जस्सट्ठा आहारो आरंभो तस्स होइ नियमेण ।
आरंभे पाणिवहो पाणिवहे होइ वयभंगो।।१२६।।

चक्रे० : अक्षरार्थः स्पष्टो भावार्थस्त्वयम्, यद्यपि साधोः पचनादौ न व्यापारस्तथापि मदर्थमिदं निष्पन्नमिति जानतो निःशूकतया[१] भुञ्जानस्याऽनुमतिसम्भवाद्दोषः ।।१२६।।

देव० : यस्य साधो**रर्थाय** निमित्तायाऽ**हारो**ऽशनादिः पच्यत इति शेषः, **आरम्भः** खण्डनपेषणादिसन्धुक्षणादिव्यापार**स्तस्य भवति नियमेन,** चस्य गम्यमानत्वा**दारम्भे** च **प्राणिवधः, प्राणिवधे** च **भवति व्रतभङ्गः** । अयमर्थः-यद्यपि साधोः पचनादौ न व्यापारस्तथापि मम निमित्तं निष्पन्नमिदमिति जानतो निःशूकतया भुञ्जानस्य कथमिव त्रिकरणशुद्धिः स्यात् ? तत्परिभोगतस्तस्यानुमतत्वादिति गाथार्थः।।१२६।।

चक्रे० : इत्थमुपदिष्टेऽप्याधाकर्मभोजी यस्तस्य महादोषमाहुः –

देव० : इत्थमुपदिष्टेऽपि यः क्लिष्टकर्मा आधाकर्म निःशूकतया भुङ्क्ते तस्यानाराधकत्वमाह –

भुंजइ आहाकम्मं सम्मं न य जो पडिक्कमइ लुद्धो ।
सव्वजिणाणाविमुहस्स तस्स आराहणा नत्थि।।१२७।।

चक्रे० : भुङ्क्त आधाकर्म, सम्यगभावशुद्ध्याऽऽलोचनापूर्वं **न च यः प्रतिक्रामति** न तद्भोजनान्निवर्त्तते **लुब्धः, तस्य सर्वजिनाज्ञाविमुखस्याऽऽराधना** परलोकसाधकत्वं **नास्ति**।।१२७।।

देव० : भुङ्क्तेऽभ्यवहरति **यः** साधु**राधाकर्म** वर्णितस्वरूपम्, **सम्यग**भावशुद्ध्या **न च** नैव **प्रतिक्रामति** प्रायश्चित्तप्रतिपत्त्या तद्भोजनात् प्रतिनिवर्त्तते, किंविशिष्टः सन् ? **लुब्धो** रसनालम्पटोऽनेन यः कथञ्चित् सकृद् भुक्त्वापि सम्यक्प्रतिक्रामति, यश्चालुब्धो ग्लानादिकारणे

१. निःशङ्कतया K

भुङ्क्ते तयोराराधकत्वमाह, तस्य द्रव्ययतेः **सर्वे** च भरतैरवतविदेहजास्ते **जिनाश्च** तेषा**माज्ञा** द्वादशाङ्गी तस्यां **विमुखः** प्रतिकूल**स्तस्याराधना** परलोकसाधकत्वं **नास्तीति** गाथार्थः ।।१२७।।

**** पिण्डविशुद्धिप्रकरणे-१९ ****

अधुनाधाकर्मपरिभोगेनाऽऽज्ञाभङ्गस्य विपाकं दर्शयन्नाह –

भुंजइ आहाकम्मं सम्मं जो न य पडिक्कमति लुद्धो ।
सव्वजिणाणाविमुहस्स तस्स आराहणा नत्थि ।।

भुङ्क्तेऽभ्यवहर**त्याधाकर्म्म** पूर्व्वोक्तं **यः** साधुरिति प्रक्रमः, कीदृशः सन्नित्याह– **'लुद्धो'** गृद्धोऽनेन ग्लानादिकारणेन यस्तद् गृह्णाति स आज्ञां न लङ्घयतीत्यावेदयति । भुक्त्वा च **'सम्मं'**ति सम्यगपुनरावृत्त्या भावशुद्ध्या वा यो **न** नैव, **चः** स्थाप्यः, **प्रतिक्रामत्या**धार्कमिकपरिभोगात् प्रायश्चित्तग्रहणपूर्वकं व्यावर्त्तते । स्थापितचकाराद् गृहीत्वा तन्न करोतीति गृह्यते, स आज्ञाभङ्गदोषकारीति प्रक्रमः। तस्य फलमाह– **सर्वजिनानां** समस्ततीर्थकराणा**माज्ञो**पदेशस्तस्या **विमुखः** पराङ्मुखो भ्रष्ट इति भाव**स्तस्य** । तस्येति साधुसङ्कल्पिताहारभोजित्वादाज्ञाभङ्गकारिणो यते**राराधना** सुगतिनिबन्धनसदनुष्ठाननिष्पादना, यद्वाऽऽराधना मरणकाले भाविनि पर्यन्तक्रिया साऽशुद्धाहारभोक्तृत्वेन संयमादिविघातकारित्वात् तस्य नरकादिकुगतिगमनसम्भवा**न्नास्ति** न विद्यते । अथवाऽखण्डितसंयमानुष्ठानपरिपालनस्यान्ते पण्डित-मरणेनैव सुगतिप्राप्तिकारकं श्रेयस्करमुपवर्ण्यते तच्च तस्य न स्यात्, युज्यते चैतत् फलं परममहाराज-तीर्थकराज्ञाभङ्गकारिणाम्। यत इहलोकेऽपि राजादेरप्याज्ञाभङ्गकारिणोऽनर्थपरम्परां प्राप्नुवन्तो दृश्यन्ते, किं पुनस्तीर्थकराज्ञाभङ्गकारिणांस्तामिति ।।१९।।

चक्रे० : यद्येवम्, कथमागमे दुर्भिक्षादावाधाकर्माद्यनुज्ञातमित्याहुः –

देव० : यद्येवं तर्हि कथमागमे दुर्भिक्षग्लानाद्यागाढप्रयोजन आधाकर्मादिग्रहणमनुज्ञातमित्याह –

संथरणम्मि असुद्धं दुण्ह वि गिण्हंतदिंतयाणऽहियं ।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे ।।१२८।।

चक्रे० : संस्तरणे प्रासुकैषणीयादिनैव निर्वाहे **सत्यशुद्धमा**धाकर्मादि, **द्वयोरपि गृह्णद्ददतोः, अहितं** संसारहेतुत्वात्, **आतुरदृष्टान्तेन,** यथाहि रोगिणे कदाचित् पथ्यमप्यपथ्यम्, कदाचित् त्वपथ्यमपि पथ्यं स्याद्देशकालाद्यपेक्षया, एव**मसंस्तरणे** दुर्भिक्षग्लानाद्यवस्थायां **तदेवा**शुद्धमपि **हितम्**, यदाह –

सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवायाओ पुणो विसोही न याविरई ।। [ओघनि० ४७]

काहं अच्छित्तिं अदुवा अहीहं तवोवहाणेसु य उज्जमिस्सं
गणं च नीईइ व सारविस्सं सालंबसेवी समुवेइ मोक्खं ।। [प्रव.सारो॰ ७७९]
न वि किंचि अणुन्नायं पडिसिद्धं वा वि जिणवरिंदेहिं ।
एसा तेसिं आणा कज्जे सच्चेण होयव्वं ।। [पञ्चवस्तु-२४०]

इति गाथार्थः ।।१२८।।

देव० : संस्तरणे प्रासुकैषणीयाहारादिनैव निर्वाहे सत्**यशुद्धमनेषणीयं** गृह्यमाणं दीयमानं चेति गम्यते, **द्वयोरपि,** नैकस्य कस्यापि, **ग्रहीतृदात्रोः** साधुश्रावकयोः **अहितम**नर्थहेतुत्वादपथ्यं स्यादित्येष उत्सर्गः । अपवादत**स्त्वातुरो** रोगी तस्य **दृष्टान्त** उदाहरणं तेन, यथा हि रोगिणः कस्यामप्यवस्थायां पथ्यमपथ्यम्, कस्याञ्चित्तु पुनरपथ्यमपि पथ्यं स्यात्, तथा च भिषक्शास्त्रम्–

उत्पद्येत हि सावस्था देशकालामयान् प्रति ।
यस्यां कार्यमकार्यं स्यात् कर्मकार्यं तु वर्जयेत् ।। [ ]

अनेन न्यायेन **'तं चेव'**त्ति अशुद्धमपि **हितम**वस्थोचितत्वात् पथ्यम्, द्वयोरपीत्यत्रापि योगोऽ**संस्तरणे**ऽनिर्वाहे दुर्भिक्षग्लानाद्यवस्थायामित्यर्थः । अयमभिप्रायो यद्यपीदमाधाकर्माज्ञाभङ्गाद्यनेकदोषकारणं वर्णितं तथापि –

सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवायाओ पुणो विसोही न याविरई ।। [जीवानुशासन-२०८]
काहं अच्छित्तिं अदुवा अहीहं तवोवहाणेसु य उज्जमिस्सं ।
गणं च नीईइ व सारविस्सं सालंबसेवी समुवेइ मोक्खं ।।
सालंबणो पडंतो अप्पाणं दुग्गमे वि धारेइ ।
इय सालंबणसेवी धारेइ जई असढभावं ।। [पुष्पमाला-२३७, ३८]
अप्पेण बहुमेसेज्जा एयं पंडियलक्खणं ।
सव्वासु पडिसेवासु एयं अट्ठपयं विऊ ।।
नवि किंचि अणुन्नायं पडिसिद्धं वावि जिणवरिंदेहिं ।
एसा तेसिं आणा कज्जे सच्चेण होयव्वं ।। [पञ्चवस्तु-२४०]

इत्याद्यागमाभिज्ञैर्यथावसरं बहुतरगुणलाभाकाङ्क्षया गृह्यमाणं दीयमानं च न दोषायेति गाथार्थः ।।१२८।।

** बृहत्कल्पभाष्ये-१६०८ **

अपि च इदमपि ते श्राद्धा ज्ञापनीयाः –

संथरणम्मि असुद्धं दोण्ह वि गिण्हंतदिंतयाणऽहियं ।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे ।।

संस्तरणं नाम प्रासुकमेषणीयं चाशनादि पर्याप्तं प्राप्यते न च किमपि ग्लानत्वं विद्यते **तत्राशुद्धम-**प्रासुकमनेषणीयं च **गृह्णतो ददतश्च द्वयोरप्यहितम**पथ्यम्, गृह्णतः संयमबाधाविधायित्वाद् ददतस्तु भवान्तरे स्वल्पायुर्निबन्धनकर्मोपार्जनात् । **तदेवा**शुद्ध**मसंस्तरणे**ऽनिर्वाहे दीयमानं गृह्यमाणं च **हितं** पथ्यं भवति । आह – कथं तदेव कल्प्यं तदेव चाकल्प्यं भवितुमर्हति ? इति उच्यते–**आतुरो** रोगी तस्य **दृष्टान्तेने**दं मन्तव्यम्, यथा हि रोगिणः कामप्यवस्थामाश्रित्यान्नौषधादिकमपथ्यं भवति, काञ्चित् पुनः समाश्रित्य तदेव पथ्यम्, एवमिहापि भावनीयम् ।।१६०८।।

** निशीथसूत्रे-१६५० **

संथरणम्मि असुद्धं दोण्ह वि गेण्हंतदेंतयाणऽहितं ।
आउरदिट्ठंतेणं तं चेव हितं असंथरणे ।।

फासुएसणिज्जा असणादिया पज्जता जत्थ लब्भंति जत्थ हट्टो य तं संथरंतम्मि संथरे, अफासुयं देंत-गेण्हंताण अहियं भवति । **तं चेव** अफासुयं **असंथरे हितं** भवति ।

चोदग आह– 'तदेव कल्पं तदेव चाकल्पम्, कथमेतत् ?'

आचार्य आह–**आतुरदृष्टान्त**सामर्थ्यात्, निरुजस्य विषादिनौषधेन किं प्रयोजनम्, सरुजस्य तदेव विषादिकं पथ्यं भवति ।।१६५०।।

चक्रे० : अनिर्वाहेऽनेषणीयपरिभोगोऽपि हितायेत्युक्तम्, तत्किं यथा तथा ? नेत्याहुः –

देव० : अनिर्वाहेऽनेषणीयपरिभोगोऽपि हितायेति प्रतिपादितम्, तत्किं यथाकथञ्चिदेव नेत्याह –

फासुयएसणिएहिं फासुयओहासिएहिं कीएहिं ।
पूईए मीसएण य आहाकम्मेण जयणाए।।१२९।।

चक्रे० : प्रासुकैः प्रगतासुभि**रेषणीयै**श्च**ा**धाकर्म्मादिदोषरहितैः, तदलाभे **प्रासुकावभाषितैः,** अवभाषितं समयभाषया याचितम्, तदप्राप्तौ **क्रीतैः**, ततः **पूतिभिः** पूतिकर्मदोषदुष्टैः, ततोऽपि **मिश्रैर्मि**श्रजातदोषदूषितैः, ततोऽ**प्याधाकर्मभिरन्नाद्यैः** शरीरधारणा कार्येति शेषः ।

यतनयाऽनागाढप्रयोजने समस्तक्षेत्रे त्रिःपरिभ्रमणेन पूर्वपूर्वस्याऽलाभ उत्तरोत्तरमादेयम्, आगाढे तु सहसैवाधाकर्माऽपि ग्राह्यमिति भावः।।१२९।।

देव० : प्रगता असवो येभ्यस्तानि **प्रासुकानि,** तान्यप्येषणीयान्याधाकर्मादिसमस्तदोषरहितानि, तैः प्रथमं तावदिति शेषः, तदलाभे **प्रासुकाऽवभाषितै**[1]रवभाषितं समयसञ्ज्ञया याचितम्, एतदसम्पत्तौ च **क्रीतैः,** तदसम्भवेऽपि **'पूइए'**त्ति वचनस्यातन्त्रत्वात् पूतिभिः, एवमुत्तरत्रापि, तदप्राप्तावपि **मिश्रकैः,** ततोऽप्याधाकर्मभिरिह **च**कारोऽनुक्तसमुच्चये, ततः सूत्रविधिकुशलेन याचनादोषमवधिं कृत्वा लघुतमलघुतरलघ्वादिदोषाश्रयणेन तावद्गवेषणीयं यावत्पूतिमिश्राधाकर्माणि, तैरन्नपानादिभिरातुरस्य शरीरसन्धारणा कार्येत्युपस्कारस्तत्रापि **यतनया** अनागाढप्रयोजने समस्तक्षेत्रे त्रिःपरिभ्रमणेन प्राच्यप्राच्यदोषदुष्टस्यालाभे उत्तरोत्तरदोषदुष्टस्य ग्रहणरूपया, आगाढे तु यथाकथञ्चित् सहसैव ग्राह्यमिति भाव इति गाथार्थः।।१२९।।

**** हितोपदेशप्रकरणे-१२७ ****

नन्वपवाददानविधिरयं भवद्भिः स्वमतिविकल्पित एव, किं वाऽसौ सिद्धान्ते क्वाऽप्यस्तीत्याशङ्क्याह – 'जं भणियं' यद् यस्मादिदमागमे भणितम् –

फासुयएसणिएहिं फासुयओहासिएहिं कीएहिं ।
पूईकम्मेण तहा आहाकम्मेण जयणाए ।।

अनेन क्रमेणासंस्तरणे गीतार्थश्रमणोपासकः साधुजनं निर्वाहयति, तत्र प्रथमं तावत् **प्रासुकैषणीयैरा**हारैरिति शुद्धो भङ्गः, तदलाभे **प्रासुकावभासितैः** सिद्धान्तभाषया याचितैरित्यर्थः । अयं पूर्वस्मात् सदोषः, याचितकालाभे तु **क्रीतै**र्मूल्यक्रीतैः, याचितकदोषात् क्रीतदोषोऽपि महान् । क्रीतैरपि निर्वाहमपश्यन् पूतिकर्म करोति, **पूतिकर्मणा**प्यनिर्वाह **आधाकर्म्मणा**ऽपि **यतनया** निर्वाहं करोति । किं बहुना ? योऽल्पप्रायश्चित्तो दोषस्तं तमुररीकरोति, सोऽयमागमप्रणीतो विधिरिति ।

उक्तं च –

संथरणंमि असुद्धं दुण्हवि गिण्हतदिंतयाण हियं ।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे ।। [निशीथभा० १६५०] ।।१२७।।

चक्रे० : नन्वाधाकर्मभोगे प्रागाज्ञाभङ्गः प्रोक्तः, सम्प्रति तु स एवानुज्ञात इति विरुद्धमित्याहुः –

१. प्रासुक इव भाषितैः A

देव० : नन्वाधाकर्मभोजिनः पूर्वमाज्ञाभङ्गः प्रतिपादितः, साम्प्रतं पुनर्यतनावतस्तदेवानुज्ञायत इति कथं न व्यभिचरतीत्याह –

उस्सग्गेण निसिद्धाणि जाणि दव्वाणि संथरे जइणो ।
कारणजाए जाए अववाए ताणि कप्पंति।।१३०।।

चक्रे० : स्पष्टा, नवरं **कारणजाते** ग्लानत्वादिकारणसमूहे।।१३०।।

देव० : **उत्सर्गः** सामान्योक्तो विधिस्तेन **निषिद्धानि** निवारितानि **यानि द्रव्याणि** सचेतनाचेतनादीनि **संस्तरे** द्रव्यापदादिविरहे **यतेः** साधो**स्तानि,** किं **कारणजाते** द्रव्यापदादिहेतुसमूहे **जाते** समुत्पन्ने सत्**यपवादे** द्वितीयपदे **कल्पन्ते** संयमोपकाराय प्रभवन्ति । तदयमभिप्रायः – पूर्वसूत्राण्युत्सर्गविषयाण्येतत्पुनरपवादविषयमिति भिन्नविषयत्वान्न विरोध इति गाथार्थः।।१३०।।

**** बृहत्कल्पभाष्ये-३३२७ ****

अथ किं पुनरनयोः स्वस्थानम् ? इत्याह –

उस्सग्गेण निसिद्धाइँ जाइँ दव्वाइँ संथरे मुणिणो ।
कारणजाते जाते सव्वाणि वि ताणि कप्पंति ।।

उत्सर्गेण संस्तरणमाश्रित्य **यानि द्रव्याणि** प्रलम्बादीनि **मुनेः** संयतस्य **प्रतिषिद्धानि** तान्येव **कारणजाते** विशुद्धालम्बनप्रकारे **जाते** समुत्पन्ने सति **सर्वाण्यपि कल्पन्ते** ।।३३२७।।

**** निशीथसूत्रे-५२४५ ****

अववादट्ठाणे पत्ते –

उस्सग्गेण णिसिद्धाणि जाणि दव्वाणि संथरे मुणिणो ।
कारणजाए जाते सव्वाणि वि ताणि कप्पंति ।।

जाणि संथरमाणस्य उस्सग्गेण णिसिद्धाणि ताणि चेव **दव्वाणि** अववाय**कारणजाते,** 'जाय'सद्दो प्रकारवाची बितिओ **'जाय'**सद्दो उप्पण्णवाची, अन्यतमे कारणप्रकार उत्पन्न इत्यर्थः । जाणि उस्सग्गे पडिसिद्धाणि उप्पण्णे कारणे **सव्वाणि वि ताणि कप्पंति** ण दोसो ।।५२४५।।

चक्रे० : अथापवादः किंस्वरूपः ? इत्याहुः –

देव० : अथापवादः किंस्वरूपो भवतीत्याह –

पुढवाइसु आसेवा उपन्ने कारणंमि जयणाए ।
मिगरहियस्स ठियस्सा अववाओ होइ नायव्वो।।१३१।।

चक्रे० : पृथ्व्यादिषु षष्ठीस्थाने सप्तमी, ततः पृथ्वीकायादीना**मुत्पन्ने कारणे** ग्लानत्वादौ **यतनया** गुरुदोषत्यागेनाऽल्पदोषाऽऽदानरूपया**ऽऽसेवा** परिभोगो**ऽपवादो भवति ज्ञातव्यः** । कस्य ? **स्थितस्य** मूलोत्तरगुणेषु वर्त्तमानस्य साधोरिति गम्यम्, किंविशिष्टस्य ? मृगा इव **मृगा** अज्ञानसाम्यादगीतार्थास्तै **रहितस्य**, ते हि तदासेवां दृष्ट्वाऽतिप्रसङ्गं धर्मभ्रंशं वा कुर्वन्तीति ।।१३१।।

देव० : पृथिव्यादिषु षष्ठीसप्तम्योरर्थं प्रत्यभेदात् पृथिव्यप्तेजोवायुवनस्पतित्रसादीना**मुत्पन्ने कारणे** भणितस्वरूपे **यतनया** गुरुदोषत्यागेन लघुदोषाश्रयणरूपया**ऽऽसेवा** परिभोगो**ऽपवादो भवती**ति **ज्ञातव्य** इति सण्टङ्कः । कस्य सा चाऽऽसेवा **स्थितस्य** मूलोत्तरगुणेषु दशविधकल्पे वा वर्तमानस्य साधोरिति गम्यते, किंविशिष्टस्य **मृगा** अज्ञा अगीतार्था इत्यर्थस्तै **रहितस्य,** ते हि तदासेवामवलोक्यातिपरिणामकत्वापरिणामकत्वाभ्यामतिप्रसङ्गं धर्मभ्रंशं वा लभेरन्निति गाथार्थः।।१३१।।

चक्रे० : अधुना बहुविषयोत्सर्गापवादपरिज्ञानतः कृत्योपदेशमाहुः –

देव० : अधुना बहुविषयोत्सर्गापवादपरिज्ञानतः कृत्योपदेशमाह –

बहुवित्थरमुस्सग्गं बहुविहमववाय वित्थरं णाउं ।
लंघेऊणुत्तविहिं बहुगुणजुत्तं करेज्जाहि।।१३२।।

चक्रे० : स्पष्टा, नवरं **ज्ञात्वा** निशीथादिग्रन्थेभ्यः, अनया च गाथया समयोचितं यद्गीतार्थः करोति तत् प्रमाणमित्यावेदितम्[१], उक्तं च –

अवलंबिऊण कज्जं जंकिंचि समायरंति गीयत्था ।
थोवावराहबहुगुण सव्वेसिं तं पमाणं तु ।। [धर्मरत्नप्र० ८५] ।।१३२।।

१. प्रमाणमित्याह - 'उस्सग्गेण निसिद्धाणि जाणि दव्वाणि संथरे जइणो' वेदितं P, K

देव० : पूर्वार्द्धं सुगमम्, नवरं **ज्ञात्वा** निशीथादिग्रन्थेभ्यः, **लङ्घयित्वा** विगाह्याल्पबहुगुणत्वेन तुलयित्वेति यावत्, **उक्तविधि**मुत्सारककल्पाभिहितन्यायं **बहुगुणयुक्तं** प्रभूतगुणसम्पन्नं **कुर्याः** कृत्यमिति गम्यते, अनेन[१] समयोचितं यद्गीतार्थः करोति तत्प्रमाणमित्यावेदयति, यदुक्तम् –

अवलंबिऊण कज्जं जंकिंचि समायरंति गीयत्था ।
थोवावराहबहुगुण सव्वेसिं तं पमाणं तु ।। [पञ्चवस्तु-२७९]

इति गाथार्थः ।।१३२।।

चक्रे० : उक्तः पिण्डविचारः, सम्प्रति शय्याशुद्धिमाहुः –

देव० : उक्तः सप्रसङ्गः पिण्डविचारः, सम्प्रति शय्याशुद्धिमाह –

मूलोत्तरगुणसुद्धं थीपसुपंडगविवज्जियं वसहिं ।
सेविज्ज सव्वकालं विवज्जए हुंति दोसा उ।।१३३।।

चक्रे० : सुगमा, नवरं **'मूलुत्तरगुणसुद्धं'**ति यस्यां पृष्ठवंशमूलस्तम्भादयः साध्वर्थं न क्रियन्ते, सा मुलगुणशुद्धा यस्यां छादनलेपनादीनि न साध्वर्थानि सा उत्तरगुणशुद्धा।।१३३।।

देव० : गुणशब्दस्य प्रत्येकमभिसम्बधा**न्मूलगुणोत्तरगुणशुद्धां स्त्रीपशुपण्डकविवर्जितां वसतिं सर्वकालं सेवेत, विपर्यये** पुन**र्भवन्ति दोषा** इति सङ्क्षेपार्थः ।

पट्ठीवंसो दो धारणाउ चत्तारि मूलवेलीओ ।
मूलगुणे हु ववेया एसा उ अहागडा वसही ।। [पञ्च० ७०७]

तत्र पृष्ठवंशो मोभ इति लोके यः प्रतीतः, द्वे धारण्यौ यत् प्रतिष्ठितौ, असावेव, चतस्रो मूलवेलयो याश्चतुर्षु कोणेषु निधीयन्ते, एते सप्तापि मूलगुणास्तैश्च साधुमाधाय कृतैरुपेता युक्ता एषा, तुशब्द एवकारार्थः, आधाय कृता आधार्कर्मिक्येव वसतिरिति । उत्तरगुणाश्च द्विविधा मूलोत्तरगुणा उत्तरोत्तरगुणाश्च, तत्र मूलोत्तरगुणाः –

वंसग-कडणु-क्कंवण-च्छायण-लेवण-दुवार-भूमीए ।
सपरिकम्मा वसही एसा मूलोत्तरगुणेसु ।। [पञ्च० ७०८]

अत्र वृद्धसम्प्रदायः – वंसगत्ति दण्डकाः, कडणंति कटादिभिः कुट्यकरणम्, उक्कंवणंति दण्डकोपर्युडयणमिति यत्प्रतीतम्, च्छायणंति दर्भादिभिराच्छादनम्, लेवणंति विक्खल्लेण

१. अत एवोक्तमागमे –
जावज्जीवं गुरुणो सुद्धमसुद्धेण होइ नायव्वं । वसहे बारसवासा अट्ठारस भिक्खुणो मासा ।। A

कुड्डाणलिम्पनम्, दुवारत्ति गृहद्वारस्य वाहल्यकरणमन्यस्य वा विधानम्, भूमित्ति भूमिकर्म, विसमाए समीकरणंति वुत्तं होइ, एसा सपरिकम्मा वसही मूलोत्तरगुणेसुत्ति मूलभूतोत्तरगुणेष्वित्यर्थः, एते च पृष्टिवंशादयश्चतुर्दशाप्यविशोधिकोटिः । अमी पुनरुत्तरोत्तरगुणा विशोधिकोटिस्थिता वसतेरुपघातकरास्तद्यथा –

दूमिय धूविय वासिय उज्जोविय बलिकडा अवत्ता य ।
सित्ता सम्मट्ठाविय विसोहिकोडिं गया वसही ।। [पञ्च० ७०९]

अत्रापि वृद्धव्याख्या–दूमियत्ति उल्लाइया सेढिकादिभिः संमृष्टेत्युक्तं भवति, धूवियत्ति दुर्गन्धत्वादगरुप्रभृतिभिः, वासियत्ति वासिताः पुटवासकुसुमादिभिः, उद्योतिता रत्नप्रदीपादिभिः प्रकाशिता, बलिकडत्ति कृतकूरादिबलिविधाना, अवत्तत्ति च्छगणमृत्तिकाभ्यां जलेन चोपलिप्तभूमितला, सिक्ता केवलोदकेनार्द्रीकृता, संमृष्टा प्रमार्जिता, साध्वर्थायेति सर्वत्र प्रक्रमः । विशोधिकोटिंगयत्ति अविशुद्धकोटौ न भवतीत्यर्थ इति । एतदनुसारतश्चतुःशालादिष्वपि मूलोत्तरगुणविभागो भावनीयः, साक्षात्तदभणनं तु प्रायेण यतीनां ग्रामेषु विहारात्तेषु चैवंविधवसतेरेवसम्भवादिति । अन्ये चामी वसतिदोषाः –

कालाइक्कंत-उवट्ठाणा-अभिकंत-अणभिकंता य ।
वज्जाय-महावज्जा य-सावज्ज-मह-अप्पकिरिया य ।। [पञ्च० ७१२]

मासे चतुर्मासे वा पूर्णे तत्रैव वसतां कालातिक्रान्ता, मासकल्पे वर्षाकल्पे वा पूर्णेऽन्यत्र विहृत्य द्वावष्टौ च मासान् पूरयित्वा तस्यामेवागच्छतामुपस्थापना भवति, यावदर्थिकार्थं निष्पन्नान्यैश्वरकादिपाषण्डिभिर्गृहस्थैर्वा निषेविताभिक्रान्ता, तदनासेविता त्वनभिक्रान्तेति, आत्मार्थं कृतां साधुभ्यो दत्वा स्वयमन्यां कुर्वतो वर्ज्या, यदाह –

अत्तट्ठकडं दाउं जईणमन्नं करेइ वज्जा उ ।
जम्हा तं पुव्वकडं वज्जेइ तओ भवे वज्जा ।। [पञ्च० ७१५]

तथा श्रमणब्राह्मणादीनां पाषण्डिकानामर्थाय कृता महावर्ज्या, निर्ग्रन्थादीनां तु पञ्चानां श्रमणानामर्थाय कृता सावद्या, जैनमुनीनामर्थाय कृता महासावद्या, आह च –

पासंडकारणा खलु आरंभो अहिणवो महावज्जा ।
समणट्ठा सावज्जा महसावज्जा य साहूणं ।। [पञ्च० ७१६]

इमेऽष्टौ दोषाः, या तु समस्तोक्तदोषवर्जिता स्वार्थं जिनबिम्बप्रतिष्ठार्थं वा कारिता साऽल्पक्रिया शुद्धेत्यर्थः । अयं तु दोषपद्धतिपठितोऽपि गुणोऽल्पशब्दस्याभाववाचकत्वादिति ।

तथा स्त्रीवर्जिता यत्र स्त्रियो मिथः कथादिभिः स्थानं न विदधति, यस्यां च स्थितैः स्त्रीणां चङ्क्रमितादिविकृतरूपाणि नावलोक्यन्ते, ता अपि साधून् विश्रब्धस्थानासनादि कुर्वाणान्न प्रेक्षन्ते, गीत-हसित-भूषणादिरवश्च स्त्रीणां न श्रूयते[१], ता अपि साधुमधुरस्वाध्यायध्वनिं नाकर्णयन्तीत्यत्र गाथा –

थीवज्जियं वियाणह इत्थीणं जत्थ ठाणरूवाइं ।
सद्दा य न सुव्वंती तावि य तेसिं न पेच्छंति ।। [पञ्च० ७२०]
ठाणं चिट्ठंति जहिं मिहो कहाईहिं नवरमित्थीओ ।
ठाणे नियमारूवं सिय सद्दो जेण तो वज्जे ।। [पञ्च० ७२१]

विप्रकृष्टे कदाचिच्छब्दो न स्यादपीति स्यादित्युक्तम् –

चंकम्मियं ठिइ मोट्टियं च विप्पेक्खियं च सविलासं ।
सिंगारे य बहुविहे दट्ठुं भुत्तेयरे दोसा ।। [पञ्च० ७२३]

मोट्टियंति किलकिञ्चितं रमितमित्यर्थः । भुत्तेयरत्ति भुक्ताभुक्तभोगयोर्दोषाः स्मृतिकुतूहलादयः ।

जल्लमलपंकियाणवि लावण्णसिरी उ जहसि देहाणं ।
सामण्णेऽवि सुरूवा सयगुणिया आसि गिहवासे ।।
गीयाणि य पढियाणि य हसियाणि य मंजुले य उल्लावे ।
भूसणसद्दे राहस्सिए य सोऊण जे दोसा ।।
गंभीरमहुरफुडविसयगाहगो सुस्सरो सरो जेसिं ।
सज्झायस्स मणहरो गीयस्स णु केरिसो होज्ज ?।। [पञ्च० ७२४, २५, २६]

तथा पशुवर्जिता गोगर्दभीवडवादिपशुस्त्रीतत्पुरुषरहिता, तथा पण्डकवर्जिता नपुंसकरहिता विपर्यये दोषा दूषणानि, ते च व्यक्ता एव । तत्र मूलोत्तरगुणाऽशुद्धायामाधाकर्मादयः, स्त्रीसहितायां तु ब्रह्मव्रतागुप्त्यादयः । यदाह–

बंभवयस्स अगुत्ती लज्जाणासो य पीइवुड्ढी य ।
साहु तवो वणवासो निवारणं तित्थहाणी य ।। [पञ्च० ७२२]

१. ध्वनिर्न श्रूयते A

लज्जानाशोऽसकृत्परस्परदर्शनेन, प्रीतिवृद्धिश्च नित्यमालापविश्रम्भकथादिसम्भवात्, साधुतपोवनवास इति लोके गर्हा, निवारणं तद्द्रव्यान्यद्रव्याणाम्, तीर्थहानिर्लोकाप्रवृत्तितः । इति पशुपण्डकसहितायामपि चित्तक्षोभाभिघातादयः, अभ्यधायि च –

पसुपंडगेसु वि इहं मोहानलदीवियाण जं होइ ।
पायमसुहा पवित्ती पुव्वभवऽब्भासओ तह य ।। [पञ्च० ७२८]

आज्ञादयश्च दोषाः सर्वत्रापि समा एव, तस्मादुक्तदोषवर्जितैव वसतिरासेव्या, यदाह –

तम्हा जहुत्तदोसेहिं वज्जिअं निम्ममो निरासंसो ।
वसहिं सेविज्ज जई विवज्जए आणमाईणि ।। [पञ्च० ७२९]

इति गाथार्थः ।।१३३।।

* पञ्चवस्तौ-७०६ *

इदानीं वसतिविधिमाह –

मूलुत्तरगुणसुद्धं थीपसुपंडगविवज्जिअं वसहिं ।
सेविज्ज सव्वकालं विवज्जए होंति दोसा उ ।।

मूलगुणोत्तरगुणपरिशुद्धां तथा **स्त्रीपशुपण्डकविवर्जितां वसतिं सेवेत सर्वकालम्, विपर्यये**ऽशुद्धस्त्र्यादिसंसक्तायां वसतौ **भवन्ति दोषा** इति गाथार्थः ।।७०६।।

* प्रवचनसारोद्धारे-८७४ *

तथा चाह–

मूलुत्तरगुणसुद्धं थीपसुपंडगविवज्जियं वसहिं ।
सेविज्ज सव्वकालं विवज्जए हुंति दोसा उ ।।

'मूलुत्ते'त्यादि, **मूलोत्तरगुणपरिशुद्धां** तथा **स्त्रीपशुपण्डकविवर्जितां वसतिं सेवेत सर्वकालम्, विपर्यये**--अशुद्धायां स्त्र्यादिसंसक्तायां च वसतौ **भवन्ति दोषा इति,** एतदनुसारतस्तु चतुःशालादिष्वपि मूलोत्तरगुणविभागो विज्ञेयः, यत्पुनरिह सूत्रे चतुःशालाद्यपेक्षया मूलोत्तरगुणविभागः साक्षात्नोक्तस्तत्रेदं कारणं–यथा विहरतां साधूनां श्रुताध्ययनादिव्याक्षेपपरिहारार्थं प्रायो ग्रामादिष्वेव वासः सम्भवति, तत्र च वसतिः पृष्ठवंशादियुक्तैव भवति, ततस्तासामेव वसतीनां साक्षाद्ग्रहणमिति, उक्तं च–

चाउस्सालाईए विन्नेओ एवमेव उ विभागो । इह मूलाइगुणाणं सक्खा पुण सुण न जं भणिओ ।।
विहरंताणं पायं समत्तकज्जाण जेण गामेसु । वासो तेसु य वसही पट्ठाइजुया अओ तासिं ।।८७४।।

चक्रे० : अथ वस्त्रशुद्धिमाहुः –

देव० : अथ क्रमप्राप्तां वस्त्रशुद्धिमाह –

जन्न तयट्ठा कीयं नेय वुयं नेय [१]गहियमन्नेणं ।
आहडपामिच्चं वज्जिऊण तं कप्पए वत्थं ।।१३४।।

चक्रे० : यत्र तदर्थं प्रस्तावात् साधुनिमित्तं **क्रीतं नैव व्यूतम्, नैवान्येषां** पार्श्वाद् वस्त्राऽन्तरेण परावृत्य बलादाऽऽच्छिद्य वा **गृहीतं तद्वस्त्रं कल्पते, आहतं प्रामित्यं वर्जयित्वा** । इह च पिण्डवदुद्गमोत्पादनैषणादयोऽपि दोषा यथासम्भवं ज्ञेयाः, यत्तु क्रीतादिदोष-भणनमात्रं तद्बाहुल्येनाऽमीषामेव सम्भवात् ।।१३४।।

देव० : यत्र तदर्थं प्रस्तावात्साधुनिमित्तं **क्रीतं** मूल्येन गृहीतम्, **नैव व्यूतमा**तान-वितानादितन्तुक्रियया निर्वर्त्तितम् । एकारः प्राकृतप्रभवो **न च गृहीतमन्येन** वस्त्वन्तरेण परिवृत्येत्यर्थः, पञ्चम्यर्थे वा तृतीया, ततश्चान्यस्माद् भृत्यादेराच्छिद्येत्यर्थः, साध्वर्थमितीहापि गम्यं, **तद्वस्त्रं कल्पत** इति योगः । प्रस्तावाद्यंतीनां किं कृत्वा ? **वर्जयित्वा,** किम् ? **आहतमपमित्यं** च विशेषणोभयपदकर्मधारयश्चात्र, इह च पिण्डवदुद्गमोत्पादनैषणादयोऽपि दोषा यथासम्भव-मवसेयाः, यत्तु क्रीतादिदोषभणनं तद्बाहुल्येनामीषां सम्भवात् ।

इह मूलोत्तरगुणविभागश्चैवम्-तणविणणसंजयट्ठा मूलगुणा उत्तरा य पाणसयणत्ति । पूर्वार्द्धम्, अस्य व्याख्या – तननवितननादयो मूलगुणा अविशोधिकोटिः, पानसज्जानादयश्चोत्तरगुणा विशोधिकोटिरिति । अत्र तानवितानयोरसावद्यत्वादुत्तरगुणत्वं पानसज्जनयोश्च सावद्यत्वान्मूल-गुणत्वं युक्तमिति परः । आचार्य आह –

अत्तट्ठियतंतूहिं समणट्ठ तओ अपाइयतुओ य ।
किं सो न होइ कम्मं फासूणवि पज्जिओ जो उ ।। फासूणवित्ति स्वार्थविहितेनापीत्यर्थः ।
जइपज्जणं तु कम्मं इयरमकम्मं सकप्पऊ धोउ ।
अह धोउवि न कप्पइ तणणं विणणं च तो कम्मत्ति ।। [ ]

इत्थं मूलोत्तरगुणशुद्धमौर्णिककार्पासिकादिभेदर्भिन्नं यद्वस्त्रं दायकेनोपढौकितं भवति, तद् द्वयोरप्यन्तयोर्गृहीत्वा सर्वतो निरीक्षणीयम्, मा तत्र गृहिणां मणिर्वा सुवर्णं वान्यद्वा रूपकादिद्रव्यं

१. गहियमन्नेसिं 'चक्रे' टीकानुसारेण, गहियमन्नेण T,C,P,K

निबद्धं स्यात्, ततः सोऽपि गृहस्थो भण्यते निरीक्षस्वैतद्वस्त्रं सर्वतः, एवं च तेन यदि मण्यादि दृष्टं ततो लष्टम्, अथ न पश्यति ततः साधुरेव दर्शयत्येनमपनयेति आह–गृहिणः कथिते कथमधिकरणं न भवति ? उच्यते- कथिते स्तोकतर एव दोषः, अकथिते तूड्डाहादिर्महान् दोष इति तथा –

नवभागकप्पणाए पढमं वत्थं करित्तु जोयंति ।
नाऊण फलविसेसं गिण्हंती अहव वज्जंति ।।
चत्तारि देवया भागा दुवे भागा य माणुसा ।
आसुरा य दुवे भागा मज्जे वत्थस्स रक्खसो ।।

[बृ. कल्पभा० २८३३, नि.भा० ५०८८]

अंजणखंजणकद्दमलित्ते मूसगभक्खियं अग्गिविदड्ढे ।
तुण्णिय कुट्टिय पज्जवलीढे होइ विवागो असुहोऽसुहो वा ।।

[बृ.कल्पभा० २८३२, नि.भा० ५०८७]

देवेसु उत्तमो लाभो माणुसेसु य मज्झिमो ।
आसुरेसु य गेलन्नं मरणं जाण रक्खसे ।। [बृ. कल्पभा० २८३४, नि.भा० ५०८९]

इति सप्रसङ्ग इति गाथार्थः।।१३४।।

**** प्रवचनसारोद्धारे-८४९ ****

इदानीं 'वत्थग्गहणविहाणं'ति पञ्चविंशत्युत्तरं शततमं द्वारमाह –

जत्र तयट्ठा कीयं नेव वुयं जं न गहियमन्नेसिं ।
आहडपामिच्चं चिय कप्पए साहुणो वत्थं ।।

इह तावद्वस्त्रमेकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियावयवनिष्पत्तिभेदात् त्रिधा भवति, तत्रैकेन्द्रियावयवनिष्पन्नं कार्पासिकादि, विकलेन्द्रियावयवनिष्पन्नं कौशेयकाद्येतच्च कारण एव गृह्यते, पञ्चेन्द्रियावयवनिष्पन्न-मौर्णिकादि, पुनरेकैकं त्रिधा–यथाकृताल्पपरिकर्मबहुपरिकर्मभेदात्, तत्र यानि परिकर्मरहितान्येव तथास्वरूपाणि लभ्यन्ते तानि यथाकृतानि, यानि चैकवारं खण्डित्वा सीवितानि तान्यल्पपरिकर्माणि, यानि पुनर्बहुधा खण्डित्वा सीवितानि तानि बहुपरिकर्माणि, इह च यान्यल्पपरिकर्माणि वस्त्राणि तानि बहुपरिकर्मवस्त्रापेक्षया स्तोकसंयमव्याघातकारीणीत्यतस्तदपेक्षया शुद्धानि, तेभ्योऽपि यथाकृतान्यति-शुद्धानि, मनागपि पलिमन्थादिदोषकारित्वाभावात्, ततो गृह्णद्भिः पूर्वं यथाकृतानि ग्राह्याणि तदलाभे चाल्पपरिकर्माणि तेषामप्यभावे बहुपरिकर्माण्यपि वस्त्राणि ग्राह्याणीति, एतच्च सर्वमपि वस्त्रं गच्छवासिभिः

कल्पनीयमेव ग्राह्यम्, तथैवं-**यद्वस्त्रं न तदर्थं** व्रतिनिमित्तं **क्रीतम्,** यच्च **नैव** व्रतिनिमित्तं **'वुयं'**ति अन्तर्भूतण्यर्थत्वात् वायितम्, **यच्च नैव गृहीतमन्येषां** सम्बन्धि, अनिच्छतोऽपि पुत्रादेः सकाशात् साधुदानाय बलाद्यन्न गृहीतमिति भावः, एवंविधं **वस्त्रम्,** तथाऽ**भ्याहृतमपमित्यकं** च **त्यक्त्वा** शेषं **साधोः कल्पत** इति, तत्राऽभ्याहृतं द्वेधा-परग्रामाभ्याहृतं स्वग्रामाभ्याहृतं च, परग्रामाभ्याहृतं यदन्यस्माद् ग्रामादेः साधुनिमित्तमानीतम्, स्वग्रामाभ्याहृतं हट्टादिभ्यो यद् व्रतिभिरदृष्टं यतिनिमित्तमेव गृहे समानीतम्, व्रतिदृष्टं तु हट्टादिभ्योऽप्यानीतं गृहादिषु यतीनां ग्रहीतुं कल्पत इति, तथाऽपमित्यकं-उद्धारकेणान्यस्माद् गृहीत्वा यद्ददाति, दोषाश्चात्रापि पिण्डवद्वाच्या इति, अपरं च-अत्राप्यविशोधिकोटिविशोधिकोटिद्वयं ज्ञातव्यम्, तत्र मूलतो यत्यर्थं वायनादिकं वस्त्रंस्याविशोधिकोटिः प्रक्षालनादिकं च यत्यर्थं क्रियमाणं विशोधिकोटिः, इदं च वस्त्रं यदा कल्पनीयमित्यवसितं भवति तदा द्वयोरप्यन्तयोर्गृहीत्वा सर्वतो निरीक्षणीयम्, मा तत्र गृहिणां मणिर्वा सुवर्णं वाऽन्यद्वा रूपकादिद्रव्यं निबद्धं स्यात्, ततः सोऽपि भण्यते-निरीक्षस्वैतद्वस्त्रं सर्वतः, एवं च यदि तेन मण्यादि दृष्टं ततो गृहीतम्, अथ न दृष्टं ततः साधुरेव दर्शयत्येनमपनयेति, आह-गृहिणः कथिते कथमधिकरणं न भवति ? उच्यते, कथिते स्तोकतर एव दोषः, अकथिते तु महानुड्डाहादिः स्यादिति।।८४९।।

चक्रे० : अथ पात्रशुद्धिमाहुः -

देव० : अथ पात्रशुद्धिमाह -

तुंबय-दारुय-मट्टी[१]पत्तं कम्माइदोसपरिमुक्कं ।
उत्तम-मज्झ-जहन्नं जईण भणियं जिणवरेहिं।।१३५।।

चक्रे० : सुगमा ।।१३५।।

देव० : तुम्बकमलाबुः, **दारुकं** काष्ठम्, **मृत्तिका** पृथ्वीविशेष एतेषां द्वन्द्वः । तासां **पात्रं** भिक्षाभाजनम्, किंविशिष्टम् ? **कर्मादिदोषपरिमुक्तम्,** सूचकत्वात्सूत्रस्य, आधाकर्मादिदूषणजालविकलम्, **यतीनां साधूनां भणितं जिनवरै**स्तीर्थकृद्भिः । एतदेकैकं किंविशिष्टमित्याह-**उत्तममध्यमजघन्यम्,** तत्रोत्तमं पतद्ग्रहो मध्यमं मात्रं जघन्यमोलङ्कादन्ये पुनस्तुम्बकमयादीनां यथासङ्ख्यमुत्तमादि विभागं कल्पयन्ति पुनरेकैकं यथाकृताल्पपरिकर्मसपरिकर्मरूपतया त्रिधाऽवसेयम्, इह च पूर्वपूर्वस्यालाभ उत्तरोत्तरस्य ग्रहणं विधेयम् । मूलोत्तरगुणविभागश्च तुम्बकमाश्रित्येत्थं - '[२]मुहुकरणं मूलगुणा पाए निक्कोरणं तु इयरेउ'त्ति गाथादलं सुगममेव दारुमयादिषु तु स्वयमभ्यूह्यः, तच्च गृह्णन्नमुं विधिं प्रयुङ्क्ते -

१. मट्टीयपत्तं K, मट्टियपत्तं A,Z २. मुहकरणं A, C

दाहिणकरेण कोणं घेत्तुत्ताणेण वाममणिबंधे ।
खोडेज्ज तिन्नि वारे तिन्नि तले तिन्नि भूमीए ।। [पञ्चवस्तु-२७७] ततश्च –
ते सबीयाइं दट्ठुं न गेण्हई गेण्हई य अदिट्ठे ।
गहणंमि उ परिसुद्धे कप्पइ दिट्ठेहिं विवहूहिं ।। [ ]

उत्तरार्धस्यायं भावार्थः – ग्रहणकाले परिशुद्धे पश्चाद्यदि बहून्यपि बीजादिनि पश्यति तथापि गृह्णात्येव, न परिष्ठापयति प्रत्यर्पयति वा, किन्तु यतनया तान्येव स्फेटयति यत्र न विराध्यन्ते तत्र च क्षिपतीति गाथार्थः।।१३५।।

चक्रे० : सम्प्रति चतुष्टयशुद्धिं समापयन्नेतां च कुर्वन्नेव साधुर्भवतीत्याहुः –

देव० : चतुष्टयशुद्धिमधुनोपसंहरन्नेतामनुतिष्ठन्नेव साधुर्भवतीत्याह –

एसा चउक्कसोही [१]निद्दिट्ठा जिणवरेहिं सव्वेहिं ।
एयं जहसत्तीए कुणमाणो भन्नए साहू।।१३६।।

चक्रे० : सुगमैव ।।१३६।।

देव० : व्यक्तार्था, नवरं सर्वैरिति समस्तक्षेत्रकालभाविभिरनेन सकलसर्ववित्सम्मतत्वेन व्रततत्त्वमसावेवेत्यावेदयति यथाशक्त्येत्यनेन तु क्वचित्कारणमाश्रित्याशोधयन्नपि शुद्ध इति सूचयतीति ।।१३६।।

चक्रे० : यदाचरन् साधुः स्यात्तदुक्तम्, सम्प्रति यदाचरन्नसाधुः स्यात् तदाहुः –

देव० : यदनुष्ठायी यतिर्भवति तदुक्तमधुना यथा न भवति तथाह –

उद्दिट्ठकडं भुंजइ छक्कायपमद्दणो घरं कुणइ ।
पच्चक्खं च जलगए जो पियइ कहं नु सो साहू।।१३७।।
जे संकिलिट्ठचित्ता मायट्ठाणंमि निच्च तल्लिच्छा ।
आजीविगभयघत्था मूढा नो साहुणो हुंति।।१३८।।

चक्रे० : उभे अपि स्पष्टे, नवरं उद्दिट्ठमुद्देशः साध्वपेक्षा, तेन कृतं, **उद्दिष्टकृतमा**धाकर्म । तथा **मातृस्थाने** परवञ्चने **नित्यं तल्लिप्सव**स्तदेकाभिलाषिणः।।१३७, १३८।।

१. पन्नत्ता Z,

देव० : उद्दिष्टमुद्देशः साध्वपेक्षा, तेन कृत**मुद्दिष्टकृतमा**धाकर्मादि, तद् **भुङ्क्ते**ऽभ्यवहरत्याकुट्टिकया, तथा **षट्कायमर्दनो** यत्र क्वचन पृथिव्याद्युपमर्दको **गृहं करोति,** सम्भवत्येवैषणीयालये मूर्छया वसतिं भाटकगृहं वा देवादिव्याजतो वा तथा **प्रत्यक्षं चो**पलभ्यमान एव **जलगतां**स्तोयाश्रितानप्कायिकादीन् **यः पिबत्यु**पजीवत्याकुट्टिकयैव, **कथं नु स साधु**नैव भावयतिरिति ।

तथा **ये** केचन बहुश्रुता अपि **संक्लिष्टचित्तास्**तीव्ररागद्वेषोपहतचेतसो गुणेष्वपि मत्सरिणः क्वचिद्दोषेऽप्यनुरागिणः, **मातृस्थाने** बहिस्तत्तत्क्रियानेपथ्यभाषणादिके परवञ्चने **नित्यं** सर्वकालं **तस्मिन्**नेव परवञ्चने **लिप्सवो** बद्धाभिसन्धयः, **आजीविकाभयग्रस्ता** वृत्तिव्यवच्छेदभीरवः, ह्रस्वत्वं प्राकृतत्वात्। अत एव **मूढाः** प्रबलमोहवशवर्त्तिनो **नो** नैव **साधवो भवन्ती**ति गाथाद्वयार्थः ।।१३७, १३८।।

**** दशवैकालिकनिर्युक्तौ-३५७ ****

उद्दिट्ठकयं भुंजइ छक्कायपमद्दओ घरं कुणइ ।
पञ्चक्खं च जलगए जो पियइ कह नु सो भिक्खू ? ।।

उद्दिश्य कृतं भुङ्क्त इत्योद्देशिकमित्यर्थः, **षट्कायप्रमर्दको** यत्र क्वचन पृथिव्याद्युपमर्दकः **गृहं करोति,** सम्भवत्येवैषणीयालये मूर्च्छया वसतिं भाटकगृहं वा, तथा **प्रत्यक्षं चो**पलभ्यमान एव **जलगतान**प्कायादीन् **यः पिबति** तत्त्वतो विनाऽऽलम्बनेन, **कथं न्वसौ भिक्षुः,** नैव भावभिक्षुरिति गाथार्थः।।३५७।।

**** पञ्चवस्तौ-१२०२, स्तवपरिज्ञायाम्-९३ ****

उद्दिट्ठकडं भुंजइ छक्कायपमद्दणो घरं कुणइ ।
पञ्चक्खं च जलगए जो पिअइ कहण्णु सो साहू ? ।।

उद्दिश्य कृतं भुङ्क्ते आकुट्टिकया, **षट्कायप्रमर्दनो** निरपेक्षतया, **गृहं करोति** देवव्याजेन, **प्रत्यक्षं च जलगतान्** प्राणिनो **यः** पिबत्याकुट्टिकयैव, **कथं न्वसौ साधु**र्भवति ? नैवेति गाथार्थः ।।१२०२।।

**** पञ्चाशके-१४/४२ ****

'यः साधुर्गुणरहित' इत्युक्तमथ तमेव दर्शयन्नाह–

उद्दिट्ठकडं भुंजति छक्कायपमद्दणो घरं कुणति ।
पञ्चक्खं च जलगते जो पियइ कह णु सो साहू ।।

उद्दिष्टमुद्देशः साध्वपेक्षा तेन कृत**मुद्दिष्टकृतमा**धाकर्मादि तद्भु**ङ्क्ते** भक्षयत्याकुट्टिकया, तथा

षट्कायप्रमर्दनः पृथिव्याद्यारम्भकः सन् **गृहं** गेहं **करोति** विदधाति देवादिव्याजेन । तथा **प्रत्यक्षं च** साक्षादेवाविध्वस्तानित्यर्थः, **जलगतांस्तोयाश्रितान्** प्राणिनोऽप्कायिकानित्यर्थः, **यः** पुमान् **पिबत्यु-**पजीवत्याकुट्टिकयैव। **कथं** न कथञ्चित्, **न्विति** वितर्के, **स** इत्यसौ **साधुस्तात्त्विकयतिः** । इति गाथार्थः ।।४२।।

**** पञ्चाशके-१७/५१ ****

एवं चरमसाधूनां चरणं व्यवस्थाप्यातिप्रसङ्गवारणायाह –

एवं च संकिलिट्ठा माइट्ठाणंमि णिच्चतल्लिच्छा ।
आजीवियभयगत्था मूढा णो साहुणो णेया ।।

एवं चोक्तनीत्या संज्वलनव्यतिरिक्तकषायोदये न श्रमणत्वमित्येवं लक्षणया, **संक्लिष्टाः** संक्लिष्टचित्ताः कषायान्तरोदयात्, **मातृस्थाने** मायायां **नित्यं तल्लिप्साः** सदैव तत्पराः, पररञ्जनपरायणत्वात्। आजीवनमाजीविका निर्वाहस्तदसंभावनया यद्भयं भीतिस्त**दाजीविकाभयं** तेन **ग्रस्ता** अभिभूता ये ते तथा, गृहस्थैर्विज्ञातनिर्गुणत्वा धनादिविरहिता वा कथं निर्वक्ष्याम इत्यभिप्रायवन्त इत्यर्थः । **मूढा** मुग्धाः, परलोकसाधनवैमुख्येनेहलोकप्रतिबद्धत्वात्, **नो** नैव **साधवो ज्ञेया** ज्ञातव्याः, इति गाथार्थः ।।५१।।

चक्रे० : साध्वसाधुस्वरूपमुक्त्वा पुनः साधुत्वं वक्तुमुपदेशमाहुः –

देव० : साध्वसाधुस्वरूपमभिहितमधुना पुनः साधुतत्त्वं प्रतिपादयन्नुपदेशमाह –

सीलंगाण सहस्सा अट्ठारस जे जिणेहिं पन्नत्ता ।
जो ते धरेइ सम्मं गुरुबुद्धी तम्मि कायव्वा।।१३९।।

चक्रे० : अक्षरार्थः सुगमः, नवरं शील्यतेऽभ्यस्यते विधिनिषेधरूपतयेति शीलं चारित्रम्, तस्याऽङ्गान्यंशास्तेषां **सहस्राण्यष्टादश**, तन्निष्पत्तिश्च –

जोगे करणे सन्ना इंदिय भोमाइ समणधम्मे य ।
सीलंगसहस्साणं अट्ठारसगस्स निप्फत्ती ।। [स्तवपरिज्ञा-५४]

योगः करणकारणानुमतिरूपस्त्रिधा, करणं मनोवाक्कायरूपं त्रिधा, संज्ञा आहारभयमैथुन-परिग्रहरूपाश्चतस्रः, इन्द्रियाणि श्रोत्रचक्षुर्घ्राणरसनस्पर्शनरूपाणि पञ्च, भूम्यादिः पृथिव्यप्ते-जोवायुवनस्पतिद्वित्रिचतुष्पञ्चेंद्रियाऽजीवरूपो दशपदः, श्रमणधर्मः क्षान्तिमार्दवार्जवमुक्ति-तपःसंयमसत्यशौचाऽऽकिञ्चन्यब्रह्मचर्यरूपो दशविधः, तैः शीलाङ्गसहस्राष्टादशकस्य निष्पत्तिः,

तथाहि – न हन्ति मनसाऽऽहारसंज्ञासंवृतः श्रोत्रेन्द्रियसंवरणः पृथिवीजीवान् क्षान्तिसम्पन्न इत्येकं शीलाङ्गम्,

एवं मार्दवादिपदयोगेनापि पृथिवीकायाभिलापेन दश शीलाङ्गविकल्पाः स्युः, एवमप्कायाद्यभिलापैरपि दश दश मिलितं जातं शतम्, एतच्च श्रोत्रेन्द्रियेण लब्धम्, एवं प्रत्येकं चक्षुरादिभिरपि जातानि पञ्चशतानि, एतानि चाऽऽहारसंज्ञापदेनामुच्यमानानि लब्धानि, एवं भयादिसंज्ञाभिरपि, जाते द्वे सहस्रे, एतावच्च मनसा लब्धम्, एवं वाक्कायाभ्यामपि, जातानि षट् सहस्राणि, एतानि च स्वयंकरणेन, एवं कारणाऽनुमतिभ्यामपि प्रत्येकं षट् षट् सहस्राणि, सर्वमेलने जातान्यष्टादश सहस्राणि।।१३९।।

देव० : अक्षरार्थः सुगमः, नवरं शील्यतेऽभ्यस्यते विधिप्रतिषेधरूपतयेति शीलं चारित्रम्, तस्याऽङ्गान्यंशास्तत्समुदायरूपत्वात्तस्य तेषां **सहस्राण्यष्टादश,** कथं पुनरेकविधस्य शीलस्याङ्गानामष्टादश सहस्राणि ? उच्यते –

जोगे करणे सण्णा इंदिय भोमाइ समणधम्मे य ।
सीलंगसहस्साणं अट्ठारसगस्स निप्फत्ती ।। [स्तवपरिज्ञा-५४]

व्याख्या–योगः करणकारणानुमतिरूपस्त्रिधा, तस्मिन् विषयभूते करणं मनोवाक्कायरूपं त्रिधा, तत्र संज्ञादीनि चत्वारि पदानि द्वन्द्वैकत्ववन्ति तत्र संज्ञा आहारभयमैथुनपरिग्रहस्वरूपाश्चतस्रः, तास्विन्द्रियाणि श्रोत्रचक्षुर्घ्राणरसनस्पर्शनलक्षणानि पञ्च, तेषु भूमिरादिर्यस्य गणस्य भूम्यादिः, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियाजीवरूपो दशपदः, तत्र श्रमणधर्मः क्षान्तिमार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिञ्चन्यब्रह्मरूपो दशविधः । तस्मिंश्च **शीलाङ्गसहस्राणामष्टादशकस्य** निष्पत्तिस्तथाहि – न हन्ति मनसाऽऽहारसंज्ञासंवृतः श्रोत्रेन्द्रियसंवरणः पृथिवीजीवान् क्षान्तिसम्पन्न इत्येकं शीलाङ्गम्, एवं मार्दवादिपदयोगेनापि पृथिवीकायाभिलापेन दश शीलाङ्गविकल्पाः स्युः । एवमप्कायाद्यभिलापैरपि दशदशमीलितं जातं शतम्, एतच्च श्रोत्रेन्द्रियेण लब्धम्, एवं प्रत्येकं चक्षुरादिभिरपि, जातानि पञ्च शतानि, एतान्याहारपदेनामुच्यमानेन लब्धानि, एवं भयादिसंज्ञाक्रान्ताभिरपि जाते द्वे सहस्रे, एतावच्च मनसा लब्धम्, एवं वाक्कायाभ्यामपि, जातानि षट् सहस्राणि, एतानि स्वयं करणेन, एवं कारणानुमतिभ्यामपि, प्रत्येकं षट् षट् सहस्राणि, सर्वमीलने जातान्यष्टादशसहस्राणि। ननु चैकयोग एवाऽष्टादशसहस्राणि स्युः यदा तु द्व्यादिसंयोगजन्या इह क्षिप्यन्ते भेदास्तदा बहवोऽपि स्युस्तथाहि –

एकद्व्यादिसंयोगेन योगेषु सप्त विकल्पाः, एवं करणेषु संज्ञासु पञ्चदश, इन्द्रियेष्वेकत्रिंशत्, भूम्यादिषु त्रयोविंशत्यधिकं सहस्रम्, एवं क्षमादिष्वपि, इत्येषां च परस्पराभ्यासे द्वे कोटीसहस्रे, त्रीणि कोटीशतानि, चतुरशीतिकोटीनामेकपञ्चाशल्लक्षाणि, त्रिषष्टिसहस्राणि, द्वे शते, पञ्चषष्टिश्चेति, अङ्कतोऽपि २३८४५१६३२६५. ततः किमष्टादशैव सहस्राण्युक्तानि ? उच्यते यदि श्रावकधर्मवदन्यतरभङ्गकेन सर्वविरतिप्रतिपत्तिः स्यात्तदा युज्येत तद्भणनम्, न चैवमेकतरस्यापि, शीलाङ्गभङ्गकस्य शेषसद्भाव एव भावाद्, अन्यथा सर्वविरतिरेव न स्याद्, अभ्यधायि च –

इत्थ इमं विन्नेयं अईयं पज्जं तु बुद्धिमंतेहिं ।
एक्कम्मि वि सुपरिसुद्धं सीलंगं सेससब्भावे ।। तथा –
इक्को वायपएसोऽसंखेयपएसो संगओ जहउ ।
एयंपि तहा नेयं सतत्तचाओ इयरहा उ ।। [स्तवपरिज्ञा-६१, ६२]

इति गाथार्थः।।१३९।।

चक्रे० : अत एव –

देव० : अत एव च –

ऊणत्तं न कयाइ वि इमाण संखं इमं तु अहिगिच्च ।
जं एयधरा सुत्ते निद्दिट्ठा [१]वंदणिज्जाओ।।१४०।।

चक्रे० : ऊनत्वमेकादिभिर्हीनत्वं **न कदाचिदपि** दुःषमादावप्येषां शीलाङ्गानां **सङ्ख्यामिमां त्वष्टादशशीलाङ्गसहस्रलक्षणा<u>मधिकृत्य</u>, यद्** यस्मा**देतद्धरा** अष्टादशशीलाङ्गसहस्रधारिण एव **सूत्रे** प्रतिक्रमणाख्ये **निर्दिष्टा वन्दनीयाः** 'अट्ठारससीलंगसहस्सधारा' इति वचनेन ।।१४०।।

देव० : ऊनत्वमेकादिभिर्हीनत्वं **नैव कदाचिदपि** दुःषमादाव**प्येतेषां** शीलाङ्गानां **सङ्ख्यां** परिमाण**मिमामे**तामष्टादशसहस्रलक्षणाम्, **तु**रेवकारार्थो योजित एव, **अधिकृत्या**श्रित्य, कुत एतदित्याह – **यद्यस्मादेतद्धरास्त्वष्टादशशीलाङ्गसहस्रधारिण एव सूत्रे** प्रतिक्रमणाख्ये **निर्दिष्टा** उक्ता **वन्दनीया** [२]नमस्कारार्हाः, नान्ये 'अट्ठारससीलंगसहस्सधारा' इत्यादिवचनप्रामाण्यादयमपि, **तु**शब्द एवकारार्थः प्राग्योजितश्चेति गाथार्थः।।१४०।।

---

१. वंदणिज्जाउ T,C २. प्रणम्याः T,B,C

** स्तवपरिज्ञायाम्-७५ **

ऊणत्तं न कयाइवि इमाणं संखं इमं तु अहिगिच्च ।
जं एयधरा सुत्ते णिद्दिट्ठा वंदणिज्जाओ ।।

ऊनत्वं न कदाचिदप्येतेषां शीलाङ्गानां **संख्यामेवाधिकृत्य**-आश्रित्य, यस्मा**देतद्धरा**-अष्टादशशीलाङ्गसहस्रधारिणः **सूत्रे** प्रतिक्रमणाख्ये **निर्दिष्टा वन्दनीया** नान्ये 'अट्ठारससहस्ससीलंगधारा' इत्यादि वचनप्रामाण्यात् । इदं तु बोध्यम्-यत्किञ्चिदेकाद्युत्तरगुणहीनत्वेऽपि मूलगुणस्थैर्येण चारित्रवतां योग्यतया शीलाङ्गसङ्ख्या पूरणीया, प्रतिज्ञाकालीनसंयमस्थानान्यसंयमस्थानानां षट्स्थानपतितानां चोक्तवदेव तुल्यत्वोपपत्तेः 'संजमठाणठियाणं किइकम्मं बाहिराणं भइअव्वं' इत्याद्युक्तस्योपपत्तेश्चेत्यधिकमस्मत्कृतगुरुतत्वविनिश्चये । उत्सर्गविषयो वाऽयम् ।।७५।।

चक्रे० : उक्तमेवार्थं किञ्चिद्विशिष्टमाहुः -

देव० : उक्तमेवार्थं किञ्चिद्विशिष्टमाह -

पंचविहाययरओ अट्ठारससहस्सगुणगणोवेओ ।
एस गुरू मह सुंदर भणिओ कम्मट्ठमहणेहिं।।१४१।।

चक्रे० : स्पष्टा, नवरं **पञ्चविध आचारो** ज्ञानदर्शनचारित्रतपोवीर्याचारभेदात्।।१४१।।

देव० : पञ्चविधः पञ्चप्रकार **आचारो** व्यवहारः, स च ज्ञानदर्शनचारित्रतपोवीर्यविषयस्तत्र **रतः** सक्तः स्वयमासेवनतोऽन्योपदेशतश्च प्रागभिहितशीलाङ्गलक्षणा**ष्टादशसहस्रगुणगणोपेतः,** एवंविशिष्टे गुरौ जातहर्षः शिष्यं प्रत्याह ग्रन्थकारः, हे **सुन्दर !** गुणानुरागप्रधान **एष गुरुर्मम भणितः कर्माष्टमथनै**र्जिनैः । इह विशेषणपरनिपातः प्राकृतत्वादिति गाथार्थः।।१४१।।

चक्रे० : एवं साधुस्वरूपमाख्यायेदानीं षट्त्रिंशतिकाषट्केनाचार्यगुणानाख्यातुं गाथासमूहमाहुः -

देव० : तदियता सामान्येन साधुस्वरूपमुपवर्ण्य साम्प्रतं विचित्रषट्त्रिंशतिकाभिराचार्यगुणाभिधित्सया गाथाकदम्बकमाह -

अट्ठविहा गणिसंपय चउग्गुणा नवरि हुंति बत्तीसं ।
विणओ य चउब्भेओ छत्तीसगुणा इमे तस्स।।१४२।।

चक्रे० : गणो गच्छोऽस्याऽस्तीति **गण्या**चार्यस्तस्य **सम्पत्**समृद्धि**रष्टविधा** - १-आचार

२-श्रुत ३-शरीर ४-वचन ५-वाचना ६-मति ७-प्रयोगमति ८-संग्रहपरिज्ञाभेदात्, **नवरं चतुर्गुणाश्च**तुर्भिर्गुणिता **भवन्ति द्वात्रिंशत्** सूरिगुणाः ।

तत्राचारोऽनुष्ठानम्, स एव सम्पत् सा चतुर्द्धा । तद्यथा –

१-संयमध्रुवयोगयुक्तता – चरणे नित्यं समाध्युपयुक्ततेत्यर्थः २-असंप्रग्रहः – आत्मनो जात्याद्युत्सेकरूपाऽऽग्रहवर्जनम् ३-अनियतवृत्तिः - अनियतविहारः ४-वृद्धशीलता - वपुर्मनसोर्निर्विकारता ।

एवं श्रुतसम्पच्चतुर्धा, १-बहुश्रुतता - युगप्रधानागमतेत्यर्थः २-परिचितसूत्रता - उत्क्रमक्रम-वाचनादिभिः स्थिरसूत्रता ३-विचित्रसूत्रता - स्वसमयादिभेदात् ४-घोषविशुद्धिकरणता - उदात्तादिविज्ञानात् ।

शरीरसम्पच्चतुर्धा, १-आरोहपरिणाहयुक्तता - उचितदैर्घ्यादिविस्तरतेत्यर्थः २-अनवत्रप्यता - अलज्जनीयाऽङ्गता ३-परिपूर्णेन्द्रियताऽनुपहतचक्षुरादिकरणता ४-स्थिरसंहननता - तपःप्रभृतिषु शक्तियुक्तता ।

वचनसम्पच्चतुर्धा, १-आदेयवचनता २-मधुरवचनता ३-अनिश्रितवचनता-मध्यस्थ-वचनतेत्यर्थः ४-असन्दिग्धवचनता।

वाचनासम्पच्चतुर्धा, १-विदित्वोद्देशनम् - परिणामिकादिकं शिष्यं ज्ञात्वेत्यर्थः २-विदित्वा समुद्देशनम् ३-परिनिर्वाप्यवाचना - पूर्वदत्ताऽऽलापकान् शिष्यमधिगमय्य पुनः सूत्रदानम् ४-अर्थनिर्यापणा - अर्थस्य पूर्वापरसाङ्गत्येन गमनिका।

मतिसम्पच्चतुर्धा, १-अवग्रह २-इहा ३-अपाय ४-धारणाभेदात् ।

प्रयोगमतिसम्पच्चतुर्धा इह प्रयोगो वादमुद्रा, १-तत्रात्मपरिज्ञानम् - वादादिसामर्थ्यविषये २-पुरुषपरिज्ञानम् - किमयं वादी साङ्ख्यो बौद्धो वा ? ३-क्षेत्रपरिज्ञानम् - किमिदं मायाबहुल-मन्यथा वा ? साधुभावितमभावितं वेति ? ४-वस्तुज्ञानम् - किमिदं राजाऽमात्यसभ्यादि भद्रकमभद्रकं वा ?

संग्रहः स्वीकरणम्, तत्र परिज्ञाज्ञानमष्टमी सम्पच्चतुर्धा, १-पीठफलकादिद्रव्यविषया २-बालादियोग्यक्षेत्रविषया ३-यथासमयं स्वाध्याय - भिक्षाविषया ४-यथोचितविनयादिविषया चेति।

तथा **विनयश्चतुर्भेदः** स च –

आयारे सुयविणए विक्खिवणे चेव होइ बोद्धव्वे ।
दोसस्स य निग्घाए विणए चउहेस पडिवत्ती ।। [प्रव.सा॰ ५४६]

एतद्गाथातोऽवसेयः, तत्राऽऽचारविनयः संयमतपोगणैकाकिविहारविषयचतुर्विधसामाचारी-स्वरूपः । १-तत्र पृथ्वीकायरक्षादिसप्तदशपदेषु स्वयं करणाऽन्यकारणसीदत्स्थिरीकरणयत-मानोपबृंहणात्मिका संयमसामाचारी। २-पाक्षिकाष्टमीचतुर्दश्यादिषु द्वादशविधतपसि स्वपरयोर्व्यापारणरूपा तपःसामाचारी, प्रत्युपेक्षणादिषु, बालग्लानादिवैयावृत्यादिषु च ३-विषीदद्गणप्रवर्त्तनस्वयमुद्यमनस्वभावा गणसामाचारी ४-एकाकिविहारप्रतिमायाः स्वयमङ्गीकरणान्याङ्गीकारणलक्षणा एकाकिविहारसामाचारी।

श्रुतविनयः १-सूत्रग्राहण २-अर्थश्रावण ३-हित ४-निःशेषवाचनात्मकः । हितं योग्यताऽनुसारेण वाचयतो निःशेषमापरिसमाप्तेः ।

१-विक्षेपणाविनयश्च मिथ्यात्वविक्षेपणान्मिथ्यादृष्टेः स्वसमये स्थापनम्।२-सम्यग्दृष्टेस्त्वारम्भ-विक्षेपणाच्चारित्राध्यासनम्। ३-च्युतधर्मस्य धर्मे स्थापनम्। ४-प्रतिपन्नचारित्रस्य परस्याऽऽत्मनो वाऽनेषणीयादिनिवारणेन हितार्थमभ्युत्थानमिति लक्षणः।

तथा १-दोषनिर्घातविनयः क्रुद्धस्य क्रोधापनयनम्। २-दुष्टस्य विषयादिदोषवतो दोषाऽप-नयनम् । ३-काङ्क्षितस्य परसमयादिकाङ्क्षावतः काङ्क्षाच्छेदः। ४-स्वतश्चोक्तदोषविरहादा-त्मप्रणिधानमिति स्वरूपः।

एवमात्मानं परं च विनयतीति विनय इति दिग्मात्रमिदम्, विशेषस्तु व्यवहारभाष्यादेरवसेयः । **इमे** मिलिताः **षट्त्रिंशद्गुणास्तस्य** गणिनो भवन्तीति गाथार्थः ।।१४२।।

देव० : गणः समुदायो गुणानां[१] साधूनां वा यस्यास्ति स गणी, 'भूम्नि अतिशायिने वा इन्' अतिशायी वाचार्यस्तस्य सम्पत्समृद्धिर्भावरूपा **गणिसम्पदष्टविधा**ष्टप्रकारा, आचार-श्रुतशरीरवचनवाचनामतिप्रयोगमतिसङ्ग्रहपरिज्ञाभेदाद् **नवरं** केवलं **चतुर्गुणाः** प्रतिभेदं चतुर्भिराहता **द्वात्रिंशद्भवन्ति** सूरिगुणा इति योगः ।

---

१. भूयानतिशयवान् वा गुणानां साधूनां वा यस्यास्तीति स गणी आचार्यस्तस्य T,C

तत्राचरणमाचारोऽनुष्ठानम्, स एव सम्पद्विभूतिस्तस्य वा सम्पत्सम्पत्तिराचारसम्पत्, सा चतुर्धा, तद्यथा – १-संयमध्रुवयोगयुक्तता चरणे नित्यं समाध्युपयुक्ततेत्यर्थः, २-असम्ग्रह आत्मनो जात्याद्युत्सेकरूपग्रहवर्जनमिति भावः, ३-अनियतवृत्तिरनियतविहार इति योऽर्थः, ४-वृद्धशीलता वपुर्मनसोर्निर्विकारतेति यावदिति ।

एवं श्रुतसम्पत् सापि चतुर्धा, तद्यथा – १-बहुश्रुतता युगप्रधानागमतेत्यर्थः, २-परिचितसूत्रतोत्क्रमक्रमवाचनादिभिः स्थिरसूत्रता, ३-विचित्रसूत्रता स्वसमयादिभेदात्, ४-घोषविशुद्धिकरणतोदात्तादिविज्ञानादिति।

शरीरसम्पच्चतुर्धा, तद्यथा – १-आरोहपरिणाहयुक्ततोचितदैर्घ्यादिविस्तरतेत्यर्थः, २-अनवत्रप्यताऽलज्जनीयाङ्गतेत्यर्थः, ३-परिपूर्णेन्द्रियताऽनुपहतचक्षुरादिकरणता, ४-स्थिरसंहननता तपःप्रभृतिषु शक्तियुक्ततेति ।

वचनसम्पच्चतुर्धा, तद्यथा – १-आदेयवचनता, २-मधुरवचनता सरसवाक्यता, ३-अनिश्रितवचनता मध्यस्थवचनतेत्यर्थः, ४-असन्दिग्धवचनता परिस्फुटवचनतेत्यर्थः।

वाचनासम्पच्चतुर्धा, तद्यथा - १-विदित्वोद्देशनं, परिणामिकादिकं शिष्यं ज्ञात्वेत्यर्थः, २-विदित्वा समुद्देशनम्, ३-परिनिर्वाप्यवाचना, पूर्वदत्तालापकान् शिष्यमधिगमय्य पुनः सूत्रदानम्, ४-अर्थनिर्यापणाऽर्थस्य पूर्वापरसाङ्गत्येन गमनिकेति।

मतिसम्पच्चतुर्धा, तद्यथा – १-अवग्रह २-ईहा ३-अपाय ४-धारणाभेदादिति ।

प्रयोगमतिसम्पच्चतुर्धा, इह प्रयोगो वादमुद्रा, १-तत्रात्मपरिज्ञानं वादादिसामर्थ्यविषये, २-पुरुषपरिज्ञानं किं नयोऽयं वाद्यादि, ३-क्षेत्रपरिज्ञानं किमिदं मायाबहुलमन्यथा वा, साधुभिर्भावितमभावितं वेति विमर्शनम्, ४-वस्तुपरिज्ञानं वस्तु वादकाले राजाऽमात्यादिरिति।

संग्रहपरिज्ञा, संग्रहः स्वीकरणम्, तत्र परिज्ञाज्ञानमष्टमीसम्पच्चतुर्धा, तद्यथा– १-बालादियोग्यक्षेत्रविषया, २-पीठफलकादिविषया, ३-यथासमयं स्वाध्यायभिक्षाविषया, ४-यथोचितविनयादिविषया चेति।

तथा **विनयश्चतुर्भेदः,** स च–

आयारे सुयविणए विक्खिवणे चेव होइ बोद्धव्वे ।
दोसस्स य निग्घाए विणए चउहेस पडिवत्ति ।। [प्रव. सारो॰ ५४६]

२. ग्राह T,C

इत्येतद्रथातोऽवसेयः, तत्राऽऽचारविनयः संयमतपोगणैकाकिविहारविषयचतुर्विध-सामाचारीस्वरूपः १-तत्र पृथ्वीकायरक्षादिसप्तदशपदेषु स्वयंकरणान्यकारणसीदत्स्थिरी-करणयतमानोपबृंहणात्मिका संयमसामाचारी, २-पाक्षिकाष्टमीचतुर्दश्यादिषु द्वादशविधतपसि स्वपरयोर्व्यापारणरूपा तपःसामाचारी, ३-प्रत्युपेक्षणादिषु बालग्लानादिवैयावृत्त्यादिषु च विषीदद्गणप्रवर्तनस्वयमुद्यमनस्वभावा गणसामाचारी, ४-एकाकिविहारप्रतिमायाः स्वयमङ्गी-करणान्याङ्गीकारणलक्षणैकाकिविहारसामाचारीति ।१।

श्रुतविनयः – १-सूत्रग्राहण २-अर्थश्रावण ३-हित ४-निःशेषवाचनात्मकश्च हितं योग्यतानुसारेण, वाचयतो निःशेषमापरिसमाप्तेः, शेषं स्पष्टमिति ।२।

विक्षेपणाविनयश्च– १-मिथ्यात्वविक्षेपणान्मिथ्यादृष्टेः स्वसमये स्थापनम्, २-सम्यग्दृष्टेस्त्वार-म्भविक्षेपेण चारित्राध्यासनम्, ३-च्युतधर्मस्य धर्मे स्थापनम्, ४-प्रतिपन्नचारित्रस्य परस्यात्मनो वाऽनेषणीयादिनिवारणेन हितार्थमभ्युत्थानमिति लक्षणः ।३।

तथा दोषनिर्घातविनयः १-कुद्धस्य क्रोधाऽपनयनम्, २-दुष्टस्य विषयादिदोषवतो दोषाऽपनयनम्, ३-काङ्क्षितस्य परसमयादिकाङ्क्षावतः काङ्क्षाछेदः, ४-स्वतश्चोक्तदोषविरहादात्मप्रणिधान-मिति स्वरूपः ।४। एवं ह्यात्मानं परं च विनयतीति विनयः, इति दिग्मात्रमिदम्, विशेषस्तु व्यवहार-भाष्यादवसेय इति । **इमे** मीलिताः **षट्त्रिंशद्गुणास्तस्य** गणिनो भवन्तीति गाथार्थः ।। १४२।।

**** उपदेशमाला पुष्पमालायाम्-३३४ ****

अथ भङ्ग्यन्तरेणापि गुरोः षट्त्रिंशद्गुणानाह –

अट्ठविहा गणिसंपय आयाराई चउव्विहेक्केक्का ।
चउहा विणयपवित्ती छत्तीसगुणा इमे गुरुणो ।।

गणोऽस्यास्तीति **गण्या**चार्यस्तस्य **सम्पत्** समृद्धिः, सा चेहाचारादिभेदादष्टधा, तद्यथा– १-आचारसम्पत् २-श्रुतसम्पत् ३-शरीरसम्पत् ४-वचनसम्पत् ५-वाचनासम्पत् ६-मतिसम्पत् ७-प्रयोगमतिसम्पत् ८-संग्रहपरिज्ञासम्पत् तथा चाह–

आयार सुय सरीरे वयणे वायण मई पओगमई । एएसु संपया खलु अट्ठविहा संगहपरिण्णा ।।

एतासु चैकैका चतुर्विधा, तत्राचारसम्पत्तावदित्थं चतुर्धा–१-संयमध्रुवयोगयुक्तता २-असंप्रग्रहः ३-अनियता वृत्तिः ४-वृद्धशीलता चेति तत्र संयमश्चारित्रं तस्मिन् ध्रुवो नित्यो योगः समाधिस्तद्युक्तता, कोऽर्थः ? तत्र सततोपयुक्तता, तथा समन्तात् प्रकर्षेण जातिश्रुततपोरूपादिप्रकृष्टतालक्षणेनात्मनो

ग्रहणं अहमेव जातिमानित्यादिरूपेणावधारणं संप्रग्रहो न तथाऽसम्प्रग्रहः, जात्याद्यनुत्सिक्तत्वमित्यर्थः, अनियता वृत्तिः–अनियतविहारस्वरूपा, एवं वृद्धशीलता वपुषि मनसि च निभृतस्वभावता, निर्विकारतेत्यर्थः।

अथ श्रुतसम्पच्चतुर्धा, तद्यथा- १-बहुश्रुतता २-परिचितसूत्रता ३-घोषविशुद्धिकरणता ४-उदात्तानुदात्तादिस्वरविशुद्ध्याराधयिता।

शरीरसम्पच्चतुर्धा– १-आरोहपरिणाहयुक्तता २-अनवत्राप्यता ३-परिपूर्णेन्द्रियता ४-स्थिरसंहननता च, १-अत्राऽऽरोहो दैर्घ्यं परिणाहो विस्तरस्ताभ्यां लक्षणप्रमाणसमन्विताभ्यां युक्तताऽऽरोहपरिणाहयुक्तता, २-अविद्यमानमवत्राप्यमवत्रपणं लज्जनं यस्य स तथा, यद्वाऽवत्रापयितुं लज्जायितुमर्हः शक्यो वाऽवत्राप्यो लज्जनीयो न तथाऽनवत्राप्यः, लक्षणसम्पूर्णाहीनसर्वाङ्गत्वेन सर्वस्याप्यलज्जनीय इत्यर्थः, तद्भावोऽनवत्राप्यता ३-परिपूर्णान्यनुपहतानि चक्षुरादीनीन्द्रियाणि यस्य स तथा तद्भावः परिपूर्णेन्द्रियता।

वचनसम्पच्चतुर्द्धा– १-आदेयवचनता २-मधुरवचनता ३-अनिश्रितवचनता ४-असंदिग्धवचनता, तत्र प्रकृष्टार्थप्रतिपादकमपरुषं सैश्वर्यगाम्भीर्यादिगुणोपेतमत एव श्रोतृजनाल्हादकं मधुरं वचनं यस्य स तथा तद्भावो मधुरवचनता, रागाद्यनिश्रितं वचनं यस्य स तथा तद्भावोऽनिश्रितवचनता, परिस्फुटवचनता ।

वाचनासम्पच्चतुर्द्धा-१-विदित्वोद्देशनं २-विदित्वा समुद्देशनं ३-परिनिर्वाप्य वचनता ४-अर्थनिर्यापणा च, तत्र पारिणामकत्वादिगुणोपेतान् शिष्यान् विज्ञाय यद्यस्य योग्यं तत्तस्यैवोद्दिशतः समुद्दिशतश्च विदित्वोद्देशनविदित्वासमुद्देशने ज्ञातव्ये, परिनिर्वाप्य पूर्वप्रदत्तसूत्रालापकान् जाहकदृष्टान्तेन शिष्यस्य सम्यक् परिणमय्य ततोऽपरालापकानां वाचना परिनिर्वाप्यवाचना, अर्थस्य सूत्राभिधेयस्य निर्यापणापूर्वापरसाङ्गत्येन विमृशतः प्ररूपयतो वा सम्यग् निर्वाहनाऽर्थनिर्यापणा ।

सम्यगवग्रहेहापायधारणाभेदान्मतिसम्पच्चतुर्धा ।

प्रयोगोऽत्र प्रयोजनसिद्धये व्यापारस्तत्काले मतिर्वस्तुपरिच्छित्तिः प्रयोगमतिः, तत्सम्पच्चतुर्द्धा ऽऽत्मपुरुषक्षेत्रवस्तुपरिज्ञानभेदात्, १-तत्रात्मज्ञानं वाद्यादिव्यापारकाले किममुं प्रतिवादिनं जेतुं मम शक्तिरस्ति न वेत्याद्यात्मीयस्वरूपपर्यालोचनम्, २-पुरुषज्ञानं किमयं प्रतिपादी पुरुषः साङ्ख्यः सौगतोऽन्यो वा प्रतिभादिमानितरो वेत्यादि परिभावनम्, ३-क्षेत्रज्ञानं किमिदं क्षेत्रं संयमनिर्वाहानुकूलं न वा साधुभिर्भावितमभावितं वेत्यादि विमर्शनम्, ४-वस्तुज्ञानं किमिदमाहारादि वस्तु मम हितं न वेत्यादि निरूपणम्।

संग्रहपरिज्ञासम्पदपि चतुर्धा, तत्र बालदुर्बलग्लानबहुयतिजननिर्वाहयोग्यक्षेत्रग्रहणलक्षणा प्रथमा निषद्यादिमालिन्यपरिहाराय पीठफलकोपादानात्मिका द्वितीया, उक्तञ्च जीतकल्पे 'पीढगफलगग्गहणे न उ मइलंती निसिज्जाई'।

वासासु विसेसेणं अण्णं कालं तु गम्मए तत्थ । पाणा सीयलकुंथाइया य तो गहण वासासु ।। तथा स्वयमेव स्वाध्यायप्रत्युपेक्षणाभिक्षाटनोपधिसमुत्पादनात्मिका तृतीया, प्रव्राजकाध्यापकरत्नाधिकप्रभृतीनामुपधिवहनविश्रामणाभ्युत्थानदण्डकोपादानादिरूपा चतुर्थी, तदेवं दर्शिता प्रत्येकं चतुर्विधाऽष्टापि गणिसम्पदः ।

अथ **चतुर्द्धा विनयप्रतिपत्तिरु**च्यते तत्रेत्थं विनयश्चतुर्धा—आचारविनयः श्रुतविनयो विक्षेपणाविनयो दोषनिर्घातनाविनयश्च ।

तत्राचारविनयः पुनरपि चतुर्धा, तद्यथा–संयमसामाचारी तपःसामाचारी गणसामाचारी एकाकिविहारसामाचारी च, १-तत्र संयमं स्वयमाचरति परं च ग्राहयति तत्र च सीदन्तं स्थिरीकरोति तदुद्यन्तं चोपबृंहतीति संयमसामाचारी, २-पाक्षिकादिषु तपःकर्म्म स्वयं करोति परं च कारयति भिक्षाचर्यां स्वयमनुतिष्ठति परं च तस्यां नियुङ्क्त इति तपः सामाचारी, ३-प्रत्युपेक्षणाबालवृद्धादिवैयावृत्त्यादिकार्येषु स्वयमभ्युद्यतोऽग्लान्या गणं प्रेरयतीति गणसामाचारी, ४-एकाकिविहारप्रतिमां स्वयं प्रतिपद्यते परं च ग्राहयतीत्येकाकिविहारसामाचारी।

श्रुतविनयोऽपि चतुर्द्धा- १-सूत्रवाचनां ददाति, २-अर्थं व्याख्यानयति, ३-हितं वाचयति हितवाचना तदैव भवति यदा सूत्रमर्थस्तदुभयं वा परिणामिकादिगुणोपेतं शिष्यं पर्यालोच्य यद्यस्य योग्यं तत्तस्यैव वाचयति, ४-सूत्रमर्थं वा निःशेषं परिसमाप्तिं यावद्वाचयति नानवस्थिततयाऽपान्तरालेऽपि मुञ्चति ।

विक्षेपणाविनयश्चतुर्द्धा, १-तत्र मिथ्यादृष्टिं मिथ्यामार्गाद्विक्षिप्य सम्यक्त्वधर्मं ग्राहयति, २-सम्यग्दृष्टिं तु गृहस्थं गार्हस्थ्याद्विक्षिप्य प्रव्राजयति, ३-सम्यक्त्वाच्चारित्राद्वा च्युतं तद्भावाद्विक्षिप्य पुनस्तत्रैव स्थापयति स्वयं चारित्रधर्मस्य यथैवाभिवृद्धिस्तथैव प्रवर्त्तते, ४-अनेषणीयपरिभोगादित्यागेनैषणीयपरिभोगादिस्वीकारेणेत्यर्थः।

दोषनिर्घातनाविनयोऽपि चतुर्द्धा, तद्यथा– १-क्रुद्धस्य देशनादिभिः क्रोधनिर्घातना, २-कषायविषयादिभिर्दुष्टस्य तद्भावविनिवर्त्तनम्, ३-भक्तपानादिविषयायाः परसमयविषयाया वा काङ्क्षाया निवर्त्तनम्, ४-स्वयं क्रोधदोषकाङ्क्षारहितस्य सुप्रणिहितस्य प्रवर्त्तनम्, तदेवमेषा कर्मविनयनाद्विनयप्रवृत्तिश्चतुर्धा । तदेवमेतेऽपि सर्वे **षट्त्रिंशद्गुणा गुरो**र्भवन्तीति गाथार्थः ।।३३४।।

** गुरुगुणषट्त्रिंशत्षट्त्रिंशिकायाम्-३७ **

अथ षट्त्रिंशत्तमीं षट्त्रिंशिकामाह –

गणिसंपयट्ठचउविह बत्तीसं तेसु निच्चमाउत्तो ।
चउविहविणयपवित्तो छत्तीसगुणो गुरू जयउ ।।

गणिसंपदस्तावदष्टाष्टसंख्याकास्ताः प्रत्येकं **चतुर्विधा** इति द्वात्रिंशत्, **तेषु द्वात्रिंशद्गणिसंपद्भेदेषु नित्यमायुक्तः,** तथा चतुर्विधविनयप्रवृत्तः, इति षट्त्रिंशद्गुणो गुरुर्जयत्विति संक्षेपार्थः । विस्तरार्थस्त्वयम्- १-आचारसंपत्, २-श्रुतसंपत्, ३-शरीरसंपत्, ४-वचनसंपत्, ५-वाचनासंपत्, ६-मतिसंपत्, ७-प्रयोगमतिसंपत्, ८-संग्रहपरिज्ञासंपत्, इत्येता अष्टौ गणिसंपदः ।

तत्र चाचारसंपच्चतुर्धा- १-चरणसप्ततियुक्तता, २-निर्मदता, ३-अनियतविहारिता, ४-अचञ्चलेन्द्रियत्वं चेति ।

तथा श्रुतसंपच्चतुर्धा-१-युगप्रधानागमज्ञता, २-परिचितसूत्रार्थता, ३-उत्सर्गादिवेदित्वम्, ४-उदात्तादि-पटुवर्णोच्चारित्वम्।

तथा शरीरसंपच्चतुर्धा- १-समचतुरस्रसंस्थानता, २-संपूर्णाङ्गोपाङ्गता, ३-अविकलेन्द्रियत्वम्, ४-तपःपरीषहादेः सहिष्णुता चेति ।

तथा वचनसंपच्चतुर्धा- १-अनाहतप्रतिभात्वम्, २-मधुरवाक्यता, ३-निर्विकारवचनता, ४-स्फुटवचनता चेति ।

तथा वाचनासंपच्चतुर्धा- १-योग्यायोग्यपात्रज्ञता, २-पूर्वस्मिन् सूत्रार्थजाते परिणतेऽपरसूत्रार्थदानम्, ३-सूत्रं प्रति निर्यापणमुत्साहनम्, ४-अर्थं प्रति निर्वाहित्वं चेति ।

तथा मतिसंपच्चतुर्धा- १-अवग्रहोऽव्यक्तग्रहणम्, २-इहा विमर्शः, ३-अपायो निश्चयः, ४-धारणा अविस्मारणं चेति।

प्रयोगमतिर्वादबुद्धिः, साऽपि चतुर्द्धा- १-स्वशक्तिपरिज्ञानम्, २-पुरुषपरिज्ञानम्, ३-स्वपरानुकूलक्षेत्रपरिज्ञानम्, ४-स्वपरानुकूलराजादिवस्तुविज्ञानं चेति ।

संग्रहपरिज्ञासंपच्चतुर्धा- १-गणविहारयोग्यक्षेत्रादिपरीक्षणम्, २-भद्रकादीनामुपदेशतो गणचिन्तादौ स्थिरीकरणम्, ३-स्वाध्यायाङ्गानां पुस्तकादीनां संगच्छनम्, ४-तपोऽनुष्ठानादौ शैक्षकादीनां यद्यथायोग्यकृत्यज्ञता चेति । एवं गणिसंपद्भेदा द्वात्रिंशदिति ।

तथाऽऽचारश्रुतविक्षेपदोषप्रतिघातभेदभिन्नत्वाद् **विनयो**ऽपि चतुर्धा । १-तत्राचारविनयः स्वस्य परस्य वा संयमतपोगणप्रतिमाविहारादिसामाचारीसाधनलक्षणः, २-श्रुतविनयः सूत्रार्थोभयभावरहस्यानां दानग्रहणप्रेरणोपबृंहणादिभिः, ३-विक्षेपविनयो मिथ्यात्वतो गार्हस्थ्यतः प्रमादाद्वा विक्षिप्य तदुत्तरभावेषु स्थापनमिति, ४-तद्दोषप्रतिघातविनयो विषयकषायादिदोषप्रतिघातनेनेति । एतदर्थसूचिकाः पूर्वर्षिप्रणीतगाथाश्चात्र –

"आयार-सुय-सरीरे, वयणे-वायण-मई-पओगमई । एएसु संपया खलु, अट्ठमिया संगहपरिण्णा ।।

चरणजुओ-मयरहिओ, अनिययवित्ती-अचंचलो चेव । जुग-परिचय-उस्सग्गो-उदत्तघोसाइ विन्नाया ।।
चउरंस-अंकुटाई-बहिरत्तणवज्जिओ-तवे सत्तो। वाइ-महुरत्त-निम्मिय, फुडवयणो संपया वयणे ।।
जोगे-परिणयवयणो-निज्जवया-वायणाइ निव्वहणे । उग्गह-ईह-अवाया-धारण मईसंपया चउरो ।।
सत्ती-पुरिसं-खित्तं-वत्थुं नाउं पउंजए वायं । गणजोगं-संसत्तं-सज्झाए-सिक्खगं जाण ।।
आयारे सुअविणए, विक्खेवे चेव होइ बोद्धव्वे । दोसस्स परिग्घाए, विणए चउहेस पडिवत्ती ।।
इति गाथार्थः ।।३७।।

चक्रे० : तथा –

देव० : तथा –

वयछक्काई अट्ठारसेव आयारवाइ अट्ठेव ।
पायच्छित्तं दसहा सूरिगुणा हुंति छत्तीसं।।१४३।।

चक्रे० : व्रतषट्कादयोऽष्टादश प्रागुक्ताः, एषां चाऽऽचार्यगुणत्वमेतदपराधेषु सम्यक् प्रायश्चित्तज्ञानात् । भावप्रत्ययस्य लुप्तत्वादा**ऽऽचारवत्त्वादयोऽष्टावेव,** ते चामी –

आयारव मवहारव ववहारुव्वीलए पकुव्वी य ।
निज्जव अवायदंसी अपरिस्सावी य बोधव्वे ।। [व्यव.भा॰ ४२०]

अस्याश्चार्थः - १-आचारवान् ज्ञानसेवाभ्यां पञ्चप्रकाराचारयुक्तोऽयं हि गुणवत्त्वेन श्रद्धेयवाक्यो भवति। २-अवधारः – आलोचकोक्तापराधानामवधारणम्, तद्वान्, स हि सर्वाऽपराधेषु यथावच्छुद्धिदानसमर्थो भवति। ३-'ववहार'त्ति मतुब्लोपाद् व्यवहारवानागमश्रुताऽऽज्ञाधारणाजीतलक्षणपञ्चप्रकारव्यवहाराऽन्यतरयुक्तः, सोऽपि यथावच्छुद्धिकरणसमर्थो भवति । ४-लज्जादिनाऽतिचारान् गोपायन्तमुपदेशविशेषैरपव्रीडयति, विगतलज्जं करोतीति अपव्रीडकः, स ह्यालोचकस्यात्यन्तमुपकारको भवति, पदत्रयस्य कर्मधारयः । ५-आलोचितस्य प्रायश्चित्तदानेन प्रकर्षेण शुद्धिं कारयतीत्येवंशील इत्येतदर्थस्य सामायिकस्य कुर्व्धातोर्दर्शनात् प्रकुर्वी । ६-'निज्जव'त्ति प्राकृतत्वान्निर्यापकोऽयं हि यथा निर्वहति तथा प्रायश्चित्तं कारयति । ७-अपायान् दुर्लभबोधिकत्वादीन् सातिचाराणां दर्शयतीत्यपायदर्शी । ८-न परिश्रवत्यालोचकोक्तमकृत्यमन्यस्मै न निवेदयतीत्येवंशीलोऽपरिश्रावी । तदन्यो ह्यालोचकानां लाघवकारी बोद्धव्यः ।

प्रायश्चित्तं दशधा यदाह –

आलोयणपडिक्कमणे मीसविवेगे तहा विउस्सग्गे ।
तवछेयमूल अणवट्ठया य पारंचिए चेव ।। [पञ्चा॰ १६-२, ओघनि॰ १४१८]

एते मिलिताः **सूरिगुणाः षट्त्रिंशद्भवन्ति**।।१४३।।

देव० : व्रतषट्कादयोऽष्टादशैव वर्णितस्वरूपा, अमीषां चाऽऽचार्यगुणत्वमेतदपराधेषु सम्यक्प्रायश्चित्तपरिज्ञानतः । भावप्रत्ययस्य लुप्तत्वादा**ऽऽचारवत्त्वादयोऽष्टावेव,** ते चामी –

आयारव मवहारव ववहारुव्वीलए पकुव्वी य ।
निज्जव अवायदंसी अपरिस्सावी य बोधव्वे ।। [व्यवहारभा॰ ४२०]

अस्याश्चार्थः – १-आचारवान् ज्ञानसेवाभ्यां पञ्चप्रकाराचारयुक्तः, अयं हि गुणवत्त्वेन श्रद्धेयवाक्यो भवति, २-अवधार आलोचकोक्तापराधानामवधारणं तद्वान्, स हि सर्वापराधेषु यथावच्छुद्धिदानसमर्थो भवति, ३-'ववहार'त्ति मतुब्लोपाद् व्यवहारवानागमश्रुताऽऽज्ञाधारणाजीतलक्षणपञ्चप्रकारव्यवहारान्यतरयुक्तः, स हि यथावच्छुद्धिकरणसमर्थो भवति, ४-लज्जादिनातिचारान् गोपायन्तमुपदेशविशेषैरपव्रीडयति विगतलज्जं करोतीत्यपव्रीडकः, स ह्यालोचकस्यात्यन्तमुपकारको भवति, पदत्रयस्य च कर्मधारयः, ५-आलोचितस्य प्रायश्चित्तदानेन शुद्धिं प्रकर्षेण कारयतीत्येवंशील इत्येतदर्थस्यागमिकस्य[१] कुर्व्धातोर्दर्शनात्प्रकुर्व्वी, चः समुच्चये, ६-'निज्जव'त्ति प्राकृतत्वाद् निर्यापकः, अयं हि यथा निर्वहति तथा प्रायश्चित्तं कारयति, ७-अपायान् सातिचाराणां दुर्लभबोधिकत्वादीन् दर्शयतीत्यपायदर्शी, ८-न परिश्रवत्यालोचकोक्तमकृत्यमन्यस्मै न निवेदयतीत्येवंशीलोऽपरिश्रावी, तदन्यो ह्यालोचकानां लाघवकारी। चः समुच्चये । बोद्धव्यो ज्ञेयः, आचार्य इति योगः, इह च गुणगुणिनोः कथञ्चिदभेदादित्थं निर्देशोऽन्यथाऽऽचारवत्त्वमित्यादि द्रष्टव्यमिति।

तथा **प्रायश्चित्तं दशधा,** तच्चैवम् –

आलोयणपडिक्कमणे मीसविवेगे तहा वि उस्सग्गे ।
तवछेयमूल अणवट्ठया य पारंचिए चेव [पञ्चा॰ १६-२, ओघनि॰ १४१८]

१-तत्रालोचनं गुरोरतीचारप्रकाशनम्, २-प्रतीपं क्रमणं प्रतिक्रमणमतीचारान्निवर्त्तनम्, मिथ्या-

१. इत्येतदर्थस्य सामायिकस्य T,B,C

दुष्कृतदानमिति हृदयम्, ३-मिश्रमालोचनामिथ्यादुष्कृतरूपमुभयम्, ४-विवेचनं विवेकोऽनेषणीयभक्तादित्यागः, तथेति समुच्चये, ५-व्युत्सर्जनं व्युत्सर्गः कायोत्सर्ग इत्यर्थः, ६-तापयति कर्मेन्धनं दहतीति तपो निर्विकृतिकादि, ७-च्छेदः पञ्चाहादिक्रमेण श्रमणपर्यायस्य छेदनम्, ८-मूलं महाव्रतानां मूलत आरोपणम्, ९-नाऽवस्थाप्यत इत्यनवस्थाप्यस्तद्भावस्तत्ता क्लिष्टतरपरिणामस्याकृततपोविशेषस्य व्रतानामनारोपणमित्यर्थः, चः समुच्चये, १०-पारं प्रायश्चित्तानामन्तमञ्चति गच्छति पाराञ्चि, तदेव पाराञ्चिकं, अस्मिंश्च प्राप्ते षण्मासादिना द्वादशवर्षान्तेन तपसाऽपराधान्तं याति ततो दीक्ष्यते, चैवेति समुच्चयावधारणार्थौ, सर्वत्र च प्रथमैकवचनान्तता क्वचिदेकारान्तता विभक्तिलोपश्च प्राकृतत्वात् । सूरिगुणता चैषां यथावत्प्रयोजनेनेत्येते मीलिताः **सूरिगुणा भवन्ति षट्त्रिंशदिति** गाथार्थः ।।१४३।।

**** धर्मरत्नप्रकरणे-१२६/१ ****

तृतीया षट्त्रिंशिका त्वियम् –

वयछक्काई अट्ठारसेव आयारमाइ अट्ठेव ।
पायच्छित्तं दसहा सूरिगुणा हुंति छत्तीसं ।।

व्रतषट्कं कायषट्कं च प्रतीतम् । अकल्पादिषट्कं त्वेवम् । अकल्पो द्विधा–शिक्षकस्थापनाकल्पोऽकल्पस्थापनाकल्पश्च । तत्राद्यः –

अणहीया खलु जेणं पिंडेसणसिज्जवत्थपाएसा । तेणाणियाणि जइणो कप्पंति न पिंडमाईणि ।।

तथा

उउबद्धम्मि न अणला वासावासासु दोवि नो सेहा । दिक्खिज्जंती पायं ठवणाकप्पो इमो होइ ।।

द्वितीयः १-अनेषणीयपिण्डशय्यावस्त्रपात्रगोचरोऽकल्पः, २-गृहिभाजनं कांस्यकरोटिकादि, ३-पर्यङ्को मञ्चकादावुपवेशनम्, ४-निषद्या भिक्षार्थं गृहे प्रविष्टस्य साधोस्तत्र निषदनम्। ५-स्नानं द्विधा–अक्षिपक्ष्मप्रक्षालनमात्रमपि देशस्नानम्, सर्वाङ्गक्षालनं तु सर्वस्नानम्, ६-शोभा विभूषाकरणम्, एषां वर्जनमेव**मष्टादश** । एषां चाऽऽचार्यगुणत्वमेतदपराधेषु सम्यक्प्रायश्चित्तज्ञानात् ।

आचारवत्त्वादयोऽष्टौ गुणाः पूर्ववत् । तथा **प्रायश्चित्तं दशधा,** तद्यथा–

आलोयणपडिकमणे मीसविवेगे तहा विउस्सग्गे। तव-छेय-मूल-अणवट्ठया य पारञ्चिए चेव ।।

१-निरतिचारस्यासन्नगृहानीतभिक्षादेः प्रकटनमालोचनार्हम्, २-अनाभोगादिनाऽप्रमार्जितनिष्ठीवनादावसम्पन्नवधस्य मिथ्यादुष्कृतदानं प्रतिक्रमणार्हम्, ३-संभ्रमभयादौ सर्वव्रतातिचार आलोचनाप्रतिक्रमण-

रूपमुभयार्हम्, ४-उपयुक्तकृतयोगिगृहीतान्नादेः पश्चाज्ज्ञातस्याशुद्धस्य त्यागो विवेकार्हम्, ५-गमनागमनविहारादिषु पञ्चविंशत्युच्छ्वासादिचिन्तनं व्युत्सर्गार्हम्, ६-यस्मिन् प्रतिसेविते निर्विकृतिकादि षण्मासान्तं तपो दीयते तत्तपोऽर्हम्, ७-एवं यत्र पञ्चकादिपर्यायोच्छेदनम्, तच्छेदार्हम्, ८-यत्र पुनर्व्रतान्यारोप्यन्ते तन्मूलार्हम्, ९-यत्र पुनरनाचीर्णतया व्रतेषु न स्थाप्यते तदनवस्थाप्यार्हम्, १०-यत्र च तपोलिङ्गक्षेत्रकालानां पारमञ्चति तत् पाराञ्चितमिति । एते व्रतषट्कायादयश्च सर्वे मिलिताः **षट्त्रिंशत् सूरिगुणा भवन्ती**ति ।।१।।

चक्रे० : तथा –

देव० : तथा –

आयाराई अट्ठ उ तह चेव य दसविहो [१]य ठियकप्पो ।
बारस तव छावस्स य सूरिगुणा हुंति छत्तीसं ।।१४४।।

चक्रे० : आचारादय आचारसम्पदाद्या **अष्टौ** प्रागुक्तरूपाः । **दशविधश्च स्थितकल्पः**, स चैवम् –

आचेलक्कुद्देसिय सेज्जायर रायपिंड किइकम्मे।
वय जेट्ठ पडिक्कमणे मासं पज्जोसवणकप्पो ।। [पञ्चवस्तु-१५००]

द्वादशविधं तपः, षडावश्यकानि सामायिकादीनि, एतेऽपि मेलिताः **षट्त्रिंशत् सूरिगुणाः** स्युः ।।१४४।।

देव० : भीमादिन्यायेनैकपदलोपा**दाचार** सम्पदादयो **अष्टौ** वर्णित स्वरूपा एव । **तु**रुत्तरपद समुच्चये । **तथा चैव,** चेति समुच्चये, **दशविधः, चः** पादपूरणे स्थितः पुरिमान्तिमजिनसाधूनां सततासेवनतः स चासौ कल्पश्च मर्यादा **स्थितकल्पः** स चैवम् –

आचेलुक्कु-द्देसिय-सिज्जायर-रायपिंड-किइकम्मे ।
वय-जेट्ठ-पडिक्कमणे मासं पज्जोसवणकप्पो ।। [पञ्चवस्तु-१५००]

तत्र न विद्यते चेलमस्यासावचेलकस्तस्य भाव आचेलक्यम्, इह चेषदर्थत्वान्नञः, श्वेतमलिन-खण्डितजीर्णाल्पमूल्यैः सद्भिरपि चेलैरचेलाः साधवः, यथानुदरा कन्येति, भणितं च –

तह थोव जुण्णकुच्छियचेलेहिं वि भण्णइ अचेलो त्ति ।
जह तंतुसालिय लहुं दे पोत्तिं नग्गिया मोत्ति ।। [ ]

१. य ठिइकप्पो P,K ठिईकप्पो T,C

एतच्च पुरिमान्तिमतीर्थसाधूनामेवम्, तदितरे तु महामूल्याऽप्रमाणपञ्चवर्णान्यपि गृह्णन्ति । तथा च -

आचेलुक्को धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमगाण जिणाणं होइ सचेलोऽचेलो वा ।। [पञ्चाशक-१७/१२]

औद्देशिकमिहाधाकर्म, तदेकमुद्दिश्य निवृत्तं प्रथमान्तिमतीर्थयोः सर्वैरपि परिहर्त्तव्यम्, तदन्येषु यदर्थं निष्पन्नं तस्यैवैकस्य न कल्पते ।

शय्यातरो वसतिदाता, राजाचक्रवर्त्त्यादिस्तयोः पिण्डः समुदानम्, तत्राद्यः -

असणाईया चउरो पाउंछण वत्थ पत्तकंबलगं ।
सूइ छुर कन्नसोहण नहरणिया सागरियपिंडो ।। [नवतत्त्वप्र॰ ७३]

अयं च सर्वतीर्थेषु सर्वैरपि परिहर्त्तव्यः, यदाह -

पुरपच्छिमवज्जेहिं अविकम्मं जिणवरेहिं लेसेणं ।
भुत्तं विदेहएहि य न य सागरियस्स पिंडो उ ।। [प्रव.सारो॰ ८०७]
लिंगत्थस्स उ वज्जो तं परिहरओ व भुंजओ वा वि।
जुत्तस्स अजुत्तस्स व रसावणो इत्थ दिट्ठंतो ।। [प्रव.सारो॰ ८०५]

एष पुनः शय्यातरपिण्डो न भवति, तद्यथा -

तणडगलछार मल्लग सेज्जासंथारपीठलेवाई ।
सिज्जायर पिंडो सो न होइ सेहो य सोवहिओ ।। [नवतत्त्वप्र॰ ७४]

राजपिण्डस्तु -

असणाईया चउरो वत्थं पायं च कंबलं चेव ।
पाउंच्छणगं च तहा अट्ठविहो रायपिंडो उ ।। [पञ्चाशक-१७/२२]

अयं तु प्रथमान्तिमानां वर्ज्यः, मध्यमवैदेहिकास्तु दोषाऽसम्भव गृह्णन्त्येव ।

कृतिकर्म-वन्दनकम्, तच्च सर्वसाध्वीभिस्तद्दिनदीक्षितस्यापि साधोर्विधेयम्, अभ्यधायि च -

सव्वाहिं संजईहिं किइकम्मं संजयाण कायव्वं ।
पुरिसुत्तमु त्ति धम्मो सव्वजिणाणं पि तित्थेसु ।। [पञ्चाशक-१७/२४]

साधुभिश्च स्ववर्गे यथाज्येष्ठमेतेषां च पदानां समाहारत्वात् सप्तम्येकवचनम् ।

ततश्चाऽऽचेलक्यादिषु भणितप्रकारेण यथास्वं विधिनिषेधरूपतया स्थिताः साधवो भवन्तीत्ययमोघकल्पः। एतेष्वेव च प्रथमचरमजिनसाधवः स्थिता एवेति स्थितकल्पस्तेषामिति ।

व्रतानि महाव्रतानि तानि च पुरिमान्तिमतीर्थकृतसाधूनां पञ्च, मध्यमवैदेहिकानां तु ब्रह्मव्रतस्य परिग्रहेऽन्तर्भावाच्चत्वारि, तत्त्वतस्तु तेषामपि पञ्चैव, प्रत्यपादि च –

दुण्हवि दुविहो वि ठिओ एसो आजम्ममेव विन्नेओ ।
इय वयभेया दुविहो एगविहो चेव तत्तेणं ।। [पञ्चाशक-१७/२८]

ज्येष्ठो रत्नाधिकः स चोपस्थापनादिनमाश्रित्य प्रथमान्तिमतीर्थसाधूनां तदन्येषां तु प्रव्रज्यादिनमाश्रित्य यदि निरतिचारः प्रतिपादितं च –

उवठावणाए जेट्ठो विण्णेओ पुरिमपच्छिमजिणाणं ।
पव्वज्जाए उ तहा मज्झिमगाणं निरइयारो ।। [पञ्चाशक-१७/२९]

अयमप्युभयेषामपि ज्येष्ठत्वेन स्थित एव ।

प्रतिक्रमणमुभयसन्ध्यं षड्विधावश्यककरणम्, तद्व्यवस्था चैवम् –

सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स।
मज्झिमगाण जिणाणं कारणजाए उ पडिक्कमणं ।। [पञ्चाशक-१७/३२]

सप्तम्येकवचनं प्राग्वत्, मासमित्यनुस्वारोऽलाक्षणिकः । परि सर्वथा वसनमेकत्र निवासो निरुक्तविधेः पर्युषणा एतद्द्वयलक्षणः कल्प आचारो मासपर्युषणकल्पस्तस्मिंश्च स्थिता स्थितेत्यादि प्राग्वत् तत्र मासकल्पऋतुबद्धकाल एकक्षेत्रे त्रिंशदहोरात्रावस्थानरूपः, स चेत्थम्–

पुरिमेयरतित्थयराण मासकल्पो ठिओ विणिद्दिट्ठो ।
मज्झिमगाणजिणाणं अट्ठियओ एस विन्नेओ ।। [पञ्चाशक-१७/३५]

पर्युषणाकल्पोऽपीत्थमेव, तथा चाऽऽह –

पज्जोसवणाकल्पोऽपेवं पुरिमेयराइभेएणं ।
उक्कोसेयरभेओ सो नवरं होइ विन्नेओ ।। [पञ्चाशक-१७/३८]

प्रथमान्तिमानामित्यर्थः । तत्र –

चाउम्मासुक्कोसो सत्तरि राइंदिया जहण्णो उ ।
थेराण जिणाणं पुण नियमा उक्कोसओ चेव ।। [पञ्चाशक-१७/३९]

जघन्यसम्भवस्त्वेवम् –

असिवाइ कारणेहिं अहवा वासं न सुट्ठु आरद्धं ।
अभिवट्टियम्मि वीसा इयरेसु सवीसईमासो ।। [ ]

अत्र चैवं व्यवस्था –

इत्थ य अणभिग्गहियं वीसइरायं सवीसईमासो ।
तेण परमभिग्गहियं गिहिनायं कत्तियं जाव ।। [ ] इति

पर्युषणाकल्पश्चैवं न्यूनोदरताकरणम्, विकृतिनवकपरित्यागः, पीठफलकादि संस्तारकादानम्, उच्चारादिमात्रकसंग्रहणम्, लोचकरणम्, शैक्षाऽप्राव्राजनम्, प्राग्गृहीतानां भस्मडगलकादीनां परित्यजनमितरेषां ग्रहणम्, द्विगुणवर्षोपग्रहोपकरणधरणम्, अभिनवोपकरणाग्रहणम्, सक्रोशयोजनात्परतो गमनवर्जनमित्यादिको मध्यमतीर्थेषु तु नैवम्, यतो –

दोसासइ मज्झिमगा अच्छंति य जावपुव्वकोडी वि ।
इहरा उ न मासं पि हु एवं खु विदेहजिणकप्पी ।। [पञ्चाशक-१७/४०]

इह चैतेभ्य एव दशभ्यः पदेभ्यो मध्यादमीषु षट्सु पदेषु मध्यमतीर्थिकानां सतताऽनासेवनादस्थितकल्पो ज्ञेयः, तथाहि –

आचेलुक्कुद्देसिय पडिक्कमणे रायपिंड मासेसु ।
पज्जुसणाकप्पम्मिय य अट्ठियकप्पो मुणेयव्वो ।। [प्रव.सारो॰ ६५१]

शेषेषु चतुर्षु तेषामपि स्थित एव । भावितं चैतदिति, कृतं प्रसङ्गेन, प्रकृतं प्रस्तूयते ।

द्वादशतपांसि तपोभेदाः प्रागभिहितस्वरूपाः **षडावश्यकानि** सामायिकादीनि प्रतीतानि, उंभयत्र विभक्तिलोपः प्राकृतत्वात्, **सूरिगुणा**मीलिताः **षट्त्रिंशद्भवन्ती**ति गाथार्थः ।।१४४।।

** प्रवचनसारोद्धारे-५४८ **

अथ भङ्ग्यन्तरेणापि गुरोः षट्त्रिंशद्गुणानाह –

आयाराई अट्ठ उ तह चेव य दसविहो य ठियकप्पो ।
बारस तव छावस्सग सूरिगुणा हुंति छत्तीसं।।

'आयाराई'त्यादि, **आचाराः** श्रुतादयः प्राग्व्यावर्णितस्वरूपा अविवक्षितस्वस्वभेदा **अष्टौ** गणिसम्पदः, **तथा**

आचेलक्कुद्देसिय सिज्जायर रायपिंड किइकम्मे। वय जेट्ठ पडिक्कमणे मासं पज्जोसवणकप्पो ।।

इत्येवं वक्ष्यमाणस्वरूपो **दशविधः स्थितकल्पः**, तथा **द्वादशविधं तपः** प्रागुक्तस्वरूपम्, तथा **षडावश्यकानि** सामयिकचतुर्विंशतिस्तववन्दनकप्रतिक्रमणकायोत्सर्गप्रत्याख्यानलक्षणानि, एतानि सर्वाण्यपि मिलितानि **षट्त्रिंशत्सूरिगुणा भवन्ति** । इह चैवमन्या अपि षट्त्रिंशिकाः सम्भवन्ति, तास्तु विस्तरभयान्नाभिधीयन्ते ।।५४८।।

देव० : अथाऽऽचारादिसम्पदः स्वयमाह –

आयार सुय सरीरे वयणे वायण मई पओगमई ।
एएसु संपया खलु अट्ठमिया संगहपरिन्ना ।।१४५।।

देव० : एतदर्थश्च प्राग्व्याख्यात एव ।।१४५।।

** प्रवचनसारोद्धारे-५४१ **

तत्राष्टौ सम्पद इमाः –

आयार सुय सरीरे वयणे वायण मई पओगमई ।
एएसु संपया खलु अट्ठमिया संगहपरिण्णा ।।५४१।।

'आयारे'त्यादि, **आचारश्च श्रुतं** च **शरीरं** चेत्येकवद्भावादाचारश्रुतशरीरम्, तथा **वचनम्,** प्राकृतत्वादेकारः, **वाचनामतिः, प्रयोगमतिः, एतेषु** विषये **सम्पत्,** तथाहि– १-आचारम्पत् २-श्रुतसम्पत् ३-शरीरसम्पत् ४-वचनसम्पत् ५-वाचनासम्पत् ६-मतिसम्पत् ७-प्रयोगमतिसम्पत् ८-**अष्टमी च संग्रहपरिज्ञा**सम्पत् तत्राऽऽचरणमाचारोऽनुष्ठानं तद्विषया स एव वा सम्पद् विभूतिस्तस्य वा सम्पत् सम्पत्तिः प्राप्तिराचारसम्पत्, एवमग्रेऽपि व्युत्पत्त्यर्थो भावनीयः ।।५४१।।

चक्रे० : तथा –

देव० : तथा –

विगहा कसाय सन्ना पिंडो उवसग्गझाण सामइयं ।
भासाधम्मो एए [१]चउगुणिया हुंति सूरिगुणा ।।१४६।।

चक्रे० : विकथा स्त्रीभक्तदेशराजकथाख्याः । **कषायाः** क्रोधाद्याः । **संज्ञा** आहारभयमैथुनपरिग्रहसंज्ञाख्याः । **पिण्ड** आहारोऽशनपानखादिमस्वादिमरूपः । **उपसर्गा** दैवमानुषतैरश्चात्मसंवेदनीयरूपाः, आत्मसंवेदनीयाः शिरोऽहिस्खलनादिभिः । **ध्यानमार्त्तरौद्रधर्मशुक्लध्यानाख्यम्** । **सामायिकं** सम्यक्त्वश्रुतदेशविरतिसर्वविरत्याख्यम् । **भाषा** सत्याऽसत्यमिश्राऽसत्यामृषास्वरूपा । तत्र सत्याऽस्त्यात्मेत्यादि, असत्या नास्त्यात्मेत्यादि, मिश्रा पुनरुभयरूपा यथाऽविदित्वाऽप्यस्मिन्नगरे दशदारका जाता मृता वेति ब्रूते, असत्यामृषाऽऽमन्त्रण्यादिका हे देवदत्त ! इत्यादि । **धर्मो** दानशीलतपोभावनाभेदः ।

एते विकथादयो नव, उक्तनीत्या **चतुर्गुणा भवन्ति सूरिगुणाः** षट्त्रिंशदिति भावः । इह च स्थितकल्पादीनां यथासम्भवं सम्यगासेवनपरिज्ञानप्ररूपणपरिहारादिभिः सूरिगुणत्वं ज्ञेयम् ।।१४६।।

देव० : विरुद्धा संयमबाधकत्वेन कथा वचनपद्धति**र्विकथा** स्त्रीकथादिः । तत्र स्त्रीकथा-स्त्रीसम्बन्धिनां जातिकुलरूपनेपथ्यानां प्रशंसा निन्दा वा, तत्र जातिर्ब्राह्मणादिका, यथा –

धिग्ब्राह्मणीर्धवाभावे या जीवन्ति मृता इव ।
धन्या मन्ये जने शूद्रीः पतिलक्षेऽप्यनिन्दिताः ।। [ ]

कुलमुग्रादि, यथा –

अहो चौलुक्यपुत्रीणां साहसं जगतोऽधिकम् ।
पत्युर्मृत्यौ विशन्त्यग्नौ याः प्रेमरहिता अपि ।। [ ]

रूपं शरीरसंस्थानम्, यथा –

चन्द्रवक्त्रा सरोजाक्षी सद्गीः पीनघनस्तनी ।
किं लाटी नो मता सास्य देवानामपि दुर्लभा ।। [ ]

१. सूरिगुणा हुंति छत्तीसं P,K

नेपथ्यं कञ्चुकपरिधानादिनिवेशविशेषरूपम्, यथा –

धिग्नारीरौदीच्या बहुवसनाच्छादिताङ्गलतिकत्वात् ।
यद्यौवनं न यूनां चक्षुर्मोदाय भवतीसदेति ।। [ ]

स्त्रीकथायां चैते दोषाः –

आयपरमोहुदीरणा उड्डाहो सुत्तमाइपरिहाणी ।
बंभवए य अगुत्ती पसंगदोसा य गमणाई ।। [निशीथसू० १२१]

उन्निक्रमणादयः, भक्तकथा–आवापनिर्वापाऽऽरम्भनिष्ठानवर्णनस्वभावा, तत्र शाकघृतादीन्येतावन्ति तस्यां रसवत्यामुपयुज्यन्त इत्यावापकथा, एतावन्तस्तत्र पक्वान्नभेदा[१] व्यञ्जनभेदा वेति निर्वापकथा, तित्तिरादीनामियतां तत्रोपयोग इत्यारम्भकथा, एतावद्द्रविणं तत्रोपयुज्यत इति निष्ठानकथेति, उक्तं च –

सागघयादावावो पक्कमपक्कं तु होइ निव्वाओ ।
आरंभ तित्तिराई निट्ठाणं जा सयसहस्सं ।। [निशीथसू० १२३] इह चामी दोषाः-

आहारमंतरेणावि गहिओ जायई स इंगालं ।
अजिइंदिय ओदरिआ वाओ य अणुन्न दोसा य ।। [निशीथसू० १२४]

देशकथा छन्दविधिविकल्पनेपथ्यविकत्थनस्वरूपा, तत्र छन्दो गम्याऽगम्यविभागः, यथा लाटदेशे मातुलभगिनी गम्या, अन्यत्राऽगम्येति । विधिर्या यत्र देशे भोजनादिविरचना । विकल्पो यो यत्र नदीकूपसारण्यादिभिः सस्यनिष्पत्तिप्रकारः, गृहदेवकुलनिवेशग्रामनगरादि विकल्पश्च । नेपथ्यं स्त्रीपुरुषाणां वेषः स्वाभाविको विभूषाप्रत्ययश्च, इह दोषाः –

रागद्दोसुप्पत्ती सपक्खपरपक्खओ य अहिगरणं ।
बहुगुण इमो त्ति दोसो सोउं गमणं च अण्णेसिं ।। [निशीथसू० १२७]

राजकथा नगरादिप्रवेशनिर्गमबलकोशप्रशंसनरूपा, यथा –

सियसिंधुरखंधगओ सियचमरो सियछत्तछन्ननभो ।
जणनयणकिरणसेओ एसो पविसइ पुरे राया ।। इत्यादि, दोषाश्चात्र –

१. पक्वाऽपक्वान्नभेदा A

चारिय चोराभिमरे हियमारिय संक-काउ-कामा वा ।
भुत्ताभुत्तोहाणे (भुक्तभोगोऽभुक्तभोगो वाऽवधावनं कुर्यात्)
करिज्ज वा आसंसपओगं ।। [निशीथसू० १३०]

कष्यन्ते क्लिश्यन्ते प्राणिनोऽस्मिन्निति कषः संसारस्तमयन्ते गच्छन्त्येभिरसुमन्त इति **कषायाः** । यदि वा कषाया इव कषायाः, यथाहि तुवरिकादिकषायकलुषिते वाससि मञ्जिष्ठादिरागः श्लिष्यति चिरं वाऽवतिष्ठते, तथैतत् कलुषिताऽऽत्मनि कर्म सम्बध्यते चिरस्थितिकं च जायते तदायत्तत्वात् तत् स्थितेः, 'ठिइ अणुभागं कसायओ कुणइ' इति वचनात् । ते च क्रोधमानमायालोभाभिधानास्तत्र क्रोधो मोहनीयोदयसम्पाद्यो जीवस्य परिणतिविशेषः क्रोधः, एवमितरेष्वपि ।

संज्ञानं **संज्ञा** चैतन्यं तच्चासातवेदनीयमोहनीयकर्मोदयजन्यविकारयुक्तमाहारसञ्ज्ञादित्वेन व्यपदिश्यते । तत्राऽऽहारसंज्ञाऽसातवेदनीयसमुत्थआहाराभिलाषः, भयसंज्ञा भयमोहनीयसम्पाद्यो जीवपरिणामः, मैथुनसंज्ञा वेदोदयजनितो मैथुनाऽभिलाषः, परिग्रहसंज्ञा चारित्रमोहोदयकृतः परिग्रहाभिलाषः ।

पिण्डः समयपरिभाषयाऽऽहारः, स चाऽशनपानखादिमस्वादिमरूपस्तद्विभागश्चैवम् –

असणं ओयणसत्थुगमुग्गजगाराइ खज्जगविही य ।
खीराइ सूरणाई मंडगपभिई य विन्नेयं ।।
पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव ।
आउक्काओ सव्वो कक्कडगजलाइयं च तहा ।।
भत्तोसं दंताई खज्जूरं नालिकेरदक्खाई ।
चिब्भडिअंबगफणसाइ बहुविहं खाइमं नेयं ।।
दंतवणं तंबोलं चित्तं तुलसीकुहेडगाई य ।
महुपिप्पलिसुंठाई अणेगहा साइमं होइ ।। [पञ्चाशक-५/२७-३०]

उपसृजन्ति प्रतिपन्नार्थत्यागतोऽप्रधानीभवन्त्येभिरसुमन्त इत्**युपसर्गाः**ते च दैव्यमानुषतैरश्चात्मसंवेदनीयरूपाः । १-तत्र दैव्या हास्यप्रद्वेषविमर्शपृथग्विमात्राप्रभवाः, पृथग्भिन्ना विविधा मात्रा हासादिवस्तुरूपाः पृथग्विमात्राः, तथा हि हासेन कृत्वा प्रद्वेषेण करोतीत्येवं संयोगाः कार्याः,

हासादयस्तु सुज्ञाना एव । २-मानुषा अपि हासप्रद्वेषविमर्शकुशीलप्रतिषेवणासमुत्थाः, कुशीलमब्रह्म तस्य प्रतिषेवणा । ३-तैरश्चा आहारहेतुभयद्वेषापत्यलयनसंरक्षणोद्भवाः । ४-आत्मसंवेद्यास्तु घट्टनप्रपतनस्तम्भनश्लेषणनिमित्ताः, तत्र घट्टनेन क्वचिच्चक्षुषि रजःप्रपाते सति तन्मलनेन, प्रपतनेन गर्तकीलादौ स्खलनाद् भूमौ निपतनेन, स्तम्भनेन हस्तपादादेः स्वापात्स्तब्धत्वेन, श्लेषणेन करचरणादेराकुञ्चितस्य वातदोषात्तथैव लगनेन ।

ध्यानमन्तर्मुहूर्त्तमेकवस्तुनि चित्तावस्थानम्, तदार्त्तरौद्रधर्म्यशुक्लभेदभिन्नम्, १-तत्र ऋतं दुःखम्, तत्र भवमार्त्तमनिष्टेतरविषयवियोगाशंसनादि चिन्तारूपम्, २-रोदयत्यपरानिति रुद्रः, प्राणिवधादिपरिणत आत्मा, तस्येदं कर्म रौद्रं हिंसाद्यतिनिस्त्रिंशताध्यवसानम्, ३-धर्मः क्षान्त्यादिलक्षणस्तस्मादनपेतं धर्म्यं सूत्रार्थाद्यनुचिन्तनम्, ४-शुक्लं शुचि निर्मलं सकलमिथ्यात्वादिमलापगमाद्, यद्वा शुगिति दुःखमष्टप्रकारं वा कर्म, ततः शुचं क्लमयति निरस्यतीति शुक्लमर्थाद् व्यञ्जने व्यञ्जनादर्थे योगाद्योगान्तरे च सङ्क्रामतः पूर्वगतश्रुतालम्बनमेकद्रव्यगतोत्पादादिपर्यायेषु नानानयानुचिन्तनमित्यादिकम्। एतद्भेदस्वरूपं च सविस्तरं ध्यानशतकादवसेयमिह तु नोच्यते ग्रन्थविस्तरभयात् ।

सामायिकमिति समो रागद्वेषरहित आत्मपरिणामस्तस्याऽऽयो लाभः समायस्तत्र भवं सामायिकं तच्च सम्यक्त्वश्रुतदेशविरतिसर्वविरतिभेदभिन्नम् ।

भाष्यत इति **भाषा** वचनम्, सत्याऽसत्यमिश्राऽसत्यामृषास्वरूपा, १-तत्र सत्याऽस्त्यात्मेत्यादि, २-असत्या नास्त्यात्मेत्यादि, ३-मिश्रा पुनरुभयरूपा, यथाऽविदित्वाऽप्यस्मिन्नगरे दश दारका जाता मृता वेत्याह, ४-असत्याऽमृषामन्त्रणादिका, यथा हे देवदत्त ! इत्यादि।

धर्मः प्राग्वर्णितशब्दार्थो दानशीलतपोभावनामयः। **एते** विकथादयो नव पदार्था**श्चतुर्गुणा** भावितनीत्या चतुराहता **भवन्ति सूरिगुणाः** षट्त्रिंशदिति भावः, इति[१] गाथार्थः ।।१४६।।

चक्रे० : तथा –

देव० : एवं षट्त्रिंशिकाभिः सूरिगुणानभिधाय साम्प्रतं सामान्येनैव तानाऽऽह –

पंचमहव्वयजुत्तो पंचविहायारपालणुज्जुत्तो ।
पंचसमिओ तिगुत्तो छत्तीस गुणो गुरू होइ ।।१४७।।

१. इह च स्थितकल्पादीनां यथासम्भवं सम्यगासेवनपरिज्ञानप्ररूपणपरिहारादिभिः सूरिगुणत्वमवसेयमिति गाथार्थः T,C

चक्रे० : स्पष्टा, नवरं पञ्चमहाव्रतादीनामष्टादशानामपि स्वयंकरणाऽन्यकारणतो द्वैगुण्येन **षट्त्रिंशद्गुणो गुरुर्भवती**त्यर्थः ।।१४७।।

देव० : [१]सुगमा, नवरं **पञ्चमहाव्रतानि, पञ्चाऽऽचाराः, पञ्च समितयस्तिस्रो गुप्तय** इत्यष्टादशपदानि । अमीषां स्पर्शनपालनभेदद्वैविध्यात् **षट्त्रिंश**देतावद्गुणो **गुरुर्भवती**ति । तत्र स्पर्शनं विधिना गुरोः पुरः प्रतिपत्तिः, पालनमुपयोगतः प्रतिजागरणमिह च स्थितकल्पादीनां यथासम्भवं सम्यगासेवनपरिज्ञानप्ररूपणपरिहारादिभिः सूरिगुणत्वमवसेयमिति गाथार्थः ।।१४७।।

चक्रे० : सम्प्रत्यनुयोगप्रवर्त्तनमाश्रित्य गुरोर्गुणषट्त्रिंशिकां गाथाचतुष्टयेनाहुः –

देव० : सम्प्रत्यनुयोगप्रवर्तनमाश्रित्य तस्यैव गुरोर्गुणषट्त्रिंशिकां विवक्षुर्गाथाचतुष्टयमाह –

देस-कुल-जाइ-रूवी संघयणी [२]धिइजुओ अणासंसी ।
अविकत्थणो [३]अमायी थिरपरिवाडी गहियवक्को ।।१४८।।
जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो नाणाविहदेसभासन्नू ।।१४९।।
पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू ।
आहारण-हेउ-कारण-नयनिउणो गाहणाकुसलो ।।१५०।।
ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ।।१५१।।

चक्रे० : देशकुलजातिरूपाण्यतिशायीनि विद्यन्ते यस्य स तथा । तत्र १-देशो मध्यदेशो जन्मभूमिः, २-कुलमिक्ष्वाक्वादि पैतृकम्, ३-जातिर्मातृसमुत्था, ४-रूपमङ्गोपाङ्गसम्पूर्णता, ५-**संहननी** विशिष्टसंहननः, स हि वाचनादौ न श्राम्यति, ६-**धृतियुक्तः**, ७-**अनाशंसी** श्रोतृभ्यो न वस्त्राद्याऽऽकाङ्क्षी, ८-**अविकत्थनो**ऽबहुभाषी, अनात्मश्लाघापरो वा ९-**अमायी,** १०-**स्थिरा** निश्चला **परिपाटिः** सूत्रार्थवाचना यस्य स तथा, ११-**गृहीतं वाक्यं** येन स तथाऽवधारणावान्, यद्वा गृहीतं वाक्यं यस्य स आदेयवचनः ।

---

१. पञ्चमहाव्रतयुक्तः, पञ्चविधाचारपालनोद्युक्तः, पञ्चभिरीर्यादिचेष्टाभिः समितः पञ्चसमितः, त्रिभिर्मनःप्रभृतिभिर्गुप्तः षट्त्रिंशद्गुणैः उक्तनीत्या गुरुर्भवतीति गाथार्थः T,B,C २. धीजुओ P, K, ३. अमाई P,K,Z

१२-**जितपरिषत्,** १३-**जितनिद्रः,** १४-**मध्यस्थः** शिष्येषु समचित्तः, १५-**देशः** साधुभावितादिः, १६-**कालः** सुभिक्षादिः, १७-**भावः** क्षायोपशमिकादिस्तान् जानातीति तज्ज्ञः, स हि यथौचित्येन विहरति धर्मकथां च कुरुते, १८-**आसन्ना** प्रश्नानन्तरमेव **लब्धा प्रतिभा** उत्तरदाने बुद्धिर्येन स तथा, १९-**नानाविधदेशभाषाज्ञः**।

२०-२४ **पञ्चविध आचारे** ज्ञानादौ **युक्तः,** २५-**सूत्रार्थतदुभयविधिज्ञ** इह तदुभयपदेनैव गतार्थत्वात् सूत्रार्थपदोपादानं चतुर्भङ्ग्यर्थम् । तदुभयपदेन च तृतीयभङ्गस्य ग्राह्यतोक्ता, २६-**उदाहरणं** दृष्टान्तः, २७-**हेतुरन्वयव्यतिरेकवान्,** २८-**कारणं** दृष्टान्तादिरहितमुपपत्तिमात्रम्, यथा निरुपमसुखः सिद्धो ज्ञानाऽनाबाधप्रकर्षात्[१], अन्यत्र निरुपमसुखाभावान्नास्त्यत्र दृष्टान्तः, उक्तं च –

हेऊ अणुगमवइरेगलक्खणो सज्झवत्थुपज्जाओ ।
आहरणं दिट्ठंतो कारणमुववत्तिमित्तं तु ।। [विशेषा. भा॰ १०७७]

साध्यमनित्यत्वम्, तदाधारभूतं वस्तु शब्दः, तस्य पर्यायः क्रमभावी धर्मः कृतकत्वरूपः ।

२९-**नया** नैगम-संग्रह-व्यवहार-ऋजूसूत्र-शब्द-समभिरूढै-वंभूताऽऽख्याः सप्त तेषु **निपुणः,** अनीदृशो हि वचनमात्रेण न बोधयितुमलम् । अत एव ३०-**ग्राहणाकुशलः** परप्रत्यायनक्षमः।

३१-**स्वसमयपरसमयवित्,** ३२-**गम्भीरो**ऽतुच्छः ३३-**दिप्तिमान्** सप्रतापः, ३४-**शिवो** विशिष्टतपोलब्ध्यादिभिः क्षेमकृत् ३५-**सोमो**ऽक्रोधनः, ३६-**गुणानां** मूलगुणादीनां **शतानि** बहुत्वोपलक्षणं चैतत्तैः **कलितो युक्तो**ऽर्हः **प्रवचनसारं** सिद्धान्तार्थं **परिकथयितुमिति** गाथाचतुष्टयार्थः, एवं रूपगुणग्रामसमन्वितश्चाचार्यो दर्शनप्रभावको भवति, आर्यखपुटाचार्यवत् ।।१४८-१५१।।

देव० : देशकुलजातिरूपाण्यतिशायीनि विद्यन्ते यस्य स तथा तत्र १-देशो मध्यदेशः सार्द्धपञ्चविंशतिजनपदरूपो वा तदुत्पन्नस्य हि वचनं शिष्याः सुखेनैवाऽवगच्छन्ति, २-कुलमिक्ष्वाकुप्रभृति, ३-जातिर्मातृसमुत्था, एतदुपेतो हि प्रतिपन्नार्थनिर्वाहको भवति यदुच्यते–

अभिजातः प्रतिपन्नं त्यजति न कृच्छ्रेऽपि महति सम्प्राप्तः ।
पङ्कोपलादिविषमेप्युज्झति पथि किं धुरं धवलः ।। [ ]

१. ज्ञानाऽवबोधप्रकर्षात् K

४-रूपमङ्गोपाङ्गसम्पूर्णता, तद्वानाऽऽदेयवाक्यो भवति, तथाहि –

धम्मोदएण रूवं करिंति रूवस्सिणो वि जइ धम्मं ।
गज्झवओ य सरूवो पसंसिमो तेण रूवंति ।। [ ]

इत्यादि सर्वगुणाश्रयश्च, यत्राकृतिस्तत्र गुणा वसन्तीतिकृत्वा, ५-**संहननी** विशिष्टसंहनन-संयुक्तः, स हि वाचनादिषु न श्राम्यति, ६-**धृतियुतः** सर्वत्रानाकूलमनाः, ७-आशंसत इत्येवं शील आशंसी न तथा, श्रोतृभ्यो न वस्त्राद्याकाङ्क्षावान्, ८-**अविकत्थनो**ऽबहुभाषी, अनात्मश्लाघापरो वा, ९-मायी मायावान्, न तथाऽ**मायी,** परिवाराद्यर्थमनुयोगार्थिनः शिष्यान्न शाठ्येन वाह्यति, १०-**स्थिरा** निश्चला प्रमादरहितत्वेन **परिपाटिः** सूत्रार्थपरावर्त्तना यस्य स तथा, ११-**गृहीतं वाक्यं** येन यस्य वा स तथा, अवधारणावानाऽऽदेयवाक्यो वेति ।

तथा १२-जितेव **जिता** निःक्षोभत्वेन **पर्षत्**सभा येन स तथा, स हि सदसि न मुह्यति, १३-**जितनिद्रस्**तस्य हि जागरूकत्वेन सूत्रार्थौ न नश्यतः, लघु च शिष्यान् समयोदधेः पारं प्रापयति, १४-**मध्यस्थो** रागद्वेषरहितत्वेन शिष्येषु समचित्तः, १५-**देशः** साधुभावितादिः, १६-**कालः** सुभिक्षादिः, १७-**भावः** क्षायोपशमिकादिस्ताज्ञानातीति तज्ज्ञः, स हि यथौचित्येन विहरति धर्मकथां च कुरुते, १८-**आसन्नाः** प्रश्नानन्तरमेव **लब्धा प्रतिभो**त्तरदाने बुद्धिर्येन स तथा प्रत्युत्पन्नमतिरित्यर्थः, स हि क्वचिद्वादिना पृष्टस्तत्कालनिर्णयदायित्वेन प्रवचनप्रभावको भवति, १९-**नानाविधदेशभाषाज्ञो**ऽयं हि नानादेशजविनेयावबोधको भवतीति ।

तथा २०-२४ **पञ्चविध आचारे** ज्ञानादौ **युक्त** उद्युक्तः, स हि स्वयमुद्यतः शिष्यानुद्यमयति, २५-**'सुत्तत्थतदुभयविहिण्णू'** सूत्रार्थतदुभयानां विविधान् भेदान् जानातीति ज्ञात्वा, ततश्च सूत्रज्ञो हीनाऽत्यक्षरादिदोषविद्, अर्थज्ञोऽविस्मृतशुद्धसम्प्रदायस्तदुभयज्ञः सूत्रार्थकुशल इह च तदुभयपदेनैव गतार्थत्वे सूत्रार्थपदोपादानेन चतुर्भङ्गी सूचयति, तदुभयपदेन च तृतीयभङ्गस्य ग्राह्यतामाह, एवंविध एव ह्यनुयोगयोग्यो भवति, २६-उदाहियते प्रस्तुतहेत्वाश्रयदर्शनाय प्रयुज्यत **इत्युदाहरणं** दृष्टान्तः, २७-हिनोति गमयति विवक्षितमर्थमिति **हेतु**रन्वयव्यतिरेकलक्षणः, २८-**कारणं** दृष्टान्तादिरहितमुपपत्तिमात्रं, यथा निरुपमसुखः सिद्धो ज्ञानाऽनाबाधप्रकर्षात्, अन्यत्र हि निरुपमसुखासम्भवान्नोदाहरणमस्ति, उक्तं च –

हेऊ अणुगमवइरेग-लक्खणो सज्झवत्थुपज्जाओ ।
आहरणं दिट्ठंतो कारणमुववत्तिमेत्तं तु ।। [विशेषा. भा० १०७७]

२९-**नया** नैगम १ सङ्ग्रह २ व्यवहार ३ ऋजुसूत्र ४ शब्द ५ समभिरूढैवम्भूताभिधानाः ६-७ सप्त, तेषु **निपुणः** कुशलोऽनीदृशो हि वचनमात्रेण न बोधयितुमलम्, अत एव ३०-**ग्राहणाकुशलः** परप्रत्यायनसहः।

तथा ३१-**स्वसमयो** जैनमतम्, **परसमयः** शाक्यादिसिद्धान्तस्तौ वेत्तीति त**द्विद्,** स हि परवादिभिरजय्यो भवति, ३२-**गम्भीरो**ऽतुच्छाशयः. ३३-**दीप्तिमान्** सप्रतापस्तादृशो हि दुष्प्रधृष्यः स्यात् ३४-**शिवो** विशिष्टतपोलब्ध्यादिभिः क्षेमकृत्, ३५-**सोमो**ऽक्रोधनः पुनः किंविशिष्टः? ३६-**गुणानां** मूलगुणादीनां **शतानि,** बहुत्वोपलक्षणं चैतत् तैः **कलित** उपेतो **युक्तो**ऽर्हः **परिकथयितुं प्रवचनं** द्वादशाङ्गं तस्य **सारो**ऽर्थस्तमिति गाथाचतुष्टयार्थः ।।१४८-१५१।।

**** बृहत्कल्पभाष्ये-२४१-४४, प्रवचनसारोद्धारे-५४८ ****

केन वेति द्वारम् –

देस-कुल-जाइ-रूवी संघइणी धिइजुओ अणासंसी ।
अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ।।
जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो नाणाविहदेसभासन्नू ।।
पंचविहे आयारे जुत्तो सुत्तऽत्थतदुभय विहन्नू ।
आहरण-हेउ-उवणय-नयनिउणो गाहणाकुसलो ।।
ससमय-परसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ।।

युतशब्दः प्रत्येकमभिसम्बध्यते–देशयुतः कुलयुत इत्यादि । तत्र यो मध्यदेशे जातो यो वाऽर्द्धषड्विंशतिषु जनपदेषु स **देश**युतः, स ह्यार्यदेशभणितिं जानाति, ततः सुखेन तस्य समीपे शिष्या अधीयत इति तदुपादानम्, **कुलं** पैतृकम्, तथा च लोके व्यवहार इक्ष्वाकुकुलजोऽयं नागकुलजोऽयमित्यादिः, तेन युतः प्रतिपन्नार्थनिर्वाहको भवति, **जाति**र्मातृकी, तया युतो विनयादिगुणवान् भवति, **रूप**युतो लोकानां गुणविषयबहुमानभाग् जायते, 'यत्राकृतिस्तत्र गुणा वसन्ति' इति प्रवादात्, **संहनन**युतो व्याख्यायां न श्राम्यति, **धृतियुतो** नातिगहनेष्वर्थेषु भ्रममुपयाति, **अनाशंसी** श्रोतृभ्यो वस्त्राद्यनाकाङ्क्षी, **अविकत्थनो** नातिबहुभाषी, **अमायी** न शाठ्येन शिष्यान् वाहयति, स्थिरा अतिशयेन निरन्तराभ्यासतः स्थैर्यमापन्ना अनुयोगपरिपाट्यो यस्य स **स्थिरपरिपाटिः,** तस्य हि सूत्रमर्थो वा न मनागपि गलति, **गृहीतवाक्य** उपादेयवचनः, तस्य ह्यल्पमपि वचनं महार्थमिव प्रतिभाति ।।२४१।।

जितपरिषन्न महत्यामपि पर्षदि क्षोभमुपयाति, **जितनिद्रो** रात्रौ सूत्रमर्थं वा परिभावयन् न निद्रया बाध्यते, **मध्यस्थः** सर्वेषु शिष्येषु समचित्तः, देशं कालं भावं जानातीति **देश-काल-भावज्ञः,** स हि देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति, शिष्याणां चाभिप्रायान् ज्ञात्वा तान् सुखेनानुवर्त्तयति, **आसन्नलब्धप्रतिभः** परवादिना समाक्षिप्तः शीघ्रमुत्तरदायी, नानाविधानां देशानां भाषा जानातीति **नानाविधदेशभाषाज्ञः,** स हि नानादेशीयान् शिष्यान् सुखेन शास्त्राणि ग्राहयति ।।२४२।।

पञ्चविध आचारो ज्ञानाचारादिरूपस्तस्मिन् **युक्त** उद्युक्तः, स्वयमाचारेष्वस्थितस्यान्यानाचारेषु प्रवर्त्तयितुमशक्यत्वात्, सूत्रा-ऽर्थग्रहणेन चतुर्भङ्गी सूचिता-एकस्य सूत्रं नार्थः, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यर्थोऽपि, चतुर्थस्य न सूत्रं नाप्यर्थः, तत्र तृतीयभङ्गग्रहणार्थं तदुभयग्रहणम्, सूत्रा-ऽर्थ-तदुभयविधीज्ञानातीति **सूत्रार्थतदुभयविधिज्ञः,** आहरणं दृष्टान्तः, हेतुश्चतुर्विधो यापकादिर्यथा दशवैकालिकनिर्युक्तौ, यदि वा द्विविधो हेतुः कारको ज्ञापकश्च, तत्र कारको घटस्य कर्त्ता कुम्भकारः, ज्ञापको यथा तमसि घटादीनामभिव्यञ्जकः प्रदीपः, उपनय उपसंहार नया नैगमादयः, एतेषु निपुण **आहरण-हेतूपनय-नयनिपुणः,** स हि श्रोतारमपेक्ष्य तत्प्रतिपत्त्यनुरोधतः क्वचिद् दृष्टान्तोपन्यासं क्वचिद् हेतूपन्यासं करोति, उपसंहारनिपुणतया सम्यगधिकृतमर्थमुपसंहरति, नयनिपुणतया नयवक्तव्यतावसरे सम्यक्प्रपञ्चं वैविक्त्येन नयानभिधत्ते, **ग्राहणाकुशलः** प्रतिपादनशक्त्युपेतः ।।२४३।।

स्वसमयं परसमयं वेत्तीति **स्वसमयपरसमयवित्,** स च परेणाक्षिप्तः सुखेन स्वपक्षं परपक्षं च निर्वहति, **गम्भीरो**ऽतुच्छस्वभावः, **दीप्तिमान्** परवादिनामनुद्धर्षणीयः, **शिवो**ऽकोपनः, यदि वा यत्र तत्र वा विहरन् कल्याणकरः, **सोमः** शान्तदृष्टिः, गुणा मूलगुणा उत्तरगुणाश्च तेषां शतानि तैः कलितो **गुणशतकलितः,** **युक्तः** समीचीनः **प्रवचनस्य** द्वादशाङ्गस्य **सारमर्थं कथयितुम्** ।।२४४।।

** दशवैकालिकनिर्युक्तौ-५ **

'केण'त्ति केनानुयोगः कर्त्तव्य इति वक्तव्यम्, तत्र य इत्थम्भूत आचार्यस्तेन कर्त्तव्यः, तद्यथा -

देस-कुल-जाइ-रूवी संघयणधिइजुओ अणासंसी ।
अविकत्थणो अमाई थिरपरिवाडी गहियवक्को।।

जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो णाणाविहदेसभासन्नू ।।

पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिण्णू ।
आहरण-हेउ-कारण-णयनिउणो गाहणाकुसलो ।।

ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ जुग्गो पवयणसारं परिकहेउं ।।

आसामर्थः कल्पादवसेयः, प्राथमिकदशकालिकव्याख्याने तु लेशत उच्यते–आर्यदेशोत्पन्नः सुखाववोध-वाक्यो भवतीति **देशग्रहणम्**, पैतृकं **कुलं** विशिष्टकुलोद्भवो यथोत्क्षिप्तभारवहने न श्राम्यति, मातृकी **जातिः** तत्सम्पन्नो विनयान्वितो भवति, **रूपवानादेयवचनो** भवति, आकृतौ च गुणा वसन्ति, **संहननधृतियुक्तो** व्याख्यानतपोऽनुष्ठानादिषु न खेदं याति, **अनाशंसी** न श्रोतृभ्यो वस्त्राद्याकाङ्क्षति, **अविकत्थनो** बहुभाषी न भवति, **अमायी** न शाठ्येन शिष्यान् वाहयति, **स्थिरपरिपाटी** स्थिरपरिचितग्रन्थस्य सूत्रं न गलति, **गृहीतवाक्यो**ऽप्रतिघातवचनो भवति, **जितपरिषत्** परप्रवादिक्षोभ्यो न भवति, **जितनिद्रो**ऽप्रमत्तत्वाद् व्याख्यानरतिर्भवति प्रकामनिकामशायिनश्च शिष्याँश्चोदयति, **मध्यस्थः** संवादको भवति, **देशकालभावज्ञो** देशादिगुणानवबुद्ध्याप्रतिबद्धो विहरति देशनां च करोति, **आसन्नलब्धप्रतिभो** जात्युत्तरादिना निगृहीतः प्रत्युत्तरदानसमर्थो भवति, **नानाविधदेशभाषाविधिज्ञो** नानादेशजविनेय-प्रत्यायनसमर्थो भवति, ज्ञानादि**पञ्चविधाचारयुक्तः** श्रद्धेयवचनो भवति, **सूत्रार्थोभयज्ञः** सम्यगुत्सर्गा-पवादप्ररूपको भवति, **उदाहरणहेतुकारणनयनिपुण**स्तद्गम्यान् भावान् सम्यक् प्ररूपयति नाऽऽगम-मात्रमेव, **ग्राहणाकुशलः** शिष्याननेकधा ग्राहयति, **स्वसमयपरसमयवित्** सुखं परमताक्षेपमुखेन स्वसमयं प्ररूपयति, **गम्भीरो** महत्यप्यकार्ये न रुष्यति, **दीप्तिमान्** परप्रवादिक्षोभमुत्पादयति, **शिवो** मारिरोगाद्युपद्रवविघातकृद् भवति, **सौम्यः** प्रशान्तदृष्टितया सकलजनप्रीत्युत्पादको भवति, इत्थम्भूत एव **गुणशतकलितो योग्यः प्रवचनमा**गमस्तस्य **सारस्तं कथयितुमि**ति, यतोऽसावनेकभव्यसत्त्व-प्रबोधहेतुर्भवति, उक्तं च–

गुणसुट्ठिअस्स वयणं घयमहुसित्तोव्व पावओ भाइ । गुणहीणस्स न सोहइ णेहविहीणो जह पईवो ।।

तथा चान्येनाप्युक्तम्–

क्षीरं भाजनसंस्थं न तथा वत्सस्य पुष्टिमावहति । आवल्गमानशिरसो यथा हि मातृस्तनात्पिबतः ।।
तद्वत्सुभाषितमयं क्षीरं दुःशीलभाजनगतं तु । न तथा पुष्टिं जनयति यथा हि गुणवन्मुखात्पीतम् ।।
शीतेऽपि यत्नलब्धो न सेव्यतेऽग्निर्यथा श्मशानस्थः । शीलविपन्नस्य वचः पथ्यमपि न गृह्यते तद्वत् ।।
चारित्रेण विहीनः श्रुतवानपि नोपजीव्यते सद्भिः । शीतलजलपरिपूर्णः कुलजैश्चाण्डालकूप इव ।।

**** उपदेशमाला पुष्पमालायाम्-३३०-३३ ****

प्रकारान्तरेण गुरुगुणानेवाह –

देस-कुल-जाइ-रूवी संघयणधिईजुओ अणासंसी ।
अविकत्थणो अमायी थिरपरिवाडी गहियवक्को ।।
जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावण्णू ।
आसन्नलद्धपइभो नाणाविहदेसभासण्णू ।।

पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिण्णू ।
आहरण-हेउ-उवणय-नयनिउणो गाहणाकुसलो ।।
ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ एसो पवयणउवएसओ य गुरू ।।

'**देस**'त्ति १-इह सर्वत्र सूचनमात्रत्वात् सूत्रस्यार्यदेशोत्पन्न एव गुरुर्भवतीत्यर्थः, तथा २-'**कुल**'त्ति पितृपक्षशुद्धः, ३-'**जाइ**'त्ति मातृपक्षशुद्धः, तथा ४-अरूपस्यानादेयत्वादिप्रसङ्गतो **रूपवानेव** गुरुः, ५-**संहननेन** विशिष्टशारीरसामर्थ्यरूपेण सम्पन्नः, ६-संयमादिनिर्वाहणे **धृत्या** मानसावष्टम्भबलरूपया **युक्तः**, ७-धर्मकथादिप्रवृत्तौ वस्त्रभोजनाद्याशंसादिविरहितः, ८-स्वल्पेऽपि केनचिदपराद्धे तुच्छतया पुनः पुनस्तदुत्कीर्त्तनं विकत्थनं तद्रहितः, ९-मायाविनिर्मुक्तः, १०-**स्थिरपरिपाटि**रविस्मृतसूत्रार्थः, ११-**गृहीतवाक्य** आदेयवचनः, १२-**जितपर्षद्** महत्यामपि पर्षदि क्षोभरहितः, १३-**जितनिद्रः**, १४-**मध्यस्थो** रागद्वेषरहितः, १५-देशौचित्येन यः प्रवर्त्तते स **देशज्ञः**, १६-एवं **कालज्ञः**, १७-भावः पराभिप्रायस्तदौचित्यप्रवर्त्तको **भावज्ञः**, १८-आसन्ना झगित्येव लब्धा कर्मक्षयोपशमेनाविर्भूता प्रतिभा परतीर्थिकादीनामुत्तरप्रदानशक्तिर्यस्येत्यासन्नलब्धप्रतिभः, १९-**नानाविधदेशभाषाकुशलः**, २०-२४ ज्ञानदर्शनचारित्रतपोवीर्यविषय**पञ्चविधाचारयुक्तः**, २५-**सूत्रार्थतदुभयवेत्ता**, २६-**आहरणं** दृष्टान्तः, २७-साध्यार्थगमको **हेतुः** कृतकत्वादिः, २८-दृष्टान्तदर्शितार्थस्य प्रकृतयोजना **उपनयः**, २९-**नया** नैगमादय एतेषु सर्वेष्वप्याहरणादिषु **निपुणः**, ३०-**ग्राहणाकुशलः** प्रतिपादकशक्तियुक्त इत्यर्थः, ३१-**स्वसमय**वेत्ता, ३२-**परसमयवेत्ता**, ३३-**गम्भीरः** परैरलब्धमध्यः, ३४-**दीप्तिमान्** तीर्थिकादी-नामसह्यप्रतिभः, ३५-विद्यामन्त्रादिसामर्थ्यादशिवोपशमकर्तृत्वेन शिवहेतुत्वा**च्छिवः**, ३६-**सौम्योऽ**-रौद्रप्रकृतिरिति षट्त्रिंशद्गुणोपेतो गुरुर्विज्ञेयः, उपलक्षणत्वाच्चामीषामपरैरपि **गुणशतैः कलितः, एष प्रवचनोपदेशको गुरु**र्भवतीति गाथाचतुष्टयपरमार्थः ।।३३०-३३।।

**** धर्मरत्नप्रकरणे-१२६ ****

प्रकृतं सूत्रं व्याख्यानयन्नाह–गुरवः षट्त्रिंशद्गुणयुक्तः, तथाहि –

देस-कुल-जाइ-रूवी संघयणी धिइजुओ अणासंसी ।
अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ।।
जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो नाणाविहदेसभासन्नू ।।
पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू ।
आहरण-हेउ-कारण-नयनिउणो गाहणाकुसलो ।।

ससमयपरसमयविऊ गम्भीरो दित्तिमं सिवो सोमो ।
गुणसयकलिओ जुत्तो पवयणसारं परिकहेइ ।।

तत्राऽऽर्यदेशोद्भूतः सुखावबोधवचनो भवति ततो देशग्रहणम्, कुलं पैतृकमिक्ष्वाक्वादि, तज्ज्ञातश्च यथोत्क्षिप्तभारवहने न श्राम्यति, जातिर्मातृकी, तत्संपन्नो हि विनयादिगुणवान् स्यात् । 'यत्राकृतिस्तत्र गुणा भवन्ति' इति रूपग्रहणम्, **संहननधृतियुतो** न व्याख्यानादिषु खेदमेति, **अनाशंसी** श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति, **अविकत्थनो** हितमितभाषी, **अमायी** विश्वास्यः, **स्थिरपरिपाटिः** स्थिरपरिचितग्रन्थस्य सूत्रार्थगलनाभावात्, **ग्राह्यवाक्यः** सर्वत्रास्खलिताज्ञः, **जितपरिषद्** राजादिसदस्यपि न क्षोभमुपयाति, **जितनिद्रो** निद्राप्रमादिनः शिष्यान् सुखेनैव बोधयति, **मध्यस्थः** शिष्येषु समचित्तः, **देशकालभावज्ञः** सुखेनैव गुणवद्देशादौ विहरति, **आसन्नलब्धप्रतिभो** द्राक् परवाद्युत्तरदानसमर्थः, **नानाविधदेशभाषाज्ञो** नानादेशजान् सुखेनैवावबोधयति, ज्ञानाद्याचारपञ्चकयुक्तः श्रद्धेयवचनः स्यात्, **सूत्रार्थतदुभयविधिज्ञ** उत्सर्गापवादप्रपञ्चं यथावद् ज्ञापयति, **आहरणं** दृष्टान्तः, **हेतु**रन्वयव्यतिरेकवान्, **कारणं** दृष्टान्तादिरहितमुपपत्तिमात्रम्, **नया** नैगमादयः, एषु **निपुणः** सुखेनैतान् प्रयुङ्क्ते, **ग्राहणाकुशलो** बह्वीभिर्युक्तिभिः शिष्यान् बोधयति, **स्वसमयपरसमयज्ञः** सुखेनैव तत्स्थापनाव्यूहौ विधत्ते, **गम्भीरो**ऽलब्धमध्यः, **दीप्तिमान्** पराधृष्यः, शिवहेतुत्वा**च्छिवः**, तदधिष्ठिते देशे मार्याद्युपशमनात्, **सौम्यः** सर्वजनमनोनयनरमणीयः, **गुणशतकलितः** प्रश्रयाद्यनेकगुणोपेतो **युक्तोऽर्हत्प्रवचनसारं परिकथयितुं** प्रवचनानुयोगयोग्यो भवतीत्यर्थः ।।१२६।।

**** उपदेशमालायाम्-११ ****

xxx २०-ज्ञानाचार २१-दर्शनाचार २२-चारित्राचार २३-तपाचार २४-वीर्याचार**रूपपञ्चविधाचारयुक्तः** श्रद्धेयवचनो भवति, २५-**सूत्रार्थोभयज्ञः** सम्यगुत्सर्गापवादप्ररूपको भवति, २६-**उदाहरण** २७-**हेतु** २८-**कारण** २९-**नयनिपुण**स्तद्गम्यान् भावान् सम्यक्प्ररूपयति नाऽऽगममात्रमेव शरणीकरोति, तत्रोदाहरणानि वह्न्यादिसिद्धौ महानसादयो दृष्टान्ताः, हेतवो ज्ञापका धूमवत्त्वादयः कारणान्युत्पादकानि परिणाम्यादीनि कुम्भादेर्मृत्पिण्डादिवत्, नया नैगमादयः । xxx

चक्रे० : अथ किमर्थं पुनः पुनर्गुरोर्गुणान्वेषणं क्रियते ? इत्याहुः –

देव० : अथ किमर्थमित्थं पुनः पुनर्गुरोर्गुणान्वेषणं क्रियते ? इत्याह –

वूढो गणहरसद्दो गोयममाईहिं धीरपुरुसेहिं ।
जो तं ठवइ अपत्ते जाणंतो सो महापावो ।।१५२।।

चक्रे० : स्पष्टा ।।१५२।।

देव० : व्यूढो धृतो **गणधरशब्दो** गणभृद् ध्वनिः, कैः ? धिया राजन्त इति **धीराश्च** ते **पुरुषाश्च** तैः, किमादिभि**र्गौतमादिभिर्म**कारोऽलाक्षणिक इन्द्रभूतिसुधर्मप्रभृतिभि**र्यश्च तं** गणधरशब्दं स्वजनशिष्यादिव्यामोहात्**स्थापयत्या**रोपय**त्यपात्रे**ऽनर्हे पुरुषे **जानन्,** प्रस्तावाद-पात्रत्वमनेन च्छद्मस्थपरीक्षया परीक्षितस्य क्वचिदङ्गारमर्दकादाविव व्यभिचारेऽपि न दोषः, **स महापाप**स्तत्कृततीर्थमालिन्याद्यनाचारस्य तन्मूलत्वाद्, इह चैतदपि ज्ञातव्यम्, यथा –

एवं पवत्तिणिसद्दो जो वूढो अज्जचंदणाईहिं ।
जो तं ठवइ अपत्ते जाणंतो सो महापावो ।। [पञ्चवस्तु-१३२०]

पात्रं पुनरियम् –

गीयत्था कयकरणा कुलजा परिणामिया य गंभीरा ।
चिरदिक्खिया य वुड्ढा अज्जावि पवत्तिणी भणिया ।। [पञ्चवस्तु-१३१७] एवं च-

तम्हा तित्थयराणं आराहंतो जहोइयगुणेसु ।
दिज्ज गणं गीयत्थो नाऊण पवत्तिणिपयं वा ।। [पञ्चवस्तु-१३२५]

इति गाथार्थः।।१५२।।

**** पञ्चवस्तौ-१३१९ ****

तथा च –

वूढो गणहरसद्दो गोअमपमुहेहिं पुरिससीहेहिं ।
जो तं ठवेइ अपत्ते जाणंतो सो महापावो ।।

व्यूढो गणधरशब्दो गौतमप्रमुखैः पुरुषसिंहैः महात्मभि**र्यस्तं स्थापयत्यपात्रे जानानः स महापापो** मूढ इति गाथार्थः ।।१३१९।।

चक्रे० : अयोग्यस्थापनामाश्रित्य दोष उक्तः, सम्प्रत्यसद्देशनामाश्रित्य तमाहुः –

देव० : अयोग्यस्थापनामाश्रित्य दोष उक्तः, सम्प्रति कुदेशनामाश्रित्य तमाह –

तिन्नि वि रयणाइं देइ गुरु सुपरिक्खियइं न जस्सु[१],
सीसहसीसु हरंतु जिह सो गुरु वइरि उ तस्सु[२] ।

१. जस्स P,K २. तस्स P,K

सो गुरु वइरि उ तस्सु[१] इत्थु संदेहु न किज्जइ,
सीसह सीसु हरंतु जे वंनरु नरह भणिज्जइ ।
सुपरिक्खियइं न जस्सु[२] सच्चु संसउ मणिछित्रि वि;
देइ सुदेउ-सुधम्मु-सुगुरु गुरुरयणाइं तित्रि वि।।१५३।।

चक्रे० : कुण्डलकरूपकं सुगमम्।।१५३।।

देव० : द्विभङ्गिकाच्छन्दः[३] सुगमम्, नवरं संसारचारकनिवाससन्त्रस्तस्त्राणमयमितिकृत्वा जन्तुर्गुरुमाश्रितः, स च कुदेशनया कुदेवादिषु देवत्वादिप्रतिपत्तिमुत्पादयता तेन सुतरां तत्र निक्षिप्त इति विश्वस्तघातित्वेन शीर्षापहारिणा वैरिणा तुल्य इति भावः, तथा च –

जह सरणमुवगयाणं जीवाणं निकिंतई सिरे जो उ ।
एवं आयरिओ वि हु उस्सुत्तं पन्नविंतो उ ।। [उपदेशमाला-५१७]

इत्यादि।।१५३।।

चक्रे० : अथ रत्नत्रयस्यैव स्वरूपमाहुः –

देव० : अथ रत्नत्रयस्यैव स्वरूपमाह –

सो जि धम्मु सचराचर जीवहदयसहिउ,
सो गुरु जो घरघरणि[४]सुरयसंगमरहिउ ।
इंदियविसयकसाइहिं देउजुमुक्कमलु;
एहु लेहु रयणत्तउ चिंतियदिन्नफलु।।१५४।।

चक्रे० : सुगमम्।।१५४।।

देव० : सुगमम्, नवरं सहचरैर्वर्तन्त[५] इति सहचरास्ते च तेऽचराश्च सचराचराः, अनेन यैर्हिंसयाऽपि धर्मोऽभिहितो यथा –

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ।।
औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतिं पुनः ।। [मनुस्मृति-५/३९-४०]

१. तस्स इत्थ P,K २. जस्स P,K ३. कुंडलकरूपकं T,B,C. ४. घरिणि T,C ५. भावप्रधानत्वात् निर्देशस्य, सहचराचरत्वेन वर्तन्त इति T,B,C

इत्यादि तान् प्रतिक्षिपति, यतस्तैरेवोक्तम् –

सर्वे वेदा न तत्कुर्युः सर्वे यज्ञाश्च पार्वति ।
सर्वतीर्थाभिषेकश्च यत्कुर्यात् प्राणिनां दया ।। [ ]

इति तथा सुरतसङ्गमवर्जनेनैव गृहिणीवर्जने सिद्धे यत्पुनस्तद्ग्रहणं तद्धर्मपत्न्या अपि परिहारार्थम्, तथा च केचिदाहुः - क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलसाधनमिति।।१५४।।

चक्रे० : अथैतद्रत्नत्रयं कथं ज्ञेयमित्याहुः –

देव० : अथैतद्रत्नत्रयं कथमवबुध्यत इत्याह –

देवं गुरुं च धम्मं च भवसायरतारयं ।
गुरुणा सुप्पसन्नेण जणो जाणइ निच्छियं।।१५५।।

चक्रे० : पाठसिद्धा।।१५५।।

देव० : पाठसिद्धः श्लोकः ।।१५५।।

चक्रे० : अथ प्रकारान्तरेण पुनर्गुरोरेव स्वरूपमाहुः –

देव० : अथ प्रकारान्तरेण पुनर्गुरोरेव स्वरूपमाह –

धम्मन्नू धम्मकत्ता य सया धम्मपरायणो ।
सत्ताणं धम्मसत्थत्थदेसओ भन्नए गुरु।।१५६।।

चक्रे० : एषाऽपि स्पष्टा, केवलं **सदा** सर्वकालं **धर्म्मपरायणो** न तु द्रष्टारमपेक्ष्य कदाचिदेव ।।१५६।।

देव० : धर्मः श्रुतचारित्रलक्षणस्तं जानातीति **धर्मज्ञो** युगप्रधानागम इत्यर्थोऽनेन ज्ञानमुक्तम्। **धर्मः**[१] प्राग्वत्तस्य **कर्त्ता**ऽनुष्ठायी, अनेन क्रिया प्रतिपादिता । **च**कारो विशेषणसमुच्चये, तदनेन यदाहुः– किं मोक्षतरोर्बीजम् ? सम्यग्ज्ञानं क्रियासहितमिति तदाविर्भावितम् । **सदा** सर्वकालं **धर्मपरायणो** न तु द्रष्टारमपेक्ष्य कदाचिदेव, तदियता स्वार्थ उक्तः । अथ तीर्थप्रवृत्त्यङ्गभूतं देशनारूपं परार्थमाह- **सत्त्वानां धर्मशास्त्रार्थदेशको भण्यते गुरुर**नेन कामशब्दादिशास्त्रान्तरदेशित्वप्रतिषेधमाह, इति श्लोकार्थः।।१५६।।

१. क्षान्त्यादिस्तस्य A.

चक्रे० : तदेवं गुरोर्गुणानुपवर्ण्य तस्यैव माहात्म्यमाहुः –

देव० : तदेवं गुरुगुणग्राममुपवर्ण्य तस्यैव माहात्म्यमाह –

तं सुगुरुसुद्धदेसणमंतक्खरकन्नजावमाहप्पं ।
जं मिच्छविसपसुत्तावि केइ पावंति सुहबोहं[१]।।१५७।।

चक्रे० : स्पष्टा, नवरं **केचिदा**सन्नसिद्धिकादयः।।१५७।।

देव० : तत् सुगुरुशुद्धदेशनैव मन्त्राक्षराणि, तेषां **कर्णजाप**स्तस्य **माहात्म्यं** प्रभावः, **यत्किम्** ? यद्भावप्रधानत्वान्निर्देशस्य, **मिथ्यात्वमेव** सद्बोधप्रतिबन्धित्वसाधर्म्येण **विषं** तेन प्रसुप्ता इव **प्रसुप्ताः** प्रणष्टसंविदः, **अपिः** प्रकर्षद्योतने, **केचिदा**सन्नसिद्धिकादयः **प्राप्नुवन्ति शुभबोधमि**ति गाथार्थः ।।१५७।।

चक्रे० : तथा –

देव० : तथा –

सग्गाऽपवग्गमग्गं मग्गंताणं अमग्गलग्गाणं ।
दुग्गे भवकंतारे नराण नित्थारया गुरुणो ।।१५८।।

चक्रे० : स्वर्गापवर्गमार्गं मार्गयमाणानाम्, अथवाऽ**मार्गलग्नानां दुर्गे भवकान्तारे नराणां निस्तारका गुरव** इत्यर्थः ।।१५८।।

देव० : स्वर्गापवर्गमार्गं मार्गयमाणानाममार्गलग्नानां दुर्गे भवकान्तारे नराणां निस्तारका गुरव इति गाथार्थः।।१५८।।

चक्रे० : अन्यच्च–

देव० : अन्यच्च–

अन्नाणनिरंतरतिमिरपूरपडिपूरियंमि[२] भवभवणे ।
को पयडेइ पयत्थे जइ गुरुदीवा न दिप्पंति।।१५९।।

चक्रे० : अत्र चाऽर्थे केशिगणधरप्रदेशिपार्थिवयोर्दृष्टान्तः ।।१५९।।

देव० : निगदसिद्धा।।१५९।।

१. सुहबोहिं P, K. २. परिपूरियंमि A,T,C,Z

चक्रे० : अथ सामान्यजनोचितमन्वयव्यतिरेकेण गुरोर्लक्षणमाहुः –

देव० : अथ मुग्धजनोचितमन्वयव्यतिरेकतो गुरोर्लक्षणमाह –

अक्खरु अक्खइ किंपि न ईहइ अन्नुवि भवसंसारह बीहइ ।
संजमनियमिहिं खणु वि न मुञ्चइ एहा धम्मिय सुहगुरु वुच्चइ।।१६०।।
छव्विहजीवनिकाउ विराहइ पंच वि इंदिय जो न वि साहइ ।
कोहमाणमयमच्छरजुत्तउ[१] सो गुरु नरयह नेइ निरुत्तउ।।१६१।।

चक्रे० : रूपकद्वयं स्पष्टम्।।१६०, १६१।।

देव० : अक्षरं धर्मप्रतिबद्ध**माख्याति,** तच्च कथयन् व्यासादिव**न्न किञ्चिदीहते** श्रोतृभ्यस्तस्यात्मभावक्रीतत्वेनाकल्प्यत्वाद्, एतेन धर्मार्थिनैव देशना विधेयेति, **अन्यच्च भवे** चतुर्गतिके **संसारः** पर्यटनं तस्माद् **बिभेति,** मा क्वचिदुत्सूत्रं भविष्यतीति । **समि**ति सम्यग् **यमा** अहिंसादयो मूलगुणा इत्यर्थः, **नियमाः** शौचादय उत्तरगुणा इत्यर्थः, यदाह –

अहिंसासुनृतास्तेय-ब्रह्माकिञ्चनता यमाः ।
नियमाः शौचं सन्तोषः स्वाध्यायतपसी अपि ।। [षड्दर्शनस० १५१]

देवताप्रणिधानं चेति तैः **क्षणमपि न मुच्यत ईदृशो** हि **धार्मिक शुभगुरुरुच्यत** इति।।

यस्तु **षड्विधजीवनिकायं विराधयति** हिनस्ति, **पञ्चाप्या**स्तामेकादिक**मिन्द्रियाणि** करणानि **यो नैव साधयति** जयत्यनिरुद्धाश्रवोऽसंवरश्चेत्यर्थः । **क्रोधः** कोपो **मानो**[२] दुरभिनिवेशो **मदो** जात्याद्युत्सेको **मत्सरः** परगुणाद्यसहिष्णुता, तै**र्युक्तो** य इत्यत्रापि योगः, **स** गुरुरिव **गुरु**स्तदाभासित्वेन **नरकं नयति** श्रोतारमिति गम्यते, **'निरुत्तउ'**त्ति लोकरूढ्या निश्चितः स्वक्रियानुरूपदेशित्वात्तस्येति[३] वदनकद्वयार्थः ।।१६०, १६१।।

चक्रे० : अत्र कथं प्रथमदर्शन एव गुरुगुणाऽवगम इत्याहुः –

देव० : अथ किमर्थमभीक्ष्णमिह गुरोर्गुणोद्घोषणा[४] ? सत्यमैहिकामुष्मिकसदनुष्ठानस्य सर्वस्यापि गुरुमूलत्वादतस्तत्परीक्षाव्यतिरेकेण प्रवर्त्तमानस्य विप्रतारकमार्गदेशकवचनप्रवृत्तस्येव मा भूद् दुरुत्तरसंसाराटवीविनिपातस्तद्गुणप्रतीतिश्च कस्यचित्कथञ्चिज्जायत इत्यनेकधा गुरुगुणव्यावर्णनमदुष्टमिति, ननु तथापि प्रथमदर्शन एव कथं तद्गुणावगम इत्याह –

१. मत्सर T,C मच्छरि A २. गर्वो T,B,C ३. रुपकद्वयार्थः T,B,C ४. गुरोर्गुणपरावृत्तिः T,B,C

आलयविहारभासा चंकमणट्ठाणविणयकम्मेहिं ।
सव्वन्नुभासिएहिं जाणिज्जइ सुविहिओ साहू।।१६२।।

चक्रे० : आलयः सुप्रमार्जितादिः स्त्रीपशुपण्डकरहितश्चोपाश्रयः, **विहारो** मासकल्पादिः, **भाषा** सूचकत्वात् सूत्रस्य भाषासमितिः, **चङ्क्रमणमी**र्योपयुक्तस्य गमनम्, अत्र चैकग्रहणेन तज्जातीयग्रहणादखिलप्रवचनमातॄणां ग्रहणं ज्ञेयम्, **स्थान**मूर्ध्वस्थानं निष्क्रमप्रवेशादिप्रदेशवर्जितम्, **विनयकर्म** मिथो विनयार्हेषूचितप्रतिपत्ति एषां द्वन्द्वः, एतैः **सर्वज्ञभाषितै**र्लिङ्गै**र्ज्ञायते सुविहितः साधुः** ।।१६२।।

देव० : आलयः सुप्रमार्जितादिलक्षणः, स्त्रीपशुपण्डकादिदोषरहितो वोपाश्रयः, **विहारो** मासकल्पादिः, **भाषा** देशेन समुदायावगमाद्भाषासमितिः । **चङ्क्रमण**मीर्योपयुक्तस्य गमनक्रियाऽत्र चैकग्रहणे तज्जातीयग्रहणादखिलप्रवचनमातॄणां ग्रहणं मन्तव्यम् । **स्थान**मूर्ध्वस्थानं निष्क्रमप्रवेशादिप्रदेशवर्जितम्, **विनयकर्म** परस्परं विनयार्हेषूचितप्रतिपत्तिरमीषां द्वन्द्वः । एतैः **सर्वज्ञभाषितै**स्तीर्थकृदुक्तैर्लिङ्गैरिति गम्यम्, **ज्ञायते**ऽवगम्यते सुष्ठु शोभनं विहितमनुष्ठानं यस्य स **सुविहितः साधु**र्यतिः । न चैवमप्यङ्गारमर्दकोदायिनृपमारकादिभिर्व्यभिचारः, प्रायशः संवादित्वादन्यथा धूमादीनामप्यग्निज्ञानादौ सम्यग् हेतुत्वं न स्यात्, तेषामपि क्वचिद्विप्रतारक-गोपालधूमभृतघटिकादौ व्यभिचारदर्शनाद्, व्यवहारनयप्राधान्येनैव च छद्मस्थानां प्रवृत्तेः, अत एव च यावत्तत्सम्यग्भावो न ज्ञायते तावत्तेषामपि बाह्यलिङ्गपरीक्षया प्रतिपत्तिः कर्मक्षयायैव, किं चातिशयज्ञानिनोऽपि पुरस्कुर्वन्त्येव व्यवहारनयं यदाह –

व्यवहारोवि हु बलवं जं छउमत्थंपि वंदई [१]अरहा ।
जो होइ अणाभिन्नो जाणंतो धम्मयं एयं ।। [पञ्चवस्तु-१०१६]

इति गाथार्थः ।।१६२।।

**** आवश्यकनिर्युक्तौ- ११४८ ****

इत्थं चोदकेनोक्ते सति व्यवहारनयमतमधिकृत्य गुणाधिकत्वपरिज्ञानकारणानि प्रतिपादयन्नाचार्य आह-

आलएणं विहारेणं ठाणाचंकमणेण य ।
सक्को सुविहिओ नाउं भासावेणइएण य ।।

---

१. अरिहा A

आलयो वसतिः सुप्रमार्जितादिलक्षणाऽथवा स्त्रीपशुपण्डकविवर्जितेति, तेनाऽऽलयेन, नागुणवत एवंविधः खल्वालयो भवति, विहारो मासकल्पादिस्तेन **विहारेण, स्थानमूर्ध्वस्थानम्, चङ्क्रमणं** गमनम्, स्थानं च चङ्क्रमणं चेत्येकवद्भावस्तेन **च,** अविरुद्धदेशकायोत्सर्गकरणेन च युगमात्रावनिप्रलोकन-पुरस्सराद्रुतगमनेन चेत्यर्थः, **शक्यः सुविहितो ज्ञातुम्, भाषावैनयिकेन च** विनय एव वैनयिकं समालोच्य भाषणेनाऽऽचार्यादिविनयकरणेन चेति भावना, नैतान्येवम्भूतानि प्रायशोऽसुविहितानां भवन्तीति गाथार्थः ।।११४८।।

चक्रे० : अथेत्थम्भूतस्य साधोर्विचित्रचारित्रमोहनीयक्षयोपशमभेदतो नामान्याहुः –

देव० : अथेत्थम्भूतस्य सुविहितस्य विचित्रचारित्रमोहनीयक्षयोपशमोपशमक्षयभेदतो नामान्याह –

पुलायनामो पढमो चरित्ती बीओ बउस्सो तइओ कुसीलो ।
चउत्थओ होइ नियंठनामो सव्वुत्तमो पंचमओ सिणाओ।।१६३।।

चक्रे० : १-**पुलाको** निस्सारो धान्यकणस्तद्वन्मनागसारसंयमः, साधुरपि पुलाकस्तन्नामा **प्रथम**श्चारित्री, स द्विधा लब्धिप्रतिषेवाभेदात् तत्र लब्धिपुलाको लब्धिविशेषवान् यदाह –

संघाइयाण कज्जे चुण्णिज्जा चक्कवट्टिसिन्नंपि ।
तीए लद्धीए जुओ लद्धिपुलाओ मुणेयव्वो ।। [संबोधप्र० ७५३]

प्रतिषेवापुलाकः स्खलितादिभिर्ज्ञानाद्यसारताकारी । २-**द्वितीयश्चारित्री** बकुशसंयम-योगा**द्बकुशो** बकुशं कर्बुरम्, सोऽपि द्विविधस्तत्र वस्त्रपात्राद्युपकरणविभूषाकृत् प्रथमः, करचरणनखमुखादिदेहावयवविभूषाकृद् द्वितीयः । ३-**तृतीयः कुशील** एषोऽपि द्विधा ज्ञानादिप्रतिषेवणाकुशीलो ज्ञानाद्युपजीवकः, कषायकुशीलः कषायैर्ज्ञानादिविराधकः । ४-**चतुर्थको भवति निर्ग्रन्थनामा** निर्गतो ग्रन्थान्मोहनीयाख्यादिति निर्ग्रन्थ उपशान्तमोहक्षीणमोह-गुणस्थानकस्थो मुनिः । ५-**सर्वोत्तमः पञ्चमकः** स्नात इव **स्नातको** घातिकर्ममलक्षालनात् केवलज्ञानीत्यर्थः । एत उत्तरोत्तरं शुद्धचारित्राः, एषां च विस्तारविचारः प्रज्ञप्तिपञ्चविंशतितम-शतषष्ठोद्देशकाद् ज्ञेय इति वृत्तार्थः।।१६३।।

देव० : तत्र पुलाको निःसारशाल्यादिकणस्ततः पुलाकवत्पुलाकः, संयमसारापेक्षया च संयमवानपि मनाक् तमसारं कुर्वन् पुलाक इत्युच्यते ततः **पुलाक** इति **नाम** यस्य स तथा **प्रथम** आद्य**श्चारित्री** साधुरयं च द्विविधो लब्धिप्रतिषेवाभेदात्, तत्र लब्धिपुलाको लब्धिविशेषवान्, यदाह-

संघाइयाण कज्जे चुण्णिज्जा चक्कवट्टिसिन्नंपि[१] ।
तीए लद्धीए जुओ लद्धिपुलाओ मुणेयव्वो ।। [संबोधप्र॰ ७५३]

अन्ये त्वाहुरासेवनतो यो ज्ञानपुलाकस्तस्येयमीदृशी सञ्ज्ञा, स एव च लब्धिपुलाको न तद्व्यतिरिक्तः कश्चिदपर इति प्रतिषेवापुलाकश्च पञ्चधा, ज्ञानदर्शनचरणलिङ्गयथासूक्ष्मभेदात् । तत्र ज्ञानमाश्रित्य पुलाकस्तस्यासारताकारी विराधको ज्ञानपुलाक एवं दर्शनादिपुलाकोऽपि आह च–

खलिआइदूसणेहिं नाणं संकाइएहिं संमत्तं ।
मूलोत्तरगुणपडिसेवणाए चरणं विराहेइ ।।

लिंगपुलाओ अन्नं निक्कारणओ करेइ जो लिंगं ।
मणसा अकप्पियाणं निसेवओ होइ अहासुहुमो ।। [पञ्चनिर्ग्रन्थीप्र॰ १०, ११]

द्वितीयो नामशब्दस्यात्रापि सम्बन्धाद् **बकुश**नामा चारित्रीत्यत्रापि योगः । एवमुत्तरत्रापि तत्र बकुशं शबलं कर्बुरमित्यनर्थान्तरम्, बकुशसंयमयोगाद् बकुशः, उपकरणशरीरभेदादयमपि द्विविधः, तत्र वस्त्रपात्राद्युपकरणविभूषानुवर्त्तनशीलः प्रथमः, करचरणनखमुखादिदेहावयवविभूषानुवर्त्ती द्वितीयः, स चायं द्विविधोऽपि पञ्चधा, आभोगाऽनाभोगसंवृत्ताऽसंवृत्तयथासूक्ष्मभेदस्तत्राऽऽभोगः साधूनामकृत्यमेतत् शरीरोपकरणविभूषणमित्येवं ज्ञानम्, तत्प्रधानो बकुश आभोगबकुश एवमन्येऽपि, इहाप्युक्तम् –

आभोगे जाणंतो करेइ दोसं अयाणमणाभोगे ।
मूलोत्तरेहिं संवुड विवरीय असंवुडो होइ ।।

अच्छिमुहमज्जमाणो होइ अहासुहुमओ तहा बकुसो ।
अहवा जाणिज्जंतो असंवुडो संवुडो इयरो ।। [पञ्चनिर्ग्रन्थीप्र॰ २१,२२] इति ।

तृतीयः कुत्सितं शीलमस्येति **कुशीलः,** प्रतिषेवणाकषायभेदादयमपि द्वेधा, तत्र सेवना सम्यगाराधना, तत्प्रतिपक्षस्तु प्रतिषेवणा तया कुशीलः प्रतिषेवणाकुशीलः, स पुनः पञ्चधा ज्ञानादिभेदात्, तत्र –

इह नाणाइ कुसीलो उवजीवं होइ नाणपभिईओ ।
अहसुहमो पुण तुस्सं एस तवस्सित्ति संसारे ।। [पञ्चनिर्ग्रन्थीप्र॰ २४]

---

१. सिस्संपि A

कषायैः कुशीलः कषायकुशीलोऽयमपीत्थमेव पञ्चधैव, इह गाथाः –

नाणे दंसणलिंगे जो जुंजइ कोहमाणमाईहिं ।
सो नाणाइकुसीलो कसायओ होइ विन्नेओ ।।
चारित्तंमि कुसीलो कसायओ जो पयच्छई सावं ।
मणसा कोहाईए निसेवओ होइ अहासुहुमो ।।
अहवा वि कसाएहिं नाणाईणि उ विराहए जो उ ।
सो नाणाइकुसीलो नेओ वक्खाणभेएण ।। [पञ्चनिर्ग्रन्थीप्र० २५, २६, २७] इति ।

चतुर्थ एव **चतुर्थको भवति,** निर्गतो ग्रन्थान्मोहनीयकर्माख्यादिति **निर्ग्रन्थनामा**यं च पञ्चधा, १-तत्रोपशान्तमोहाद्धायाः क्षीणमोहच्छद्मस्थाद्धायाश्चान्तर्मुहूर्त्तप्रमाणायाः प्रथमसमये वर्तमानः प्रथमसमयनिर्ग्रन्थः, २-शेषेषु त्वप्रथमसमयनिर्ग्रन्थः, ३-एवं निर्ग्रन्थाद्धायाश्चरमसमये चरमसमयनिर्ग्रन्थः, ४-शेषेषु त्वितरः, ५-सामान्येन तु यथासूक्ष्मः, इति पारिभाषिकीसंज्ञा उक्तञ्चेह–

अंतमुहुत्तपमाणद्धनिग्गंथद्धाए पढमसमयंमि ।
पढमसमयनिग्गंथो अन्नेसु अपढमसमओ सो ।।
एमेव तयद्धाए चरमे समयंमि चरमसमओ सो ।
सेसेसु पुण अचरमो सामन्नेणं अहसुहुमो ।। [पञ्चनिर्ग्रन्थीप्र० ३०, ३१] इति

सर्वेषामुत्तमः **सर्वोत्तमः पञ्चमकः** स्नात इव **स्नातको** घातिकर्मलक्षणमलपटलक्षालनाद्, अयमपि पञ्चधा १-तत्राक्षपी घातिकर्मचतुष्टयक्षपणानन्तरं तत्क्षपणाभावादिति प्रथमः, २-अशबल एकान्ततो विशुद्धचरणोऽतिचारपङ्काभावादिति द्वितीयः, ३-अकर्मांशो विगतघातिकर्मेति तृतीयः, ४-संशुद्धज्ञानदर्शनधरः केवलज्ञानदर्शनधारीति चतुर्थः, ५-अपरिश्रावी परिश्रवत्याश्रवति कर्म बध्नातीत्येवं शीलो न तथेति, अबन्धको निरुद्धयोग इत्यर्थ इति पञ्चमः स्नातकभेदः । अमीषां च शब्दनयापेक्षया भेदः सम्भाव्यत इह चोत्तरोत्तरेषां विशुद्धिमत्वादित्थं क्रमः पुलाकादीनाम्, अमीषां च वेदादि ३५ द्वारविचारः प्रज्ञप्तिपञ्चविंशतितमशतषष्ठोद्देशकादवसेय इति वृत्तार्थः।।१६३।।

**** प्रवचनसारोद्धारे-७१९ ****

इदानीं 'निग्गंथ'त्ति त्रिनवतं द्वारमाह —

पंच नियंठा भणिया पुलाय बउसा कुसील निग्गंथा ।
होइ सिणाओ य तहा एक्केक्को सो भवे दुविहो ।।

ग्रन्थादान्तरान्मिथ्यात्वादेर्बाह्याच्च धर्मोपकरणवर्जधनादेर्निर्गता **निर्ग्रन्थाः** साधवः, ते पञ्चविधा उक्ताः, यथा – **पुलाको बकुशः कुशीलो निर्ग्रन्थः स्नातकश्चेति**, एतेषां च पुलाकादीनां सर्वेषां सामान्यतश्चारित्र-सद्भावेऽपि मोहनीयकर्मक्षयोपशमादिवैचित्र्याद्भेदोऽवगन्तव्यः, **एकैकोऽपि स** पुलाकादि**र्द्विविधो भवेत्,** द्वैविध्यं च सूत्रकृदेवाग्रे प्रकटयिष्यति ।।७१९।।

चक्रे० : अथैते सर्वे सम्प्रति प्राप्यन्ते किं वा कतिचिदेवेत्याहुः –

देव० : अथैते सर्वेऽपि सम्प्रति प्राप्यन्ते किं वा कतिचिदेवेत्याह –

निग्गंथसिणायाणं पुलायसहियाण तिण्ह [१]वोच्छेओ ।
बकुसकुसीला [२]दुन्नि वि जा तित्थं ताव होहिंति।।१६४।।

चक्रे० : स्पष्टा।।१६४।।

देव० : निर्ग्रन्थस्नातकयोः पुलाकसहितयोस्त्रयाणां व्यवच्छेदो निर्वृत्तिर्जन्म प्रतीत्य तेषां तृतीयचतुर्थारकयोरेव भावात् । अथ निर्ग्रन्थादिषु नामग्राहमभिहितेषु त्रयाणामिति गतार्थः, सत्यम्, गतार्थानामपि दृश्यत एव लोके प्रयोगस्तथा चाह जिनेन्द्रबुद्धिः - यदि गतार्थानामप्रयोग एव स्यात्तदा पचति देवदत्त इत्यत्र पचतीत्येतत् तिवैकत्वस्याभिहितत्वाद्देवदत्त इति सि एकवचनं न स्यादिति । **बकुशकुशीलौ द्वावपी**ति प्राग्वत् । **यावत्तीर्थं** श्रीमहावीरस्य **तावद् भविष्यतः,** तथा च व्यवहारभाष्यम्-'बउसपडिसेवगा खलु इत्तिरिच्छेया य संजया दुन्नि जो तित्थणुसज्जंति'त्ति गाथार्थः ।।१६४।।

**** प्रवचनसारोद्धारे-७३० ****

अथैते पुलाकादयः पञ्चापि कियन्तं कालं यावत्प्राप्यन्ते ? तत्राह –

निग्गंथसिणायाणं पुलायसहियाण तिण्ह वोच्छेओ ।
समणा बउसकुसीला जा तित्थं ताव होहिंति ।।

निर्ग्रन्थस्नातकानां पुलाकसहितानां त्रयाणामपि निर्ग्रन्थभेदानां **व्यवच्छेदोऽ**भावो 'मणपरमोहिपुलाए' इत्यादिवचनाज्जम्बूस्वामिनोऽनन्तरमेते त्रयोऽपि न जाता इत्यर्थः, **बकुशकुशील**लक्षणाः पुनः **श्रमणाः**-साधवो **यावत्तीर्थं तावद्भविष्यन्ति,** 'बकुसकुसीलेहिं वट्टए तित्थं' इति वचनात्।।७३०।।

---

१. वुच्छेओ P, K २. दोण्णि A, दोन्नि Z

चक्रे० : अथ यावत्तीर्थभाविनौ तौ प्रति किं कार्यमित्याहुः –

देव० : यतस्तौ यावत्तीर्थमनुषज्येते ततः किमित्याहः –

ता तेसिं असढाणं जहसत्ति जहागमं जयंताणं ।
कालोचियजयणाए बहुमाणो होइ कायव्वो।।१६५।।

चक्रे० : **तत्** तस्मात्**तयोर्ब**कुशकुशीलयो**रशठयोर्यथाशक्ति यथागमम्, काली** दुःषमा त**दुचितयतनया यतमानयोर्बहुमानः** पूजा **कर्तव्यः** ।।१६५।।

देव० : **तत्तस्मात्तयो**र्बकुशकुशीलयो**रशठयोर**मायाविनो**र्यथाशक्ति** यथाबलं **यथागम-मा**गमानतिक्रमेण **यतमानयो**रुद्यतयोः, कथम् ? **कालो** दुःषमा त**दुचितयतनया, बह्व**तिशयेन **मानः** पूजा **भवति कर्त्तव्य** इति गाथार्थः ।।१६५।।

चक्रे० : अथ पूजामेव व्यञ्जयन्ति –

देव० : अथ पूजामेव व्यनक्ति –

[१]बहुमाणो वंदणयं निवेयणा पालणा य जत्तेण ।
उवगरणदाणमेव य गुरुपूया होइ विन्नेया।।१६६।।

चक्रे० : **बहुमाणो** मानसिकी प्रीतिः, **वन्दनकं** द्वादशावर्त्तम्, **निवेदना** द्रव्यतो धनधान्यादि[२]सर्वस्वसमर्प्पणम्, भावतः सर्वात्मना मनसा समर्प्पणम्, **पालना** तदुपदेशा-ऽऽराधनम्, **यत्नेन** रहस्यमेतदित्यादरेण, **उपकरणस्य** वस्त्रादे**र्दानम्, एवे**ति समुच्चये, **च**कारादभ्युत्थानाऽभिगमनाऽनुगमनादिका च **गुरुपूजा भवति विज्ञेया** ।।१६६।।

देव० : बहुमानो मानसिकी प्रीति**र्वन्दनं** द्वादशावर्तम्, **निवेदना** द्रव्यतो भावतश्च, तत्र द्रव्यतो धनधान्यादिसर्वस्वस[३]मर्पणम्, भावतः सर्वात्मना मनःसमर्पणम्, **पालना** तदुपदेशाऽऽराधनम्, **च**कारस्याऽवधारणार्थत्वाद्, **यत्नेनै**व परमरहस्यमिदमित्यादरेणोपकरोति संयममनुतिष्ठतः साधोरुपकारं करोती**त्युपकरणं** वस्त्रपात्रादि, तस्य **दानं** वितरण**मेवे**ति समुच्चये, **च**कारोऽ-भ्युत्थानाऽऽगच्छदभिगमनगच्छदनुव्रजनाऽञ्जलिप्रग्रहादिबाह्यप्रतिपत्तिसूचकः, किम् ? **गुरुपूजा भवति विज्ञेयेति** गाथार्थः ।।१६६।।

---

१. बहुमाणं A २. सर्वस्वार्पणा P, K ३. समर्पणा A, T, B, C

चक्रे० : अथ निर्ग्रन्थस्नातकापेक्षया हीनगुणानां बकुशकुशीलानां कथमित्थं प्रतिपत्तिरित्याहुः-

देव० : अथ स्नातकाद्यपेक्षया हीनगुणानामन्येषां कथमित्थं प्रतिपत्तिरित्याह -

पलए महागुणाणं हवंति सेवारिहा लहुगुणा वि ।
अत्थमिए दिणनाहे अहिलसइ जणो पईवंपि।।१६७।।

चक्रे० : पाठसिद्धा, नवरं **प्रलय** अभावे ।।१६७।।

देव० : स्पष्टार्था, नवरं **प्रलये**ऽभावे **महागुणानां** स्नातकादीनां लघवः शबलत्वकषाय-कलुषितत्वाभ्यां गुणाश्चारित्रगुणा येषां ते तथा, यतोऽ**स्तमिते दिननाथे** सवितरि **प्रदीपमप्य-भिलषति जन**स्तेनापि तमसि घटघटीसरावोदञ्चनादि पदार्थावलोकनेन स्वार्थसिद्धेरिति।।१६७।।

चक्रे० : आगमोऽप्येवमेव व्यवस्थितस्तथाहि -

देव० : यस्मादागमोऽप्येवमेव व्यवस्थितस्तथाहि -

सम्मत्तनाणचरणाणुवाइमाणाणुगं च जं जत्थ ।
जिणपन्नत्तं भत्तीए पूयए तं तहाभावं।।१६८।।

चक्रे० : सम्यक्त्वज्ञानचरणाऽनुपातिनं साक्षादागमाऽनुक्तम**प्याज्ञानुगं** जिनोक्तानुसारिणं **यं** भावं गुणविशेषं **यत्र** पुरुषे पश्येदिति शेषः । शेषगुणाऽभावेऽपि **तं जिनप्रज्ञप्तमि**ति मनसि कृत्वा **भक्त्या** बहुमानत**स्तथा** तेन प्रकारेण गुणविशेषाऽनुमानेन **पूजयेत्** सत्कारयेदित्यर्थः।।१६८।।

देव० : सम्यक्त्वं च **ज्ञानं** च **चरणं** च, तान्यनुपतत्यनुगच्छतीति त**दनुपाती**, तं तथा**ऽऽ-ज्ञानुगं** चाप्तोपदेशानुसारि, इह च साक्षादागमानुक्तमपि **यत्किञ्चित्सम्यक्त्वाद्यनुपाति** स्यादिति तस्य पृथगुपन्यासोऽयम्, **यत्र** पुरुषे पश्येदिति शेषः । **तं** भावं पर्यायविशेषं गुणाभावेऽपि **जिनप्रज्ञप्तमि**तिकृत्वा **भक्त्या** बहुमानत**स्तथा** सम्यक्त्वाद्युचितप्रतिपत्तिप्रकारेण **पूजयेत्** सत्कारयेदिति गाथार्थः ।।१६८।।

चक्रे० : अत्र चार्थे –

देव० : इह च –

केसिंचि य आएसो दंसणनाणेहिं वट्टए तित्थं ।
वोच्छिन्नं[१] च चरित्तं वयमाणे होइ पच्छित्तं।।१६९।।

चक्रे० : केषाञ्चिदागमानभिज्ञाना**मादेशो** मतम्, यथा **'दर्शनज्ञानाभ्यां वर्त्तते तीर्थं चारित्रं च व्यवच्छिन्नम्'** इति **वदति** ब्रुवाणे **भवति प्रायश्चित्तम्** ।।१६९।।

देव० : केषाञ्चित्प्रवचनैकदेशिना**मादेशो** मतम्, किमित्याह—**दर्शनज्ञानाभ्यां वर्तते** प्रवहति **तीर्थं** चतुर्वर्णः सङ्घः, **च**शब्दो हेतौ, यतो **व्यवच्छिन्नं** निवृत्तं **चारित्रम्,** तथा चागमः –

मूलगुणउत्तरगुणा जम्हा भंसंति चरणसेढीओ ।
तम्हा जिणेहिं दोन्निवि पडिसिद्धा सव्वसाहूणं ।। [गुरुतत्त्व० १-८९]

अग्गग्घाओ हणे मूलं मुलग्घाओ य अग्गयं । इति, अस्य व्याख्या – 'जहा तालदुम्मस्स अग्गसूईए हयाए मूलो हओ चेव, मूलेवि हए अग्गसूई हया, एवं मूलोत्तरगुणेसुवि उवसंहारो, एवं च नत्थि कोइ सो संजओ जो मूलुत्तरगुणाणं अन्नयरं न पडिसेवइ, अन्नयरगुणपडिसेवणे य दुण्हवि मूलुत्तराण अभावो, दुण्हवि अभावे सामाइयसंजमस्स अभावो । संजमस्स अभावे पंचण्हवि नियंट्ठाणं अभावो, एवं च अचरित्तं तित्थं भवइ'त्ति सोपस्कारत्वादिति **वदति** ब्रुवाणे **भवत्या**पद्यते **प्रायश्चित्तमा**गमप्रतीतम्, अन्यथा प्ररूपणेन श्रुतस्याऽऽशातनासम्भवाद्, यतोऽत्रैव वक्ष्यति सिद्धान्तवचनम्-'जो संजमए' इत्यादि । किञ्च चारित्रनिषेधकैरपि दुष्प्रसभान्तं तीर्थानुवृत्तिरिष्टैव, न च ज्ञानदर्शनचारित्रव्यतिरिक्तं तीर्थमस्तीति स्ववचनव्याघातस्तथा च श्रीभद्रबाहुः – 'दंसणनाणचरित्तंमि निउत्तं जिणवरेहिं सव्वेहिं एएण होइ तित्थं' इति, तस्मात्तीर्थमिच्छता चारित्रमप्यकामेनैष्टव्यम् ।

किञ्च यदि दर्शनज्ञानाभ्यामेव तीर्थं वर्तेत तदा श्रेणिकप्रभृतीनामपि श्रमणत्वं प्रसज्येत, तेषामपि दर्शनज्ञानसद्भावाद्, न च वाच्यं तेऽपि श्रमणा एव, श्रामण्यगुणयुक्तस्य नरकेष्वनुपपातात्, तेषां च नरकगमनप्रतिपादनाद् । यदप्येकविंशतिवर्षसहस्राणि तीर्थानुवृत्तिरुच्यते तदपि नोपपद्येत, दर्शनज्ञानयोः षट्स्वपि समास्ववस्थितत्वात्, तयोरेव च मोक्षमार्गत्वे सर्वगतिभ्योऽपि मुक्तिगमनप्रसङ्गाच्चेति स्थितं साम्प्रतमपि चारित्रसहितं तीर्थमिति गाथार्थः।।१६९।।

१. वुच्छिन्नं P, K

चक्रे० : अमुमेवार्थं भावयन्ति –

देव० : पूर्वोक्तमेव भावयन्नाह –

जो भणइ नत्थि धम्मो न य सामइयं न चेव य वयाइं ।
सो समणसंघबज्झो कायव्वो समणसंघेण।।१७०।।

चक्रे० : स्पष्टा।।१७०।।

देव० : यो भणति नास्ति धर्मः क्षान्त्यादिलक्षणो **न च सामायिकं** रागद्वेषाभावरूपम्, **न चैव चे**ति समुच्चये, **व्रतानि** महाव्रतानि **स श्रमणसङ्घबाह्यः** साधुसङ्घबहिर्भूतः **कर्तव्यः श्रमणसङ्घेन,** द्वादशविधसम्भोगेन परिहर्त्तव्यः, सम्भोगश्च यथा –

उवहि - सुय - भत्तपाणे - अंजलीपग्गहेइ य ।
दायणाय - निकाये य - अब्भुट्ठाणित्तिआवरे ।।
किइकम्मस्स य करणे - वेयावच्चकरणेणि य ।
समोसरणं - सन्निसिज्जा य - कहाए य पवंधणे।। [ ]

अस्य रूपकस्याऽर्थो निशीथपञ्चमोद्देशकभाष्यादवसेयः ।

नवरं दायणत्ति शिष्यगणार्पणम्, निकायत्ति शय्योपध्यादिभिर्निमन्त्रणम्, यत्रानुयानादिषु बहवः साधवो मिलन्ति तत्समवसरणम्, सन्निसिज्जायत्ति निषद्यागतस्य निषद्यागतेन सह श्रुतपरावर्तनम्, कथाया वादजल्पादिरूपायाः प्रबन्धनमिति गाथार्थः।।१७०।।

चक्रे० : किमिति स बहिः कार्य इत्याहुः –

देव० : किमिति –

दुप्पसहंतं चरणं जं भणियं भगवया इहं खेत्ते ।
आणाजुत्ताणमिणं न होइ अहुण त्ति वामोहो ।।१७१।।

चक्रे० : दुष्प्रसभान्तं दुष्प्रसभाचार्यपर्यन्तम्, **आज्ञायुक्तानां** साधुनां **चरणं** चारित्रम्, **यद्** यस्माद् **भणितं भगवता** श्रीवीरस्वामिनेह **क्षेत्रे** भरताख्ये तस्मादिदं **न भवत्यधुनेति** यस्य मतिस्तस्य **व्यामोहो** मूढतेति स बहिः कार्य इत्यर्थः।।१७१।।

देव० : दुष्प्रसभो दुष्प्रसभनामाऽऽचार्योऽन्ते यस्य तत्तथा, तद्गुणसंविज्ञानोऽयं बहुव्रीहिः । **चरणं** चारित्रं **यद्यस्माद् भणितं भगवता** श्रीमहावीरतीर्थकृ**तेहास्मिन्** भरतनाम्नि **क्षेत्रे,** यदवाचि -

तित्थवोच्छेयकाले दुप्पसभो नाम अणगारो ।
तंमि कालगए चरित्तं तित्थं च वोच्छिज्जिहि ।। [ ] इति ।

तस्मादपेर्गम्यमानत्वा**दाज्ञायुक्तानामप्यधुना** दुःषमायां चरणं **न भवतीत्ये**वंरूपा प्रतिपत्ति**र्व्यामोहो** मूढतेति गाथार्थः ।।१७१।।

** उपदेशपदे-८०९ **

दुप्पसहंतं चरणं भणियं जं भगवया इहं खेत्ते ।
आणाजुत्ताणमिणं ण होंति अहुण त्ति वामोहो ।।

दुष्प्रसभान्तं दुष्षमापर्यन्तभागभाविदुष्प्रसभनामकमुनिपुङ्गवपर्यवसानं गङ्गाप्रवाहवदव्यवच्छिन्नं **चरणं भणितं यद्यस्माद् भगवतेह क्षेत्रे । आज्ञायुक्तानां** यथासामर्थ्यमाज्ञापरिपालनपरायणाना**मिदं** चारित्रं **न भवत्यधुनैष व्यामोहो** वर्त्तते, यथाशक्त्याज्ञापरिपालनस्यैव चारित्ररूपत्वात्, तस्य च साम्प्रतमपि भावादिति ।।८०९।।

चक्रे० : ननु तथाविधबुद्धिबलाद्यभावात् कथमिदानीं चारित्रसम्भवः ? इत्याहुः –

देव० : ननु तथाविधबुद्धिबलाद्यभावतः कथमिदानीं चारित्रसम्भव इत्याह –

कालोचियजयणाए मच्छररहियाण उज्जमंताणं ।
जणजत्तारहियाणं होइ जइत्तं जईण सया।।१७२।।

चक्रे० : सुगमा, नवरं **जनयात्रारहितानां** कृतप्रतिकृतिसुखदुःखचिन्तादिलोक-व्यवहारमुक्तानाम्, **सदे**ति यावत्तीर्थम् ।।१७२।।

देव० : कालोचितयतनया प्राग्वन्**मत्सररहितानामु**पलक्षणत्वाद्रागद्वेषवर्जितानां**मुद्यच्छतां** प्रतिलेखनादिसामाचारीषु यतमानानाम्, **जनयात्रारहितानां** [१]कृतप्रतिकृतिसुखदुःखचिन्तादिलोक-व्यवहारमुक्तानां **यतीनां यतित्वं** चारित्रवत्त्वं **भवति सदे**ति दुःषमान्तं यावदन्तररहितमित्यर्थ इति गाथार्थः।।१७२।।

१. कृति T,B,C

चक्रे० : एतदेव समर्थयन्ति –

देव० : एतदेव समर्थयति –

न विणा तित्थं नियंठेहिं नातित्था य नियंठया ।
छक्कायसंजमो जाव ताव अणुसज्जणा दुण्हं[१] ।।१७३।।

चक्रे० : न विना निर्ग्रन्थैः सामान्येन चारित्रिभिस्**तीर्थम्, न चाऽतीर्था निर्ग्रन्थास्**तीर्थं विना तेऽपि न भवन्तीत्यर्थः, पुलाकबकुशप्रतिषेवणाकुशीलानामेवायं नियमः, तथा च प्रज्ञप्तिः -

पुलाए णं भंते ! किं तित्थे हुज्जा, अतित्थे हुज्जा ? गोयमा ! तित्थे हुज्जा, नो अतित्थे हुज्जा। एवं बउसे वि, पडिसेवणाकुसीले वि । कसायकुसीले पुच्छा, गोयमा ! तित्थे वा हुज्जा अतित्थे वा हुज्जा, जइ अतित्थे हुज्जा किं तित्थयरे हुज्जा, पत्तेयबुद्धे हुज्जा ? गोयमा ! तित्थयरे वा हुज्जा, पत्तेयबुद्धे वा हुज्जा । एवं नियंठे वि । एवं सिणाए वि ।

तस्मात् **षट्कायसंयमो यावत्तावदनुषञ्जना**ऽनुवृत्तिर्द्वयो**र्बकुशप्रतिषेवणाकुशील**योरेवेत्यर्थः ।।१७३।।

देव० : न विना निर्ग्रन्थैश्चारित्रिभि**स्तीर्थम्,** न **चाऽतीर्था निर्ग्रन्था**स्तीर्थं विना तेऽपि न भवन्तीत्यर्थः, अनयोरन्योन्याविनाभावित्वमिति हृदयम् । इह च पुलाकबकुशप्रतिषेवणाकुशीलानामेवायं नियमः, तथा च प्रज्ञप्तिः – पुलाएणं भंते ! किं तित्थे हुज्जा, अतित्थे हुज्जा ? गोयमा ! तित्थे हुज्जा नो अतित्थे हुज्जा । एवं बउसे वि, पडिसेवणाकुसीले वि । कसायकुसीले पुच्छा, गोयमा ! तित्थे वा हुज्जा अतित्थे वा हुज्जा, जइ अतित्थे हुज्जा किं तित्थयरे हुज्जा, पत्तेयबुद्धे हुज्जा ? गोयमा ! तित्थयरे वा हुज्जा पत्तेयबुद्धे वा हुज्जा। एवं नियंठे वि । एवं सिणाए वि ।

तस्मात् **षट्कायसंयमो यावत्तावदनुषञ्जना**ऽनुवृत्तिर्द्वय**ोरिति** गाथार्थः ।।१७३।।

**** व्यवहारसूत्रम्-४१९७ ****

न विणा तित्थं नियंठेहिं नियंठा वा [न] अतित्थिगा ।
छक्कायसंजमो जाव ताव अणुसज्जणा दोण्हं ।।

निर्ग्रन्थैर्विना तीर्थं न भवति, नापि ते **निर्ग्रन्था अतीर्थिकाः** तीर्थरहिता भवन्ति, परस्पर व्यवस्थिततया

१. दोण्हं A, Z

एकस्यापरस्य [च] भावात् । निर्ग्रन्थग्रहणं संयतानामुपलक्षणम्, तत एतदपि द्रष्टव्यम् - संयतैर्विना न तीर्थम्, नापि तीर्थमन्तरेण संयताः । निर्ग्रन्थाः संयताश्च प्रथमसंहनन - चतुर्दशपूर्वधर - व्यवच्छेदेऽपि विद्यन्ते, यतो **यावत् षट्कायसंयमस्तावद् द्वयानामपि अनुषङ्गना** अनुवर्त्तना समस्ति । षट्कायसंयमश्च प्रत्यक्षतोऽद्याप्युपलभ्यते, ततः सन्ति निर्ग्रन्थाः, सन्ति संयता इति प्रतिपत्तव्यम् । तत्सत्त्वप्रतिपत्तौ च तीर्थं सचारित्रमित्यपि प्रत्येतव्यम् । चारित्रे च सति प्रायश्चित्तमिति ।।४१९७।।

चक्रे० : उत्तरार्धमेव विवृण्वन्ति –

देव० : उत्तरार्धमेव विवृणोति –

जा संजमया जीवेसु ताव मूला य उत्तरगुणा य ।
इत्तरियछेयसंजम नियंठ बउसायपडिसेवी[१]।।१७४।।

चक्रे० : यावत्संयमता जीवेषु, शेषगुणाभावेऽपि यावत् षड्जीवरक्षामपि लभ्यते । **तावन्मूला** मूलगुणा **उत्तरगुणाश्च**, यावच्चैते ताव**दित्वरच्छेदसंयमौ** सामायिकसंयमच्छेदोपस्थापनीयसंयमौ, यावच्चैतौ ताव**न्निर्ग्रन्थौ बकुशायप्रतिषेविणौ** । आयो ज्ञानादिलाभस्तस्य प्रतिकूलं सेवन्ते चेष्टन्त आयप्रतिषेविणो ज्ञानाद्युपजीवकाः प्रतिषेवणाकुशीला इत्यर्थः । अनुषज्येत इति सर्वत्र योज्यम् ।।१७४।।

देव० : यावत् स्वार्थिकतल्प्रत्ययान्तत्वात् **संयमता** रक्षणम्, केषु विषये ? **जीवेषु** पृथिव्यादिषु, शेषगुणासम्भवेऽपि यावत् षड्जीवरक्षामात्रमपि लभ्यत इत्यर्थः । **तावदु**त्तरपदस्थगुणशब्दस्येहापि सम्बन्धा**न्मूल**गुणा **उत्तरगुणाश्च,** यावच्चैते ताव**दित्वरं** च सामायिकं सामायिकसंयमः, भीमादिन्यायेन **च्छेदो**पस्थापनीय**संयमश्च** तौ, विभक्तिलोपश्चेह, यावच्चैतत्संयमद्वयं ताव**न्निर्ग्रन्थौ,** कौ ? चकारस्य च्छन्दोभङ्गभयान्मध्यपातादीर्घत्वस्य च प्राकृतत्वाद् **बकुशप्रतिषेविणौ** च बकुशप्रतिषेवणाकुशीलावित्यर्थः । अनुषज्येत इति सर्वत्र योग इति गाथार्थः।।१७४।।

चक्रे० : एषैव सर्वतीर्थेषु व्यवस्थेत्याहुः –

देव० : एतदेव समस्ततीर्थकृत्तीर्थव्यवस्थितत्वेन समर्थयन्नाह –

सव्वजिणाणं निच्चं बकुसकुसीलेहिं वट्टए तित्थं ।
नवरं कसायकुसीला अपमत्तजई वि[२] सत्तेण ।।१७५।।

१. बकुसा P, K २. वि संतेण A,T,C,Z वसंतेणं P

चक्रे० : सर्वजिनानां भरतैरवतविदेहतीर्थकृताम्, **नित्यं बकुशकुशीलाभ्यां वर्त्तते तीर्थम्**, पुलाकादीनामल्पत्वात्कादाचित्कत्वाच्च, **नवरं** केवलमयं विशेषः - **सत्त्वेन** कषायसत्तयाऽ**प्रमत्तयतयोऽपि** सप्तमगुणस्थानवर्तिनोऽपि **कषायकुशीला** भण्यन्ते, अत एवम्भूताः कषायकुशीला अपि यावत्तीर्थं भवन्तीति भावः ।।१७५।।

देव० : सर्वजिनानां पुरिमान्तिममध्यमविदेहजतीर्थकृतां **बकुशकुशीलाभ्यां वर्त्तते तीर्थं** प्रवचनं **नित्यमि**ति सततं पुलाकादीनामल्पत्वात्कादाचित्कत्वात् सतामपि च तीर्थप्रवृत्तिं प्रत्यनङ्गत्वात्, **नवरं** केवलमयं विशेषः - **कषायकुशीला अप्रमत्तयतयोऽपि** सप्तमगुण-स्थानवर्त्तिनोऽपि भण्यन्त इति विशेषः, कथम् ? **सत्त्वेन** कषायसत्तयेति गाथार्थः।।१७५।।

चक्रे० : यत एव बकुशकुशीलाभ्यां तीर्थप्रवृत्तिरत एव -

देव० : अथ सिंहावलोकनन्यायेन यदुक्तं प्राग् यस्तं स्थापयत्यपात्रे स महापाप इति तद्विशिनष्टि, यदि वा यत एव बकुशकुशीलाभ्यां तीर्थप्रवृत्तिरत एव -

गुरुगुणरहिओ य इह दट्ठव्वो मूलगुणविउत्तो जो ।
न उ गुणमित्तविहीणु त्ति चंडरुद्दो उदाहरणं।।१७६।।[1]

चक्रे० : गुरुगुणरहितश्चेह गुरुविचारे स एव **द्रष्टव्यो यो मूलगुणवियुक्तः,** उपलक्षणत्वादभीक्ष्णमुत्तरगुणविराधकश्च,

जो चयइ उत्तरगुणे मूलगुणे वि अचिरेण सो चयइ [उपदेशमाला-११७] इति वचनात् ।

न पुनर्गुणमात्रविहीनः प्रियवचनविशिष्टोपशमादिगुणविकल इत्यत्रार्थे **चण्डरुद्रा**चार्य **उदाहरणं** दृष्टान्तः, अयं हि प्रकृतिरोषणोऽपि बहूनां संविग्नगीतार्थशिष्याणाममोचनीयो बहुमानविषयश्चाऽभूत्।।१७६।।

देव० : चशब्दोऽत्र पुनःशब्दार्थः, ततो **गुरुगुणरहितः** पुन**रिह** गुरुविचारे स एव **द्रष्टव्यो** ज्ञातव्यः, यः किम् ? **यो मूलगुणवियुक्तो** महाव्रतादिविरहितः सम्यग्ज्ञानक्रियारहितो वा, उपलक्षणत्वादभीक्ष्णमुत्तरगुणविराधकश्च 'जो चयइ उत्तरगुणे मूलगुणे वि अचिरेण सो चयइ' इति वचनात्, **न तु** न पुन**र्गुणमात्रविहीनो** मधुरभाषणविशिष्टोपशमादिगुणविकल इत्यस्मिन्नर्थे **चण्डरुद्र**श्चण्डरुद्राचार्य **उदाहरणं** दृष्टान्तः, इह च प्रयोगो गुणमात्रविहीनोऽपि गुरुरेव,

१. गुणमित्तविहीण त्ति P,K, गुणमेत्तविहीणो वि Z

मूलगुणयुक्तत्वाच्चण्डरुद्राचार्यवत्, तथा ह्यसौ प्रकृतिरोषणोऽपि बहूनां संविग्नगीतार्थ-शिष्याणाममोचनीयो विशिष्टबहुमानविषयश्चाभूत्, ○तत्कथानकं चैवम् –

आसीदामुक्तसुव्यक्त-ज्ञानादिगुणभूषणः । चण्डरुद्र इति श्रीमान् सूरिः प्रकृतिरोषणः ।।१।।
अनाभोगादपि कृते क्रियालोपे लघुन्यपि । आचुक्रोशाकृशक्रोधावेशवश्यो मुनीनसौ ।।२।।
मनागपि मुनीनां स स्खलितं क्षन्तुमक्षमः । सङ्क्लेशभीरुर्गच्छस्यादूरदेशे स्थितिं व्यधात् ।।३।।
स तथा विहरन् ग्रामानुग्रामं नैष्ठिकाग्रिमः । उज्जयिन्यामथान्येद्युरुद्याने समवासरत् ।।४।।
कश्चिदाकारमाधुर्य-निर्जितामरदारकः । इभ्यसूनुस्तदावन्तीनगर्यां पर्यणीयत ।।५।।
मुनिव्रातपदाम्भोज-रजःपातपवित्रितम् । तदुद्यानं समं मित्रैः क्रीडितुं स युवा ययौ ।।६।।
तत्रेभ्यसूनोः सुहृदः क्रीडन्तो ददृशुर्मुनीन् । ववन्दिरे च ते सर्वे श्रेष्ठिसुतसमन्विताः ।।७।।
उचुश्च पूज्याः प्रव्रज्यां दत्त नः सुहृदे स्यात् । अयं हि बाल्यात् संविग्नो गृहवासपराङ्मुखः ।।८।।
विषाय विषयानेष विभवं लोष्टुराशये । तृणाय स्त्रैणमाबाल्यान्मेने मुनिरिवानिशम् ।।९।।
शठांस्तानिङ्गितैर्ज्ञात्वा साधवः सुधियोऽभ्यधुः । अधिकारी गुरुर्दीक्षादानादौ न पुनर्वयम् ।।१०।।
गुरुः क्वेति तदापृष्टैरथ सूरिरदर्श्यत । अमीषामौषधमसावेवेत्यालोच्य साधुभिः ।।११।।
सुधर्षणोऽयमेकाकी वर्षीयानिति दारकैः । सान्तर्हासैर्गुरुर्गत्वा नत्वा च प्राग्वदौच्यत ।।१२।।
अहो मया सहामीषां मूर्खाणामेष विप्लवः । ध्यात्वेत्यमर्षणः सूरिस्तैर्भस्मानाययद् द्रुतम् ।।१३।।
पश्यामः किं करोत्येष इति बुद्ध्या दुराशयाः । सहासाः सहसा केचित्तस्मै भस्मोपनिन्यिरे ।।१४।।
अथ यूनः शिरः सूरिरूरुयुग्मान्तरस्थितम् । क्षणाल्लुलुञ्च मित्रेषु मुञ्च मुञ्चेति वादिषु ।।१५।।
नवोढश्चिन्तयामास लुञ्चितोऽस्मि यथातथा । ममेदृशस्य वै तर्हि गर्हिता गृहमेधिता ।।१६।।
गृहीतं विप्लवेनापि भावतो भवतु व्रतम् । **दृषदित्यादृतोऽप्यर्चां ज्ञातः सन्मणिरर्हति** ।।१७।।
अथ साश्रूणि मित्राणि बभाणाभिनवो मुनिः । भद्राः प्रमोदावसरे विषादः क्रियते किमु ।।१८।।
अकामस्यापि मे दीक्षा जज्ञे पुण्योदयादियम् । **अगादलसमध्येन तदसौ जाह्नवी स्वयम्** ।।१९।।
न विप्लवममुं यूयं सौम्याश्चेदकरिष्यत । कथं दीक्षा ममेदृशाभविष्यद् दुर्मतेस्तदा ।।२०।।
प्राणिनां स्यादुपाध्यायः को वा नाधर्मकर्मणि । **निवर्तयति पापाद्यस्तद्धि मित्रं प्रवक्ष्यते** ।।२१।।

○ अयं कथानकः T,C हस्तप्रतिषु पञ्चाशकवृत्यन्तर्गत श्री चण्डरुद्राचार्यकथानकसदृश एव, तस्मादत्र A प्रतानुसारेणैव गृहीतः । सम्पा० ।

दीक्षा यथातथा वापि गृहीता मुच्यते कथम् । अथ मुच्येत वाच्यत्वं मज्जनं च भवार्णवे ।।२२।।
तद्यात यूयं मा चैतत् कमपि ज्ञापयिष्यथ । नो चेन्मम करिष्यन्ति ज्ञातयो व्रतखण्डनम् ।।२३।।
उक्त्वेति दत्त्वालङ्कारान् विसृष्टाः सुहृदोऽमुना । अगमन् केचन क्वापि बाष्पपूरप्लुतेक्षणाः ।।२४।।
अथ शैक्षोऽभ्यधाद्धीतिरत्र मे स्वजनात्प्रभो । प्रसद्य सद्यो गमनमन्यत्र क्रियतां ततः ।।२५।।
सूरिरूचे दिवा तर्हि वर्त्मनः प्रत्युपेक्षणाम् । गत्वा त्वं कुरु येन स्याद्विहारो निशि नौ सुखम् ।।२६।।
शैक्षकेण तथा कृत्वा विज्ञप्तो रजनीमुखे । विहितावश्यकश्चण्डरुद्रस्तेन सहाचलत् ।।२७।।
व्यक्तमग्रस्थिते मार्गमेकाग्रे कथयत्यपि । तस्मिन् गुरुर्जराक्लिष्टः स्खलति स्म पदे पदे ।।२८।।
पन्थानं प्रत्युपैक्षिष्ठाः कीदृशं त्वं दुराशय । इति तीक्ष्णाक्षरैः क्षारैरिवाभीक्ष्णं वपुर्दहन् ।।२९।।
दण्डेन गुरुराजघ्ने शिष्यशीर्षं मुहुर्मुहुः । नश्यद्गुणाक्रन्दरवाकारठात्कारदारुणम् ।।३०।। युग्मम्
क्षमिणामग्रणी शैक्षः स दध्यौ शुद्धधीस्त्विदम् । धिगहं गुरुसन्तापपापभागभवं कथम् ।।३१।।
विनीतस्येङ्गितज्ञस्य विदुषः कृतकर्मणः । गुरुः स्वपरिवारस्य तस्यान्तः सन् समाधिना ।।३२।।
दुरात्मना मया प्रापि पश्य क्लेशमयीं दशाम् । **उपप्लवाय तिग्मांशोर्भवेद्राहोर्हि सङ्गमः** ।।३३।। युग्मम्
गुरुणा विकटादस्मादाकृष्टोऽस्मि भवावटात् । दुर्गमार्गाम्बुधावस्मिन् मया तु निहितो गुरुः ।।३४।।
आक्रोशतो घ्नतो वात्र दोषः कोऽप्यस्ति नो गुरोः । अपराधो ममैवायमुपतापयतो गुरुम् ।।३५।।
इति भावयतस्तस्य क्षमोपचितचेतसः । घातिकर्मक्षयाद्दिव्यं केवलज्योतिरुद्ययौ ।।३६।।
करामलकवल्लोकं तेनाकलयतोऽखिलम् । सुखं च नयतः सूरिं विभातास्य विभावरी ।।३७।।
ततो नवोदितादित्यकिरणालिमिवारुणाम् । गुरुः क्षरन्तीमैक्षिष्ट शैक्षे रुधिरधोरणीम् ।।३८।।
ऊचे चेदृक्षचरितश्चिरप्रव्रजितोऽप्यहम् । त्वमद्यदीक्षितोऽपीदृगहो नौ महदन्तरम् ।।३९।।
गुरौ मय्यसती क्षान्तिस्त्वयि शिष्ये कथं गता ? । **अविद्यमानं कूपेम्बु प्रणाल्यां कथमागतम् ?** ।।४०।।
धिगधन्यं गुणैः शून्यं न्यूनं चारित्रपर्यवैः । मामाचार्यब्रुवंकोटिमारूढं क्रोधपाप्मनः[१] ।।४१।।
अस्य मे सुकुले जन्म प्रव्रज्या दीर्घकालिकी । चिराद्गुरुपदोपास्तिः सूत्रार्थावगमो मनाक् ।।४२।।
आचार्यत्वं परिवारस्तत्किं यन्न क्षमोचितम् ।
तथापि दुर्भगं स्त्रीव न क्षमा मां स्पृशत्यपि ।।४३।। युग्मम्

१. आचार्यखेटं माम् A

इति स्वं तीव्रसंवेगयोगान्निन्दन्नवाप सः । आचार्यश्चण्डरुद्रोऽपि शुद्धात्मा केवलश्रियम् ।।४४।।
भूयः सूरिस्तयाह्लाय स्वपरिवारसम्पदा । दर्शान्त इव शीतांशुर्ज्योत्स्नया समयुज्यत ।।४५।।
विहृत्य सुचिरं धात्र्यामुद्धृत्य सुबहुं जनम् । भवान्धकूपादाप श्रीचण्डरुद्रः शिवास्पदम् ।।४६।।

इत्थं क्षान्तिगुणेन किञ्चिदमुनैवैकेन शून्योऽपि सन्,
पूर्णो मूलगुणैस्तथोत्तरगुणैः श्रीचण्डरुद्रः परैः ।
रेखामेष युगप्रधानगणभृत्पङ्क्तौ परां प्राप्तवान्;
तत्केनापि गुणेन कश्चन गुरुर्न्यूनोऽपि पूज्यः सताम् ।।४७।।

इति गाथार्थः ।।१७६।।

* पञ्चाशके-११/३५ *

अथ 'गुरुगुणरहितस्तु गुरुर्न गुरुरिति विधित्याग एव तस्येष्ट' इति यदुक्तं तत्र विशेषाभिधानायाह-

गुरुगुणरहिओ वि इहं दट्ठव्वो मूलगुणविउत्तो जो ।
ण उ गुणमेत्तविहीणो त्ति चंडरुद्दो उदाहरणं ।।

गुरुगुणरहितोऽप्यपिशब्दोऽत्र पुनःशब्दार्थः, ततश्च 'गुरुगुणरहितो गुरुर्गुरुर्न भवति' इत्यत्र गुरुगुणरहितः पुन**रिह** गुरुकुलवासप्रक्रमे । स एव **द्रष्टव्यो** ज्ञातव्यो **मूलगुणवियुक्तो** महाव्रतरहितः सम्यग्ज्ञान-क्रियाविरहितो वा **यः** । **न तु** न पुन**र्गुणमात्रविहीनो** मूलगुणव्यतिरिक्तप्रतिरूपताविशिष्टोपशमादि-गुणविकलः, **इति** हेतोर्गुरुगुणरहितो द्रष्टव्य इति प्रक्रमः, उपप्रदर्शनार्थो वेतिशब्दः । उक्तं चेहार्थे-

कालपरिहाणि दोसा एत्तो इक्काइगुणविहीणेण । अण्णेण वि पव्वज्जा दायव्वा सीलवंतेण ।।

अत्रार्थे किं ज्ञापकमित्याह-**चण्डरुद्रश्च**ण्डरुद्राभिधानाचार्य **उदाहरणं** ज्ञापकम् । तत्प्रयोगश्चैवम्-गुणमात्रविहीनोऽपि गुरुरेव, मूलगुणयुक्तत्वात्, चण्डरुद्राचार्यवत्, तथा ह्यसौ प्रकृतिरोषणोऽपि बहूनां संविग्नगीतार्थशिष्याणाममोचनीयो विशिष्टबहुमानविषयश्चाभूत्, तत्कथानकं चैवं दृश्यते -

चण्डरुद्राभिधानोऽभूदाचार्योऽतिबहुश्रुतः । ज्ञानादिपञ्चधाऽऽचाररत्नरत्नाकरोपमः ।।१।।
असमाचारसंलोकसंज्वलत्कोपवाडवः । संक्लेशपरिहाराय गच्छपार्श्वे स्म तिष्ठति ।।२।।
विहरंश्च समायात उज्जयिन्यां कदाप्यसौ । विविक्तोद्यानदेशे च तस्थौ गच्छस्य सन्निधौ ।।३।।
अथ श्रीमत्सुतः कोऽपि सुरूपो नवयौवनः । प्रधानवस्त्रमाल्यादिभूषितो मित्रवेष्टितः ।।४।।
विवाहानन्तरं क्रीडन्नागतः साधुसन्निधौ । तन्मित्रैः केलिना प्रोक्तास्तं पुरस्कृत्य साधवः ।।५।।
अस्मत्सखममुं यूयं हे भदन्ता विरागिणम् । निर्विण्णं भवकान्तारात्प्रव्राजयत सत्वरम् ।।६।।
साधवस्तु तकान् ज्ञात्वा चसूरीकरणोद्यतान् । औषधं सूरिरेवैषामित्यालोच्य बभाषिरे ।।७।।

भो भद्रा गुरवोऽस्माकं कुर्वते कार्यमीदृशम् । वयं तु नो ततो यात गुरूणामन्तिकं लघु ।।८।।
केलिनैव ततो गत्वा गुरुमूचुस्तथैव ते । सूरिणा भणितं तर्हि भस्मानयत सत्वरम् ।।९।।
येनास्य लुञ्चनं कुर्मो वयस्यैस्तु ततो लघु । तदानीतं ततः सूरिः पञ्चमङ्गलपूर्वकम् ।।१०।।
लुञ्चनं कर्तुमारेभे तद्वयस्यास्तु लज्जिताः । चिन्तितं चेभ्यपुत्रेण कथं यास्याम्यहं गृहे ।।११।।
स्वयमाश्रितसाधुत्वः संलुञ्चितशिरोमुखः। ततो विसृज्य मित्राणि गुरुमेवमुवाच सः ।।१२।।
भदन्त परिहासोऽपि सद्भावोऽजनि मेऽधुना । **रङ्कत्वेनापि तुष्टस्य सौराज्यं मे समागतम्** ।।१३।।
ततः स्वजनाराजाद्या यावन्नायान्ति मत्कृते । तावदन्यत्र गच्छामो नो चेद्बाधा भविष्यति ।।१४।।
गुरुर्बभाषे यद्येवं ततो मार्गं निरूपय । तथैव कृतवानेष वृत्तौ गन्तुं ततस्तकौ ।।१५।।
आचार्यः पृष्ठतो याति पुरतो याति शिक्षकः । रात्रौ वृद्धत्वतोऽपश्यन् मार्गे प्रस्खलितो गुरुः ।।१६।।
रे दुष्ट शैक्ष ! कीदृशो मार्गः संवीक्षितस्त्वया । इति ब्रुवाणो दण्डेन शीर्षे तं हतवान् क्रुधा ।।१७।।
एवं स चण्डरोषत्वाच्चलितः स्खलितः पथि। शिरस्यास्फोटयन् याति तं शैक्षं क्षमिणां वरम् ।।१८।।
शिष्यस्तु भावयामास मन्दभाग्योऽस्म्यहं यतः । महाभागो महात्मायं महाकष्टे नियोजितः ।।१९।।
भगवानेष सौख्येन स्वगच्छे निवसन्मया । अहो दशां महाकष्टां प्रापितः पापिना मुधा ।।२०।।
एवं भावयतस्तस्य प्रशस्तध्यानवह्निना । दग्धकर्मेन्धनत्वेन केवलज्ञानमुद्गतम् ।।२१।।
ततस्तं तद्वलेनासौ सम्यग्रेतुं प्रवृत्तवान् । प्रभाते च स तं दृष्ट्वा क्षरल्लोहितमस्तकम् ।।२२।।
आत्मानं निन्दति स्मैवमधन्योऽहमपुण्यवान् । यस्य मे सति रोषाग्निशममेघे बहुश्रुते ।।२३।।
परोपदेशदक्षत्वे बहुकाले च संयमे । न जातो गुणरत्नानां प्रधानः क्षान्तिसद्गुणः ।।२४।।
अयं तु शैक्षः पुण्यात्मा धन्योऽयं गुणवानयम् । यस्याद्य दीक्षितस्यापि कोऽप्यपूर्वः क्षमागुणः ।।२५।।
एवं सद्भावनायोगाद्वीर्योल्लासादपूर्वतः । आचार्यश्चण्डरुद्रोऽपि संप्राप्तः केवलश्रियम् ।।२६।।
इति गाथार्थः ।।३५।।

**** गुरुतत्त्वविनिश्चये-१/१७० ****

गुरुगुणरहिओ अ इह दट्ठव्वो मूलगुणविउत्तो जो ।
ण उ गुणमित्तविहूणो त्ति चंडरुद्दो उदाहरणं ।।

'गुरुगुण'त्ति । **गुरुगुणरहितश्चेह** स **द्रष्टव्यो यो मूलगुणविहीनो न तु गुणमात्रविहीनो** गुरुर्न भव**तीति**। अत्र **चण्डरुद्रा**चार्य **उदाहरणम्,** यथा तस्य क्षमादिरूपोत्तरगुणवैकल्येऽपि मूलगुणसामग्र्याच्चारित्रम-प्रतिहतमेवमन्येषामपीति । विवेचितमिदमन्यत्र ।।१७०।।

चक्रे० : सम्प्रति दुःषमाद्यनुभावमाश्रित्योपदेशमाहुः –

देव० : सम्प्रति दुःषमाद्यनुभावमाश्रित्योपदेशमाह –

कालाइदोसओ जइवि कहवि दीसंति तारिसा न जई ।
सव्वत्थ तहवि नत्थि त्ति नेव कुज्जा [१]अणासासं ।।१७७।।

चक्रे० : स्पष्टा, नवर**मनाश्वासम**नास्थाम्।।१७७।।

देव० : काले दुःषमा **आदि**र्येषां चारित्रप्रतिकूलद्रव्यक्षेत्रभावानां ते तथा, तेषां **दोषतो यद्यपि तादृशाः** समस्तसाधुगुणकलिता **यतयो न दृश्यन्ते, तथापि सर्वत्र न सन्तीत्येवं**रूप-**मनाश्वासम**नास्थां **न कुर्यादि**ति गाथार्थः ।।१७७।।

चक्रे० : यतः –

देव० : यतः –

कुग्गहकलंकरहिया जहसत्ति जहागमं च जयमाणा ।
जेण विसुद्धचरित्त त्ति वुत्तमरिहंतसमयंमि ।।१७८।।

चक्रे० : कुग्रहोऽसदभिनिवेशः, स एव **कलङ्को** दोषस्तेन **रहिता यथाशक्ति यथागमं च यतमानाः, येन** कारणेन **विशुद्धचारित्रा इत्युक्तमर्हत्समये** जिनमते।।१७८।।

देव० : कुग्रहोऽसदभिनिवेशः, स एव **कलङ्को** दोषस्तेन **रहिता यथाशक्ति यथागमं च यतमानाः, येन** कारणेन **विशुद्धचारित्रिण इति** विशेषे**णोक्तमर्हत्समये** जिनमत इति गाथार्थः।।१७८।।

चक्रे० : तादृशाश्च दृश्यन्त एव, तथाहि –

देव० : तादृशाश्च दृश्यन्त एव, तथाहि –

अज्जवि [२]तिन्नपइन्ना गरुयभरुव्वहणपच्चला लोए ।
दीसंति महापुरिसा अखंडियसीलपब्भारा।।१७९।।

चक्रे० : सुगमा, नवरं **'तिन्नपइन्ना'** तीर्णसामायिकादिप्रतिज्ञाः । **'गुरुभरुव्वहणपच्चला'** दुर्वहसंयमभारोद्वहनसमर्थाः।।१७९।।

१. अणासंसं P, K २. तिन्निपइन्ना T,C,P, K गुरु P, K

देव० : अद्यापि सम्प्रत्यपि तीर्णेव **तीर्णा** पर्यन्तगमनान्महानदीव **प्रतिज्ञा** 'करेमि भंते सामाइयं' इत्याद्यभ्युपगमो यैस्ते तथा, **गुरुश्चासौ भर** इव भरश्च दुर्वहत्वसाधर्म्यात्संयम-स्तस्**योद्वहनं** निर्वहणं तत्र **प्रत्यलाः** समर्थाः, क्वचिद् द्रव्याद्यापद्यप्यनासेवितापवादा इति तत्त्वम्, **अखण्डितशीलप्राग्भारा** बलात्कारामन्त्रणोपनिपातेष्वप्यक्षुभितचेतसोऽत एव **महापुरुषा लोके दृश्यन्त** इति गाथार्थः।।१७९।।

देव० : तथा –

अज्जवि तवसुसियंगा तणुयकसाया जिइंदिया धीरा ।
दीसंति जए जइणो वम्महहिययं वियारंता।।१८०।।

चक्रे० : स्पष्टैव।।१८०।।

देव० : स्पष्टा, नवरं **धीराः** क्षुदादिपरीषहसहिष्णवः, तथा **मन्मथस्य** [१]परिणामरूप-त्वान्मन्मथहृदयं विदारयन्त इति लोकरूढितोऽभिहितमिति।।१८०।।

देव० : तथा –

अज्जवि [२]दयसंपन्ना छज्जीवनिकायरक्खणुज्जुत्ता ।
दीसंति [३]तवस्सिगणा विगहविरत्ता सुईजुत्ता।।१८१।।

चक्रे० : एषाऽपि स्पष्टा, नवरं **श्रुतिः** स्वाध्यायस्तेन युक्ताः।।१८१।।

देव० : अद्यापि दयासम्पन्ना, अत एव **षड्जीवनिकायरक्षणोद्युक्ता दृश्यन्ते तपस्विगणा विकथाविरक्ताः, श्रुतिः** स्वाध्यायस्तेन **युक्ता** इति गाथार्थः।।१८१।।

देव० : पूर्वोक्तमेव सङ्गृह्णन् किञ्चिद्विशेषमाह –

अज्जवि दयखंतिपइट्ठियाइं [४]तवनियमसीलकलियाइं ।
विरलाइं दूसमाए दीसंति सुसाहुरयणाइं।।१८२।।

चक्रे० : प्रतीतार्था।।१८२।।

देव० : भावितार्थेयम्, नवरं **नियमा** द्रव्याद्यभिग्रहा इति।।१८२।।

१. वेदोदयस्य हृदयं लक्षणया रहस्यं विदारयन्त इति A २. वयसंपन्ना Z ३. तवस्सियजणा T,C, विकहविरत्ता Z ४. पयट्ठियाइं P, K

चक्रे० : तथा च –

देव० : ततश्च –

[१]इइ जाणिऊण एयं मा दोसं [२]दूसमाए दाऊण ।
धम्मुज्जमं [३]पमुञ्चह अज्जवि धम्मो जए जयइ।।१८३।।

चक्रे० : निगदसिद्धा, नवरं **एतदिति** चारित्राऽस्तित्वम्।।१८३।।

देव० : इति दर्शितप्रकारेण **ज्ञात्वैतद् दुःषमाया**मपि चारित्रास्तित्वं **मा धर्मोद्यमं प्रमुञ्चत**ेति योगः, किं कृत्वा ? **दत्त्वा दोषं** चारित्रप्रतिकूलतालक्षणं दुःषमाया अवसर्पिणीपञ्चमारकस्य, यतोऽ**द्यापि धर्म**श्चारित्रलक्षणो **जगति जयत्य**तिशायितया वर्त्तत इति गाथार्थः।।१८३।।

चक्रे० : एवमनेकधा चारित्राऽस्तित्वं प्रतिष्ठाय निगमनमाहुः –

देव० : एवमनेकधा दुःषमायां चारित्रास्तित्वं प्रतिष्ठाय निगमनमाह –

ता तुलियनियबलाणं सत्तीए जहागमं जयंताणं ।
[४]संपुन्न च्चिय किरिया दुप्पसहंताण साहूणं।।१८४।।

चक्रे० : सुगमा, नवरं **सम्पूर्णैव क्रिया** न पूर्वयतिभ्यो न्यूना, स्वसामर्थ्यतुलनायाः समानत्वात् ।।१८४।।

देव० : तत्तस्मात्तुलितनिजबलानां सर्वात्मना व्यापारित स्वसामर्थ्यानाम्, संयमयोगेष्विति शेषः। तथा **शक्त्या यथागमं यतमानानां** यतनावतां क्वचिदशिवादिकारणेष्वकल्प्यप्रतिषेवायां प्राप्तायामिति गम्यम्, **सम्पूर्णैव** न पुनः प्राक्तनयतिभ्यो न्यूना **क्रिया** संयमानुष्ठानम्, स्वसामर्थ्यतुलनां प्रत्युभयेषामपि समानत्वाद्, **दुष्प्रसभान्तानां साधूना**मिति, ततश्च साम्प्रतं यतयोऽपि कतिचित् सम्पूर्णचारित्रवन्त एव, संयमयोगेषु तुलितनिजबलत्वात्प्राक्तनयतिवदिति गाथार्थः ।।१८४।।

---

१. इय P, K, Z २. दूसमाइ P, K ३. पमुंचह T,C,Z ४. संपुणच्चिय T,C

चक्रे० : एवं चारित्रिणं व्यवस्थाप्य साम्यविशुद्धं तस्यैव चित्तं नमस्कुर्वते –

देव० : एवं चारित्रिणं व्यवस्थाप्य सामायिकोत्कर्षमाविर्भावयंस्तस्यैव चित्तं नमस्कुरुते –

लाहालाह-सुहासुह-जीवियमरण-ठि[१]ईपयाणेसु ।
हरिसविसाय विमुक्कं नमामि चित्तं चरित्तीणं।।१८५।।

चक्रे० : प्रकटार्था।।१८५।।

देव० : उत्तानार्था, नवरं **हर्षः** प्रमोदः स च **लाभादिषु, विषादो** दैन्यं स **चालाभादिषु,** ताभ्यां **विमुक्तम्,** तथा नमहेति विवक्षिते कवेरुक्तगुणगुरुभक्तिपारवश्याद् **नमामी**त्यायातमिति।।१८५।।

चक्रे० : साम्यमेव शिष्यायोपदिशन्ति –

देव० : [२]हर्षविषादविमुक्ततामेवोपदेशद्वारेण दृढयन्नाह –

वंदिज्जंतो हरिसं निंदिज्जंतो करिज्ज न विसायं ।
न हु नमियनिंदियाणं [३]सुगइं कुगइं च बिंति जिणा।।१८६।।

चक्रे० : स्पष्टा ।।१८६।।

देव० : वन्द्यमानो नमस्यमानो जनैरिति शेषः, **हर्षं** न कुर्यादितीहापि योगः । **निन्द्यमानो** हील्यमानः **कुर्यान्न विषादम्,** यदाह –

वंदिज्जमाणा न समुक्कसंति हीलिज्जमाणा न समुज्जलंति ।
दंतेण चित्तेण चरंति लोए मुणी समुग्घाइयरागदोसा ।। [आव. नि० ८६६]

किमिति ? यतो हुरेवकारार्थो **नैव नतनिन्दितानां** यथासङ्ख्यं **सुगतिं** मोक्षादिकाम्, **कुगतिं** वा नरकादिकां **ब्रुवते जिनास्**तीर्थकृतस्तयोः स्वकृतसदसदनुष्ठानमूलत्वादिति गाथार्थः।।१८६।।

**** उपदेशमाला पुष्पमालायाम्-२०८ ****

तथा –

वंदिज्जंतो हरिसं निंदिज्जंतो करिज्ज न विसायं ।
न हि नमियनिंदियाणं सुगइं कुगइं च बिंति जिणा।।

१. ठिइ T,C, Z ठिय P,K २. सामायिकार्थमेवशिष्यायोपदिशन्नाह T,B,C ३. सुगई कुगई व बेंति A

साधुर्धनाढ्यादिभि**र्वन्द्यमानो हर्षं** गोपालादिभिस्तु **निन्द्यमानो विषादं न कुर्यात्,** कुत इत्याह–न हि यस्माल्लोकै**र्नतानामे**व साधूनां **सुगतिं निन्दितानां तु कुगतिं ब्रुवन्ति जिनाः,** किन्त्वात्मगतगुणदोषैरेव तत्प्राप्तिस्तैरुक्ता, यदि पुनरेवमुक्तं स्यात्तदाऽभ्यर्थ्यापि परैर्वन्दनं कार्येत हठाच्च निन्दां कुर्वन्निवार्येत, न चैवं तस्मान्न तथा कार्यमिति गाथार्थः ।।२०८।।

चक्रे० : तथाविधस्य च साम्यभाजः साधोर्जीवत्वे तुल्येऽपि तपःप्रभृतयो गुणा वन्दनीया इति स्थापयन्तस्तन्नमस्कारमाहुः –

देव० : [१]भगवन् ! जीवत्वे तुल्येऽपि कथं चारित्रिणं नमस्करोषीति मुग्धशिष्येण प्रेरिते सूरिराह –

वंदामि तवं तह संजमं च खंतिं च बंभचेरं च ।
जीवाणं च अहिंसा जं च नियत्ता घरावासा ।।१८७।।

चक्रे० : वन्दे तपस्तथा संयमं चेन्द्रियमनोनिग्रहम्, **क्षान्तिं च ब्रह्मचर्यं च जीवानां चाहिंसाम्, यञ्च निवृत्ता** विरता **गृहावासात्,** तञ्च विरतत्वं साधुनां वन्द इत्यर्थः।।१८७।।

देव० : वन्दे तपस्तथा संयमं चेन्द्रियमनोनिग्रहं **क्षान्तिं च ब्रह्मचर्यं च जीवानां चाहिंसां यञ्च निवृत्ता** विरता **गृहावासात्तञ्च** विरतत्वं वन्द इत्यर्थः । [२]समदेहादित्वेन वन्द्यत्वे विशेषाभावाद् गुरुगता ज्ञानदर्शनचारित्रपर्याया एव वन्दनीया इत्यर्थः । चकाराः स्वगतानेकभेदसूचका इति गाथार्थः ।।१८७।।

चक्रे० : अथ यतिधर्मस्य क्षान्तिप्रधानत्वात् तामेवोत्कर्षयन्ति –

देव० : अथ धर्मस्य दया मूलम्, न चाक्षमावान् दयां समाधत्ते तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्ममिति वाचकवचनमाश्रित्य [३]त्वया क्षमैवावलम्बनीयेत्युपदिशन्नाह –

जइ खमसि तो नमिज्जसि छज्जइ नामंपि तुह खमासमणो ।
अह न खमसि न नमिज्जसि नामंपि निरत्थयं वहसि ।।१८८।।

चक्रे० : उत्तानार्था ।।१८८।।

देव० : यदि क्षमसेऽनिमित्तं निन्द्यमानोऽपि क्रोधं न करिष्यसि, **ततो नम्यस** इह लोकेऽपि

१. सर्वजनवन्द्यमानस्य गुरोर्हर्षो माभूदिति तर्जयन्निव भूयोऽप्याह T,B,C २. साधूनामितिगम्यते, तद्वता T,B,C ३. उपदेशरूपतया पुनः क्षमामुत्कर्षयन्नाह T,B,C

जनवन्दनीयस्तदा भविष्यसीत्यर्थः । **'छज्जइ'**त्ति शोभते **नामापि तव** तत इतीहापि योगः, किं तन्नाम ? **क्षमाश्रमण** इति, क्षमाप्रधानः श्रमणः क्षमाश्रमण इत्यन्वयघटनात्, व्यतिरेकमाह- **अथ न क्षमसे** तदा **न नमस्यसे, नामापि** क्षमाश्रमण इति **निरर्थकं वहसि,** अन्वयाघटनाद् वृद्धपुरुषेऽजरामरादिव्यपदेशवदिति गाथार्थः ।।१८८।।

चक्रे० : अथ निरर्थकनामवाहिन एव भेदेनाख्याय तेषु कृत्यमाहुः –

देव० : अथ निरर्थकनामवाहिन एव भेदेनाख्याय तेषु कृत्यविधिमाह –

पासत्थओसन्नकुसीलरूवा संसत्तऽहाछंदसरूवधारी ।
आलावमाईहिं विवज्जणिज्जा अवंदणिज्जा य जिणागमंमि।।१८९।।

चक्रे० : पार्श्वे ज्ञानादीनां तिष्ठतीति **पार्श्वस्थः, अवसन्न** इवाऽवसन्नः सामाचार्याः सेवने पराभग्नः, कुत्सितं शीलमस्येति **कुशीलस्तत** एषां **रूपं** स्वभावो येषां ते तथा । **संसक्तः** सदसदाचारयोः सम्पृक्तः, **यथाच्छन्दः** स्वरुचिप्रधान उत्सूत्रप्ररूपक इत्यर्थः, तयोः **स्वरूपं धारयन्ति** ये ते तथा । **आलापादिभिरा**दिशब्दात् संवासादिभि**र्विवर्जनीयास्त**था च –

आलावो संवासो वीसंभो संथवो पसंगो य ।
हीणायारेहिं समं सव्वजिणिंदेहिं पडिकुट्ठो ।। [उपदेशमाला-२२२]

अवन्दनीयाश्च जिनागमे, एतत्स्वरूपसूचिकाश्चागमगाथाः –

सो पासत्थो दुविहो सव्वे देसे य होइ नायव्वो ।
सव्वंमि नाणदंसणचरणाणं जो उ पासंमि ।।

देसंमि उ पासत्थो सेज्जायरऽभिहडरायपिंडं च ।
नीयं च अग्गपिंडं भुंजइ निक्कारणे चेव ।। [संबोधप्र० ३४८, ३४९]

कुलनिस्साए विहरइ ठवणकुलाणि य अकारणे विसइ ।
संखडिपलोयणाए गच्छइ तह संथवं कुणइ ।। [संबोधप्र० ३५०]

मात्रादिसम्बन्धघटनलक्षणम् –

ओसन्नोवि य दुविहो सव्वे देसे य तत्थ सव्वंमि ।
उउबद्धपीढफलगो ठवियगभोई य नायव्वो ।। [संबोधप्र० ३५१]

ऋतुबद्धे पीढफलकसेवक एकान्तेनास्तीर्णसंस्तारक एव वा । देशाऽवसन्नस्तु –

आवस्सगाइयाइं न करेइ अहवा विहीणमहियाइं ।
गुरुवयणबलाय[१] तहा भणिओ देसावसन्नोत्ति ।। [संबोधप्र॰ ३५२]

तिविहो होइ कुसीलो नाणे तह दंसणे चरित्ते य ।
एसो[२] अवंदणिज्जो पन्नत्तो वीयरागेहिं ।। [प्रव.सारो॰ १०९]

सम्मत्तकुसीलो पुण संकाई सेवगो मुणेयव्वो ।
कोउगभूईकम्माइसेवगो होइ चरणंमि ।। [ ]

सौभाग्यादिकृते स्त्र्यादीनां त्रिकचतुष्कादिषु स्नानादिकरणं कौतुकम्, ज्वराद्यपगमार्थमभिमन्त्रितरक्षिकादानं भूतिकर्म, आदिशब्दान्निमित्तादिकं ज्ञेयम् ।

पंचासवप्पवत्तो जो खलु तिहिं गारवेहिं पडिबद्धो ।
इत्थिगिहिसंकिलिट्ठो संसत्तो संकिलिट्ठो उ ।। [प्रव.सारो॰ ११९]

स्त्रीसंक्लिष्टः स्त्रीजनमध्यवासी, गृहिसंक्लिष्टस्तद्धनधान्यादितप्तिकारी । असंक्लिष्टस्तु –

पासत्थाईएसुं संविग्गेसुं च जत्थ संमिलइ ।
तहि तारिसओ होई पियधम्मो अहव इयरो उ ।।

उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो ।
एसो उ अहाच्छंदो इच्छाच्छंदोत्ति एगट्ठा ।। [प्रव.सारो॰ १२०,१२१] ।।१८९।।

देव० : पार्श्वे ज्ञानादीनां तिष्ठतीति पार्श्वस्थः, अथवा मिथ्यात्वादयो बन्धहेतवः पाशास्तेषु तिष्ठतीति **पाशस्थः** । अवसन्न **इवावसन्नः** सामाचार्याः सेवने शिथिलीभूतः पराभग्न इत्यर्थः, कुत्सितं शीलमस्येति **कुशीलस्तत** एतेषां स्वरूपं स्वभावो येषां ते तथा, **संसक्तः** सदसदाचारयोः सम्पृक्तः, **यथाछन्दः** स्वरुचिप्रधान उत्सूत्रप्ररूपक इत्यर्थः, तयोः स्वरूपं धारयन्ति ये ते तथा, वचनव्यत्ययः प्राकृतत्वाद्, **आलापादिभिरा**दिशब्दात्संवासादिभि**र्विवर्जनीयास्त**था च -

आलावो संवासो वीसंभो संथवो पसंगो य ।
हीणायारेहिं समं सव्वजिणिंदेहिं पडिकुट्ठो ।। [उपदेशमाला-२२२]

---

१. गुरुवयणं च विराहइ भणिओ एसो उ ओसन्नो । P, K २. तत्थ य नाणकुसीलो अकालसज्झायमाईहिं P, K

अवन्दनीयाश्च जिनागमेऽर्हत्प्रवचन इति । पार्श्वस्थादिस्वरूपं च सूत्रगाथाभिरुच्यते–

सो पासत्थो दुविहो सव्वे देसे य होइ नायव्वो ।
सव्वंमि नाणदंसणचरणाणं जो उ पासंमि ।।
देसंमि उ पासत्थो सेज्जायरभिहडरायपिंडं च ।
नीयं च अग्गपिंडं भुंजइ निक्कारणे चेव ।। [प्रव.सारो० १०४, १०५]

पिण्डशब्दो नित्यशब्दश्च सर्वपदेषु सम्बध्यत इति । तथा –

कुलनिस्साए विहरइ ठवणाकुलाणि य अकारणे विसइ ।
संखडिपलोयणाए (विवाहाद्यवलोकनाय) गच्छइ तह संथवं कुणइ ।।
[संबोधप्र० ३५०]

मात्रादिसम्बन्धघटनलक्षणम् ।

ओसन्नोवि य दुविहो सव्वे देसे य तत्थ सव्वंमि ।
उउबद्धपीढफलगो ठवियगभोई य नायव्वो ।। [संबोधप्र० ३५१]

ऋतुबद्धे पीठफलकासेवक एकान्तेनास्तीर्णसंस्तारक एव वा, शेषं सुगमम् । देशावसन्नस्तु-

आवस्सगसज्झाए पडिलेहणज्झाणभिक्ख भत्तट्ठे ।
आगमणे निग्गमणे ठाणे य निसीयणतुयट्टे ।। [प्रव.सारो० १०७]

एतेषु विषये देशावसन्नो भवतीत्यर्थः, कदा इत्याह –

आवस्सगाइयाइं न करेइ अहवा वि हीणमहियाइं । (यदैतानि सर्वथा न करोति हीनाधिकानि वा करोतीत्यर्थः अन्यच्च) गुरुवयणबला य तहा । (क्वचिद्वितथाचरणे गुरुणा प्रेरितः सन् संमुखीभूयाऽऽलजालानि वक्ति न पुनः सम्यक्प्रतिपद्यते) भणिओ एसो उ ओसन्नो ।। [संबोधप्र० ३५२]

तिविहो होइ कुसीलो नाणे तह दंसणे चरित्ते य ।
तत्थ य नाणकुसीलो अकालसज्झायमाईहिं ।।
सम्मत्तकुसीलो पुण संकाईसेवगो मुणेयव्वो ।
कोउगभूईकम्माइ सेवगो होइ चरणंमि ।। [ ]

सौभाग्यादिकृते योषिदादीनां त्रिकचतुष्कादिषु स्नानादिकरणं कौतुकम्, ज्वराद्यपगमार्थमभिमन्त्रितभस्मनो दानं भूतिकर्म, आदिशब्दान्निमित्तादिकमवसेयमिति ।

संक्लिष्टासंक्लिष्टभेदात् संसक्तोऽपि द्वेधा, तत्र –

पंचासवप्पवत्तो जो खलु तिहिं गारवेहिं पडिबद्धो ।
इत्थिगिहिसंकिलिट्ठो संसत्तो संकिलिट्ठो उ ।। [प्रव.सारो॰ ११९]

स्त्रीसंक्लिष्टः स्त्रीप्रतिषेवी, गृहिसंक्लिष्टस्तद्धनधान्यादितप्तिकारी । असंक्लिष्टस्तु-

पासत्थाईएसुं संविग्गेसुं च जत्थ संमिलइ ।
तहि तारिसओ होई पियधम्मो अहव इयरो उ ।।

धार्मिकमध्ये धार्मिकमिवात्मानं दर्शयति, इतरेषु त्वितरमिति ।

उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो ।
एसो उ अहाछंदो इच्छाछंदोत्ति एगट्ठा ।। [प्रव.सारो॰ १२०, १२१]

इह चोपलक्षणमिदम्, अन्येऽपि नित्यवासिकथिकप्राश्निकमामकसंप्रसारिणः सूत्रेऽवन्द्यत्वेनाभिहिताः, तल्लक्षणमिदम् –

एगखेत्तंमि सया तहाविहालंवणं विणा जो उ ।
विहरइ सायागरुओ नियावासंतिगं[1] बेंति ।।
आहाराईणट्ठा जसहेउं अहव पूयणनिमित्तं ।
तक्कामो जो धम्मं कहेइ सो काहिओ होइ ।।
लोइयववहारेसु लोइयसत्थाइएसु कज्जेसु ।
पासणियत्तं (विचारणं) कुणइ पासणिओ सो उ नायव्वो ।।
खेत्ताईसु ममत्तं कुणमाणो मामगो मुणेयव्वो ।
कयविक्कयाय गिहिणामंतंतो संपसारीओ ।। [ ] इति गाथार्थः ।।१८९।।

**** आवश्यकनिर्युक्तौ-११०७/१, संबोधसित्तर्याम्-९ ****

साम्प्रतं यदुक्तं 'पञ्चानां कृतिकर्म न कर्तव्यम्' अथ क एते पञ्च ?, तान् स्वरूपतो निदर्शयन्नाह –

पासत्थो ओसन्नो होइ कुसीलो तहेव संसत्तो ।
अहछंदोऽवि य एए अवंदणिज्जा जिणमयंमि ।।

किलेयमन्यकर्तृकी गाथा तथाऽपि सोपयोगा चेति व्याख्यायते । तत्र पार्श्वस्थो दर्शनादीनां पार्श्वे तिष्ठतीति **पार्श्वस्थः**, अथवा मिथ्यात्वादयो बन्धहेतवः पाशाः पाशेषु तिष्ठतीति पाशस्थः,

१. नीयावासिंतिगं बेंति A नीयावासिंतगं बिंति T,B,C

सो पासत्थो दुविहो सव्वे देसे य होइ णायव्वो । सव्वंमि णाणदंसणचरणाणं जो उ पासंमि ।।

देसंमि य पासत्थो सिज्जायरऽभिहड रायपिंडं वा । णिययं च अग्गपिंडं भुंजति णिक्कारणेणं च ।।

कुलणिस्साए विहरइ ठवणकुलाणि य अकारणे विसइ । संखडिपलोयणाए गच्छइ तह संथवं कुणई ।।

अवसन्नः सामाचार्यासेवने अवसन्नवदवसन्नः –

ओसन्नोऽवि य दुविहो सव्वे देसे य तत्थ सव्वंमि । उउबद्धपीढफलगो ठवियगभोई य णायव्वो।।

देशावसन्नस्तु –

आवस्सगसज्झाए पडिलेहणझाणभिक्खऽभत्तट्ठे । आगमणे णिग्गमणे ठाणे य णिसीयणतुयट्टे ।।

आवस्सयाइ ण करे करेइ अहवावि हीणमहियाइं । गुरुवयणबलाइ तथा भणिओ एसो य ओसन्नो ।।

गोणो जहा वलंतो भंजइ समिलं तु सोऽवि एमेव । गुरुवयणं अकरेंतो बलाइ कुणई व उस्सूण्णो ।।

भवति कुशीलः कुत्सितं शीलमस्येति कुशीलः –

तिविहो होइ कुसीलो णाणे तह दंसणे चरित्ते य । एसो अवंदणिज्जो पन्नत्तो वीयरागेहिं ।।

णाणे णाणायारं जो उ विराहेइ कालमाईयं । दंसणे दंसणायारं चरणकुसीलो इमो होइ ।।

कोउय भूईकम्मे पसिणापसिणे णिमित्तमाजीवे । कक्ककुरुए य लक्खण उवजीवइ विज्जमंताई ।।

सोभग्गाइणिमित्तं परेसि ण्हवणाइ कोउयं भणियं । जरियाइ भूइदाणं भूईकम्मं विणिद्दिट्ठं।।

सुविणयविज्जाकहियं आइंखणिघंटियाइकहियं वा । जं सासइ अन्नेसिं पसिणापसिणं हवइ एयं ।।

तीयाइभावकहणं होइ णिमित्तं इमं तु आजीवं । जाइकुलसिप्पकम्मे तवगणसुत्ताइ सत्तविहं ।।

कक्ककुरुगा य माया णियडीए जं भणंति तं भणियं । थीलक्खणाइ लक्खण विज्जामंताइया पयडा ।।

तथैव संसक्त इति यथा पार्श्वस्थादयोऽवन्द्यास्तथाऽयमपि संसक्तवत् संसक्तः, तं पार्श्वस्थादिकं तपस्विनं वाऽऽसाद्य सन्निहितदोषगुण इत्यर्थः, आह च–

संसत्तो य इदाणीं सो पुण गोभत्तलंदए चेव। उच्चिट्ठमणुच्चिट्ठं जं किंची छुब्भई सव्वं ।।

एमेव य मूलुत्तरदोसा य गुणा य जत्तिया केइ । ते तम्मिवि सन्निहिया संसत्तो भण्णई तम्हा ।।

रायविदूसगमाई अहवावि णडो जहा उ बहुरूवो । अहवा वि मेलगो जो हलिद्दरागाइ वहुवण्णो ।।

एमेव जारिसेणं सुद्धमसुद्धेण वाऽवि संमिलइ । तारिसओ च्चिय होति संसत्तो भण्णई तम्हा ।।

सो दुविकप्पो भणिओ जिणेहि जियरागदोसमोहेहिं । एगो उ संकिलिट्ठो असंकिलिट्ठो तहा अण्णो ।।

पंचासवप्पवत्तो जो खलु तिहि गारवेहि पडिबद्धो । इत्थिगिहिसंकिलिट्ठो संसत्तो संकिलिट्ठो उ ।।

पासत्थाईएसुं संविग्गेसुं च जत्थ मिलती उ । तहि तारिसओ भवई पियधम्मो अहव इयरो उ ।।

एषोऽसंक्लिष्टः, **यथाछन्दोऽपि च** यथाछन्दो यथेच्छयैवागमनिरपेक्षं प्रवर्तते यः स यथाच्छन्दोऽभिधीयते, उक्तं च –

उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो । एसो उ अहाछंदो इच्छाछंदोत्ति एगट्ठा ।।

उस्सुत्तमणुवदिट्ठं सच्छंदविगप्पियं अणणुवाइ । परतत्ति पवत्तिंति णेओ इणमो अहाछंदो ।।

सच्छंदमइविगप्पिय किंची सुहसायविगइपडिबद्धो । तिहिगारवेहिं मज्जइ तं जाणाही अहाछंदं ।।

एते पार्श्वस्थादयो**ऽवन्दनीयाः**, क्व ?-**जिनमते,** न तु लोक इति गाथार्थः ।।१।।

**** प्रवचनसारोद्धारे-१०३ ****

अथ 'इयरे पंचेव' त्ति द्वारम्, तत्राऽऽह –

पासत्थो ओसन्नो होई कुसीलो तहेव संसत्तो ।
अहछंदोवि अ एए अवंदणिज्जा जिणमयंमि ।।

'पासत्थो' इत्यादि **पार्श्वस्थोऽवसन्नो भवति कुशीलस्तथैव संसक्तो यथाछन्दोऽपि चैतेऽवन्दनीया जिनमते,** तत्र पार्श्वे तटे ज्ञानादीनां यस्तिष्ठति स पार्श्वस्थः, अथवा मिथ्यात्वादयो बन्धहेतवः पाशा इव पाशास्तेषु तिष्ठतीति पाशस्थः, स च द्विभेदः–सर्वतो देशतश्च, तत्र सर्वतो यः केवलवेषधारी सम्यग्ज्ञानदर्शनचारित्रेभ्यः पृथक् तिष्ठति, देशतः पुनः पार्श्वस्थः स यः कारणं तथाविधमन्तरेण शय्यातराभ्याहृतं नृपतिपिण्डं नैत्यिकमग्रपिण्डं वा भुङ्क्ते तथा ममैवैतानि कुलान्याभाव्यानि नान्यस्येति यः कुलनिश्रया विहरति तथा गुर्वादीनां योग्यानि स्थापनाकुलानि यः कारणमन्तरेणैव प्रविशति ।।१०३।।

चक्रे० : अथ तद्वन्दने को दोष इत्याहुः –

देव० : अथैतद्वन्दने को दोष इत्याह –

वंदंतस्स उ पासत्थमाइणो नेव[१] निज्जर न कित्ती ।
जायइ कायकिलेसो बंधो कम्मस्स आणाई ।।१९०।।

चक्रे० : वन्दमानस्य पार्श्वस्थादीन्नैव निर्जरा, न कीर्तिः किन्तु **जायते कायक्लेशः** शरीरावनामादिकः, तथा **कर्मबन्ध**स्तदाचारानुमोदनात्, उक्तं च –

१. नेय A

किइकम्मं च पसंसा सुहसीलजणंमि कम्मबंधा य ।
जे जे पमायठाणा ते ते उववूहिया हुंति ।। [आव.नि॰ ११९२]

'आणाई'त्ति आज्ञाभङ्गादयश्च जायन्ते, तत्र भगवन्निषिद्धवन्दनेनाज्ञाभङ्गः, तं दृष्ट्वाऽन्येऽपि वन्दन्त इत्यनवस्था, तान् वन्दमानान् दृष्ट्वाऽन्येषां मिथ्यात्वम्, कायक्लेशतो देवताभ्यो वाऽऽत्मविराधना, तद्वन्दनेन तत्कृताऽसंयमानुमोदनात् संयमविराधनेति गाथार्थः ।।१९०।।

देव० : वन्दमानस्य पार्श्वस्थादीन्नैव निर्जरा कर्मक्षयलक्षणा, तीर्थकराज्ञाविराधनद्वारेण निर्गुणत्वान्न **कीर्तिर**हो पुण्यभागयमित्येवंलक्षणा, अपि त्वकीर्तिरेव, नूनमयमप्येवंस्वरूपो यदेतान् वन्दत इति, तथा **जायते कायक्लेशो**ऽवनामादिलक्षणः शरीरखेदः, तथा **बन्धो** विशिष्टरचनयाऽऽत्मनि स्थापनम्, क्रियत इति **कर्म** ज्ञानावरणीयादि तस्य तदाचारानुमोदनात्, तथा चाभिहितम्-

किइकम्मं च पसंसा सुहसीलजणम्मि कम्मबंधा य ।
जे जे पमायठाणा ते ते उववूहिया हुंति ।। [आव.नि॰ ११९२]

पदैकदेशेऽपि पदावगमा**दाज्ञाभङ्गादयश्च** जायन्त इतीहापि योगः, तत्र भगवत्प्रतिक्रुष्टवन्दनेनाज्ञाभङ्गस्तं दृष्ट्वान्येऽपि वन्दन्त इत्यनवस्था, तान् वन्दमानान् दृष्ट्वान्येषां मिथ्यात्वम्, कायक्लेशतो देवताभ्यो वाऽऽत्मविराधना, तद्वन्दनेन तत्कृतासंयमानुमोदनात्संयमविराधनेति गाथार्थः ।।१९०।।

**** आवश्यकनिर्युक्तौ-११०८, गुरुतत्त्वविनिश्चये-३/१२१, संबोधसित्तर्याम्-१० ****

अथ पार्श्वस्थादीन् वन्दमानस्य को दोष इति ?, उच्यते –

पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ ।
कायकिलेसं एमेव कुणई तह कम्मबंधं च ।।

पार्श्वस्थादीनुक्तलक्षणान् **वन्दमानस्य** नमस्कुर्वतो **नैव कीर्तिर्न निर्जरा भवति,** तत्र कीर्तिः–अहो अयं पुण्यभागित्येवंलक्षणा, सा न भवत्यपि त्वकीर्तिर्भवति, नूनमयमप्येवंस्वरूपो येनैषां वन्दनं करोति, तथा निर्जरणं निर्जरा कर्मक्षयलक्षणा सा न भवति, तीर्थकराज्ञाविराधनाद्वारेण निर्गुणत्वात्तेषामिति, चीयत इति कायो देहस्तस्य क्लेशोऽवनामादिलक्षणः कायक्लेशस्तं **कायक्लेशमेवमेव** मुधैव **करोति** निर्वर्तयति, **तथा** क्रियत इति कर्म ज्ञानावरणीयादिलक्षणं तस्य बन्धो विशिष्टरचनयाऽऽत्मनि स्थापनं तेन वाऽऽत्मनो **बन्धः** स्वस्वरूपतिरस्करणलक्षणः कर्मबन्धस्तं **कर्मबन्धं च** करोतीति वर्तते, चशब्दादाज्ञाभङ्गादींश्च

दोषानवाप्नुते, कथम् ? भगवत्प्रतिक्रुष्टवन्दन आज्ञाभङ्गः, तं दृष्ट्वाऽन्येऽपि वन्दन्त इत्यनवस्था, तान् वन्दमानान् दृष्ट्वाऽन्येषां मिथ्यात्वम्, कायक्लेशतो देवताभ्यो वाऽऽत्मविराधना, तद्वन्दनेन तत्कृता-संयमानुमोदनात्संयमविराधनेति गाथार्थः ।।११०८।।

**** संबोधसप्ततिकायाम्-१० ****

अथ पार्श्वस्थादीनां वन्दनफलमाह –

पासत्थाई वंदमाणस्स नैव कित्ति न निज्जरा होइ ।
जायइ कायकिलेसो बंधो कम्मस्स आणाए ।।

निर्दिष्टलक्षणान् **पार्श्वस्थादीन् वन्द्यमानस्य** जनस्य **कीर्त्तिर्न** भवति, **निर्जरा** कर्मक्षयमपि **न भवति,** पुनः **कायक्लेशः** कायस्य शरीरस्य क्लेश इतस्ततश्चलनात्मको **जायत** उत्पद्यते, कर्मबन्धोऽप्यष्टानां **कर्मणामपि बन्धो** भवति, **आज्ञाया** जिनाज्ञाया भङ्गोऽपि भवतीति शेषः, अतो न वन्दनार्हाः पार्श्वस्थादय इति भावः ।।१०।।

चक्रे० : एवं तावत्पार्श्वस्थादीन् वन्दमानस्य दोषा उक्ताः, सम्प्रत्येषामेव गुणाधिकान् वन्दयतामपायान् दर्शयन्ति –

देव० : एवं तावत्पार्श्वस्थादीन् वन्दमानस्य दोषा उक्ताः, साम्प्रतं तेषामेव गुणाधिकवन्दन-प्रतिषेधमकुर्वतामपायान् दर्शयति –

जे बंभचेरस्स वयस्स भट्ठा उड्डंति पाए गुणसुट्ठियाणं ।
जम्मंतरे दुल्लहबोहिया ते [१]कुंटत्तमंटत्तणयं लहंति।।१९१।।

चक्रे० : स्पष्टा, नवरं **कुण्टः** पाणिविकलः, **मण्टस्तु** विसंस्थुलोरूजङ्घः, तस्मादवन्द्याः पार्श्वस्थाद्या इति स्थितम्।।१९१।।

देव० : षष्ठ्याः पञ्चम्यर्थत्वाद् **ये [२]ब्रह्मचर्यान्मैथुनव्रताद्, व्रतात्** सामान्येन प्राणातिपात विरमणादे**र्भ्रष्टाः** संयमबाह्या इत्यर्थः, व्रतान्तर्गतत्वेऽपि ब्रह्मव्रतस्य पृथगुपादानं तद्भ्रंशस्याति-दौष्ट्यख्यापनार्थमत एवात्रापवादोऽपि नास्ति, तथा चात्र कल्पभाष्यम् –

कामं सव्वपएसु वि [३]ओसग्गववायधम्मया जुत्ता ।
मुत्तुं मेहुणभावं न विणा तं रागदोसेण ।। [ ]

१. लाहेवि कुटत्तणयं लहंति M २. ब्रह्मचर्याद् व्रताद् भ्रष्टाः, शेषव्रतोपलक्षणमिदमस्यैव च भणनमेतद्भ्रंशस्य T,B,C
३. उसग्गववायधम्मया जुत्ता । मोत्तुं मेहुणभावं न विण तं रागदोसेणं T,C

'उड्डंति'त्ति [१]उपनयन्ति **पादौ** चरणौ **गुणसुस्थितानां** मूलोत्तरगुणधारिणाम्, वन्दमानानामिति शेषः । **ते** एवमुपचितपापभरा **जन्मान्तरे दुर्लभबोधिका** नरकतिर्यक्षु भूयोभूयः परिभ्रम्य कदाचित्पुनरनन्तकालात्तदवाप्तेः ।

किञ्च लब्धायामपि बोधौ **कुण्टत्वमण्टत्वमु**पलक्षणत्वादान्ध्यबाधिर्यमौक्यरोगित्वादि च **लभन्ते** यथा न शक्नुवन्ति धर्ममनुष्ठातुम्, कुण्टः पाणिविकलो मण्टस्तु विसंस्थुलोरुजङ्घ इति, तस्मादवन्दनीया एते पार्श्वस्थादय इति स्थितमिति गाथार्थः ।।१९१।।

** आवश्यकनिर्युक्तौ-११०९, गुरुतत्त्वविनिश्चये-३/१२२ **

एवं तावत्पार्श्वस्थादीन् वन्दमानस्य दोषा उक्ताः, साम्प्रतं पार्श्वस्थादीनामेव गुणाधिकवन्दनप्रतिषेधमकुर्वतामपायान् प्रदर्शयन्नाह –

जे बंभचेरभट्ठा पाए उड्डंति बंभयारीणं ।
ते हुंति कुंटमुंटा बोही य सुदुल्लहा तेसिं ।।

'जे' त्ति । **ये** पार्श्वस्थादयो **भ्रष्टब्रह्मचर्या** अपगतब्रह्मचर्या इत्यर्थः, ब्रह्मचर्यशब्दो मैथुनविरतिवाचकस्तथौघतः संयमवाचकश्च, **'पाए उड्डंति बंभयारीणं'** पादावभिमानतो व्यवस्थापयन्ति ब्रह्मचारिणां वन्दमानानामिति, तद्वन्दननिषेधनं न कुर्वन्तीत्यर्थः, ते तदुपात्तकर्मजं नारकत्वादिलक्षणं विपाकमासाद्य यदा कथञ्चित् कृच्छ्रेण मानुषत्वमासादयन्ति तदापि **भवन्ति कोण्टमुण्टा**। **बोधिश्च** जिनशासनावबोधलक्षणा सकलदुःखविरेकभूता **सुदुर्लभा तेषाम्,** सकृत्प्राप्तौ सत्यामप्यनन्तसंसारित्वादिति गाथार्थः ।।११०९।।

चक्रे० : अत एव च –

देव० : अत एव च –

पासत्थो ओसन्नो कुसीलसंसत्तनी य [२]अहाच्छंदो ।
एएहिं आइन्नं न आयरिज्जा न संसिज्जा।।१९२।।

चक्रे० : स्पष्टा ।।१९२।।

देव० : पार्श्वस्थादयो वर्णितस्वरूपास्तत **एतैराचीर्णमा**चरितं **नाचरेन्नशंसेदिति** गाथार्थः।।१९२।।

---

१. प्रगुणीकुर्वतेत्यर्थे देश्यं T,B,C २. अहछंदो A,T,C,Z

** उपदेशमालापुष्पमालायाम्-२०६ **

तमेव सुखशीलजनं दर्शयति –

पासत्थो ओसन्नो कुसील संसत्तनी अहाछंदो ।
एएहिं समाइन्नं न आयरेज्जा न संसिज्जा ।।

तत्र सम्यग्ज्ञानदर्शनचारित्रेभ्यः पार्श्वे पृथक् तिष्ठतीति **पार्श्वस्थः,** अमुं च सर्वथैवाचारिक्रिणं केचिन्मन्यन्ते, तच्च न सङ्गतम्, यतो निशीथचूर्णिरिहैवं दृश्यते "सत्थो अच्छइ, सुत्तपोरसिं अत्थपोरसिं वा न करेइ, दंसणाइयारेसु वट्टइ, चारित्ते न वट्टइ, अइयारे य न वज्जेइ, एवं सत्थो अच्छइ पासत्थो"त्ति, अनेन च सर्वथैवास्य चारित्राभाव एवेति नावसीयते, किन्तु सर्वतो देशतश्चायं सूत्रे पठ्यते, तत्र ज्ञानादिभ्यः पृथग्भूतः सर्वतः, अग्रपिण्डनित्यपिण्डभोजित्वादिदोषदुष्टस्तु देशतः, इदं च द्वैविध्याभिधानमपार्थकं स्यात्, चारित्राभावस्योभयत्रापि समानत्वात्, तस्माद् भजनया सातिचारचारित्रसत्ताऽप्यस्याप्यवबुध्यते ।

अवसीदति प्रमाद्यति साधुसामाचार्यामि**त्यवसन्नः** सोऽपि द्विविधः सर्वतो देशतश्च, अत्रावबद्धपीठफलकः स्थापनाभोजी च सर्वावसन्नः, तत्रैककाष्ठानिष्पन्नसंस्तारकालाभे बहुभिरपि वंशादिकाष्ठखण्डैर्दवरकादिबन्धान् दत्त्वा वर्षासु संस्तारकः क्रियते, स च पक्षसन्ध्यादिषु बन्धापगमं कृत्वा प्रत्युपेक्षणीय इति जिनाज्ञा, यस्त्वेवं न प्रत्युपेक्षते सोऽवबद्धपीठफलकोऽभिधीयते, अथवा पुनः पुनः शयनादिनिमित्तं नित्यमास्तीर्णसंस्तारकः, एकान्तानास्तीर्णसंस्तारक एव वा यस्त्वास्ते स एवमभिधीयते, यस्तु प्रतिक्रमणस्वाध्यायप्रत्युपेक्षणादिकां साधुसामाचारीं प्रत्येकं न करोति, हीनाधिक्यादिदोषदुष्टां वा करोति, स्खलितेषु मिथ्यादुष्कृतं न ददाति प्रेरितोऽपि गुरोः सन्मुखीभूय ब्रवीतीत्यादिदोषदुष्टः स देशावसन्नः ।

कुत्सितं ज्ञानदर्शनचारित्रलक्षणं शीलं यस्य स **कुशीलः,** अयं च ज्ञानदर्शनचारित्रकुशीलताभेदात् त्रिविधः, तत्र कालविनयादिकमष्टविधं ज्ञानाचारं यो विराधयति स ज्ञानकुशीलः, ज्योतिषविद्यामन्त्रयोगचूर्णनिमित्तादिकं प्रयुञ्जानो जातिकुलशिल्पतपोगणसूत्रादि वाऽऽहारादिगृद्ध्याऽऽजीवन् विभूषादिकं च चरणमालिन्यजनकं कुर्वाणश्चरणकुशीलः ।

गुणैर्दोषैश्च संसज्यते मिश्रीभवतीति **संसक्तः,** इदमुक्तं भवति–यथा गवादीनां खानदकलन्दके उच्छिष्टमनुच्छिष्टं वा भक्तखलकार्पासादिकं सर्वं प्राप्यत एवं मूलोत्तरगुणविषया बहवो गुणा दोषाश्च यत्र लभ्यन्ते, यथा वैलको हरिद्रया रञ्जितः पीतो भवति, पुनः प्रक्षाल्य गुलिकयाऽनुलिप्तो नीलो भवति, हिंगुलिकादिना तु रक्तादिवर्णो भवति, तथैव नटवद् यो बहुरूपः सम्पद्यते, संविग्नेषु मिलितः संविग्नमात्मानं दर्शयति पार्श्वस्थादिषु तु तद्रूपतां भजत इत्यर्थः, स एवंभूतः संसक्तः, अयमपि द्विविधः, संक्लिष्टोऽसंक्लिष्टश्च, तत्र पञ्चाश्रवप्रवृत्तो गौरवत्रयप्रतिबद्धः स्त्रीप्रतिषेवी गृहकार्यचिन्तनपरश्च संक्लिष्टः, संविग्नपार्श्वस्थादिबहुरूपस्त्वसंक्लिष्टः ।

ऋतुबद्धकाले मासकल्पं वर्षासु पुनः कार्त्तिकचातुर्मासिकमतिक्रम्य पुष्टालम्बनमन्तरेणापि सुखप्रतिलिप्सुतया य एकत्रापि क्षेत्रे तिष्ठति स **नित्य**वासी ।

छन्दोऽभिप्रायः, स चेह प्रस्तावाद्यथाछन्दस्यैव सम्बन्धी गृह्यते, ततश्च तीर्थकरवचनबहिर्भूतं स्वाभिप्रायस्यैवानुरूपं प्ररूपयति करोति वा यः स **यथाछन्द** उत्सूत्रमाचरन् प्ररूपयंश्च, तथा परतप्तिप्रवृत्तः स्वल्पेऽपराधे पुनः पुनर्झषणशीलो मिथ्यालम्बनं च स्वबुद्ध्या किञ्चिद्विकल्प्य सुखाभिलाषी विकृतिप्रतिबद्ध ऋद्धिरससातगौरवैर्गर्वितश्च यथाछन्द इत्यर्थः ।

एते षडप्यनन्तरोक्तसुखशीलजनस्वरूपाः, **एतैश्च** षड्भिरपि यज्जिनाज्ञामतिक्रम्य **समाचीर्ण** तत् तानेव दृष्टान्तीकृत्य न स्वय**माचरेत्, नापि शंसेत्** शोभनमिदमिति न प्रशंसेदित्यर्थः । अत्राह–नन्वावश्यकादिषु पार्श्वस्थादीनां कृतिकर्मादिकमपि निवारितम्, एतेषु च पार्श्वस्थादिषु मध्येऽग्रपिण्डभोजित्वादिकया स्वल्पयाऽप्युत्तरगुणसेवया केचित् पठ्यन्ते, केचित्तु पञ्चाश्रवप्रवृत्त्यादिकया बहुदोषया मूलगुणसेवया, ततश्चातिगहनमिदम्, न कश्चित्तथाविधो विषयविभागो लक्ष्यते, सत्यम्, तर्हि किञ्चिद्विशेषपरिज्ञानार्थं कल्पसम्बन्धि भाष्यं चूर्णितश्च किञ्चिल्लिख्यते –

संकिण्णऽवराहपओ अणाणुतावी य होइ अवरुद्धो । उत्तरगुणपडिसेवी आलंबणवज्जिओ वज्जो ।। (बृ० ३ उ० ८४०) (जीत० १३२३) । अत्र चूर्णिः-संकिण्णो नाम बहूहिं उत्तरगुणावराहपएहिं, ते य काउं नाणुतप्पइ-दुट्ठु कयं, निस्संको निद्दओ पवत्तइ, आलंबणा नाणाई तेहिं वज्जिओ यः स कियकम्मे वर्जनीयः, अर्थादापन्नम्-आलंबणसहिओ उत्तरगुणे पडिसेवमाणोऽवि पुज्जो इति शिष्यवचनं, आयरिओ भणइ-न केवलं उत्तरगुणपडिसेवी एव आलंबणसहिओ पुज्जो, तथा च भाष्यम् –

हेट्ठाठाणठिओऽवी पावयणिगणट्ठियाइ अहरे ऊ । कडजोगी उ निसेवइ आइनियंठो व्व सो पुज्जो ।। ८४१ (जीत १३२३) । अत्र चूर्णिः– हिट्ठिल्लेहिं संजमठाणेहिं ठिओऽवि, मूलगुणप्रतिषेव्यपीति भावः, कडजोगी नामगीयत्थो, पावयणी-आयरिओ गणो-गच्छो एएसिं अट्ठयाए अधरे-आत्यन्तिके जं निसेवेइ तेण संजमसेढीए चेव वट्टइ, जह आइनियंठो-पुलागो तस्स लद्धी चक्कवट्टिखंधावारंपि थंभेउं विणासेउं च कुलाइकज्जेसु आलोइयपडिक्कंतो सुद्धो महानिज्जरो य, यत आह भाष्यकारः –

कुणमाणोऽवि य कडणं कयकरणो नेव दोसमज्जेइ । अप्पेण बहुं इच्छइ विसुद्धआलंबणो समणो ।। ८४२ (पंच० २४२५) कडणंति कटमर्दनमपि कुर्वाणः कृतकरणः पुलाको न दोषमभ्येति, विशुद्धालम्बनोऽल्पेन बह्विच्छति, अपरं चेह भ्रष्टसंयमगुणोऽप्यायोपायकुशलेन कार्यार्थिना वन्दनीयः, अन्यथा दोषप्रसङ्गात्, तथाहि–केनचिदाचार्येण गीतार्थाभावेऽगीतार्था अपि क्षुल्लकाः प्रत्यन्तपल्ल्यां क्षेत्रप्रत्युपेक्षार्थं प्रेषिताः, तत्र भ्रष्टव्रत एको वाचको राजकुले यत्कृतप्रमाणः परिवसति, ते च प्रत्युपेक्षितक्षेत्राः साधवस्तं पृच्छन्ति-क्वासौ तिष्ठतीति, लोकेन कथितम्–यथाऽरण्ये तिष्ठति, ततस्तेऽपि तत्र गतास्तमजारक्षणप्रवृत्तं पुराणं दृष्ट्वाऽद्रष्टव्योऽयमिति विमृश्यागीतार्थत्वेन शनैः शनैरपसर्पन्ति, तांश्च तथा दृष्ट्वा कुपितो वाचकः

पल्लीपतेः कथयित्वा गुप्तौ प्रक्षेपितवान्, ततस्तदन्वेषणार्थं गुरवस्तत्र समायाताः, तं च वाचकं भ्रष्टव्रतमपि वन्दित्वा शिक्षका एतेऽज्ञा इत्युक्त्वा च तानगीतार्थशिष्यान् मोचितवन्तः, तथा च भाष्यम्–

पेसविया पच्चन्तं गीयाऽसइ खेत्तपेहग अगीया । पेहियखेत्ता पुच्छंति वायगं कत्थऽरण्णेत्ति ।।३-८५३।।

ओसक्कंते दट्ठुं संकच्छेई उ वायगो कुविओ । पल्लिवइकहण रुंभण गुरुआगम वंदणं सेहा ।।८५४।।

नन्वेवं पार्श्वस्थादीन् वन्दमानस्य तद्दोषानुज्ञातः संयमव्ययादयो दोषाः प्रसजन्ति, सत्यम्, किन्तु संयमव्ययात् तदायो यथा गरीयान् भवति तथा यतितव्यमेव, तथा च भाष्यम्–

कुणइ वयं धणहेउं धणस्स वणिओ उ आगमं नाउं । इय संजमस्सवि वओ तस्सेवट्ठा न दोसाय ।।८४६।।

गच्छस्स रक्खणट्ठा अणागयं आउवायकुसलेणं । एवं गणाहिवइणा सुहसीलगवेसणा कज्जा ।।८४७।।

तद्यथा 'वायाए नमोक्कारो' इत्यादि, किं बहुना ?

वायाए कम्मुणा वा तह चेट्ठइ जह न होइ से मंनुं । पस्सइ जओ अवायं तं भावं दूरओ वज्जे ।।८६४।।

इति तावद् गुणवर्जितविषयं वाग्नमस्कारादिकं कृत्यमुक्तम्, यत्र तु गुणः स्वल्पोऽप्यस्ति तत्र किं कर्त्तव्यम् ? अत्रापि भाष्यम् –

दंसणनाणचरित्तं तवविणयं जत्थ जत्तियं जाणे । जिणपन्नत्तं भत्तीए पूयए तं तहिं भावं ।।८६९।। (जीत १३३२) । किमिह बहुविस्तरेण प्रवचनसारमेवोच्यते, तच्च 'पडिसेहो य अणुन्ना' इत्यादिना सूत्रेणात्रैव वक्ष्यते, तदलमतिप्रसङ्गेन, तदर्थिना तु निशीथ (उद्दे० ५) कल्पाव (उद्दे० ३) न्वेषणीयौ, तस्माद्गम्भीर-जिनप्रवचनमध्यस्थैः पौर्वापर्येण परिभावनीयं न तु क्वचिद्वचनमात्राकर्णनेनापि सम्मोहः कार्य इति गाथार्थः।।२०६।।

चक्रे० : यतः –

देव० : यतः –

जं जीयमसोहिकरं पासत्थपमत्तसंजयाईहिं ।
बहुएहिं[१] वि आइन्नं न तेण जीएण ववहारो।।१९३।।

चक्रे० : यज्जीतं समाचारविशेषोऽ**शोधिकरं** कर्ममलाऽपनयनाक्षमम्, **पार्श्वस्थप्रमत्त-संयतादिभिः**, पार्श्वस्थाः पूर्वोक्ताः प्रमत्ताः प्रमादिनस्तत्प्रकारै**र्बहुभिरप्याचीर्णं** प्रवर्त्तितम्, **न तेन जीतेन व्यवहार**स्तत्राचरणीयमित्यर्थः, यतः शतमप्यन्धानां न पश्यति।।१९३।।

१. बहुएहि A,T,C,

देव० : यज्जीतं सामाचारी विशेषोऽ**शोधिकरं** न कर्ममलापनयनसहं **पार्श्वस्थप्रमत्त-संयतादिभिः,** पार्श्वस्थाः पूर्वोक्ताः प्रमत्ताः प्रमादिनस्तत्प्रकारै**र्बहुभिर**प्यास्तामेकेन केनचि-**दाचीर्णं** प्रवर्त्तितम्, **न तेन जीतेन व्यवहार**स्तीर्थप्रवृत्तिः, शतमप्यन्धानां न पश्यतीति न्यायाज्जीतलक्षणस्यैवाऽयोगात्, शब्दप्रवृत्तिस्तु गौणवृत्त्यापि भवतीति गाथार्थः ।।१९३।।

चक्रे० : किन्तु –

देव० : किन्तु –

जं जीयं सोहिकरं संवेगपरायणेण दंतेण ।
एक्केण[1] वि आइन्नं तेण उ जीएण ववहारो।।१९४।।

चक्रे० : स्पष्टा ।।१९४।।

देव० : यज्जीतं शोधिकरं संवेगपरायणेनोपलक्षणत्वाद् गीतार्थेन च **दान्तेने**न्द्रियनो-इन्द्रियदमा**देकेना**प्यास्तां बहुभि**राचीर्णम्, तेन, तु**रेवकारार्थः पुनः सम्भाव्यते, **जीतेन व्यवहार** एव प्रदीपकल्पत्वात्, उक्तं च –

एक्कोवि नायवाई अवलंबंतो विसुद्धववहारं ।
सो होइ भावसंघो जिणाण आणं अलंघंतो ।। [संबोधप्र० ७९७]

आचीर्णलक्षणं चेदम् –

धिइसंघयणाईणं मेराहाणिं च जाणिउं थेरा ।
सेह अगीयत्थाणं ठवणा आइण्णकप्पस्स ।। [पञ्चवस्तु-४७५]
अवलंबिऊण कज्जं जं किंचि आयरंति गीयत्था ।
थेवावराहबहुगुण सव्वेसिं तं पमाणं तु ।। [पञ्चवस्तु-२७९]

तस्मात्पार्श्वस्थाद्याचीर्णं नाचरेन्न शंसेदिति गाथार्थः ।।१९४।।

**** गुरुतत्त्वविनिश्चये-२/५२, ५३ ****

शोधिकराशोधिकरजीतप्रतिपादनार्थमाह –

जं जीअमसोहिकरं पासत्थपमत्तसंजयाईणं ।
जइ वि महाणाइन्नं ण तेण जीएण ववहारो ।।

१. इककेण P, K

जं जीअं सोहिकरं संवेगपरायणेण दंतेणं ।
इक्केण वि आइन्नं तेण उ जीएण ववहारो ।।

'जं जीअं'ति । **यज्जीतं पार्श्वस्थप्रमत्तसंयताचीर्णम्**-अत एवाशोधिकरम्, तद् **यद्यपि महाजनाचीर्णं** तथाऽपि **न तेन जीतेन व्यवहारः** कर्त्तव्यस्तस्याशोधिकरत्वात् ।।५२।।

'जं जीअं'ति । **यत्पुनर्जीतं संवेगपरायणेन दान्तेनैकेनाप्याचीर्णं** तच्छोधिकरं **तेन व्यवहारः** कर्त्तव्यो भवति । न तु बहुजनापरिगृहीतत्वेनाऽस्याविश्वासः कर्त्तव्यः, बहुजनपरिगृहीतत्वस्य लोकधर्मेऽपि सत्त्वेन तस्य विश्वासानङ्गत्वात् सदाचारपरिगृहीतत्वस्यैव तत्र तन्त्रत्वादिति भावः ।।५३।।

चक्रे० : अत्रैव विशेषमाहुः -

देव० : [१]अत्रैवमाह -

[२]आणाइ अवट्टंतं जो उववूहिज्ज जिणवरिंदाणं ।
तित्थयरस्स सुयस्स य संघस्स य पच्चणीओ सो ।।१९५।।

चक्रे० : पाठसिद्धा।।१९५।।

देव० : जिनवरेन्द्राणामाज्ञायामवर्त्तमानं य उपबृंहयेद् द्वादशावर्त्तवन्दनादिना स्तूयाद्वस्त्रपात्रादिना च सन्मानयेत् **तीर्थकरस्य श्रुतस्य सङ्घस्य च स प्रत्यनीकस्**तत्प्रतिकूलवर्त्त्यनुमोदनादिति गाथार्थः ।।१९५।।

चक्रे० : अथ वस्त्रपात्राद्याशंसयोन्मार्गगामिनं गृहस्थादिकमनुवर्त्तयन्ते ये तान् प्रत्याहुः -

देव० : अथ वस्त्रपात्राद्याशंसयोन्मार्गगामिनं महर्द्धिकगृहस्थादिकमनुवर्त्तयन्ति ये तान् प्रत्याह -

किं वा देइ वराओ मणुओ सुट्ठु वि धणी वि भत्तो वि ।
आणाइक्कमणं पुण तणुयंपि अणंतदुहहेऊ।।१९६।।

चक्रे० : स्पष्टा।।१९६।।

देव० : किं वा किमिव **ददाति वराको मनुजः सुष्ठ्वप्यतिशयेन धन्यपि भक्तोऽपि** किञ्चिद्वस्त्रपात्रादि, ददद्प्याज्ञातिक्रमणजनितापायापेक्षया न किञ्चिदित्यर्थः । **आज्ञातिक्रमणं पुनस्तन्वपि** स्वल्पमप्यक्षरपदाद्यरोचनम**प्यनन्तदुःखहेतुर**नन्तभवभ्रमणकारणत्वादिति गाथार्थः।।१९६।।

१. अत्रैवाभ्युच्चयमाह T,B,C २. आणाए Z

** अभिधानराजेन्द्रकोषे 'आगम'शब्दे-८२ **

धर्मार्थिना धर्म्ममार्गे प्रवर्त्तमानेनाऽऽगमावलम्बनेनैव प्रवर्त्तितव्यं तस्यैवैकस्यैहिकामुष्मिकफल-सिद्धिहेतुतयोपादेयत्वादन्यस्य पुरुषमात्रस्यावलम्बने तदुच्छेदः स्यादित्येतद्दर्शयन्निदमाह –

किं वा देइ वराओ मणुओ सुट्ठु वि धणी वि भत्तो वि ।
आणाअइक्कमं पुण तयं पि अणंतदुहहेऊ ।।

किं वा न किञ्चिद्**ददाति** प्रयच्छति **वराको**ऽत्यन्तशक्तिरहितो **मनुजो** नरः **सुष्ठ्वप्यतिशयेन धन्यपि** धान्यादिसंपदुपेतो **भक्तोऽपि** भक्तपानवस्त्रपात्रादिदानसमर्थ एव स्यात्, न पुनः सुगतेः, **आज्ञातिक्रमणं** भगवदाज्ञोल्लङ्घनं **पुनः** परापेक्षयापि **तनुकमपि** स्वल्पमप्यास्तां तावद् बह्वित्यपिशब्दार्थः, **अनन्तदुःखहेतु**र-नन्तसंसारनिबन्धनमित्यर्थः, यदपेक्षया सर्वविदाज्ञोल्लङ्घनं क्रियते स ह्याहारादिदानमात्र एव समर्थः, न पुनः कुगतिरक्षाक्षमः, अतः किं तदपेक्षया भगवदाज्ञोल्लङ्घनेनानन्तसंसारनिवर्त्तनेनेति गाथार्थः ।।८२।।

तम्हा [१]सइ सामत्थे आणाभट्ठंमि नो खलु उवेहा ।
अणुकूलगेयरेहिं अणुसट्ठी होइ दायव्वा।।१९७।।

चक्रे० : यस्मादाऽऽज्ञातिक्रमणमनन्तदुःखहेतु**स्तस्मात् सति सामर्थ्य** आज्ञातिक्रमव्यावर्त्तन-क्षमत्वे, **आज्ञाभ्रष्ट** आज्ञातिक्रमकारिणि गृहस्थे, साधौ वाऽऽस्तामनुवर्तनम्, **खलु**रप्यर्थे, नो **नैवोपेक्षा**ऽप्युदासीनताऽपि कार्येत्यर्थः, यतः –

आणाभंगं दट्ठुं 'मज्झत्था मु'त्ति ठंति जे तुसिणा ।
अविहिअणुमोयणाए तेसिंपि य होइ वयलोवो ।। [संबोधप्र० ४६३]

किन्त्व**नुकूलैः** प्रियै**रितरैश्च** निष्ठुरैर्वचोभि**रनुशास्तिः** शिक्षा **भवति दातव्या**।।१९७।।

देव० : यस्मादाज्ञातिक्रमणमनन्तदुःखहेतु**स्तस्मात् सति सामर्थ्ये** तद्व्यावर्त्तनं प्रति विद्यमानायां शक्ता**वाज्ञाभ्रष्ट** आज्ञातिक्रमकारिणि **नो खलु**रप्यर्थे, **नैवोपेक्षा**प्यौदासीन्यमपि, आस्तां तदनुवर्त्तनं कार्येति शेषः । अयमभिप्रायः – य एवाज्ञाभङ्गं विधास्यति स एवानन्तदुःख-भाग्भविष्यति, किमस्माकमिति बुद्ध्या नोदासितव्यम् यतः –

आणाभंगं दट्ठुं'मज्झत्था मु' त्ति ठंति जे तुसिणा ।
अविहिअणुमोयणाए तेसिंपि य होइ वयलोवो ।।

---

१. सय P,K

तेसिंपि य सामन्नं भट्ठं भट्ठव्वया य ते हुंति ।
जे समणा कज्जाइ वित्तारक्खाए कुव्वंति ।। [संबोधप्र० ४६३, ४६४]

इति, तर्हि किं कर्त्तव्यमित्याह-**अनुकूलैः** प्रियै**रितरैश्च** निष्ठुरैर्वचोभिरिति गम्यम्, **अनुशिष्टिः** शिक्षा **भवति दातव्ये**ति गाथार्थः।।१९७।।

चक्रे० : ननु सम्प्रत्याज्ञातिक्रमकारिण एव भूयांसस्ततः किं कार्यमित्याहुः –

देव० : ननु सम्प्रत्याज्ञातिक्रमकारिण एव महाजनपरिगृहीताश्च बहवस्तावदुपलभ्यन्ते, ततः कथमिदं कर्तुं शक्यमित्याशयवतामुपदिशति –

एवं पाएण जणा [१]कालणुभावा इहं तु सव्वे वि ।
नो [२]सुंदरत्ति तम्हा आणाजुत्तेसु पडिबंधो।।१९८।।

चक्रे० : एवं परिदृश्यमानप्रकारेण **प्रायेण जनाः** साधुश्रावकादयः **सर्वेऽपि, कालो** दुःषमा त**दनुभावादिह** भरतक्षेत्रे **नो सुन्दरा** नो भव्या नाऽऽज्ञावर्तिनः, **इति**र्वाक्यसमाप्तौ, **तस्मादाज्ञायुक्तेषु** स्वल्पेष्वपि **प्रतिबन्धो** बहुमानः कार्य इत्यर्थः।।१९८।।

देव० : एवमिति परिदृश्यमानप्रकारेण **प्रायेण** बाहुल्येन **जनाः** साधुश्रावकादयः **सर्वेऽपि कालानुभावाद्** दुःषमाप्रभावा**दिह** भरतक्षेत्रे, **तुः** पादपूरणे, **नो सुन्दरा** भव्याः सम्भवन्तीति योगः, यतः सम्प्रति द्रव्यतः प्रतिपन्नजिनशासना अपि बाहुल्येनाभव्या दूरभव्याश्चोक्ताः । **इति**शब्दो वाक्यपरिसमाप्तौ, **तस्मादाज्ञायुक्तेषु प्रतिबन्धः,** स्वल्पा अपि ये केचनाज्ञायां वर्त्तन्ते, तेष्वेव गुरुबुद्ध्या बहुमानो विधेय इति भाव इति गाथार्थः।।१९८।।

**** उपदेशपदे-८३९ ****

एवं पाएण जणा कालणुभावा इहंपि सव्वे वि ।
णो सुंदरत्ति तम्हा आणासुद्धेसु पडिबंधो ।।

एवमुक्तोदाहरणवत् **प्रायेण** बाहुल्येन **जना** लोकाः **कालानुभावाद्** वर्तमानकालसामर्थ्या**दिहापि** जैने मते **सर्वेऽपि** साधवः श्रावकाश्च **नो** नैव **सुन्दराः** शास्त्रोक्ताचारसारा वर्त्तन्ते, किन्त्वनाभोगादिदोषाच्छास्त्र-प्रतिकूलप्रवृत्तयः । **इति** पूर्ववत् । **तस्मात्** कारणा**दाज्ञाशुद्धेषु** सम्यगधीतजिनागमाचारवशात् शुद्धिमागतेषु श्रावकेषु **प्रतिबन्धो** बहुमानः कार्यः ।।८३९।।

१. कालाणुभावा P,K २. सुंदरुत्ति T,C ○ अत्र मूलगाथायां वर्णितः 'नो सुन्दर' शब्दस्य 'अभव्य-दूरभव्य' इति टीकार्थो जिनागमादिशास्त्रानुसारी न दृश्यते, उपदेशपदवर्णितोऽर्थो वास्तविक इति ज्ञायते । - सम्पा.

चक्रे० : आज्ञालोपिषु तर्हि का वार्त्तेत्याहुः –

देव० : आज्ञाविरहितेषु तर्हि का वार्त्तेत्याह –

इयरेसु वि य पओसो नो कायव्वो भवट्ठिई एसा ।
नवरं विवज्जणिज्जा विहिणा सय मग्गनिरएणं।।१९९।।

चक्रे० : **इतरेष्वप्याज्ञा**विकलेष्वपि **प्रद्वेषो** मत्सरो **न कर्त्तव्यः**, **भवस्थितिरेषा** कर्मवैचित्र्याज्जघन्यमध्यमोत्तमजन्तुभिर्भाव्यमिति चिन्त्यम् । **नवरं विवर्जनीया** आलापाद्यै-**र्विधिना** सूत्रनीत्या । **सदा मार्गनिरतेन** सिद्धान्तोक्तनीतिवर्तिना।।१९९।।

देव० : इतरेष्वप्याज्ञाविकलेषु **प्रद्वेषो** मत्सरो **न कर्त्तव्यः,** यतो **भवस्थितिरेषा** यद्विचित्र-कर्मपरिणतेरेव जघन्यमध्यमोत्तमैर्जन्तुभिर्भाव्यमिति । **नवरं** केवलं **विवर्जनीया** आलापादि-भि**र्विधिना** सूत्रनीत्या **सदा मार्गनिरतेन** समयोक्तनीतिवर्त्तिनेति गाथार्थः ।।१९९।।

**** उपदेशपदे-८४० ****

इयरेसुंपि य पओसो णो कायव्वो भवट्ठिई एसा ।
णवरं विवज्जणिज्जा विहिणा सइ मग्गणिरएण ।।

इतरेष्वपि जिनवचनप्रतिकूलाऽनुष्ठानेषु समुपस्थितदुर्गतिपातफलमोहाद्यशुभकर्मविपाकेषु लोकोत्तर-भिन्नेषु जन्तुषु **प्रद्वेषो** मत्सरस्तद्दर्शने तत्कथायां वाऽक्षमारूपो **नो** नैव **कर्तव्यः** । तर्हि किं कर्तव्यमि-त्याशङ्क्याह–**भवस्थितिरेषा,** यतः कर्मगुरवोऽद्याप्यकल्याणिनो न जिनधर्माचरणं प्रति प्रह्वपरिणामा जायन्त इति चिन्तनीयम्। तथा, **नवरं** केवलं **विवर्जनीया** आलापसंलापविश्रम्भादिभिः परिहरणीया **विधिना** विविक्तग्रामनगरवसत्यादिवासरूपेण **सदा** सर्वकालं **मार्गनिरतेन** सम्यग्दर्शनादिमोक्षमार्गस्थितेन साधुना श्रावकेण च । अन्यथा तदालापसंभाषादिना संसर्गकरणे कुष्ठज्वररोगोपहतसंसर्ग इव तत्तद्दोषसञ्चारा-दिहलोकपरलोकयोरनर्थावाप्तिरेव । अत एवोक्तम् –

सीहगुहं वग्घगुहं उदयं च पलित्तयं च सो पविसे । असिवं ओमोयरियं दुस्सीलजणप्पिओ जो उ ।। इति ।।८४०।।

चक्रे० : अत्रैव विशेषमाहुः –

देव० : अत्रैव विशेषमाह –

अग्गीयादाइन्ने खित्ते अन्नत्थ ठिईअभावंमि[१] ।
भावाणुवघायणुवत्तणाए[२] तेसिं तु वसियव्वं।।२००।।

१. ठिइ A,P,K २. वत्तणाइ P,K

चक्रे०: अगीतार्थादयः पार्श्वस्थाद्यास्तै**राकीर्णे** व्याप्ते भाविते **क्षेत्रे** नगरादौ, **अन्यत्र स्थित्यभावे**ऽवस्थानयोग्यक्षेत्रान्तराऽभावे, **भावस्य** चारित्रपरिणामस्या**नुपघातेन** मनः-कालुष्यहेतुतत्कलहत्यागेन **तेषामनुवर्त्तनया** वाङ्नमस्काराद्यानुकूल्येन **वस्तव्यम्** । क्षेत्रान्तरे **तु** सति तद्भाविते न वस्तव्यमित्यर्थः ।।२००।।

देव० : अगीत इत्येकदेशेऽपि समुदायावगमा**दगीतार्थ**स्ततश्च - 'गीयं मुणितेगट्ठं [१]विदियत्थं खलु वयंति गीयत्थं' इति वचनाद् गीतो ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च विदितोऽर्थो येन स गीतार्थः, न तथा पार्श्वस्थ इत्यर्थः स आदिर्येषामवसन्नादीनाम्, **तै राकीर्णे** व्याप्ते भावित इति यावत्, **क्षेत्रे** नगरादा**वन्यत्र** क्षेत्रान्तरे, **स्थी**यत एभिरिति **स्थितयो**ऽवस्थानकारणानि, तासा**मभावे**, अवस्थानयोग्यक्षेत्रान्तरे सति पार्श्वस्थादिभाविते वस्तव्यमेव नेति भावः । **तेषां** पार्श्वस्थादीनां **तु**विशेषणे दर्शयिष्यते च **भावस्य** चारित्रपरिणाम**स्यानुपघातेन** मनःकालुष्यहेतुतत्कलहत्यागेनेति हृदयम्, **अनुवर्त्तनया** चानुकूल्येन वाङ्नमस्कारादिलक्षणेन पुन**र्वस्तव्यमि**ति गाथार्थः ।।२००।।

**** उपदेशपदे-८४१ ****

ननु प्रमत्तपाखण्डिजनाकुलत्वात् प्रायो विहारक्षेत्राणामशक्यमालापादिवर्जनमित्याशङ्क्याह –

अग्गीयादाइण्णे खेत्ते अणत्थ ठिइअभावम्मि ।
भावाणुवघायणुवत्तणाए तेसिं तु वसियव्वं ।।

अगीताद्याकीर्णेऽगीतार्थैरादिशब्दाद् गीतार्थैरपि मन्दधर्मैः पार्श्वस्थादिभिस्तीर्थान्तरीयैश्च भागवतादि-भिराकीर्णे समन्ताद् व्याप्ते **क्षेत्रे, अन्यत्रा**गीतार्थाद्यनाकीर्णक्षेत्रे दुर्भिक्षराजदौस्थ्याद्युपप्लववशेन **स्थित्यभावे** सति भावानुपघातेन सम्यक्प्रज्ञापनारूपस्य शुद्धसमाचारपरिपालनरूपस्य च भावस्यानुपघातेन याऽनुवर्तना 'वायाए णमोक्करो' इत्यादिरूपानुवृत्तिस्तया तेषां **तु तेषामेव वसितव्यं** तत्र क्षेत्रे । एवं हि तेऽनुवर्त्तिताः स्वात्मनि बहुमानवन्तः कृता भवन्ति, राजव्यसनदुर्भिक्षादिषु साहाय्यकारिणश्चेति ।।८४१।।

चक्रे०/देव० : अन्यथा दोषमाह –

इहरा सपरुवघाओ उच्छोभाईहिं अत्तणो लहुया ।
तेसिं पि पावबंधो दुगं पि एयं अणिट्ठं ति।।२०१।।

चक्रे०/देव० : इतरथा तदकरणे **स्वपरोपघात**स्तथा चोत्प्राबल्येन गता शोभा यस्मात्त-**दुच्छोभमा**लप्रदानम्, **तदादिभि**रादिशब्दात्कलहादिभि**रात्मनो लघुता** लाघवम्, **तेषामपि पापबन्धो** गुणिजनप्रद्वेषाद्, **द्वयमपि चैतदनिष्टमिति** प्रक्रमसमाप्ताविति गाथार्थः ।।२०१।।

१. विइयत्थं B, C

** उपदेशपदे-८४२ **

विपर्यये बाधकमाह –

इहरा सपरुवघाओ उच्छुभाईहिं अत्तणो लहुया ।
तेसिंपि पावबंधो दुगंपि एयं अणिट्ठंति ।।

इतरथा तेषामननुवर्तनया वासे क्रियमाणे **स्वपरोपघातः** सम्पद्यते । एनमेव दर्शयति- **तत्रोत्क्षोभो** हेरिकाचौर्याद्यध्यारोपरूपः, **आदि**शब्दात् कथञ्चित् कस्यचित् प्रमादाचरितस्योपलब्धस्य मत्सरातिरेकात् । सुदूरविस्तारणम्, तथाविधकुलेष्वन्नपानादिव्यवच्छेदश्च गृह्यते, ततस्तै**रात्मनः** स्वस्य **लघुता**ऽनादेयरूपता भवति, **तेषामपि पापबन्धो** बोधिघातफलः, न केवलं स्वस्य तन्निमित्तभावेनेत्यपिशब्दार्थः । एवं च सति यत् स्यात् तद्दर्शयति–**द्विकमप्येतत्** पूर्वोक्त**मनिष्टं** दुर्गतिपातकारि जायते । **इतिः** पूर्ववत् ।।८४२।।

** जीवानुशासने-८९, ९० **

अस्यैवार्थस्य साधनार्थमुपदेशपदोक्तं गाथाद्वयमाह –

अगीयादाइन्ने खेत्ते अन्नत्थ ठिइअभावम्मि ।
भावाणुवघायणुवत्तणाए तेसिं तु वसियव्वं ।।
इहरा सपरुवघाओ उच्छोभाईहिं अत्तणो लहुया ।
तेसिंपि पावबंधो दुगंपि एयं अणिट्ठंतु ।।

अगीताद्याकीर्णे श्रुतार्थानभिज्ञपार्श्वस्थाद्याकुले **क्षेत्रे** ग्रामादा**वन्यत्र** नगरादौ निर्वाहाभावतः **स्थित्यभावेऽ**-विद्यमानवासे **भावानुपघातानुवर्तनया** चित्तासङ्क्लेशेनाऽऽनुकूल्येन च **तेषाम**गीतादीनां **तु** पादपूरणे **वस्तव्यम्** । व्यतिरेकमाह–**इतरथा**ऽनुवर्त्तनाद्यभावे **स्वपरोपघात** आत्मान्यसंक्लेशः, **'उच्छोभाईहिं'** ति असद्दोषाविष्करणादिभिः, आदिशब्दादपकारादिग्रहः, **आत्मनः** स्वस्य **लघुता** माहात्म्याभावः, **तेषां** पुनरगीतादीना**मपि,** तु पुनरर्थः, स च योजित एव, **पापबन्धः** कलुषोपचयः । **द्वयमप्येतत्** पूर्व्वोक्त**मनिष्टमेव**। **तु**रेवकारार्थः, स च दर्शित एव । न चैतदनार्षम्, प्रकरणोक्तत्वात् । यतो निशीथे भणितं–'खेत्तं तु ओसन्नाइ भावियं तत्थ तयाणुवत्ती वसियव्वं' तथा पञ्चकल्पेऽपि भणितम्– 'अणाययणं वज्जयंतेणं विहारो कायव्वो । के उण अणायणा ? भन्नइ–पासत्थाइणो कुलिंगिणो य ।' एतच्च विशुद्धयत्यपेक्षया बोद्धव्यम्। ये पुनः पूर्वोक्तयुक्त्या पार्श्वस्थादयः सुतरां विवाद एव न कार्य इति गाथाद्वयार्थः ।।८९, ९०।।

चक्रे० : निगमनमाहुः –

देव० : निगमनमाह –

ता दव्वओ य तेसिं अरत्तदुट्ठेण कज्जमासज्ज ।
अणुवत्तणत्थमीसिं[१] कायव्वं किंपि नो भावा।।२०२।।

चक्रे० : ततो द्रव्यतस्तेषामरक्तद्विष्टेन साधुना **कार्यं** ज्ञानादिक**मासाद्याऽनुवर्त्तनार्थ-मीषद्वाङ्**नमस्कारादि **कर्त्तव्यम्, न किमपि भावतः,** तथा च –

वायाए नमोक्कारो - हत्थुस्सेहो य सीसनमणं वा ।
संपुच्छणऽच्छणं - छोभवंदणं - वंदणं वावि ।। [आव.नि० ११२७] ।।२०२।।

देव० : तत्तस्माद् द्रव्यतस्तुरेवकारार्थे, **तेषामरक्तदुष्टेन** साधुनेति गम्यम्, **कार्यं** ज्ञानचरणादिक**मासाद्याऽनुवर्त्तनार्थमीषन्**नमस्कारमात्रादिकं **कर्त्तव्यम्, न** पुनः **किञ्चिदपि भावतः,** तथा चात्रागमः

वायाए - नमोक्कारो[२]-हत्थुस्सेहो य - सीसनमणं वा ।
संपुच्छणऽच्छणं - छोभवंदणं वंदणं वावि ।।
परियायपरिसपुरिसं खेत्तं कालं च आगमं नाउं ।
कारणजाए जाए जहारिहं जस्स जं जोग्गं ।।
एयाइं अकुव्वंतो जहारिहं अरिहदेसिए मग्गे ।
न भवइ पवयणभत्ती अभत्तिमंताइया दोसा ।। [आव.नि० ११२७,२८,२९]

अभक्त्यादयोऽभक्तिप्रद्वेषस्वार्थभ्रंशबन्धनादयो दोषा इति गाथार्थः।।२०२।।

**** उपदेशपदे-८४३ ****

ता दव्वओ य तेसिं अरत्तदुट्ठेण कज्जमासज्ज ।
अणुवत्तणत्थमेसिं कायव्वं किंपि ण उ भावा ।।

यत एवमनुवर्तनायां दोषः, **तत्** तस्माद् **द्रव्यतस्तु** कायवाङ्मात्रप्रवृत्तिरूपादेव **तेषाम**गीतार्थादीनाम्, **अरक्तद्विष्टेन** रागद्वेषयोरन्तरालवर्त्तिना सता **कार्यं** निरुपवासलक्षणमाश्रित्या**नुवर्त्तनार्थ**मनुकूलभाव-सम्पादननिमित्तम्, **एषाम**गीतार्थादीनां **कर्त्तव्यं किमपि** वचनसंभाषादि, **न तु भावाद्** बहुमानरूपात् । कलाध्ययनोक्तश्चेत्थमेतद्वन्दनाविषयोऽपवाद उपलभ्यते । यथा –

१. अणुयत्तणत्थमीसिं T,C,Z अणुयत्तणत्थमीसं A २. आलपत्ते नमुक्कारो A,T,B,C

परिवारपरिसपुरिसं खेत्तं कालं च आगमं णाउं । कारणजाए जाए जहारिहं जस्स जं जोग्गं ।।
परिवारो से सुविहिया परिसगओ साहई च वेरग्गं । माणी दारुणभावो नितसंपुरिसाहमो पुरिसो ।।
लोगपगओ निवो वा अहवा रायाइदिक्खिओ होज्जा । खेत्तं विहिमाइ अभावियं न कालो अणागालो ।।
विहिमाइत्ति–कांतारादि ।
दंसणणाणचरित्तं तवविणयं जत्थ जत्तियं पासे। जिणपण्णत्तं भत्तीए पूयए तत्थ तं भावं ।। तथा ।।
गच्छपरिरक्खणट्ठा अणागयं आउवायकुसलेण । एवं गणाहिवइणा सुहसीलगवेसणा कज्जा।।
उप्पन्नकारणम्मी कीकम्मं जो न कुज्ज दुविहंपि । पासत्थाईयाणं चउगुरुगा भारिया तस्स ।।
इत्यादि ।।८४३।।

चक्रे० : ननु पूर्वमालापाद्यप्यमीभिः सार्द्धं निषिद्धम्, तत्कथमेतदुच्यते ? सत्यम्, अपवादमाश्रित्य, अथापवादोत्सर्गयोः कः कस्मात् सिद्ध्यतीत्याहुः –

देव० : ननु पूर्वमालापाद्यप्यमीभिः सार्द्धं निषिद्धम्, तत्कथमिदमुच्यते ? सत्यमपवादमाश्रित्य, अथोत्सर्गापवादयोः कः कस्मात्सिद्ध्यतीत्याह –

उन्नयमविक्ख निन्नस्स पसिद्धी उन्नयस्स निन्नाओ ।
इय [१]अन्नोन्नावेक्खा उस्सग्गववाय दो तुल्ला।।२०३।।

चक्रे० : उन्नतमपेक्ष्य निम्नस्य प्रसिद्धिः, उन्नतस्य च **निम्नात्, इत्येवं** प्रकारेणाऽन्योन्यापेक्षावुत्सर्गापवादौ **द्वावपि तुल्यौ** न कोऽपि कुतोऽपि सिद्ध्यति, निशीथेऽप्युक्तम् –

जावइया उस्सग्गा तावइया चेव हुंति अववाया ।
जावइया अववाया तावइया चेव उस्सग्गा ।। [उप. र० १३७]

अतो द्वयोरपि भगवदुक्तत्वेन निर्जराहेतुत्वम्।।२०३।।

देव० : उन्नतमपेक्ष्य निम्नस्य प्रसिद्धिः सद्भावः, **उन्नतस्य निम्नात्,** ल्यब्लोपे पञ्चमी, निम्नमपेक्ष्येत्यर्थः, **इत्येवमन्योन्यापेक्षावुत्सर्गापवादौ द्वावपि तुल्यौ** निम्नत्वोन्नतत्वपरत्वापरत्ववत्परस्परसव्यपेक्षितौ, अनयोर्न पुनः कश्चित्कुतोऽपि सिद्ध्यतीति भावः, अत एव निशीथादिसूत्राणि सर्वाणि सापवादानि पठ्यन्ते तथा च तत्रैवोक्तम् –

जावइया उस्सग्गा तावइया चेव हुंति अववाया ।
जावइया अववाया तावइया चेव उस्सग्गा ।। [उप. र० १३७]

२. अन्नुन्नावेक्खा T,C उन्नन्नाविक्खा P, K

अतो द्वयोरपि भगवदुक्तत्वेन निर्जराहेतुत्वम्, केवलमशाठ्येन सम्यग्विषयविभागः विवेचनीय इति गाथार्थः ।।२०३।।

** बृहत्कल्पभाष्ये-३२१ **

उन्नयमविक्ख निन्नस्स पसिद्धि उन्नयस्स निन्नाओ ।
इय अन्नुन्नपसिद्धा उस्सग्गऽववाय मो तुल्ला ।।

यथोन्नतमपेक्ष्य निम्नस्य प्रसिद्धिर्निम्नाद्योन्नतस्य प्रसिद्धि **इत्येवमन्योऽन्यप्रसिद्धा**वुत्सर्गादपवादोऽपवादादुत्सर्गः प्रसिद्ध इति द्वाव**प्युत्सर्गाऽपवादौ तुल्यौ** ।

तदेवमुत्सर्गापवादद्वारमुक्तम् । इदानीमल्पद्वारमुच्यते । शिष्यः पृच्छति-भगवन् ! किमुत्सर्गा अल्पे ? उतापवादाः ? उच्यते-तुल्याः ।।३२१।।

** उपदेशपदे-७८४ **

अथोत्सर्गापवादयोस्तुल्यसंख्यत्वमाह -

उन्नयमवेक्ख इयरस्स पसिद्धी उन्नयस्स इयराओ ।
इय अन्नोन्नपसिद्धा उस्सग्गववाय मो तुल्ला ।।

उन्नतमुच्चं पर्वतादिकम**पेक्ष्येतरस्य** नीचस्य भूतलादेः **प्रसिद्धि**र्बालाबलादेर्जनस्य प्रतीतिः तथो**न्नतस्यो**क्तरूप**स्येतरस्माद्** निम्नात् तदपेक्ष्येत्यर्थः प्रसिद्धिः सम्पद्यते । एवं सति यत् सिद्धं तदाह- **इत्ये**वमुक्तदृष्टान्ता**दन्योन्यप्रसिद्धाः** परस्परमपेक्षमाणाः प्रतीतिविषयभावभाजः सन्त **उत्सर्गापवादास्तुल्याः** समानसंख्याः सम्पद्यन्त इति ।।७८४।।

चक्रे० : अथ पर्यवसितमर्थं किं बहुनेति प्रस्तावनापूर्वमाहुः -

देव० : अथ विस्तरप्रसङ्गं वाक्यखण्डेन निरुन्धन्नुक्तानुक्तार्थसंग्रहं संक्षिप्य शार्दूलेनाह -

किं बहुणा -

मा आयन्नह मा य मन्नह गिरं कुतित्थियाणं तहा,
सुत्तुत्तिन्नकुबोहकुग्गहगहग्घत्थाणमन्नाण वि ।
नाणीणं [१]चरणुज्जयाण य तहा किच्चं करेहायरा;
निस्सेसं जणरंजणत्थमुचियं [२]लिंगावसेसाणवि।।२०४।।

१. चरणुज्जुयाण A,K,Z २. लिंगाविसेसाण A

चक्रे० : मा आकर्णयत मा च मन्यध्वं कुतीर्थिकानां गिरम्, सूत्रोत्तीर्णः कुबोध एव **कुग्रहस्तस्य ग्रहस्तेन ग्रस्तानामन्येषामपि** स्वयूथ्यानां गिरं माऽऽकर्णयत मा च मन्यध्वम् । **तथा ज्ञानिनां चरणोद्यतानां चादरान्निःशेषं कृत्यं** कृतिकर्मादि **कुरुत, जनरञ्जनार्थं चोचितं** आलापनमस्कारादि**लिङ्गावशेषाणमपि** कुरुतेति वृत्तार्थः ।।२०४।।

देव० : किम् ? न किञ्चिदित्यर्थः, **बहुनो**क्तेनेति शेषः, सङ्क्षेपस्यैव प्रक्रान्तत्वाद् **मा आकर्णयत** ? कदाचिदाकर्णनेऽपि **मा च मन्यन्ताम**भ्युपगच्छत **गिरं** वाचं **कुतीर्थिकानां** शाक्यादीनाम्, **तथा** तेनैव प्रकारेण **सूत्रोत्तीर्णो**ऽत एव **कुत्सितो बोधस्तेन कुग्रहः** कदभिनिवेशः स एव **ग्रहस्तेन ग्रस्तानां** स्वीकृतानामन्येषामपि[१] स्वयूथ्यानां गिरमिति सक्रियमिहापि सम्बध्यते । तथा च कल्पभाष्यम् –

जो तं जगप्पईवेहिं पणीयं सव्वभावपन्नवणं ।
न कुणइ सुयं पमाणं न सो पमाणं पवयणंमि ।। [ ]

ज्ञानिनां चरणोद्यतानां च, चकारो ज्ञानचरणयोः समुदितयोरेव प्रामाण्यमावेदयति, यदाह-

नाणाहीणं सव्वं नाणनओ भणइ किंच किरियाए ।
चरणनओ किरियाए तदुभयगा होइ समत्तं ।। [ ] इति ।

तथा सूत्रभणितप्रकारेण **निःशेषं कृत्यं** कृतिकर्मादि **कुरुतादरात्** सर्वप्रयत्नेन, **लिङ्गमेवावशेष**[२] उद्धरितं येषाम्, न पुनर्ज्ञानादि, तेषामपि **जनरञ्जनार्थमुचितमा**लापनमस्कारादि कुरुतेति वृत्तार्थः ।।२०४।।

चक्रे० : तथा –

देव० : तथा –

गुरुकम्माण जियाणं असमंजसचिट्ठियाणि[३] दट्ठूण ।
निंदपओसं मणयंपि सव्वहा संविवज्जेज्जा[४]।।२०५।।

चक्रे० : स्पष्टा, नवरं **निन्दां** दोषभाषणं **प्रद्वेषं** मात्सर्यं **मनागपी**षदपि **सर्वथा सम्यग् विवर्जयत** ।।२०५।।

---

१. स्वीयकृतानाम् T,B,C २. लिङ्गमेवाविशेष A, ३. चेट्ठियाणि A चेट्ठियाइं Z ४. संविज्जेह T,B,C

देव० : गुरुकर्मणां जीवानामसमञ्जसचेष्टितानि तथा तथा प्रवचनप्रतिषिद्धाचरणानि, **दृष्ट्वा निन्दां** दोषभाषणं **प्रद्वेषं** मात्सर्यं **मनागपी**षदपि **सर्वथा**त्मपरोभयैः **सम्यग**न्तः-करणशुद्ध्या **विवर्जयते**ति गाथार्थः ।।२०५।।

चक्रे० : अन्यच्च –

देव० : अन्यच्च –

दूसमकालसरूवं कम्मवसित्तं च [१]तेसिं जीवाणं ।
भावेह कुणह गुरुआयरं च गुणवंतपत्तेसु ।।२०६।।

चक्रे० : सुगमा ।।२०६।।

।। इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृत्तौ समर्थितं चतुर्थं साधुतत्त्वम् ।।

देव० : दुःषमकालस्वरूपं कर्मवशित्वं च तेषां दुःषमासमयोद्भवानां **जीवानां भावयत** विचिन्तयत, अत एव दुर्लभत्वाद् गुणवतां **कुरुत गुर्वादरं च गुणवत्पात्रेषु,** इह च गुणवत्प्रति-पत्तिमितरवर्जनं च पुनःपुनरुपदिशन्निदमेवैहिकामुष्मिकार्थसाधकमित्यावेदयतीति गाथार्थः ।।२०६।।

।। इति श्रीदेवभद्रसूरिविरचिते दर्शनशुद्धिप्रकरणविवरणे चतुर्थं साधुतत्त्वं समाप्तम् ।।श्रीरस्तु।।

---

१. सव्वजीवाणं P,K

५-तत्त्वतत्त्वम्

चक्रे० : अथ मूलद्वारगाथाक्रमप्राप्तं पञ्चमतत्त्वं व्याख्यायते, संबन्धश्चास्य पूर्वेण सह पूर्वं गुरुस्वरूपमुक्तम्, गुरुश्च तत्त्वानि गृणातीत्यतस्तत्त्वाख्यं तत्त्वमुच्यते, तत्रादौ गाथा –

देव० : अथ मूलद्वारगाथाक्रमप्राप्तस्य पञ्चमतत्त्वस्य व्याख्या प्रतन्यते, सम्बन्धश्च पूर्वेण सहास्य पूर्वं गुरुस्वरूपमुपवर्णितम्, गुरुश्च तत्त्वानि गृणातीति सम्बन्धादत्र तत्त्वानि प्रतिपाद्यन्ते, तत्रादौ–

जीवाजीवा पुन्नं पावासवसंवरो य निज्जरणा ।
बंधो मुक्खो य तहा नवतत्ता हुंति नायव्वा ।।२०७।।

चक्रे० : १-**जीव**श्चिद्वान्, २-**अजीवो** निश्चेतनः, ३-**पुण्यं** शुभप्रकृतिरूपम्, ४-**पापम**शुभप्रकृतिरूपम्, ५-आश्रवत्याऽऽगच्छत्यनेन कर्मे**त्याश्रवो** हिंसादिः, ६-संवरणं **संवर** आश्रवनिरोधः, ७-निर्जरणं **निर्जरा** विपाकात् तपसो वा कर्मपरिशाटः, ८-**बन्धो** जीवकर्मणोरत्यन्ताऽऽश्लेषः, ९-**मोक्षः** सर्वकर्ममुक्तस्याऽऽत्मनः स्थितिः, **चै**वार्थे । एतान्येव **नवतत्त्वानि तथा** सिद्धान्तोक्तप्रकारान्तरेण **ज्ञातव्यानि** न तु कुतीर्थिककल्पितानि।। २०७।।

देव० : तत्र जीवितवन्तो जीवन्ति जीविष्यन्ति चेति **जीवाः**, व्युत्पत्तिनिमित्तं चेदम्, प्रवृत्तिनिमित्तं तु संविल्लक्षणत्वमेव, तेन सिद्धैर्न व्यभिचारस्ततो जीवाश्च तद्विपरीता **अजीवाश्चे**ति द्वन्द्वः, **पुण्यं** शुभप्रकृतिरूपं तीर्थकरनामादि, **पापम**शुभं मिथ्यात्वादि, विभक्तिलोपश्च प्राकृतत्वाद्, एवमुत्तरत्रापि, आश्रवत्यागच्छत्यनेन कर्मे**त्याश्रवः** कर्मोपादानहेतुर्हिंसादिः, संवरणं **संवरो** गुप्त्यादिभिराश्रवनिरोधः, **चः** समुच्चये, **निर्जरणा** निर्जरा विपाकात्तपसो वा कर्मपरिशाटः, **बन्धो** जीवकर्मणोरत्यन्तसंश्लेषः, **मोक्षः** कृत्स्नकर्मक्षयात् स्वात्मन्यवस्थानम्, **च**कारोऽवधारणे, एतान्येव तत्त्वानि, न पुनः सुगतसाङ्ख्योलूकादिपरिकल्पितानि, तेषां विचाराक्षमत्वात् । **तथा** तेनागमोक्तप्रकारेण **नवतत्त्वानि,** प्राकृतत्वात् पुंसा निर्देशः, **भवन्ति ज्ञातव्यानि** । इह च

तत्त्वानां नवसङ्ख्यत्वं मध्यमप्रस्थानापेक्षया, अन्यथा सङ्क्षेपापेक्षया जीवाजीवयोरेव बन्धादीनामन्तर्भावसम्भवाद् द्वित्वमेव, विस्तरतस्तु तदुत्तरोत्तरभेदविवक्षयाऽऽनन्त्यमेव स्यादिति गाथासङ्क्षेपार्थः ।।२०७।।

** नवतत्त्वप्रकरणे-४ **

जीवादिनवपदार्थज्ञाने सम्यक्त्वमित्युक्तम् । तत्र के जीवादयः ? इति शङ्कासम्भवे सूत्रकार एवं तान्नामग्राहमाह –

जीवाजीवा पुन्नं पावासवसंवरो य निज्जरणं ।
बन्धो मोक्खो य तहा नवतत्ता होंति नायव्वा ।।

जीवाश्चोपयोगलक्षणा अजीवाश्च तद्विपरीता **जीवाजीवाः, पुण्यं** शुभोदयप्रकृतयः, पापं च तद्विपरीतम्, आश्रूयते कर्मोपादीयते येन स आश्रवश्च कर्मोपादानहेतुः, पापाश्रवौ तत्सहितः संवरस्तन्निरोधलक्षणः **पापाश्रवसंवरः, चः** समुच्चये, **निर्जरणं** पूर्वोपात्तकर्म्मपरिशाटः, **बन्धो** जीवप्रदेशानां कर्म्मपुद्गलैरन्योन्यानुगमात्मकसम्बन्धः, **मोक्षः** सकलकर्मविगमः । **चः** पूर्ववत् । **तथा** अनेन वस्तुत्वप्रकारेण **नवतत्त्वानि** नवसंख्यपदार्था **भवन्ति** जायन्ते, **ज्ञातव्यानि** बोद्धव्यानि । इति गाथार्थः ।।४।।

** प्रवचनसारोद्धारे-९७४ **

अथ नव पदान्याह–

जीवाजीवा पुन्नं पावाऽऽसव संवरो य निज्जरणा ।
बंधो मोक्खो इमाइं नव पयाइं जिणमयंमि ।।

'जीवे'त्यादि, **जीवाः** सुखदुःखोपयोगलक्षणा **अजीवास्**तद्विपरीता धर्मास्तिकायादयः **पुण्यं** शुभप्रकृतिरूपं कर्म, **पापं** तद्विपरीतं कर्मैव, आश्रवति–आगच्छति कर्मानेने**त्याश्रवः** शुभाशुभकर्मोपादानहेतुर्हिंसादिः, संवरणं **संवरो** गुप्त्यादिभिराश्रवनिरोधः, निर्जरणं **निर्जरा** विपाकात्तपसो वा कर्मणां देशतः क्षपणं **बन्धो** जीवकर्मणोरत्यन्तसंश्लेषः, **मोक्षः** कृत्स्नकर्मक्षयादात्मनः स्वात्मन्यवस्थानम्, **इत्येतानि नव**सङ्ख्यानि **पदानि** तत्त्वानि **जिनमते**ऽर्हत्प्रवचने विज्ञेयानीति, इह च आश्रवबन्धपुण्यपापानि मुख्यं संसारकारणमिति हेयानि, संवरनिर्जरे मुख्यं मोक्षकारणम्, मोक्षस्तु मुख्यं साध्यमित्येतानि त्रीण्यप्युपादेयानीत्येवं शिष्यस्य हेयोपादेयतापरिज्ञानार्थं मध्यमप्रस्थानापेक्षया नवेत्युक्तम्, अन्यथा सङ्क्षेपापेक्षया जीवाजीवयोरेव पुण्यपापादीनामन्तर्भावसंभवाद् द्वित्वसङ्ख्ययैवाभिधेयं स्यात्, तथा चोक्तं स्थानाङ्गे–'जदत्थिं च णं लोए तं सव्वं दुपडोयारं, तंजहा–जीवा चेव अजीवा चेव'त्ति, विस्तरतस्तु तदुत्तरोत्तरभेदविवक्षयाऽऽनन्त्यमेव स्यात्, अथ कथं जीवाजीवयोरेव पुण्यपापादीनामन्तर्भावसम्भव इति चेदुच्यते–पुण्यपापे कर्मणी बन्धोऽपि तदात्मक एव कर्म च पुद्गलपरिणामः पुद्गलाश्चाजीवा इति, आश्रवस्तु

मिथ्यादर्शनादिरूपः परिणामो जीवस्य, स चात्मानं पुद्गलांश्च मुक्त्वा कोऽन्यः ?, संवरोऽप्याश्रव-निरोधलक्षणो देशसर्वभेद आत्मनः परिणामो निवृत्तिरूपः, निर्जरा तु कर्मपरिशाटो जीवः कर्मणां यत्पार्थक्यमापादयति स्वशक्त्या, मोक्षोऽपि सकलकर्मविरहित आत्मैवेति, अन्यत्र पुनः पुण्यपापयो-र्बन्धेऽन्तर्भावात् सप्तैव तत्त्वान्युक्तानि ।।९७४।।

चक्रे० : अथ यथोद्देशं निर्देश इति जीवतत्त्वं विवृण्वन्ति –

देव० : अथ प्रत्येकमेतान् विवरितुकामो यथोद्देशं निर्देश इति न्यायादादौ जीवतत्त्वं विवृणोति –

एगविह-दुविह-तिविहा चउहा पंचविहछव्विहा जीवा ।
चेयण तस इयरेहिं वेयगइकरणकाएहिं।।२०८।।

चक्रे० : एकविधादयो जीवा भवन्ति, कथमिति क्रमेणाहुः **'चेयण'**इत्यादि । चेतनया **एकविधाः** सर्वजीवानां तदव्यभिचारात्, त्रस्यन्तीति **त्रसा इतरे** च स्थावरास्तेषां भावस्तत्त्वं तेन **द्विविधाश्च**राऽचररूपत्वात् सर्वजीवराशेः, एवमुत्तरत्राऽपि लक्षणानां व्यापकत्वं ज्ञेयम्, **वेदैः** स्त्रीपुंनपुंसकै**स्त्रिविधाः**, **गतिभि**र्नारकतिर्यग्नरामररूपाभि**श्चतुर्द्धा, करणैः** स्पर्शनादिभिरिन्द्रियैः **पञ्चविधाः**, **कायैः** पृथ्वीकायादिभिः **षड्विधाः**।।२०८।।

देव० : एकविधद्विविधत्रिविधाश्चतुर्द्धा पञ्चविधषड्विधा जीवा भवन्तीति शेषः, कथमिति क्रमेणाह **'चेयण'**इत्यादि, चेतनया एकविधाः, सर्वसत्त्वानां तदव्यभिचारात्, **त्रसाश्च** चरा **इतरे** च स्थावरास्तेषां भावस्तत्त्वम्, तेन च द्विविधाश्चरत्वाचरत्वलक्षणसङ्गृहीतत्वात् सकलसंसारि-सत्त्वराशेरेवमुत्तरत्रापि लक्षणानां व्यापकत्वमभिधेयमिह च सूत्रे लुप्तभावप्रत्ययं पदमुपात्तमिति। **वेदैः** स्त्रीपुंनपुंसकैस्त्रिविधाः, **गतिभि**र्नारकतिर्यङ्नरामरलक्षणाभिश्चतुर्द्धा, **करणैः** स्पर्शनादि-भिरिन्द्रियैः पञ्चविधाः, **कायैः** पृथ्वीकायादिनिकायैः षड्विधाः ।

नन्वयं भित्तिं विना चित्रकर्मप्रबन्धप्रारम्भः, जीवमेव [न] मन्यामहे, तत्कुतस्तद्भेदपरिकल्पनम्, तथाहि – नास्त्यात्मा, अनुपलम्भात्, वियदरविन्दवत्, न च हेतोरसिद्धत्वम्, न ह्यसौ शरीरे शरीरव्यतिरिक्तो वा भवान्तरं गच्छन् प्रत्यक्षत उपलभ्यते । न च चैतन्योपलम्भात्तत्सिद्धिस्तस्य भूतधर्मत्वात्, तथाहि – पृथिव्यप्तेजोवायुरिति तत्त्वानि । एतेभ्यश्चैतन्यं मद्याङ्गेभ्यो मदशक्तिवदिति । अत्र प्रतिविधीयते। अनुपलम्भादितिहेतुः स्वसम्बन्धीसर्वसम्बन्धी वा, यदि स्वसम्बन्धी तन्न, स्वयं घटादिवत्तस्योपलम्भात्, यथैव हि घटगता रूपादय उपलभ्यन्ते तथात्मगता

अपि ज्ञानसुखादयः, इति नात्र महदन्तरम् । अथायं न दृग्विषय इति नास्ति, न अस्याप्यनेकान्तात्, उक्तं हि – न च नास्तीह तत्सर्वं चक्षुषा यन्न गृह्यते, अन्यथा चैतन्यमपि न दृग्विषय इति तस्याप्यसत्वमापद्येत। अथ तत्स्वसंविदितमिति सदुच्यतेऽयमपि तथाभूत एवेति । यदुक्तम् – अस्त्येव चात्मा प्रत्यक्षो जीवो ह्यात्मानमात्मनाऽहमस्मीति संवेत्ति, रूपादीनि यथेन्द्रियैरिति । किं बहुना, यथा चैतन्यमस्तीत्यभ्युपगम्यते, तथात्माप्यभ्युपगन्तव्यः, तथा चाह -

ज्ञानं स्वस्थं परस्थं वा यथा ज्ञानेन गृह्यते ।
ज्ञाता स्वस्थं परस्थं वा तथा ज्ञानेन गृह्यताम् ।। [ ] इति।

अथ सर्वसम्बन्धी हेतुः, अयमप्यसिद्धोऽहमस्मीति प्रत्ययेन प्रतिप्राणि स्वात्मनः केवलिनां च सर्वात्मनामुपलम्भादिति । यदपि चैतन्यं भूतधर्म इत्यभिहितम्, तदपि प्रलापमात्रम्, भूतधर्मत्वे हि लेष्ट्वादिष्वप्युपलभ्येत । अथ कायाकारपरिणतेष्वेव तदुन्मीलतीति चेदिदमप्यनैकान्तिकं मृत-शरीरेष्वनुपलम्भादिति । तस्मादस्ति जीवः स च न विभुशरीरः, एवं तल्लिङ्गभूतचैतन्योपलम्भाद् नाप्यङ्गुष्ठपर्वाद्यधिष्ठानः सर्वशरीरव्यापितया चैतन्योपलब्धेः किंतु देहव्यापी, तेन सह कथञ्चिद्भिन्नाभिन्नस्तथा नैकान्तेन नित्यः, एवं हि - पूर्वक्रियाकर्तृत्वस्वरूपापरित्यागादुत्तरक्रिया-कर्तृत्वं न स्यात् । नाप्येकान्तेनाऽनित्यो द्वितीयादिसमयेषु सर्वथाऽभावप्रसङ्गादैहिकामुष्मिक-समस्तव्यवहारविलुप्तेश्च । यदुक्तम् –

तित्तीसमो किलामो सारक्खवि पक्खपच्चयाईणि ।
अज्झयणं झाणं भावणाय कासव्वणासंमि ।। [ ]

तस्माद् द्रव्यार्थतया नित्यः, पर्यायार्थतया त्वनित्योऽस्त्येव जीवः । इति कथं तद्भेदपरिकल्पनमभित्तिकचित्रकर्मारम्भसन्निभमिति सर्वं सुस्थम्। इह च सर्वजीवानां चेतनावत्त्वेनैकरूपाणामेव सतां संसारिसत्त्वेषु चरत्वाचरत्वाद्युपाधिद्विविधत्वादिकमवसेयमिति गाथार्थः ।।२०८।।

* *नवतत्त्वप्रकरणे-३* *

अथ जीवतत्त्वस्याभिप्रायान्तरेण प्रक्षेपगाथयैकादिक्रमेण षड्विधजीवभेदानाह –

एगविह-दुविह-तिविहा चउव्विहा-पंचछव्विहा जीवा ।
चेयण-तसइयरेहिं वेय-गइ-करण-काएहिं ।।

प्रथमद्वितीयपदाभ्यां कृत्वा तृतीयचतुर्थपदयोरर्थयोजना कर्तव्या । सा चैवम्–**चेअणत्ति** चेतनालक्षणो जीव इति जीवस्य लक्षणं क्रियते तदैक एव जीवस्य भेदः । यतः सूक्ष्मनिगोदजीवेष्वपि श्रीप्रज्ञापनादि-सूत्रेष्वक्षरस्यानन्ततमो भागः प्रतिपादितोऽस्ति ।

द्वीन्द्रिय-त्रीन्द्रिय–चतुरिन्द्रिय-पञ्चेन्द्रियजीवास्**त्रसाः** । इयरित्ति **इतरे**ऽपरे पृथिव्यप्तेजोवायु-वनस्पतिजीवा एकेन्द्रिया इति विवक्षया जीवा **द्विविधाः** ।

केचित्पुरुषवेदाः केचित्स्त्रीवेदाः, केचिन्नपुंसकवेदास्तत्र देवाः पुरुषवेदाः स्त्रीवेदाश्च । मनुष्याः पञ्चेन्द्रियतिर्यञ्चश्च केचित् पुरुषवेदाः केवित् स्त्रीवेदाः केचिन्नपुंसकवेदाश्च । तेभ्यः शेषाः पृथिव्यप्तेजोवा-युवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियनारका नपुंसका एवं विवक्षया **त्रिविधा** जीवाः।

गतिमाश्रित्य **चतुर्विधा** जीवाः– १-केचिन्मनुष्यगतिगताः २-केचिद्देवगतिगताः ३-केचिन्नरकगतिगताः ४-केचित्तिर्यग्गतिगता इति विवक्षया चतुर्विधा जीवाः ।

करणत्ति - करणानीन्द्रियाणि तान्याश्रित्य **पंचविधा** जीवाः १-पृथिव्यप्तेजोवायुवनस्पतिजीवा एकेन्द्रियाः, २-शङ्ख-कपर्दकादयो द्वीन्द्रियाः ३-गोमीमत्कुणादयस्त्रीन्द्रियाः ४-वृश्चिकादयश्चतुरिन्द्रियाः ५-नारकादयः पञ्चेन्द्रिया इति विवक्षया पञ्चविधा जीवाः ।

काएहिं इति–कायमाश्रित्य **षड्विधा जीवाः,** १-केचित् पृथिवीकायगताः २-केचिदप्कायगताः ३-केचित्तेजःकायगताः ४-केचिद्वायुकायगताः ५-केचिद्वनस्पतिकायगताः ६-केचित् त्रसकायगता इति विवक्षया षड्विधा जीवाः।।३।।

देव० : तथा –

पुढवी-आऊ-तेऊ-वाउ वणस्सइ तहेव बेइंदी ।
तेइंदिय-चउरिंदिय-पंचिंदियभेयओ नवहा।।२०९।।

चक्रे० : सुगमा ।।२०९।।

देव० : पृथिव्यापस्तेजोयोगा**त्तेजो**ऽग्निर्**वायुर्वनस्पतिस्तथैव द्वीन्द्रियास्त्रीन्द्रियाश्चतु-रिन्द्रियाः पञ्चेन्द्रियाः** सोपस्कारत्वादिति **भेदान्नवधा** जीवा भवन्तीति शेषः । ननु पृथिव्यादीनि जीवशरीराणि [१]काठिन्यादिलक्षणानि, जीवाः पुनरुपयोगलक्षणास्तत्कथं पृथिव्याप इत्यादिभेदतो नवधा जीवा इति ? उच्यते–जीवशरीरयोरन्योन्यानुगतत्वेन विभागाभावादेवमुक्तम्, न चैतदनार्षम्, यत उक्तम्– 'अन्नुन्नाणुगयाणं इमं च तं च त्ति विभज्जणमजुत्तं' इत्यादि । एवमन्यत्रापि यथासम्भवमूह्यमिति गाथार्थः।।२०९।।

१. नत्वेतान्येव जीवाः काठिन्यादिलक्षणानि ह्यमूनि T, C

चक्रे० : तथा –

देव० : अन्यच्च –

एगिंदिय सुहुमियरा सन्नियरपणिंदिया सबितिचऊ ।
पज्जत्तापज्जत्ताभेएणं चउदसग्गामा[१]।।२१०।।

चक्रे० : एकेन्द्रियाः सूक्ष्मेतराः, सूक्ष्मनामकर्मोदयात् सूक्ष्माः सकललोकव्यापिनो निरतिशयिनामदृश्याः, इतरे बादरनामकर्मोदयाद् बादराः प्रतिनियतस्थानवर्तिनः २, तथा **सञ्ज्ञिनो** मनोविज्ञानवन्तः ३, **इतरे** चाऽसञ्ज्ञिनः **पञ्चेन्द्रियाः** ४, **सद्वित्रिचतुरिन्द्रियाः** सप्त, सर्वे **पर्याप्तापर्याप्तभेदेन चतुर्दश** ग्रामा इव **ग्रामा** जीवनिवासस्थानानीत्यर्थः।।२१०।।

देव० : एकेन्द्रियाः सूक्ष्मेतराः सूक्ष्मनामकर्मोदयात्सूक्ष्माः सकललोकव्यापिनो निरतिशयानामदृश्याः, इतरे बादरनामकर्मोदयाद् बादराः प्रतिनियतस्थानवर्त्तिनः, तथा **सञ्ज्ञिनश्च** मनोविज्ञानवन्तः, **इतरे** चासञ्ज्ञिनः **पञ्चेन्द्रियाः, 'सबितिचऊ'**त्ति सूचनात्सूत्रस्य सह द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियैर्वर्तन्त इति सद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः, द्वीन्द्रियादिभिः सहिताः पूर्व इत्यर्थस्ते च **पर्याप्तापर्याप्तभेदेन चतुर्दश,** दीर्घत्वं प्राकृतत्वात्, ग्रामा[२] अवयवे समुदायोपचाराद् भूतग्रामा जीवस्थानानीत्यर्थ इति गाथार्थः ।।२१०।।

**** आवश्यकनिर्युक्तौ 'प्रतिक्रमण' अध्ययनस्य संग्रहणिगाथायाम्-१ ****

भूतानि जीवास्तेषां ग्रामाः समूहा भूतग्रामास्तैः, ते चैवं चतुर्दश भवन्ति –

एगिंदिय सुहुमियरा सण्णियर पणिंदिया य सबीतिचऊ ।
पज्जत्तापज्जत्ताभेएणं चोद्दसग्गामा ।।

एकेन्द्रियाः पृथिव्यादयः **सूक्ष्मेतरा** भवन्ति, सूक्ष्मा बादराश्चेत्यर्थः, **संज्ञीतराः पञ्चेन्द्रियाश्च,** संज्ञिनोऽसंज्ञिनश्चेति भावना, **'सबीतिचउ'**त्ति सह द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियैः, एते हि **पर्याप्तकापर्याप्तकभेदेन चतुर्दश** भूत**ग्रामा** भवन्ति ।।१।।

---

१. चउदसट्ठाणा A २. ग्रामा इव ग्रामाः विवक्षित समुदायसाधर्म्येण T,B,C

** पञ्चसंग्रहे-८२ **

एगिंदियसुहुमियरा सन्नियर पणिंदिया सबितिचऊ ।
पज्जत्तापज्जत्ताभेएणं चोद्दसग्गामा ।।

(स्वो०)-**एकेन्द्रियाः सूक्ष्माः** सूक्ष्मनामकर्मोदया**दितरे** तद्विपक्षभूता बादरा बादरकर्मोदयिनः, **संज्ञिनः** समनस्का **इतरे**ऽसंज्ञिनोऽमनस्का उभयेऽपि **पञ्चेन्द्रियाः, द्वित्रिचतुरिन्द्रियाः** स्वस्वनामकर्मोदयिन एते सप्त **पर्याप्तकाः,** एत एव सप्ता**ऽपर्याप्तकाः,** अपर्याप्तनामकर्मोदयाल्लब्ध्यपर्याप्तकाः, पर्याप्तनामकर्मोदयिनो यद्यपि करणापर्याप्तकास्तथापि पर्याप्तकवद् द्रष्टव्याः, एतानि **चतुर्दश** स्थानान्यखिलजीव-सङ्ग्राहकाणीति गाथार्थः ।।८२।।

(मलय०)-तदेवमुक्तमल्पबहुत्वम्, तदभिधानाच्च कृता सत्पदादिप्ररूपणा ।

अतीवगहनाप्येषा सत्पदादिप्ररूपणा । प्रज्ञापनाप्रसादेन विवृत्ता लेशतो मया ।।

यद्गदितमल्पमतिना किमपि विरुद्धं जिनागमवचोभिः । विद्वद्भिस्तत्त्वज्ञैः प्रसादमाधाय तच्छोध्यम् ।।

साम्प्रतं यदुक्तं 'चउदसविहावि जीवा' इति, तच्चतुर्दशत्वं जीवानां प्रतिपादयन्नाह-**सूक्ष्माः** सूक्ष्मनामकर्मोदयिनः, **इतरे** बादरा बादरनामकर्मोदयिन **एकेन्द्रियाः,** तथा **संज्ञ्यसंज्ञि**भेदभिन्नाः **पञ्चेन्द्रियाः** **'सबितिचऊ'** सद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः, एवं सप्त जीवसङ्घाता भवन्ति । एते च सर्वेऽपि प्रत्येकं **पर्याप्तापर्याप्तभेदेन** भिद्यमाना द्विधा, ततः सर्वसंख्यया **चतुर्दशग्रामाः** प्राणिसङ्घाता भवन्ति, एते च प्रागेव सप्रपञ्चं प्ररुपिताः, इति नेह भूयः प्ररुप्यन्ते ।।८२।।

चक्रे० : पुनः प्रकारान्तरेण जीवभेदानेवाहुः -

देव० : पुनः प्रकारान्तरेण जीवभेदानेवाह -

पुढविदगअगणिमारुयवणस्सईणंता[1] पणिंदिया चउहा ।
वणपत्तेया विगला दुविहा सव्वेवि बत्तीसं।।२११।।

चक्रे० : **पृथिव्युदकाग्निमारुताऽनन्तवनस्पतयः** सूक्ष्मेतरपर्याप्तापर्याप्तभेदात् । **पञ्चेन्द्रियाः** संज्ञ्यसंज्ञिपर्याप्तापर्याप्तभेदात्, प्रत्येकं षडपि **चतुर्द्धा** । **'वणपत्तेय'** त्ति प्रत्येकवनस्पतयः, **विकला** द्वित्रिचतुरिन्द्रियाः पर्याप्तापर्याप्तभेदाद् **द्विविधाः सर्वेऽपि** मेलिता **द्वात्रिंशत्**।।२११।।

---

१. वणसइणंता P, K वणसयणंता A

देव० : पृथिव्युदकाग्निमारुतानन्तवनस्पतय इह च विचित्रत्वात्[१] सूत्रस्य विशेषणस्य परनिपातः, **पञ्चेन्द्रियाश्च** प्रत्येकं[२] **चतुर्द्धा,** चकारमन्तरेणापि समुच्चयोऽवगम्यते, इतीह चशब्दो नोक्तः, यथा -

अहरहर्नयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी ।। [ ]

तत्र पृथिव्यादयः सूक्ष्मबादरपर्याप्तापर्याप्तभेदात्पञ्चेन्द्रियास्तु सञ्ज्ञ्यसञ्ज्ञिपर्याप्तापर्याप्तभेदादिति षण्णां चतुर्भिस्ताडनाच्चतुर्विंशतिः । तथा **'वणपत्तेय'**त्ति सूत्रत्वादेव प्रत्येकवनस्पतयो **'विगल'**त्ति विकलेन्द्रिया द्वित्रिचतुरिन्द्रिया **द्विविधा** इत्यष्टौ, **सर्वेऽपि** पूर्वोत्तरसंमीलनाद् **द्वात्रिंशत्,** एते च सर्वेऽपि सामान्येन व्यवहार्यव्यवहारिभेदाद् द्विविधास्तत्र सूक्ष्मानन्तवनस्पतयो व्यवहारिणोऽव्यवहारिणश्च, शेषास्तु सर्वेऽपि व्यवहारिण[३] एव । इत्थं च विचित्रप्रकारैः प्रतिपादितं जीवस्यैव सम्यग्परिज्ञानमुखेन शेषतत्त्वपरिज्ञानार्थम्, यतः –

एको भावः सर्वथा येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा एको भावस्तत्त्वतस्तेन दृष्टः ।। [ ]

अत एव प्राणादिद्वाराण्यप्यभिधास्यतीति गाथार्थः।।२११।।

चक्रे० : इह द्वीन्द्रियादिसंस्थानानि साक्षादेव दृश्यन्ते पृथ्व्यादीनां तु सूक्ष्मत्वादलक्ष्याणीति तान्याहुः –

देव० : इह तावद् द्वीन्द्रियादिसंस्थानानि नानाप्रकाराणि साक्षादेव दृश्यन्ते, पृथिव्यादिशरीराणां त्वतिसूक्ष्मत्वान्न ज्ञायन्ते कीदृशानीति शिष्यजिज्ञासायां तत्संस्थानान्याह –

---

१. तन्त्रवृत्तेः A,T,B,C २. प्रत्येकशः T,B,C

३. एवेति कृतमात्मनो भेदप्रपञ्चनम्, प्रसङ्गात् स्वरूपं ब्रूमः । तथाहि- आत्मा शरीरव्यापी, तेन सह कथञ्चिद्भिन्नाभिन्नः, प्रतिदेहं चैक एव, एकस्य सुखदुःखाद्यनुभवेऽन्येषां तथानुपलम्भाद्, न तु विभुः, शरीर एव तल्लिङ्गभूतचैतन्योपलम्भात्, नाप्यङ्गुष्टपर्वाद्यधिष्ठानः सर्वशरीरव्यापितया चैतन्योपलब्धेः । तथा नैकान्तेन नित्यः, एवं हि पूर्वक्रियाकर्तृत्वस्वरूपापरित्यागादुत्तरक्रियाकर्तृत्वं न स्याद् नाप्येकान्तेनानित्यः, द्वितीयादिसमयेषु सर्वथाऽभावप्रसङ्गादैहिकामुष्मिकसमस्तव्यवहारविलुप्तेश्च, यदुक्तम् –

तित्तीसमो किलामो सारक्खविपक्खपव्वयाईणि । अज्झयणं झाणं भावणाय कासव्वणासंमि ।।

तस्माद् द्रव्यार्थतया नित्यः पर्यायार्थतया त्वनित्य इति । A

मस्सूरए य थिबुए सूइ पडागा अणेगसंठाणा ।
पुढविदगअगणिमारुयवणस्सईणं च संठाणा।।२१२।।

चक्रे० : मसूरको धान्यविशेषः, **स्तिबुको** जलबिन्दुः, **सूचीपताके** प्रतीते, **अनेकानि** च विचित्रद्रव्याणि, तद्वत् **संस्थानमा**कारो येषां तानि, यथासङ्ख्यं **पृथिव्युदकाग्निमारुत-वनस्पतीनां संस्थानानि** वपुःपुद्गलरचनाविशेषाः।।२१२।।

देव० : मसूरकश्च धान्यविशेषः, एकारः प्राकृतप्रभव एवमुत्तरत्रापि, **स्तिबुकश्च** जलबिन्दुः, **सूची** च प्रसिद्धा, **पताका** च ध्वजोऽ**नेकानि** च विचित्रद्रव्याणि तेषां **संस्थानान्या**कारा येषां तानि, तथा क्रमेण **पृथिव्युदकाग्निमारुतवनस्पतीनां चः** पुनरर्थे, **संस्थानानि** वपुःपुद्गल-रचनाविशेषाः, प्राकृतत्वात् पुंस्त्वम्, तदिदमत्र तात्पर्यम्–पृथिवीजीवशरीरसंस्थानं मसूरकाकारमब्-जीवतनुसंस्थानं स्तिबुकाकारमित्यादि नेयमिति गाथार्थः।।२१२।।

**** जीवसमासप्रकरणे-५२ ****

यदत्रैकेन्द्रियाणां हुण्डसंस्थानं तत्पृथिव्यादीनां मसूराद्याकारभेदतो भिन्नं द्रष्टव्यमिति दर्शयति –

मस्सूरए य थिबुगे सूइ पडागा अणेगसंठाणा ।
पुढविदगअगणिमारुयवणस्सईणं च संठाणा ।।

मसूरो मालवकादिप्रसिद्धो मसूरकाकारो धान्यविशेषस्तदाकारं शरीरसंस्थानं **'पुढवि'**त्ति पृथ्वी-कायिकानां द्रष्टव्यम्, **स्तिबुको** बिन्दुस्तदाकारं **'दग'** त्ति उदककायिकानाम्, **सूच्या**कार**मग्नि**कायिकानाम्, **पताका**कारं वायुकायिकानाम्, **'वणस्सईणं च संठाणं'** त्ति, च पूर्वोक्तापेक्षया समुच्चये, वनस्पतीनां च शरीरस्य **संस्थानान्य**वयवरचनात्मिका**न्यनेका**काराणि भवन्तीत्यर्थः, इति गाथार्थः ।।५२।।

चक्रे० : अथ जीवगतेन्द्रियविषयमाहुः –

देव० : अथ जीवाधिकार एव यावद् दूरादिन्द्रियाणां स्वविषयग्राहकत्वमाह –

संगुलजोयणलक्खो समहिओ नव बारसुक्कसो विसओ ।
चक्खुत्तियसोयाणं अंगुलअस्संखभागियरो[१]।।२१३।।

चक्रे० : चक्षुस्त्रिकश्रोत्राणामुत्कर्ष उत्कृष्टो **विषयः** । तत्र चक्षुषः **स्वाङ्गुल-**निष्पन्न**योजनलक्षः साधिकः,** त्रिकस्य स्पर्शनरसनघ्राणरूपस्य **नव,** श्रोत्रस्य **द्वादश,**

१. भागीयरो A

व्याख्यानात् स्वाङ्गुलयोजनानीत्युभयत्राऽपि ज्ञेयम्, नव योजनाऽऽगतानि गन्धादीनि, द्वादश योजनाऽऽगतश्च शब्दो विषय इत्यभिप्रायः । **अङ्गुलाऽसङ्ख्यभागवर्त्ती त्वितरो** जघन्यविषयः सर्वेषाम्, सोऽपि व्याख्यानाच्चक्षुर्वर्जानामिति ज्ञेयम्, अतिसंनिकृष्टस्य तेनाऽनुपलम्भात्,

तथा च भाष्यम् –

अवरमसंखिज्जंगुल भागा उ नयणवज्जाणं ।
संखिज्जयभागा उ नयणस्स मणस्स न विसयपमाणं ।। [ ]

तथेह स्वाङ्गुलयोजनलक्षोऽप्यभासुरद्रव्यमपेक्ष्य चक्षुर्विषयत्वेनोक्तः, भासुरं त्वाश्रित्य सातिरेकैकविंशतियोजनलक्षाणि, तथा चोक्तम् –

लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धम्मि ।
उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ।। [वि.आ.भा॰ - ३४५]

कर्कसंक्रान्तिदिने।।२१३।।

देव० : स्वाङ्गुलमात्माङ्गुलं तेन निष्पन्नानि **योजनानि** तेषां **लक्षः[१] समधिकः** सातिरेकः, **नव द्वादश** च व्याख्यानात् स्वाङ्गुलयोजनानीत्यत्रापि पदद्वयेऽपि सम्बध्यते, उत्कृष्यत **इत्युत्कर्षः** सर्वबहुरित्यर्थः । **विषयो** ग्रहणयोग्यता क्रमेण **चक्षुश्च,** त्रयाणां परिशिष्टानां स्पर्शनरसनघ्राणानां समूह**स्त्रिकं** च, **श्रोत्रं** च तेषामिह च योजनलक्षादीनामाकाशदेशत्वेनेन्द्रियाविषयत्वात् तद्गतपुद्गल-द्रव्याणामेव विषयत्वमुन्नेयमाधाराधेययोरभेदोपचाराच्चेत्थं भणनमिति । **अङ्गुलासङ्ख्य-भागवर्ती त्वितरो** जघन्यविषयः, सर्वेषां व्याख्यानान्नयनवर्जानामिति ज्ञेयम्, चक्षुषस्तु सङ्ख्येय-भागवर्त्येव, अतिसन्निकृष्टस्य तेनानुपलम्भात्, तथा च भाष्यम् –

अवरमसंखिज्जंगुलभागाओ नयणवज्जाणं ।
संखिज्जइ भागाओ नयणस्स मणस्स न विसयपमाणं ।। [ ] इति ।

तथेह समधिकः स्वाङ्गुलयोजनलक्षश्चक्षुर्विषयोऽभासुरद्रव्यमधिकृत्य, भासुरं तु द्रव्यमेकविंशतियोजनलक्षेभ्योऽपि परतः पश्यन्ति, यथा पुष्करद्वीपार्द्धे मानुषोत्तरनगप्रत्या-सन्नवर्त्तिनः कर्कसङ्क्रान्तौ सूर्यबिम्बं तथा चोक्तम् –

लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धम्मि ।
उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ।। [वि.आ.भा॰ ३४५]

इति गाथार्थः।।२१३।।

१. लक्षं समधिकं सातिरेकं A

चक्रे० : अथ जीवगतप्राणाद्यभिधित्सया द्वारगाथामाहुः –

देव० : अथ जीवगतप्राणादिद्वारप्रतिपिपादयिषया द्वारगाथामाह –

पाणा पज्जत्तीओ तणुमाणं आउयं च कायठिई[१] ।
लेसा संजमजोणी एएसिं जाणियव्वाइं।।२१४।।

चक्रे० : प्राणा इन्द्रियाद्याः, **पर्याप्तय** आहारादिग्रहणादिसामर्थ्यानि, **तनुमानं** शरीरपरिमाणम्, **आयु**र्जीवितम्, काये पृथ्वीकायादिनिकाये स्थितिरवस्थानं **कायस्थितिः**, **लेश्या** आत्मपरिणामविशेषाः, **संयमस्य योनिः** सत्यमनोयोगादिस्तत्प्रभवत्वात् संयमस्य । **एतेषां** प्रस्तावाज्जीवानां **ज्ञातव्यानी**ति द्वारगाथार्थः।।२१४।।

देव० : प्राणन्त्येभिरिति **प्राणा** इन्द्रियादयः, **पर्याप्तय** आहारादिग्रहणादिसामर्थ्यानि, **तनुमानं** शरीरपरिमाणम्, एति याति चे**त्यायु**र्जीवितम्, च शब्दोऽनुक्तसमुच्चये सर्वान्ते च सम्भन्त्स्यते । **काये** पृथिवीकायादिनिकाये **स्थिति**रवस्थानम् । **लेश्याः** कृष्णादिद्रव्यसाचिव्यादात्मनः परिणामविशेषाः, यदाहुः –

कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं लेश्याशब्दः प्रयुज्यते ।। [ ]

संयमः सावद्याद्विरतिः, युवन्ति मिश्रीभवन्ति कार्मणशरीरिण औदारिकादिशरीरैरासु जन्तवो जुषन्ते सेवन्ते ता इति वा **योनय** उत्पत्तिस्थानानि, **च**काराद्योगोपयोगगुणस्थानमार्गणास्थानानि **चैतेषां** प्रस्तावाज्जीवानां **ज्ञातव्यानीति** द्वारगाथार्थः।।२१४।।

चक्रे० : तत्रादौ प्राणद्वारं विवृत्य हिंसास्वरूपमाहुः –

देव० : अथ यथोद्देशं निर्देश इति न्यायतः प्रथमं प्राणद्वारं विवृत्य प्रसङ्गतो हिंसास्वरूपमाह-

पंचिंदिय-तिविहबलं नीसासूसासआउयं चेव ।
दसपाणा पन्नत्ता तेसिं विघाओ भवे हिंसा।।२१५।।

चक्रे० : पञ्चेन्द्रियाणि स्पर्शनादीनि, **त्रिविधबलं** मनोवाक्कायजनितः शक्तिविशेषो **निःश्वासोच्छ्वासम**ध ऊर्ध्वाऽनिलप्रचारः, **आयु**र्जीवितम्, एते **दश प्राणाः प्रज्ञप्ता**स्तीर्थकरादिभिः, **तेषां विघातो** वियोजनं **भवेद्धिंसा**, न तु जीवस्य विनाशस्तस्याऽप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वात्।।२१५।।

१. कायठिइं T,C

देव० : पञ्चेन्द्रियाणि स्पर्शनादीनि, सुब्लोपः प्राकृतत्वाद्, एवमुत्तरत्रापि, **त्रिविधबलं** मनोवाक्कायजनितः शक्तिविशेषः, उल्लसति ह्येतत्सम्बन्धादात्मनः सामर्थ्यविशेषः, निःश्वसनं **निःश्वासो**ऽधःपवनसञ्चारः, उत्स्वसे**दुच्छ्वास**स्तूर्ध्वमेताभ्यामेकमेव रूपम्, द्वयोरपि शारीरवायुविशेषत्वाद्, **आयु**र्जीवितम्, **चैवे**ति समुच्चये । एते **दश प्राणाः प्रज्ञप्ता**स्तीर्थकृदादिभिः, एतद्व्यतिरेकेण जीवनाभावाद्, अत एव **तेषां विघातो** वियोजनं **भवेद्धिंसा,** न तु सर्वथा जीवविनाशस्तस्याप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वाद्, इह चैकेन्द्रियाणां स्पर्शनेन्द्रियकायबलनिःश्वासोच्छ्वासायुर्लक्षणाश्चत्वारः, द्वीन्द्रियाणां रसनवाग्बलसहिताः षट्, त्रीन्द्रियाणां घ्राणयुताः सप्त, चतुरिन्द्रियाणां चक्षुर्लक्षिताष्टौ, असञ्ज्ञिनां श्रवणोपेता नव, सञ्ज्ञिनां तु सम्पूर्णा दश प्राणा इति गाथार्थः ।।२१५।।

चक्रे० : अथ पर्याप्तीराहुः –

देव० : अथ पर्याप्तीः प्राह –

आहारसरीरिंदिय पज्जत्ती आणपाण भासमणे ।
चत्तारि पंचछप्पिय एगिंदियविगलसन्नीणं।।२१६।।

चक्रे० : १-यया ह्याहारमात्मा गृहीत्वा खलरसतया परिणमयति, सा शक्ति**राहार**पर्याप्तिः, २-यया रसीभूतमाहारं सप्तधातुतया परिणमयति, सा **शरीर**पर्याप्तिः, ३-यया तु धातुभूतमिन्द्रियतया परिणमयति **सेन्द्रियपर्याप्तिः**, ४-यया तूच्छ्वासप्रायोग्यं वर्गणाद्रव्यमादायोच्छ्वासतया परिणमय्य मुञ्चति **सोच्छ्वास**पर्याप्तिः, ५-यया तु भाषाप्रायोग्यं वर्गणाद्रव्यमादाय भाषात्वेनाऽऽलम्ब्य मुञ्चति सा **भाषा**पर्याप्तिः, ६-यया तु मनःप्रायोग्यं वर्गणामादाय मनस्तयापरिणमय्य मुञ्चति सा **मनः**पर्याप्तिः, इह च वैक्रियाहारकशरीरिणां शरीरपर्याप्तिरान्तमौहूर्त्तिकी शेषास्तु सामयिक्यः, औदारिकशरीरिणां त्वाहारपर्याप्तिरेव सामयिकी शेषास्तु प्रत्येकमान्तर्मौहूर्त्तिक्यस्ताश्च केषां कियत्य इत्याहुः – **चतस्रः पञ्च षडपि** च क्रमे**णैकेन्द्रियविकलसञ्ज्ञिनाम्**, विकला द्वित्रिचतुरिन्द्रियाऽसञ्ज्ञिनः, एताश्च पर्याप्तनामकर्मोदयवतामेव सम्पूर्णाः स्युः, अपर्याप्तास्तु ये म्रियन्ते त उच्छ्वासादिपर्याप्तिभिरपर्याप्ताः, न तु शरीरेन्द्रियपर्याप्तिभ्याम्, यतः परभवाऽऽयुर्बद्ध्वा म्रियते तद्बन्धश्च शरीरेन्द्रियपर्याप्त्यभावे न स्यादिति गाथार्थः।।२१६।।

देव० : १-तथाविधाहारपुद्गलग्रहणपरिणमनसामर्थ्य**माहार**पर्याप्तिः, २-औदारिकादिशरीरत्रय-प्रायोग्यपुद्गलद्रव्याणां ग्रहणे औदारिकादिशरीररूपतया परिणमने च शक्तिविशेषः **शरीर**पर्याप्तिः, ३-यथासम्भवमेकद्व्यादीन्द्रियप्रायोग्यपुद्गलानामादाने तत्तद्रूपतया परिणमने च सामर्थ्य-**मिन्द्रियपर्याप्तिः**, ४-आनापानोचितद्रव्याणां ग्रहणे तद्रूपतया व्यापारणे च शक्ति**रानापान**पर्याप्तिः, ५-सत्यासत्यादिचतुर्विधभाषाहेतुपुद्गलानां ग्रहणे तद्रूपतया परिणमने निस्सरणे च सामर्थ्यं **भाषा**पर्याप्तिः, ६-मनःसमुचितपुद्गलानामवलम्बने मनोरूपतया परिणमने मनने च सामर्थ्यं **मनः**पर्याप्तिः, इह च कृतद्वन्द्वस्याद्यपदत्रयस्य पर्याप्तिशब्देन सह षष्ठीतत्पुरुष उत्तरपदत्रये च द्वन्द्वैकवद्भावाद्विषयसप्तम्येकवचनमिह च वैक्रियाहारकशरीरिणां शरीरपर्याप्तिरान्तर्मौहूर्त्तिकी, शेषास्तु सामयिक्यः । औदारिकशरीरिणां त्वाहारपर्याप्तिरेव सामयिकी, शेषास्तु प्रत्येकमान्त-र्मौहूर्त्तिक्य इति ।

अथ पुनः केषां कियत्य इत्याह–**चतस्र** आहारशरीरेन्द्रियानपानलक्षणाः, **पञ्च** भाषान्विताः, **षडपि** च **मनः**समन्विताः, क्रमेणै**केन्द्रियाश्च विकलाश्च** द्वित्रिचतुरिन्द्रियाऽसञ्ज्ञिस्वरूपाः **सञ्ज्ञिनश्च,** तेषामेता अपि च यथास्वपरिपूर्णाः पर्याप्तनामकर्मोदयवतामेव भवन्ति, केवलमपर्याप्ता अपि ये म्रियन्ते, तेऽप्युच्छ्वासादिपर्याप्तिभिरेव विज्ञेया न तु शरीरे-न्द्रियपर्याप्तिभ्याम्, यतः परभवायुष्कं बद्ध्वा म्रियन्ते तच्च शरीरेन्द्रियादिपर्याप्त्या पर्याप्तैर्बध्यत इति गाथार्थः ।।२१६।।

** जीवसमासप्रकरणे-२५ **

आह-नन्वत्र सार्द्धगाथया सूक्ष्मबादरैकेन्द्रियद्वित्रिचतुरिन्द्रियसंज्ञ्यसंज्ञिपञ्चेन्द्रियलक्षणाः सप्तापि जीवभेदाः पर्याप्तापर्याप्तविशेषणाभ्यां विशेषिताश्चतुर्दशविधत्वेनोक्तास्तत्कास्ताः पर्याप्तयो यद्योगा-त्पर्याप्ता भवन्ति यद्वैकल्यात्त्वपर्याप्तत्वमासादयन्तीत्याशङ्क्य प्रसङ्गतः पर्याप्तिस्वरूपनिरूपणाद्यर्थमाह–

आहारसरीरिंदियपज्जत्ती आणपाण भासमणे ।
चत्तारि पंचछप्पिय एगिंदियविगलसण्णीणं ।।

इहाहारादिपुद्गलग्रहणपरिणमनहेतुः शक्तिविशेषः पर्याप्तिः सा च साध्यभेदात्षोढा, तद्यथा–१-ययाऽऽहारपुद्गलानादाय खलरसरूपतया परिणमयति सा**ऽऽहार**पर्याप्तिः, २-यया तु रसीभूतमाहारं रसासृग्मांसमेदोऽस्थिमज्जाशुक्ररूपसप्तधातुतया परिणमयति सा **शरीर**पर्याप्तिः, ३-यया तु धातुभूतमाहारमिन्द्रियतया परिणमयति **सेन्द्रियपर्याप्तिः**, ४-यया त्वानापानवर्गणाद्रव्यमादायानापानत्वेन

परिणमय्य मुञ्चति सा**ऽऽनापान**पर्याप्तिः, ५-यया पुनर्भाषावर्गणाद्रव्यमादाय भाषारूपतया परिणमय्य मुञ्चति सा **भाषा**पर्याप्तिः, ६-यया तु मनःप्रायोग्यवर्गणाद्रव्यमादाय मनस्त्वेन परिणमय्य मुञ्चति सा **मनः**पर्याप्तिः, तदेवं गाथापूर्वार्द्धमध्योपात्तपर्याप्तिशब्दस्य सर्वत्र योजनात् षट् पर्याप्तयोऽवगन्तव्याः । आह–किं सर्वेषामपि जीवानां सर्वा अप्येताः पर्याप्तयः प्राप्यन्ते ? नेत्याह–'**चत्तारि**' इत्यादि, इह यथासङ्ख्येन सम्बन्धः, तद्यथा–आद्याश्चतस्र **एवैकेन्द्रियाणाम्,** भाषामनसोस्तेष्वभावात्, **विकल**शब्देन चात्र मनोविकला गृह्यन्ते, ते च पारिशेष्यात् द्वित्रिचतुरिन्द्रिया असञ्ज्ञिपञ्चेन्द्रियाश्च लभ्यन्ते, तेषामाद्याः **पञ्चे**व पर्याप्तयः, न तु मनःपर्याप्तिर्मनसस्तेष्वभावादिति, **सञ्ज्ञि**पञ्चेन्द्रियाणां पुनः **षडपि** पर्याप्तयः प्राप्यन्ते, मनसोऽपि तेषां सद्भावादिति गाथार्थः ।।२५।।

**** प्रवचनसारोद्धारे-१३१७ ****

आहार-सरीरिंदिय-पज्जत्ती आणपाण भासमणे ।
चत्तारि पंचछप्पिय एगिंदियविगलसन्नीणं ।।

पर्याप्तिर्नाम आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, सा च पुद्गलोपचयादुपजायते, किमुक्तं भवति ?–उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्संपर्कतस्तद्रूपतया जातानां यः शक्तिविशेषः–आहारादिपुद्गलखलरसादिरूपतापादनहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलखलरसरूपतापरिणमनहेतुः शक्तिविशेषः सा पर्याप्तिः, सा च षोढा, तद्यथा–**आहार**पर्याप्तिः **शरीर**पर्याप्ति**रिन्द्रियपर्याप्तिः प्राणापान**पर्याप्ति**र्भाषा**पर्याप्ति**र्मनः**पर्याप्तिश्च, तत्र १-यया शक्त्या करणभूतया जन्तुर्बाह्यमाहारमादाय खलरसरूपतया परिणमयति साऽऽहारपर्याप्तिः, २-यया रसीभूतमाहारं रसासृग्मांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः, ३-यया तु धातुरूपतया परिणमितादाहारादेकस्य द्वयोस्त्रयाणां चतुर्णां पञ्चानां वेन्द्रियाणां प्रायोग्यानि द्रव्याण्युपादायैकद्वित्र्यादीन्द्रियरूपतया परिणमयति सेन्द्रियपर्याप्तिः, ४-यया पुनरुच्छ्वासयोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा प्राणापानपर्याप्तिः, ५-यया तु भाषाप्रायोग्यदलिकमादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः, ६-यया पुनर्मनोयोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति सा मनःपर्याप्तिः, आह-किं सर्वेषामपि जीवानां सर्वा अप्येताः पर्याप्तयः प्राप्यन्ते ?, नेत्याह–'**चत्तारी**'त्यादि, इह यथासङ्ख्येन सम्बन्धः, तद्यथा–आद्याश्चतस्र **एवैकेन्द्रियाणां** भाषामनसोस्तेष्वभावात्, **विकल**शब्देन चात्र मनोविकला गृह्यन्ते, ते च पारिशेष्याद् द्वित्रिचतुरिन्द्रिया असंज्ञिपञ्चेन्द्रियाश्च लभ्यन्ते, तेषामाद्याः **पञ्चैव** पर्याप्तयो न तु मनःपर्याप्तिः मनसस्तेष्वभावादिति, **संज्ञि**पञ्चेन्द्रियाणां पुनः **षडपि** पर्याप्तयः प्राप्यन्ते, मनसोऽपि तेषां सद्भावादिति, एताभिश्च स्वस्वयोग्यपर्याप्तिभिरपर्याप्ता एव ये कालं कुर्वन्ति तेऽप्याद्यपर्याप्तित्रयं समाप्य ततोऽन्तर्मुहूर्तेनायुर्बद्ध्वा तदनन्तरमबाधाकालरूपमन्तर्मुहूर्तं जीवित्वैव च म्रियन्त इति ।।१३१७।।

चक्रे० : आहारादिपर्याप्तयोऽभिहितास्तत्किं जीवाः सर्वेऽप्याहारका एव किं वा नेत्याहुः –

देव० : आहारपर्याप्तिरभिहिता, तत्किं जीवाः सर्वेऽप्याहारका एव किं वा नेत्याह –

विग्गहगइमावन्ना केवलिणो समुहया अजोगी य ।
सिद्धा य अणाहारा सेसा आहारगा जीवा।।२१७।।

चक्रे० : विग्रहगतिः समयभाषया वक्रगतिरुच्यते, इह भवान्तरे गच्छतां द्वे गती ऋजुर्वक्रा च, तत्र जीवपुद्गलयोरनुश्रेणिगमनादनुश्रेणिस्थ उत्पत्तिस्थान ऋजुगत्यैकेनैव समयेन गच्छति, तस्मिन्नेव चाऽऽहारं गृह्णाति, विश्रेणिस्थे तु द्वित्रिचतुर्वक्रां गति**मापन्ना** आद्यसमये मोक्तव्य-शरीराहाराः, अन्त्यसमय आगामिशरीराहारा मध्यमेषु त्वेकद्वित्रिसमयेषु यथासङ्ख्यमनाहाराः । वक्राणि चेत्थम् –

विदिसाउ दिसं पठमे बीए पविसरइ नाडिमज्झंमि ।
उड्ढं तइए तुरिए य नीइ विदिसं तु पंचमए ।। [ ]

तथा **केवलिनः** सम्यक् समन्तत उत्प्राबल्येनाऽऽत्मप्रदेशैश्चतुर्दशरज्ज्वात्मकं लोकाकाशं घ्नन्ति । धातूनामनेकार्थत्वात् पूरयन्ति स्मेति **समुद्धताः** समुद्घातं गता इत्यर्थः । ते ह्यायुषोऽल्पत्वं वेदनीयस्य च प्राचुर्यं ज्ञात्वा तत्समीकरणायाऽष्टसामयिकं समुद्घाातं कुर्वन्ति । तद्विधिश्चायम् –

दण्डं प्रथमे समये [स्वदेहविष्कम्भमूर्ध्वमधश्च लोकान्तगामिनम्]
कपाटमथ चोत्तरे तथा समये ।
मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ।।
संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ।। [प्रशमरति-२७३, २७४]

अत्र तृतीयचतुर्थपञ्चमसमयेष्वनाहारकाः केवलकार्मणयोगित्वाद्विग्रहगताविव वक्रसमयेषु । यदुवाच वाचकः –

औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः ।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ।।
कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ।। [प्रशमरति-२७५, २७६]

अयोगिनश्च सिद्धिगमनकाले पञ्च ह्रस्वाक्षरोच्चारणमात्रं कालं निरुद्धतनुमनोवाग्योगाः **सिद्धाश्चाऽनाहाराः, शेषा आहारका जीवाः**।।२१७।।

देव० : समुदायार्थः स्पष्टः, अवयवार्थस्त्वयम्–विग्रहणं विग्रह आनुपूर्वीकर्मोदयात्स्खलनं वक्रीभवनमिति यावत्, तेन गति**र्विग्रहगतिः,** इह हि भवान्तरं गच्छतामसुमतां द्वयीगति ऋजुर्वक्रा च, तत्र जीवपुद्गलयोरनुश्रेणिगमनाद्यदा श्रेणिस्थमुत्पादस्थानं भवति तदर्जुगत्यैकेनैव समयेन गच्छति तस्मिन्नेव चाहारग्रहणं यदा तु विश्रेणिस्थं तदा वक्रमेकं द्वे त्रीणि वा सम्भवन्ति, केचिच्चत्वारीति भणन्ति तत्रैकं वक्रं द्वाभ्याम्, द्वे तु त्रिभिः, त्रीणि तु चतुर्भिश्चत्वारि तु पञ्चभिः समयैः, तत्पुनरित्थम् –

विदिसाउ दिसिं पढमे बीए पविसरइ नाडिमज्झंमि ।
ऊड्ढं तइए तुरिये य नीइ विदिसिं तु पंचमए ।। [ ]

इति तत्र चाद्यसमये मोक्तव्यशरीराहारः, पर्यन्तसमये त्वागामिशरीराहार आहारपर्याप्ति-समयत्वात्तस्य, मध्यमेषु त्वेकद्वित्रिसमयेषु यथाक्रमं द्विवक्रादिषु केवलकार्मणयोग्यानाहारकः, व्याख्याप्रज्ञप्त्यभिप्रायस्त्वाद्यसमयात्प्रभृत्येवानाहारकस्त्रिवक्रैव च विग्रहगतिरिति, तथा **केवलिनः** सम्यक् समन्तत उत्प्राबल्येनात्मप्रदेशान् घ्नन्ति प्रतिक्षिपन्ति स्मेति, यदिवा घ्नन्ति वेद्यनामगोत्रपुद्गलान् शातयन्ति स्मेति **समुद्घताः** सूत्रत्वादलोपः, समुद्घातं गता इत्यर्थः । स चेत्थमुत्पन्नदिव्यज्ञान आयुषोऽल्पत्वं वेदनीयस्य प्राचुर्यमवधार्य तत्समतापादनाय दण्डादिक्रमेण चतुर्दशरज्ज्वात्मकं लोकमात्मप्रदेशैरापूरयति । तत्र प्रथममेवावर्जीकरणमान्तर्मौहूर्त्तिकमुदीरणावलिकायां कर्मप्रक्षेपव्यापाररूपमभ्येति तदनु –

दण्डं[१] प्रथमे समये (स्वदेहविष्कम्भमूर्ध्वमधश्च लोकान्तगामिनं)
कपाटमथ चोत्तरे तथा समये । मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ।।
संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ।। [प्रशमरति-२७३, २७४]

इह जीवप्रदेशानां दण्डतया प्रक्षेपे संहारे चौदारिककायव्यापारादौदारिककाययोग एव, द्वितीयषष्ठसप्तमेषु पुनः प्रदेशानां प्रक्षेपसंहारयोरौदारिके तस्य च बहिः कार्मणे वीर्यपरिस्पन्दादौदारिककार्मणमिश्रः, तृतीयचतुर्थपञ्चमेषु तु बहिरौदारिकात्कार्मणकायव्यापारादसहायः

१. प्रथमे समये दण्डं A,T,B,C

कार्मणस्तस्मिन्नेव च समयत्रयेऽनाहारकस्तथा यद्यपि मन्थानकरणे[१] कपाटन्यायेनौदारिकस्यापि व्यापारः सम्भाव्यते, तथापि 'कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये चेति' वचनादसौ कथञ्चिन्नास्तीति मन्तव्यमिति । योगिनो मनोवाक्कायव्यापारवन्तो न तथा निरुद्धयोगत्वादयोगिनः शैलेश्यवस्थामास्थिताः, तदध्यारोहणक्रमश्चायम् –

इह केवलज्ञानप्रादुर्भावादनन्तरमन्तर्मुहूर्त्तादि देशोनपूर्वकोट्यन्तं कालं केवली विहृत्यान्तर्मुहूर्त्तावशेषायुः सूक्ष्मक्रियमप्रतिपातिशुक्लध्यानतृतीयभेदं ध्यायन् योगनिरोधमारिप्सुः प्रथममेव पर्याप्तमात्रजघन्यमनोयोगिसञ्ज्ञिमनोद्रव्यस्तद्व्यापारेभ्योऽसङ्ख्यगुणविहीनानि मनोद्रव्याणि तद्व्यापारं च निरुन्धानोऽसङ्ख्यसमयैस्तत्सर्वनिरोधं करोति, उक्तं च–

पज्जत्तमित्तसन्निस्स जत्तियाइं जहन्नजोगिस्स ।
हुंति मणोदव्वाइं तव्वावारो य जंमित्तो ।।
तदसंखगुणविहीणे समये समये निरुंभमाणो सो।
मणसो सव्वनिरोहं कुणइ असंखेज्जसमएहिं ।। [वि.आ.भा॰ ३०५९, ६०]

ततः पर्याप्तमात्रद्वीन्द्रियजघन्यवाग्योगपर्यायेभ्योऽसंख्यगुणहीनांस्तत्पर्यायाननुसमयं निरुन्धन्नसंख्यसमयैः सर्ववाग्योगनिरोधं करोति, यदभ्यधायि –

पज्जतमित्तबिंदिय जहन्नवयजोगपज्जया जे उ ।
तदसंखगुणविहीणे समए समए निरुंभंतो ।। [वि.आ.भा॰ ३०६१]
सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं ।

तदनु च प्रथमसमयोत्पन्नसूक्ष्मपनकजघन्यकाययोगतोऽसङ्ख्यगुणहीनं काययोगं प्रतिसमयं निरुन्धन् देहत्रिभागं च मुञ्चन्नसङ्ख्येयसमयैरेव सर्वं निरुणद्धि उक्तं च–

तत्तो य सुहुमपणगस्स पढमसमओववन्नस्स ।।
जो किर जहन्नजोगो तदसंखिज्जगुणहीणमेक्केक्के ।
समए निरुंभमाणो देहतिभागं च मुंचंतो ।।
रुंभइ स कायजोगं संखाईएहिं चेव[२] समएहिं ।
तो कयजोगनिरोहो सेलेसीभावतामेइ ।। [वि.आ.भा॰ ३०६२, ६३, ६४]

१. मन्थकरणे A,T,B,C २. जोग T,B,C

इत्थं योगत्रयनिरोधं विधाय समुच्छिन्नक्रियमनिवर्त्तिशुक्लध्यानचतुर्थभेदं ध्यायन् 'अइउऋऌ' इत्येवंस्वरूपह्रस्वाक्षरपञ्चकस्वल्पप्रयत्नाद्रुताविलम्बितोच्चारणकालं शैलेश इव शैलेशो मुनिर्निरूद्धयोगतयात्यन्तस्थैर्येण तस्येयमवस्थेति व्युत्पादितशब्दां शैलेशीमनुभवति, तस्यामवस्थायामयोग्यनाहारकश्च भवतीति । तत्र च वेद्यायुर्नामगोत्रसत्कर्माणि युगपत्क्षपयत्यनेन न्यायेन–

तदसंखेज्जगुणाए गुणसेढीए रइयं पुरा कम्मं ।
समए समए खवियं कमसो सेलेसिकालेणं।। [वि.आ.भा॰ ३०८२]

तय संखेज्जगुणा इति । इहैकादश गुणश्रेणयस्तथाहि –

१-सम्यक्त्वे २-देशविरतौ ३-विरतौ ४-अनन्तानुबन्धिवियोजने ५-दर्शनक्षपणे ६-मोहोपशमने ७-उपशान्तमोहत्वे ८-क्षपकत्वे ९-क्षीणमोहत्वे १०-सयोगिनि ११-अयोगिनि चेति । ततश्च तस्याः सयोगिगुणश्रेणेर्दलिकान्यपेक्ष्यासङ्ख्यगुणेति–सव्वं खवेइ तं पुण निल्लेवं किंचिदुवरिमे समये, किंचिच्च होइ चरिमेत्ति । ततः –

देहत्रयविनिर्मुक्तः प्राप्यर्जुश्रेणिवीथिमस्पर्शाम् ।
समयेनैकेनाविग्रहेण गत्वोर्ध्वमप्रतिघः ।। [प्रशमरति-२८७]
सिद्धिक्षेत्रे विमले जन्मजरामरणरोगनिर्मुक्तः ।
लोकाग्रगतः सिध्यति साकारेणोपयोगेन ।। [प्रशमरति-२८८]

इति कृतं प्रसङ्गेनैवमेते सितं बद्धमिहाष्टविधं कर्म तदाध्मातं भस्मसाद्भूतमेषामिति **सिद्धा** ध्यानानलनिर्दग्धाष्टकर्मेन्धनाः, उक्तं हि –

'सियं धंतत्ति सिद्धस्स सिद्धत्तमुवजायइ ।'

इति ते **चानाहारकाः** प्रथमश्चकारः पूर्वेषां सिद्धेभ्यो वैलक्षण्यख्यापको द्वितीयश्च समुच्चये, **शेषा**[१] आहारं गृह्णन्तीति हलिकलिप्रभृतीनां गृह्णात्यर्थे कारितं तत आहारयन्ती**त्याहारका** इति गाथार्थः।।२१७।।

**** जीवसमासप्रकरणे-८२ ****

विग्गहगइमावन्ना केवलिणो समुहया अजोगी य ।
सिद्धा य अणाहारा सेआ आहारगा जीवा ।।

१. शेषा आहारयन्ती A

इह भवान्तरप्रस्थितजीवस्यर्जुश्रेण्यपेक्षयाऽन्यस्या विशिष्टाया वक्रायाः श्रेणेर्ग्रहणं स्वीकरणं विग्रहः, वक्रश्रेण्यारम्भरूपं वक्रितमित्यर्थः, तेन विग्रहेण परित्यक्तपूर्वशरीरस्य जन्तोर्भवान्तरोत्पत्तिस्थानाभिमुखं गमनं गति**र्विग्रहगतिस्तामापन्नाः** प्राप्ता जन्तवोऽनाहारका इति सर्वत्र संबध्यते, तथा **समवहताः** समुद्घातवर्तिनो यथासम्भवं सयोगि**केवलिनः, अयोगि**केवलिन**श्च सिद्धाश्चै**ते सर्वेऽप्य**नाहारकाः,** तथाहि–यदा जीवस्य मरणस्थानादग्रेतनभवोत्पत्तिस्थानमुपर्यधस्तिर्यग्वा समश्रेण्यां प्राञ्जलमेव भवति तदाऽयमेकेनैव समयेन तदवाप्नोति, ऋजुगतिश्चेयमुच्यते, आहारकश्चास्यां नियमाद् भवति, परित्याज्योपादेयशरीरमोक्षग्रहणसंस्पर्शभावेनाहरणीयपुद्गलानां व्यवच्छेदाभावादिति, यदा तु मरणस्थानादुत्पत्तिस्थानं किञ्चिद्वक्रं भवति यथेशानकोणोपरिभागादाग्नेयकोणाधस्तनभागस्तदा प्रथमसमय ईशानकोणोपरिभागादाग्नेयकोणोपरिभागं गत्वा तदधस्तनभागलक्षणस्योत्पत्तिस्थानस्य समश्रेणीं प्रतिपद्यते, जीवपुद्गलानामनुश्रेणिगमनात्प्रथमसमय एवोत्पत्तिस्थानप्राप्तेस्ततो द्वितीयसमये वक्रश्रेण्यन्तरारम्भरूपं विग्रहं विधाय तत्रोत्पत्तिस्थाने प्राणी समुत्पद्यत इति, इयं च विग्रहगतिरुच्यते, एकेन वक्रश्रेण्यन्तरारम्भरूपेण विग्रहेणोपलक्षिता गतिर्विग्रहगतिरितिकृत्वा, अस्यां चैकविग्रहायां द्विसमयायां विग्रहगतावाद्यसमये पूर्वशरीरस्य मुक्तत्वादग्रेतनस्य त्वद्याप्यप्राप्तत्वादनाहारक इति प्रज्ञप्त्याद्यागमानुसारिभिरभ्युपगम्यते, [पुस्तकान्तरे 'परभवपढमे साडो' इति वचनाद् मुच्यमानं हि पूर्वशरीरमस्मिन्नाद्यसमये मुक्तमसारीभूतमित्यनाहारकोऽयमत्र क्रियाकालनिष्ठाकालयोरभेदवादिनिश्चयनयमतस्यैतैराश्रयणादिति भावः] तत्त्वार्थटीकाद्यनुसारिणस्तु मन्यन्त अत्राद्यसमयेऽप्यनाहारकोऽसौ न भवति, पूर्वशरीरं ह्यत्र मुच्यमानं न मुक्तसद्भावापन्नमत एवायं पूर्वभवचरमसमय एव न तु परभवप्रथमसमयः, पूर्वशरीरस्याद्यापि सद्भावात्, तत्सद्भावे च न विद्यत आहारोऽस्येत्यनाहारक इति वक्तुमशक्यमेवेत्यनाहारकोऽयमिह न भवति, क्रियाकालनिष्ठाकालयोर्भेदवादिव्यवहारनयमतस्यैतैराश्रयणादितिहृदयम्, इदं च मतद्वयमप्यत्र कथञ्चित्प्रमाणमुभयनयमतात्मकत्वाज्जिनमतस्येति, द्वितीयसमये तूत्पत्तिस्थानप्राप्तेराहारक एवेत्यत्राविवाद इति, यदा पुनर्मरणस्थानादुत्पत्तिस्थानं वक्रतरं भवति यथा तस्मादेवेशानकोणोपरिभागान्नैर्ऋतकोणाधस्तनप्रदेशस्तदा प्रथमसमये वायव्यकोणोपरिभागं गच्छति, ततो द्वितीयसमये विग्रहेण नैर्ऋतकोणोपरिभागमागच्छति, तृतीयसमये विग्रहेणैव तदधस्तनभागस्वरूपमुत्पत्तिस्थानमवाप्नोति, तदेवं विग्रहद्वयोपेता त्रिसमया विग्रहगतिरियं भाविता, न चैते त्रयः समया अनेनैव प्रकारेण संभवन्तीति प्रतिपत्तव्यम्, किन्तूक्तानुसारेण सुधियाऽन्यथाऽपि भावनीयाः, उपलक्षणमात्रत्त्वादस्य, एवं पूर्वमुत्तरत्रापि च, इहापि पूर्वोक्तयुक्तिवशादाद्यसमयद्वयेऽनाहारकस्तृतीयसमये त्वाहारक इति निश्चयनयवादिनो मन्यन्ते, व्यवहारनयवादिनस्तु प्रागुक्तयुक्तेरेवैकस्मिनैव मध्यमे विग्रहसमयेऽनाहारको न तु प्रथमचरमसमययोरिति प्रतिपद्यन्ते, तदेवं सर्वजीवानां भवान्तरप्रतिपत्तौ ऋजुगतिर्यथोक्तस्वरूपा द्विसमया त्रिसमया च विग्रहगतिरित्येतदेव गतित्रयं संभवति, अथैकेन्द्रियाणामेव विग्रहत्रयोपेता चतुःसमया विग्रहगतिर्या सम्भवति तद्भावना प्रतिपाद्यते–इह त्रसनाड्या बहिर्विदिग्व्यवस्थितस्य सतो यस्य निगोदादेरधोलोकादूर्ध्वलोक उत्पादो नाड्या बहिरेव दिशि भवति

सोऽवश्यमेकेन समयेन विदिशो दिशमागच्छति द्वितीयेन नाडीं विशति तृतीयेनोर्ध्वलोकं व्रजति चतुर्थेन लोकनाडीतो निर्गत्योत्पत्तिस्थान उत्पद्यते, तदेवं त्रिविग्रहा चतुःसमया विग्रहगतिरियम्, अत्रापि पूर्ववदेकीयमतेनाद्येषु त्रिषु समयष्वानाहारकश्चतुर्थे त्वाहारकः, अन्यदीयमतेन तु मध्यमे वक्रसमयद्वय एवानाहारको न त्वाद्यन्त्यसमययोः, तदित्थमागमे जन्तूनां भवान्तरालगतिरियमेव चतुर्विधा प्रोक्ता- ऋजुगतिरेकविग्रहाद्विविग्रहा त्रिविग्रहा चेति, अन्ये त्वाहुश्चतुर्वक्रोपेता पञ्चसामायिकी अन्याऽप्यत्र गतिः संभवति, यदा त्रसनाडीबहिर्विदिशस्तद्बहिर्विदिश्येवोत्पद्यत इति, अत्र च समयत्रयं पूर्ववदेव, चतुर्थसमये तु नाडीतो निर्गत्योत्पत्तिस्थानस्य समश्रेणिं प्रतिपद्यते, पञ्चमे तु नाडीबहिर्विदिग्लक्षणमुत्पत्तिस्थानमवाप्नोति, अत्राप्येकेषामाद्यसमयचतुष्टयेऽनाहारकः पञ्चमे त्वाहारकः, अन्येषां तु मध्यमे वक्रसमयत्रय एवानाहारको न तु प्रथमचरमसमययोः, उक्तञ्च-'एकं द्वौ वाऽनाहारकः' (तत्त्वार्थ अ० २-सू० ३१) वाशब्दात्कदाचिन्त्रीन्वेति द्रष्टव्यम्, भाष्यकाराभिप्रायेण वाशब्दस्य एकस्य द्वयोश्च विकल्पार्थतयोन्नयनम्, अधिकस्य स्पष्टं तत्र निषेधात्, इयं च पञ्चसामयिकी गतिः कादाचित्कत्वादागमे नोक्ता, प्रायेणैकेन्द्रियाणामपीत्थमनुत्पत्तेरिति। तदेवं दर्शिता विग्रहगत्यापन्ना अनाहारकाः, इह च विग्रहगत्यापन्ना एवानाहारका इति नावधारणीयम्, सिद्धादीनामप्यनाहारकत्वाद् विग्रहगतावनाहारका एवेतीत्थमपि नावधार्यते, तस्यामपि केषुचित्समयेष्वनाहारकत्वस्यानुक्तत्वात्, तर्हि सर्वाणि वाक्यानि सावधारणानि भवन्तीति कथं नेतव्यमिति, उच्यते, क्रियतेऽवधारणं केवलं सम्भवदर्शनपरमयोगव्यवच्छेदेन विग्रहगतावनाहारकाः संभवन्त्येवेति, यथा नभसि पक्षी जाले मत्स्य इत्यादिष्वित्यलं विस्तरेण, तथा सयोगिनः केवलिनोऽपि समवहताः समुद्घाते वर्त्तमानास्तृतीयचतुर्थपञ्चमसमयेषु केवलकार्म्मणकाययोगावस्थायामनाहारकाः, एतच्चेहापि प्राक् किञ्चित्सविस्तरं प्रोक्तमेवेति, अयोगिकेवलिनः सिद्धाश्च पुनः सर्वथैवानाहारकाः, आहारग्रहणकारणौदारिकादिशरीरक्षुद्वेदनीयकर्मादेस्तेष्वभावादिति, उक्तशेषाः, पुनः सर्वेऽपि जीवा आहारका एवौजाहारलोमाहारप्रक्षेपाहारान्यतराहारग्रहणकारणसद्भावेन यथासम्भवमाहारयन्त्येवेतिकृत्वा, तत्रौजसा तैजसशरीरेण स्वसहचारिकार्म्मणशरीरान्वितेनाहारः सकारवर्णलोपादोजाहारः, अथवा ओजः स्वजन्मस्थानोचितशुक्रानुविद्धशोणितादिपुद्गलसंघातस्तस्याहार ओजाहारः, अयं चापर्याप्तावस्थायामेवान्तर्मुहूर्त्तं सर्वजन्तूनां द्रष्टव्यः, तथा लोमभिर्लोमरन्ध्रैः शिशिरप्रावृट्कालादिभाविनां शीतजलादिपुद्गलानामाहरणं ग्रहणं लोमाहारः, अयं च पर्याप्त्युत्तरकालमाभवक्षयात्समस्तजीवानामवसेयः, तथा प्रक्षेपणं मुखे प्रवेशनं प्रक्षेपस्तेनौदनादेराहारः प्रक्षेपाहारः, अथवा प्रक्षिप्यत इति प्रक्षेपः- ओदनकवलादिस्तस्याहारः प्रक्षेपाहारः, अयं च विकलेन्द्रियपञ्चेन्द्रियतिर्यङ्मनुष्याणामेव द्रष्टव्यः, तेषामपि कादाचित्को न त्वविरहितः, उक्तञ्च -

ओयाहारा जीवा सव्वे पज्जत्तया मुणेयव्वा । पज्जत्तया य लोमे पक्खेवे होंति भइयव्वा ।।

एगिंदियदेवाणं नेरइयाणं च नत्थि पक्खेवो । सेसाणं जीवाणं संसारत्थाण पक्खेवो ।।

इत्यादि, आह–ननु मनश्चिन्तितोपनतस्वरूपचतुर्थोऽप्याहारो भवनपत्यादीनां संभवति स कस्मादिह नोक्तः, सत्यम्, किन्तु करादिनाऽप्रक्षिप्ता एवांगन्तुकाः पुद्गला अत्राहारतया परिणमन्ति लोमाहारेऽप्ययमेवेत्येतावत्साम्याल्लोमाहारेऽन्तर्भावितत्वात्पृथगसावागमेऽपि नोक्त इत्यदोषः, तस्माद्विग्रहगत्यापन्नादिभ्यः **शेषाः** सर्वेऽपि **जीवा** यथोक्तस्वरूपं त्रिविधमाहारं यथासम्भवमाहारयन्त्येवेत्**याहारका** एवेति गाथार्थः ।।८२।।

**** प्रवचनसारोद्धारे-१३१९ ****

इदानीं 'अणाहारया चउरो'त्ति त्रयस्त्रिंशदुत्तरद्विशततमं द्वारमाह –

विग्गहगइमावन्ना केवलिणो समोहया अजोगी य ।
सिद्धा य अणाहारा सेसा आहारगा जीवा ।।

विग्रहगतिर्भवाद् भवान्तरे विश्रेण्या गमनं ता**मापन्नाः** प्राप्ताः सर्वेऽपि जीवास्तथा **केवलिनः समुद्घताः** कृतसमुद्घातास्तथाऽ**योगिनः** शैलेश्यवस्थास्तथा **सिद्धाः** क्षीणकर्माष्टकाः, सर्वेऽप्येते**ऽनाहाराः,** एतद्व्यतिरिक्ताः **शेषाः** सर्वेऽ**प्याहारकाः,** इह परभवं गच्छतां जीवानां गतिर्द्विधा–ऋजुगतिर्विग्रहगतिश्च, तत्र यदा जीवस्य मरणस्थानादुत्पत्तिस्थानं समश्रेण्यां प्राञ्जलमेव भवति तदा ऋजुगतिः, सा चैकसमया, समश्रेणिव्यवस्थितत्वेनोत्पत्तिदेशस्याद्यसमय एव प्राप्तेः, नियमादाहारकश्चास्याम्, हेयग्राह्यशरीरमोक्षग्रहणान्तरालाभावेनाहाराव्यवच्छेदात्, यदा तु मरणस्थानादुत्पत्तिस्थानं वक्रं भवति तदा विग्रहगतिः, वक्रश्रेण्याऽन्तरालरूपेण विग्रहेणोपलक्षिता गतिर्विग्रहगतिरितिकृत्वा, तत्र विग्रहगत्योत्पन्ना उत्कर्षतस्त्रीन् समयान् यावदनाहारकाः, तथाहि–अस्यां वक्रगतौ स्थितो जन्तुरेकेन द्वाभ्यां त्रिभिश्चतुर्भिर्वा वकैरुत्पत्तिदेशमायाति, तत्रैकवक्रायां द्वौ समयौ, तयोश्च नियमादाहारकः, तथाहि–आद्यसमये पूर्वशरीरमोक्षस्तस्मिंश्च समये तच्छरीरयोग्याः केचित्पुद्गला जीवयोगाल्लोमाहारतः । संबन्धमायान्ति, औदारिकवैक्रियाहारकपुद्गलादानं चाहारः, तत आद्यसमय आहारकः, द्वितीये च समय उत्पत्तिदेशे तद्भवयोग्यशरीरपुद्गलादानादाहारकः, द्विवक्रायां गतौ त्रयः समयाः, तत्राद्येऽन्त्ये च प्राग्वदाहारको मध्यमे त्वनाहारकः, त्रिवक्रायां चत्वारः समयाः, ते चैवं–त्रसनाड्या बहिरधस्तनभागादूर्ध्वमुपरितनभागादधो वा जायमानो जन्तुर्विदिशो दिशि दिशो वा विदिशि यदोत्पद्यते तदैकेन समयेन विदिशो दिशि याति द्वितीयेन त्रसनाडीं प्रविशति तृतीयेनोपर्यधो वा याति चतुर्थेन बहिरुत्पद्यते, दिशो विदिश्युत्पादे त्वाद्ये समये त्रसनाडीं प्रविशति द्वितीय उपर्यधो वा याति तृतीये बहिर्गच्छति चतुर्थे विदिश्युत्पद्यते, अत्राद्यन्तयोः प्राग्वदाहारको मध्यमयोस्त्वनाहारकः, चतुर्वक्रायां पञ्च समयाः, ते च त्रसनाड्या बहिरेव विदिशो विदिश्युत्पादे प्राग्वद्भावनीयाः, अत्राप्याद्यन्तयोराहारकस्त्रिषु त्वनाहारकः, तथा केवलिनः समुद्घातेऽष्टसामयिके तृतीयचतुर्थपञ्चमरूपान् केवलकार्मणयोगयुतांस्त्रीन् समयान्, अयोगिनः शैलेश्यवस्थायां ह्रस्वपञ्चाक्षरोच्चारणमात्रं, सिद्धास्तु सादिमपर्यवसितं कालमनाहारका इति ।।१३१९।।

चक्रे० : उक्तं पर्याप्तिद्वारमथ तनुमानाऽवसरस्तत्र पृथ्वीकायानां तावदाहुः –

देव० : सप्रसङ्गं पर्याप्तिद्वारमभिहितमथ तनुमानावसरस्तत्र पृथिवीकायानां तावदाह –

[१]अद्दामलयपमाणे पुढविक्काए हवंति जे जीवा ।
ते पारेवयमित्ता जंबुद्दीवे न माइज्जा ।।२१८।।

चक्रे० : सुगमा, नवर**मार्द्रामलकं** पीलुवृक्षमकुरः, **पारेवयमित्ता** पारापतमात्रतनवः।।२१८।।

देव० : सुगमा, नवर**मार्द्रामलकं** पीलुवृक्ष[२]मकुरस्तथाऽ[३]सत्कल्पनैवेयं मुग्धधियां सुखावबोधाय, यथा **पारापतमात्राणि** यदि तेषां शरीराणि स्युस्तदा **जम्बूद्वीपे न मायुरि**ति । यावता ततो लघुतरशरीरा अपि सङ्ख्यातद्वीपसमुद्रेष्वपि च नैव मायुः, न चैतन्निरुपपत्तिकममी ह्यसङ्ख्याः, उत्कृष्टसङ्ख्येयकमपि चानुयोगद्वारेष्वनवस्थितशलाकाप्रतिशलाकामहाशलाकापल्यसर्षपैः प्ररूपयतैक एव चरमोऽनवस्थितपल्यः सङ्ख्येयद्वीपसमुद्रप्रमाणः प्रतिपादित इति गाथार्थः ।।२१८।।

चक्रे० : सम्प्रत्यपामाहुः –

देव० : सम्प्रत्यपामाह –

एगंमि उदगबिंदुम्मि जे जीवा जिणवरेहिं पन्नत्ता ।
ते वि य सरिसवमित्ता जंबुद्दीवे न [४]माइज्जा ।।२१९।।

चक्रे० : स्पष्टा, केवलमुदकबिन्दुर्यावान् वालाग्रेऽवतिष्ठते तावान् ज्ञेयः, सर्षपप्रमाणभणनेन चात्र पृथ्वीतोऽपां सूक्ष्मत्वमुक्तमुत्तरोत्तरेण चैषां सर्वेषां सूक्ष्मत्वं ज्ञेयम्।।२१९।।

देव० : गतार्था, केवलमुदकबिन्दुर्यावान् वालाग्रेऽवतिष्ठते, **सर्षपमात्र**भणनेन चात्र पृथिवीकायिकशरीरेभ्योऽमीषां सूक्ष्मत्वमाह, एवमुत्तरोत्तरसूक्ष्मत्वम्, तेजोवाय्वनन्तवनस्पतिशरीरेष्वपि विज्ञेयम्, तत्पुनरसङ्ख्यगुणहीनतयेति गाथार्थः।।२१९।।

---

१. अद्दामलग P,K २. मयूरः A,T,B,C ३. स्थूल A ४. मायंति A

चक्रे० : ननु यद्येवमतिसूक्ष्मत्वं पृथ्व्यादिशरीराणां तत्कथं दृश्यन्त इत्याहुः –

देव० : ननु यद्येवमतिसूक्ष्माणि पृथिव्यादिशरीराणि तत्कथं मांसचक्षुषः पश्यन्तीत्याह –

एगस्स दुण्ह तिण्हव [१]संखिज्जाण व न पासिउं सक्का ।
दीसंति सरीराइं पुढविजियाणं [२]असंखेज्जा।।२२०।।

चक्रे० : एकस्य द्वयोस्त्रयाणां वा सङ्ख्येयानां वा पृथ्वीजीवानां शरीराणि न द्रष्टुं शक्यानि किन्त्वसङ्ख्येयानां मिलितानि तानि **दृश्यन्त** इत्यर्थः।।२२०।।

देव० : वि[३]भक्तिव्यत्ययादेक **द्वे त्रीणि वा यावत्सङ्ख्येयानि** शरीराणीति योगः, **द्रष्टुं न शक्ता**श्चर्मचक्षुष इति शेषस्तर्हि कथमित्याह–**दृश्यन्ते शरीराणि पृथिवीजीवानामसङ्ख्येयानि** समुदितानीत्यर्थ इति ।।२२०।।

**** आचाराङ्गनिर्युक्तौ-१४२, १४३ ****

सम्प्रति प्रत्येकतरूणामेकादिजीवपरिगृहीतशरीरदृश्यत्वं प्रतिपिपादयिषयाह –

एगस्स दुण्ह तिण्ह व संखिज्जाण व तहा असंखाणं ।
पत्तेयसरीराणं दीसंति सरीरसंघाया ।।

एकजीवपरिगृहीतशरीरं तालसरलनालिकेर्यादिस्कन्धः, स च चक्षुर्ग्राह्यः, तथा बिसमृणालकर्णिका-कुणककटाहानामेकजीवपरिगृहीतत्वं चक्षुर्दृश्यत्वं च, द्वित्रिसङ्ख्येयासङ्ख्येयजीवपरिगृहीतत्वमप्येवं दृश्यतया भावनीयमिति ।।१४२।।

किमनन्तानामप्येवम् ? नेत्यत आह –

इक्कस्स दुण्ह तिण्ह व संखिज्जाण व न पासिउं सक्का ।
दीसंति सरीराइं निओयजीवाणऽणंताणं ।।

नैकादीनामसङ्ख्येयावसानानामनन्ततरुजीवानां शरीराण्युपलभ्यन्ते, कुतः ?, अभावात्, न ह्येकादि-जीवपरिगृहीतान्यनन्तानां शरीराणि सन्ति, अनन्तजीवपिण्डत्वादेव, कथं तर्ह्युपलभ्यास्ते भवन्तीति दर्शयति–दृश्यन्ते शरीराणि बादरनिगोदानामनन्तजीवानाम्, सूक्ष्मनिगोदानां तु नोपलभ्यन्ते, अनन्तजीव-सङ्घातत्वे सत्यप्यतिसूक्ष्मत्वादिति भावः, निगोदास्तु नियमत एवानन्तजीवसङ्घाता भवन्तीति, उक्तं च–

---

१. संखेज्जाण A, Z २. असंखिज्जा P ३. एकस्य द्वयोस्त्रयाणां वा यावदुत्कृष्टसंख्येयकानां वा पृथिवीजीवशरीराणामिति संटङ्कः । 'न पासिउं'ति न द्रष्टुम् T,B,C

गोला य असंखेज्जा हुंति णिओआ असङ्खया गोले । एक्केक्के य निओए अणंतजीवो मुणेयव्वो ।।

एवं वनस्पतीनां वृक्षादिप्रत्येकादिभेदात्तथा वर्णगन्धरसस्पर्शभेदात् सहस्राग्रशो विधानानि सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भेदानामवसेयानीति, तथाहि-वनस्पतीनां संवृता योनिः, सा च सचित्ताचित्त-मिश्रभेदात् त्रिधा, तथा शीतोष्णमिश्रभेदाच्च, तथा प्रत्येकतरूणां दशलक्षा योनिभेदानाम्, साधारणानां च चतुर्दश, कुलकोटीनां द्वयोरपि पञ्चविंशतिकोटिशतसहस्राणीति ।।१४३।।

चक्रे० : अन्येषामतिदेशमाहुः –

देव० : अन्येषामतिदेशमाह –

आऊतेऊवाऊ एसिं[१] सरीराणि पुढविजुत्तीए ।
दीसंति वणसरीरा दीसंति असंख संखेज्जा[२] ।।२२१।।

चक्रे० : आपस्तेजो वायुरेषां शरीराणि पृथ्वीयुक्त्याऽसङ्ख्येयानि मिलितानि **दृश्यन्त** इत्यर्थः । **'वणसरीरा दीसंति असंखेज्जा'** साधारणवनस्पतिशरीराण्यसङ्ख्यानि, प्रत्येक-वनस्पतीनां तु केषाञ्चिदसङ्ख्येयानि केषाञ्चिच्च **सङ्ख्येयानि दृश्यन्ते**।।२२१।।

देव० : आपस्तेजोवायुः, किमेषां शरीराणि पृथिवीयुक्त्या दृश्यन्तेऽसङ्ख्येयानि मिलितानीत्यर्थः । तथा **'वण'**त्ति वनस्पतिजीवशरीराणि **दृश्यन्तेऽसङ्ख्येयानि, सङ्ख्येयानि** च, कोऽर्थः – साधारणवनस्पतीनामसङ्ख्यानि, प्रत्येकशरीराणां त्वसङ्ख्यानि केषाञ्चित्, केषाञ्चित्तु सङ्ख्येयानीतीह च प्रत्येकवनस्पतिं विमुच्यैकेन्द्रियाणां बादरणामङ्गुलासङ्ख्यभाग एवोत्कृष्टतो जघन्यतश्च तनुमानं सूक्ष्माणामप्येतदेव, केवलमेतदसङ्ख्येयकं लघुतरमवसेयम्, प्रत्येकशरीराणां तूत्कृष्टतो योजनसहस्रं साधिकम्, जघन्यतस्त्वङ्गुलासङ्ख्यभाग एतत्पुनर-सङ्ख्यशरीराण्यसङ्ख्यसङ्ख्येयानि च दृश्यन्त इति ब्रुवाणेन सूचितम् । यद्येवं द्वीन्द्रियादीनां किमिति तनुमानं नाभिहितम् ? सत्यम्, अमीषां लोचनगोचरत्वेन सुज्ञेयत्वादस्माभिस्तु स्थाना-शून्यार्थं किञ्चिदुच्यते –

तत्र सर्वेषामपि जघन्यतस्तावदङ्गुलासङ्ख्यभागः, स पुनरपर्याप्तावस्थायां प्रारम्भकाले, उत्कृष्टतस्तु द्वीन्द्रियाणां द्वादश योजनानि, त्रीन्द्रियाणां गव्यूतत्रयम्, चतुरिन्द्रियाणां गव्यूत-चतुष्टयम्, पञ्चेन्द्रियाणां तिरश्चां समूर्च्छिमानां गर्भजानां च योजनसहस्रम्, मनुष्याणां तु संमूर्छिमा-नामङ्गुलासङ्ख्यभागः, गर्भजानां तु गव्यूतत्रयम्, देवानां सप्तरत्नयः, नारकाणां पञ्चधनुःशतीत्यलं प्रसङ्गेन, विस्तरार्थिना तु सङ्ग्रहण्यादिग्रन्थान्वेषणं विधेयमिति गाथाचतुष्टयार्थः ।।२२१।।

१. एसि A,T,B,C, P २. संखिज्जा P

चक्रे० : सम्प्रत्यायुर्द्वारगाथायुग्ममाहुः –

देव० : सम्प्रत्यायुर्द्वारं बिभणिषुर्गाथायुग्ममाह –

बावीसइं सहस्सा सत्तसहस्साइं तिन्निऽहोरत्ता ।
वाए तिन्नि सहस्सा दसवाससहस्सिया रुक्खा।।२२२।।
संवच्छराणि बारस राइंदिय हुंति अउणपन्नासा ।
छम्मास-तिन्नि-पलिया पुढवाईणं ठिउक्कोसा [१] ।।२२३।।

चक्रे० : वातवृक्षयोः साक्षादभिधानादन्ते च पृथ्व्यादीनामिति भणनात् पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियाणां नवानां क्रमेणैतदायुरुत्कृष्टं निरुपद्रवस्थाने ज्ञेयम्, जघन्यतस्तु सर्वेषामन्तर्मुहूर्त्तम्, अनन्तवनस्पतीनां तु द्विधाऽप्यन्तर्मुहूर्त्तमिति।।२२२, २२३।।

देव० : वातवृक्षयोः साक्षादभिधानादन्ते च पृथिव्यादीनामिति भणनात्पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियाणां नवानां क्रमेणैतदायुरुत्कृष्टमवगन्तव्यम् । तथा **'दसवाससहस्सिया'** इत्यत्रोपात्तो वर्षशब्दः प्रथमगाथायां **'तिन्निऽहोरत्ता'** इत्येतद्विमुच्य सर्वत्र सम्बध्यते वृक्षग्रहणं च वनस्पतिमध्ये वृक्षाणामेवैतदायुर्भवतीति ज्ञापयति, न तु वल्ल्यादीनाम्, निरुपद्रवस्थानेषु च सर्वेषामेतदायुरवसेयम्, जघन्यतस्तु सर्वेषामनन्तवनस्पतीनामुत्कर्षतोऽपि चान्तर्मुहूर्त्तमिति गाथाद्वयार्थः।।२२२, २२३।।

**** प्रवचनसारोद्धारे-१०९६, १०९७ ****

सम्प्रति 'एगिंदियविगलसन्निजीवाणं भवट्ठिइ'त्ति षडशीत्यधिकशततमं द्वारमाह –

बावीसई सहस्सा सत्तेव सहस्स तिन्निऽहोरत्ता ।
वाए तिन्नि सहस्सा दसवाससहस्सिया रुक्खा ।।
संवच्छराइं बारस राइंदिय हुंति अउणपन्नासं ।
छम्मास तिन्नि पलिया पुढवाईणं ठिउक्कोसा ।।

पृथिव्यादीनां मनुष्यपर्यन्तानां स्थितिरायुःप्रमाणरूपा एषा उत्कृष्टा, यथा–पृथिवीकायिकानां **द्वाविंशतिवर्षसहस्राण्यप्**कायिकानां **सप्त** वर्ष**सहस्राणि** तेजस्कायिकानां **त्रीणि** रात्रिन्दिवानि **वाते**–वातकाये **त्रीणि** वर्ष**सहस्राणि वृक्षा** वनस्पतयो **दशवर्षसाहस्रिकाः,** किमुक्तं भवति ?

१. ठिइ उक्कोसा T,B,C

वनस्पतिकायिकानामुत्कर्षतः स्थितिर्दशवर्षसहस्राणीति, तथा द्वीन्द्रियाणामुत्कर्षत आयुःस्थिति**र्द्वादश** वर्षाणि त्रीन्द्रियाणामे**कोनपञ्चाशद्रात्रिन्दिवानि** चतुरिन्द्रियाणां **षण्मासाः** पञ्चेन्द्रियाणां तिर्यग्मनुष्याणां **त्रीणि पल्योपमानि,** एषा **चोत्कृष्टा स्थितिः** प्रायो निरुपद्रवस्थाने द्रष्टव्या, एवमग्रेऽपि ज्ञेयम् ।।१०९६, १०९७।।

चक्रे० : अथ कायस्थितिमाहुः –

देव० : अथ कायस्थितिमाह –

अस्संखोसप्पिणिसप्पिणीओ एगिंदियाण उ चउण्हं ।
ता चेव उ अणंता वणस्सईए उ बोधव्वा।।२२४।।

चक्रे० : अवसर्प्पन्ति जन्तूनां शरीरायुर्बलबुद्ध्यादीन्यास्वित्यवसर्प्पिण्यो दशसागरोपमकोटीकोटिपरिमाणाः, उत्सर्प्पन्त्येतान्यास्वित्युत्सर्प्पिण्यश्च, तादृश्योऽ**सङ्ख्याऽवसर्प्पिण्युत्सर्पिण्य एकेन्द्रियाणां चतुर्णां** पृथिव्यप्तेजोवायूनाम्, **ताश्चै**वाऽवसर्पिण्युत्सर्पिण्योऽ**नन्ता वनस्पतेः** पुन**र्बोद्धव्याः** । इह चैषा कायस्थितिः सामान्योक्तावपि वनस्पतेरनन्तकायिकस्य ज्ञेया, यतः प्रत्येकवनस्पतीनामसङ्ख्येयकालैव कायस्थितिर्भगवत्यामुक्तेति।।२२४।।

देव० : अवसर्पन्ति प्रतिसमयं कालप्रमाणं जन्तूनां वा शरीरायुर्बलबुद्ध्यादिकमपेक्ष्य ह्रासमनुभवन्त्यवश्यमित्यवसर्पिण्यश्च दशसागरोपमकोटीकोटिपरिमाणा उत्सर्पन्त्युक्तन्यायतो वृद्धिमनुभवन्त्यवश्यमित्युत्सर्पिण्यश्च तावत्प्रमाणा एव, उल्लोपः सूत्रत्वात् ततोऽसङ्ख्यशब्दस्यानेन सह कर्मधारयेऽ**सङ्ख्यावसर्पिण्युत्सर्पिण्य एकेन्द्रियाणां चतुर्णां** पृथिव्यप्तेजोवायूनाम्, **ताश्चैवा**वसर्पिण्युत्सर्पिण्योऽ**नन्ता वनस्पतेः** पुनः, स्त्रिया निर्देशः प्राकृतत्वाद् । **बोधव्या** इहाद्यौ **तु**शब्दौ पादपूरणे, तथा चोक्तम्-तुशब्दो विशेषणपादपूरणावधारणसमुच्चयेषु, तृतीयस्तु विशेषणे योजित एव, इयं चोत्कृष्टतः कायस्थितिरुक्ता, जघन्यतस्तु सर्वेषामन्तर्मुहूर्त्तमिति । तथेहानन्तकालं कायस्थितिः सामान्येन वनस्पतिजीवान् निगोदजीवान् वापेक्ष्य विज्ञेया, विशेषापेक्षायां तु प्रत्येकवनस्पतीनां तथा निगोदानां बादराणां सूक्ष्माणां चासङ्ख्यकालैव स्थितिः । यदुक्तम् – 'पत्तेयसरीरबायरवणप्फइकाइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सत्तरिसागरोवमकोडाकोडीओ । निओएणं भंते ! निओइत्ति० कालओ केवच्चिरं होइ ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं अणंताओ ओसप्पिणिउसप्पिणीओ, खित्तओ अड्ढाइज्जा पुग्गलपरियट्टा बायरनिओए पुच्छा-

जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सत्तरिसागरोवमकोडाकोडीओ सुहुमनिओए पुच्छा–जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखिज्जं कालंति' । त्रसेषु पुनः कायस्थितिरिहानुक्तापि सूत्रान्तराद्धण्यते, तत्र सामान्येन [१]वर्षाधिकानि विंशतिः सागरोपमशतानि । विशेषतस्तु-

वाससहस्सा संखा विगलाण ठिई होइ नायव्वा ।
सत्तट्ठभवा उ भवे पणिंदितिरिमणुय उक्कोसा ।। [प्रव.सारो॰ १०९५]

इति गाथार्थः ।।२२४।।

* उपदेशपदे-१७ *

तानेवैकेन्द्रियभेदान् पृथिवीकायिकादीन् पञ्चैव प्रतीत्य दर्शयन्नाह –

अस्संखोसप्पिणिसप्पिणीउ एगिंदियाण उ चउण्हं ।
ता चेव उ अणंता वणस्सईए उ बोद्धव्वा ।।

'अस्संखोसप्पिणिसप्पिणीउ'त्ति प्राकृतत्वादविभक्तिको निर्देशस्तेनासंख्याता उत्सर्पिण्यसर्वपिण्यः । तत्रोत्सर्पयति प्रथमसमयादारभ्य निरन्तरं वृद्धिं नयति तैस्तैः पर्यायैर्भावानित्युत्सर्पिणी । तथा च पञ्चकल्पभाष्यम् –

समए समएऽणंता परिवड्ढंता उ वण्णमाईया। दव्वाणं पज्जायाऽहोरत्तं तत्तिया चेव ।।

तद्विपरीता त्ववसर्पिणी । तुरेवकारार्थो भिन्नक्रमस्ततोऽसंख्याता **एवैकेन्द्रियाणाम्,** तुरप्यर्थे भिन्नक्रमः, **चतुर्णामपि** पृथिव्यप्तेजोवायुकायिकानां कायस्थितिर्बोद्धव्येति संबन्धः । **'ता चेव उ'** इति ता एव चोत्सर्पिण्यवसर्पिण्योऽ**नन्ताः वनस्पतौ तु** वनस्पतिकाये पुन**र्बोद्धव्या** कायस्थितिरुत्कृष्टेति । किमुक्तं भवति? पृथिव्यप्तेजोवायुकायिकेषु जीवो मृत्वा पुनःपुनरुत्पद्यमान एकैककाय असंख्याता उत्सर्पिण्यवसर्पिणीयावदास्ते, वनस्पतिकायिकेषु तु प्राणिषूत्पद्यमानस्ता एवोत्सर्पिण्यवसर्पिणीरनन्ता गमयत्युत्कृष्टतः, जघन्यतस्त्वन्तर्मुहूर्त्तमेवेति । अथोत्सर्पिण्यवसर्पिण्योः किं प्रमाणम् ? उच्यते–द्वादशारकालचक्रमुत्सर्पिण्यवसर्पिण्यौ । तत्स्वरूपं यथा –

दस कोडाकोडीओ सागरनामाण हुंति पुन्नाओ । उस्सप्पिणीपमाणं तं चेवोसप्पिणीए वि ।।
छच्चेव कालसमया हवंति ओसप्पिणीए भरहम्मि । तासिं नामविहत्तिं अहक्कमं कित्तइस्सामि ।।
सुसमसुसमा य सुसमा तइया पुण सुसमदुस्समा होइ । दुसमसुसमा चउत्थी दूसम अइदूसमा छट्ठी ।।
एए चेव विभागा हवंति उस्सप्पिणीइ छ च्चेव । पडिलोमा परिवाडी नवरि विभागेसु नायव्वा ।।
सुसमसुसमाइ कालो चत्तारि हवंति कोडिकोडीओ । तिण्णि सुसमाइकालो दुन्नि भवे सुसमदुसमाए ।।

१. संख्येयवर्षाधिकानि विंशतिः A, विंशतिः T,B,C

एक्का कोडाकोडी बायलीसाइ जा सहस्सेहिं । वासाण होइ ऊणा दूसमसुसमाइ सो कालो ।।

अह दूसमाए कालो वाससहस्साइं एक्कवीसं तु । तावइओ चेव भवे कालो अहदूसमाए वि ।।

इत्यादि । एवं द्वाभ्यामुत्सर्पिण्यवसर्पिणीभ्यां कालचक्रं द्वादशारं विंशतिसागरोपमकोटाकोटिप्रमाणम् । तत्र च यथोत्तरं कालानुभावस्वरूपं ग्रन्थान्तरादवसेयम् । विकलेन्द्रियाणां पञ्चेन्द्रियतिरश्चां मनुष्याणां च कायस्थितिरनया गाथया ज्ञेया, यथा –

वाससहस्सासंखा विगलाण ठिई उ होइ बोद्धव्वा ।

सत्तट्ठ भवा उ भवे पणिंदितिरिमणुय उक्कोसा ।। इति।।१७।।

**** प्रवचनसारोद्धारे-१०९४ ****

सम्प्रति 'एगिंदियविगलिंदियसन्नीजीवाण कायठिइओ'त्ति पञ्चाशीत्यधिकशततमं द्वारमाह –

अस्संखोसप्पिणिसप्पिणीउ एगिंदियाण (उ) चउण्हं ।

ता चेव ऊ अणंता वणस्सइए उ बोद्धव्वा ।।

एकेन्द्रियाणां चतुर्णां पृथिव्यप्तेजोवायुरूपाणां प्रत्येकमुत्कृष्टा कायस्थितिर्मृत्वा मृत्वा तत्रैव कायेऽवस्थान**मसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः,** एतच्च कायस्थितिमानं कालतः, क्षेत्रतस्वसङ्ख्येया लोकाः, इदमुक्तं भवति–असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे सर्वप्रदेशापहारेण यावत्योऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्य इति, **ता एव**-उत्सर्पिण्यवसर्पिण्योऽ**नन्ता वनस्पति**कायिकस्योत्कृष्टा कायस्थिति**र्बोद्धव्या,** इयमपि कालतः, क्षेत्रतस्तु पूवोक्तप्रकारेण अनन्ता लोकाः, असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च आवलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तत्तुल्या, इयं च कायस्थितिः सांव्यवहारिकानाश्रित्य द्रष्टव्या, असांव्यवहारिकजीवानां त्वनादिरवसेया, ततो न मरुदेव्यादिभिर्व्यभिचारः, तथा च क्षमाश्रमणाः -

तह कायठिइकालादओ विसेसे पडुच्च किर जीवे । नाणाइवणस्सइणो जे संववहारबाहिरिया ।।

[तथा कायस्थितिकालादयो विशेषान् जीवान् किल प्रतीत्य । नानादिवनस्पतीन् ये संव्यवहारबाह्याः ।।]

यापि चासांव्यवहारिकजीवानामनादिः कायस्थितिः साऽपि केषाञ्चिदनादिरपर्यवसाना, ये जातुचिदप्यसांव्यवहारिकराशेरुद्धृत्य सांव्यवहारिकराशौ न निपतिष्यन्ति, केषाञ्चिदनादिः सपर्यवसाना, येऽसांव्यवहारिकराशेरुद्धृत्य सांव्यवहारिकराशौ निपतन्ति । अथ किमसांव्यवहारिकराशेर्विनिर्गत्यं सांव्यवहारिकराशावागच्छन्ति ? उच्यते, आगच्छन्ति, तथा चोक्तं विशेषणवत्याम् –

सिज्झंति जत्तिया किर इह संववहारजीवरासीओ । इन्ति अणाइवणस्सइरासीओ तत्तिया तंमि ।।

[सिध्यन्ति यावन्तः किलेह संव्यवहारजीवराशेः । आयान्त्यनादिवनस्पतिराशेस्तावन्तस्तस्मिन् ।।]

तत्र येऽनादिसूक्ष्मनिगोदेभ्य उद्धृत्य शेषजीवेषूत्पद्यन्ते ते पृथिव्यादिविविधव्यवहारयोगात्

सांव्यवहारिकाः, ये पुनरनादिकालादारभ्य सूक्ष्मनिगोदेष्वेवावतिष्ठन्ते ते तु तथाविधव्यवहारातीतत्वादसांव्यवहारिकाः, तत्र सांव्यवहारिकाः सूक्ष्मनिगोदेभ्य उद्धृत्य शेषजीवेषूत्पद्यन्ते, तेभ्योऽप्युद्धृत्य केचिद् भूयोऽपि तेष्वेव निगोदेषु गच्छन्ति, परं तत्रापि सांव्यवहारिका एव ते, व्यवहारे पतिततत्वात्, तत्र च सूत्रोक्तमुत्कर्षतोऽवस्थानकालमानम्, असांव्यवहारिकास्तु सदा निगोदेष्वेवोत्पत्तिमरणभाजो, न कदाचनापि त्रसादिभावं लब्धवन्त इति ।।१०९४।।

चक्रे० : अथ लेश्याद्वारमाहुः –

देव० : अथ लेश्याद्वारमधिकृत्याह –

किण्हा-नीला-काऊ-तेऊ-पम्हा तहेव सुक्का य ।
छल्लेसा खलु एया जीवाणं हुंति विन्नेया।।२२५।।

चक्रे० : लेशयन्ति श्लेषयन्त्यात्मानमष्टविधेन कर्मणेति **लेश्याः कृष्णाद्याः,** कृष्णादि द्रव्यसंनिधानादशुद्धतमाऽशुद्धतराऽशुद्ध-शुद्ध-शुद्धतर-शुद्धतम-परिणामरूपाः **षडेता जीवानां भवन्ति विज्ञेयाः** ।।२२५।।

देव० : लेशयन्ति श्लेषयन्त्यात्मानमष्टविधेन कर्मणा स्थितिहेतुत्वादिति लेश्याः । तत्र कृष्णवर्णपुद्गलसन्निधानादात्मनोऽशुद्धतमः परिणामः **कृष्ण**लेश्या, नीलवर्णपुद्गलसन्निधानादशुद्धतरपरिणामो **नील**लेश्या, कापोतवर्णपुद्गलसन्निधानादशुद्धपरिणामः **कापोत**लेश्या, तैजसवर्णपुद्गलसन्निधानाच्छुद्धपरिणाम**स्तेजो**लेश्या, पद्मवर्णपुद्गलसन्निधानाच्छुद्धतरपरिणामः **पद्म**लेश्या, शुक्लवर्णपुद्गलसन्निधानाच्छुद्धतमपरिणामः **शुक्ल**लेश्या । शेषं स्पष्टम्, कृष्णादिद्रव्याणि च सकलकर्मप्रकृतिनिष्यन्दभूतानि, तदुपाधिजन्मानो भावलेश्याः कर्मस्थितिहेतवः । यदाह –

ताः कृष्णनीलकापोत-तैजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ।। [प्रशमरति-३८]

एतासां च वर्णादिविस्तरस्वरूपमुत्तराध्ययनादिसिद्धान्तादवसेयम्, इह तु नोच्यते ग्रन्थगौरवभयादिति गाथार्थः।।२२५।।

चक्रे० : एताश्च दृष्टान्तेन स्पष्टाः स्युरिति तद्द्वयमाहुः –

देव० : एताश्च दृष्टान्ततः स्पष्टतयावगम्यन्त इति दृष्टान्तद्वयसूचनायाह –

मूलं साहपसाहागुच्छफले छिंदपडियभक्खणया ।
सव्वं माणुस पुरिसे साउह-जुज्झंत-धणहरणा।।२२६।।

चक्रे० : किल केचित् षट् पथिकाः क्षुदार्त्ताः फलप्राग्भारभुग्नशाखाप्रशाखाशतं मार्गे जम्बूवृक्षमद्राक्षुः । तत्रैकस्तेष्वाह **मूलम्**, द्वितीयः **शाखाः**, तृतीयः **प्रशाखाः**, चतुर्थो **गुच्छान्** फलाधारभूतान् स्तबकान्, पञ्चमः **फलानि छिन्ते**ति, षष्ठः पुनः शुद्धतमपरिणामः स्माह **पतितभक्षणतां** वातादिना यानि फलानि पतितानि सन्ति तान्येव भक्षयतेत्यर्थः । इहाद्यः कृष्णलेश्यो द्वितीयो नीललेश्यो यावदन्तिमः शुक्ललेश्य इति ।

द्वितीयोदाहरणम् -

किल केचित् षट् चौराः कञ्चन ग्रामं मुषितुमारब्धास्तत्रैकस्तेष्ववोचद् - यथा **सर्वं** तिर्यग्मनुष्यादिकम् । द्वितीयस्तु **मनुष्यान्,** न तिरश्चः । तृतीयः **पुरुषान्,** न स्त्रीः । चतुर्थस्तानपि **सायुधान्,** न निरस्त्रान् । पञ्चमस्तानपि **युध्यमानान्,** नोदासीनान् हतेति क्रियाध्याहारः । षष्ठस्तु **धनहरणम्** – केवलं धनमेव हरत मा किञ्चिद् वधिष्टेत्यर्थः । लेश्योपनयस्तु प्राग्वत्।।२२६।।

देव० : किल केचन षट् पुरुषाः क्षुत्क्षामकुक्षयः प्रचुरतरफलभरावनतशालाशालमानमेकं जम्बूवृक्षमद्राक्षुस्ततः सर्वेषामपि फलजिघत्सूनां कथं पुनर्ग्रहीतव्यानीति सञ्जातचिन्तानां च तेषामेकः प्राह[१] -**'मूलं'** ति स्कन्धं छिन्तेति सर्वत्र योज्यम्, यथा पतितस्य शाखिनः सुखमास्वाद्यन्ते फलानि द्वितीयस्तु किञ्चिद्विशुद्धपरिणामः प्राह - **शाखाः** स्कन्धप्रभवा मूलच्छेदेऽपि तास्वेव फलावाप्तेः । तृतीयः प्राह - **प्रशाखाः** शाखाप्रभवाः, शाखाभङ्गेऽपि प्रशाखास्वेव फलसद्भावात् । तुर्यः[२] प्राह - **गुच्छान्** प्रशाखाप्ररूढान्, प्रशाखाभ्रंशेऽपि गुच्छेष्वेवातुच्छफललाभात् । पञ्चमः प्राह - **फलानि** गुच्छाग्रजातानि, तदर्थमेव प्रवृत्तेः । षष्ठः पुनः शुद्धतमो[३] प्राह- **पतितभक्षणताम्,** स्वार्थे तल् प्रत्ययः, वाय्वादिनां यानि पतितानि सन्ति तान्येव भक्षयत, अलं मूलच्छेदादिभिरिहाद्यः कृष्णलेश्यो द्वितीयो नील लेश्यो यावदन्तिमः शुक्ललेश्यः परिणामतारतम्यादिति । अथवा द्वितीयमुदाहरणम् –

---

१. व्याजहार मूलमिह प्रकाण्डम् T,B,C, २. चतुर्थस्तु गुच्छकान् स्तबकान् फलाधारभूतान् T,B,C, ३. बभाण T,B,C,

किल केचन षण्मलिम्लुचाः कञ्चन ग्राममुल्लुण्टयितुं प्रतस्थिरे, ततस्तत्र प्रविशतां तेषामवोचदेको यथा- **सर्वं** तिर्यग्मनुष्यादिकम्, द्वितीयस्तु **मानुषान्** न पुनस्तिरश्चः । तृतीयः **पुरुषान्** न पुनः स्त्रियश्चतुर्थस्तानपि **सायुधान्** न तु प्रहरणरहितान्, पञ्चमो **युध्यमानान्** न पुनः सायुधानप्युदासीनान् प्रस्तावात्सर्वत्र हतेति शेषः षष्ठस्तु **धनहरणं** केवलं धनमेव हरत, मा कञ्चिद्वधिष्टेत्यर्थः, लेश्योपसंहारस्तु प्राग्वदिति गाथार्थः।।२२६।।

देव० : सम्प्रति[१] संयमद्वारमाह –

सामाइयं पढमं छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं सुहुमं तह संपरायं च ।।२२७।।
तत्तो य अहक्खायं खायं सव्वम्मि जीवलोगम्मि ।
जं चरिऊण सुविहिया वच्चंत यरामरं ठाणं।।२२८।।

देव० : संयमो द्वेधा देशतः सर्वतश्च तत्र द्विविधत्रिविधादिना स्थूलप्राणिवधादेर्विरतिः प्रथमः, सर्वसावद्ययोगेभ्यस्त्रिविधं त्रिविधेन विरतिर्द्वितीयः, स चायम्–सामायिकछेदोपस्थापनपरिहार-विशुद्धिकसूक्ष्मसंपराययथाख्यातभेदात्पञ्चधा, समुदायार्थः सुगमोऽवयवार्थः पुनः कथ्यते, **सामायिकं** द्विविधमित्वरं यावत्कथिकं च । तत्रेत्वरं भरतैरावतेषु प्रथमचरमजिनतीर्थयोरूप-स्थापनायां छेदोपस्थापनीयचारित्रभावेन तद्व्यपदेशाभावाद् यावत्कथिकं च मध्यमतीर्थकरतीर्थेषु महाविदेहेषु चोपस्थापनाया अभावे तद्व्यपदेशस्य यावज्जीवमपि सम्भवात्, तथा छेदः सातिचारस्य यतेर्निरतिचारस्य वा शैक्षकस्य तीर्थान्तरसम्बन्धिनो वा तीर्थान्तरं प्रतिपद्यमानस्य पूर्वपर्यायव्यवच्छेदरूपस्तद्युक्तोपस्थापना महाव्रतारोपणरूपा यस्मिंस्त**च्छेदोपस्थापनम्** । **परिहारविशुद्धिकं** द्विविधम्, निर्विशमानकं निर्विष्टकायिकं च, आद्यमासेवमानानां द्वितीयमासेवित चारित्राणामिह च नवको गणस्तत्र चत्वारः परिहारकाश्चत्वारस्तद्वैयावृत्त्यकरा अनुपरिहारका एकस्तु कल्पस्थितो वाचनाचार्यस्तेषामिदं तपः, तथाहि –

परिहारियाण उ तवो जहन्नमज्झो तहेव उक्कोसो ।
सीउण्हवासकाले भणिओ धीरेहिं पत्तेयं ।।

---

१. संप्रति संयमद्वारस्य योनिद्वारस्य च निर्देशः क्रमप्राप्तः स तु सूत्रकृता केनाप्यभिप्रायेण न कृतोऽस्माभिस्तु सूत्रान्तरान्निर्दिश्यते T,C, २. तिर्थकर T,C,

तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ ।
अट्ठममिहमुक्कोसो इत्तो सिसिरे पवक्खामि ।।
सिसिरे उ जहन्नाई छट्ठाई दसमचरमगो होइ ।
वासासु अट्ठमाई बारसपज्जंतओ नेओ ।।
पारणगे आयामं पंचसु गह दोसुऽभिग्गहो भिक्खे ।
कप्पट्ठिया उ पइदिण करेंति एमेव आयामं ।।
एवं छम्मासतवं चरिउं परिहारगा अणुचरंति ।
अणुचरगे परिहारिग पइट्ठिए जाव छम्मासा ।।
कप्पट्ठिओवि एवं छम्मासतवं करेइ सेसाओ ।
अणुपरिहारिगभावं वयंति कप्पट्ठियत्तं च।।
एवं सो अट्ठारसमासपमाणो य वन्निओ कप्पो ।
संखेवओ विसेसो सुत्ताओ तस्स नायव्वो ।।
कप्पसमत्तीए तयं जिणकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुण जिणस्सगासे पवज्जंति ।।
तित्थयरसमीवासेवगस्स पासेव नो उ अन्नस्स ।
एएसिं जं चरणं परिहारविसुद्धिगं तं तु ।। [प्रव.सारो॰ ६०२-६१०]

उपशमश्रेणिक्षपकश्रेण्योर्लोभाणुवेदनसमये सूक्ष्मः सम्परायो लोभांशकषायो यस्मिंस्तच्छूक्ष्मसम्परायम्, यथाख्यातमर्हत्कथितस्वरूपानतिक्रमवत्तच्च छद्मस्थस्योपशान्तक्षीणमोहाख्यगुणस्थानद्वयवर्त्तिनः सयोग्ययोगिगुणस्थानद्वयस्थायिनः केवलिनश्च भवतीति गाथार्थः।।२२७, २२८।।

* *आवश्यकनिर्युक्तौ*-११४, ११५ *

अनन्तरगाथासूचितपञ्चचारित्रभेदप्रदर्शनायाह –

सामाइयं च पढमं छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं सुहुमं तह संपरायं च ।।
तत्तो य अहक्खायं खायं सव्वंमि जीवलोगंमि ।
जं चरिऊण सुविहिया वच्चंतयरामरं ठाणं ।।

सामायिकमिति समानां ज्ञानदर्शनचारित्राणामायः समायः, समाय एव सामायिकम्, विनयादिपाठात् स्वार्थे ठक्, आह–समयशब्दस्तत्र पठ्यते, तत्कथं समाये प्रत्ययः ? उच्यते, 'एकदेशविकृतमनन्यवद्भवती' ति न्यायात्, तच्च सावद्ययोगविरतिरूपम्, ततश्च सर्वमप्येतच्चारित्रमविशेषतः सामायिकम्, छेदादिविशेषैस्तु विशेष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भजते, तत्र प्रथमं विशेषणाभावात् सामान्यशब्द एवावतिष्ठते सामायिकमिति, तच्च द्विधा-इत्वरं यावत्कथिकं च, तत्र स्वल्पकालमित्वरम्, तच्च भरतैरवतेषु प्रथमपश्चिमतीर्थकरतीर्थेष्वनारोपितव्रतस्य शिक्षकस्य विज्ञेयमिति, यावत्कथिकं तु यावत्कथाऽऽत्मन-स्तावत्कालं यावत्कथं यावत्कथमेव यावत्कथिकमाभवद्वर्त्तीति यावत्, तच्च मध्यमविदेहतीर्थकरतीर्थान्त-र्गतसाधूनामवसेयमिति, तेषामुपस्थापनाऽभावात्, अत्र प्रसङ्गतो मध्यमविदेहपुरिमपश्चिमतीर्थकरतीर्थवर्त्ति-साधुस्थितास्थितकल्पः प्रदर्श्यते–तत्र ग्रन्थान्तरे विवक्षितार्थप्रतिपादिकेयं गाथा –

आचेलक्कुद्देसिय सेज्जायर रायपिंड किइकम्मे । वयजिट्ठपडिक्कमणे मासं पज्जोसवणकप्पो।।

अस्या गमनिका–चउसु ठिआ छसु अट्ठिआ, केषु चतुर्ष्विति आह–

सिज्जायरपिंडे या चाउज्जामे य पुरिसजिट्ठे य । किइकम्मस्स य करणे चत्तारि अवट्ठिआ कप्पा ।।

१-नास्य चेलं विद्यत इत्यचेलकस्तद्भावोऽचेलकत्वमचेलकत्वे स्थिताः, एतदुक्तं भवति–न वैदेहमध्यमतीर्थकरतीर्थसाधवः पुरिमपश्चिमतीर्थवर्त्तिसाधुवदचेलत्वे स्थिताः, कुतः ? तेषामृजुप्राज्ञत्वाद् महाधनमूल्यविचित्रादिवस्त्राणामपि परिभोगात्, पुरिमपश्चिमतीर्थकरतीर्थवर्त्तिसाधूनां तु ऋजुवक्रजडत्वाद् महाधनमूल्यादिवस्त्रापरिभोगाज्जीर्णादिपरिभोगाच्चाचेलकत्वमिति । आह–जीर्णादिवस्त्रसद्भावे कथमचे-लकत्वम् ? उच्यते, तेषां जीर्णत्वादसारत्वादल्पत्वाद् विशिष्टार्थक्रियाऽप्रसाधकत्वादसत्त्वाविशेषादिति, तथा चेत्थम्भूतवस्त्रसद्भावेऽपि लोकेऽचेलकत्वव्यपदेशप्रवृत्तिर्दृश्यते, यथा–काचिदङ्गना जीर्णवस्त्र-परिधानाऽन्याभावे सति तद्भावेऽपि च समर्पितसाटकं कुविन्दं तन्निष्पादनमन्थरं प्रति आह–'त्वर कोलिक! नग्निकाऽहमिति । २-तथौद्देशिकेऽप्यस्थिता एव, कथम् ? इह पुरिमपश्चिमतीर्थकरसाधुमुद्दिश्य कृतमशनादि सर्वेषामकल्पनीयम्, तेषां तु यमुद्दिश्य कृतं तस्यैवाकल्पनीयं न शेषाणामिति । तथा ३-शय्यातर-राजपिण्डद्वारम्–पिण्डग्रहणमुभयत्र संबध्यते, तत्र शय्यातरपिण्डे स्थिता एव, शय्यातरपिण्डो हि यथा पुरिमपश्चिमतीर्थकरसाधूनामकल्पनीयः, एवं मध्यमतीर्थकरसाधूनामपि । ४-राजपिण्डे चास्थिताः, कथम् ! स हि पुरिमपश्चिमतीर्थकरसाधूनामग्राह्य एव, मध्यमानां तु दोषाभावाद् गृह्यते । तथा ५-कृतिकर्म वन्दनमाख्यायते, तत्रापि स्थिताः, कथम् ? यथा पुरिमपश्चिमतीर्थकरसाधूनां प्रभूतकालप्रव्रजिता अपि संयत्यः पूर्वं वन्दनं कुर्वन्ति, एवं तेषामपि, यथा वा क्षुल्लका ज्येष्ठार्याणां कुर्वन्ति, एवं तेषामपि। ६-व्रतानि प्राणातिपातादिनिवृत्तिलक्षणानि तेष्वपि स्थिता एव, यथा पुरिमपश्चिमतीर्थकरसाधवो व्रतानुपालनं कुर्वन्ति, एवं तेऽपीति, आह–तेषां हि मैथुनविरतिवर्ज्यानि चत्वारि व्रतानि, ततश्च कथं स्थिता इति, उच्यते, तस्यापि परिग्रहेऽन्तर्भावात् स्थिता एव, तथा च नापरिगृहीता योषिदुपभोक्तुं पार्यते । तथा ७-ज्येष्ठेति ज्येष्ठपदे

स्थिता एव, किन्तु पुरिमपश्चिमतीर्थकरसाधूनामुपस्थापनया ज्येष्ठः, तेषां तु सामायिकारोपणेनेति । तथा ८-प्रतिक्रमणेऽस्थिताः, पुरिमपश्चिमसाधूनां नियमेनोभयकालं प्रतिक्रमणं तेषां त्वनियमः, दोषाभावे सर्वकालमप्यप्रतिक्रमणमिति। तथा ९-१० मासपर्युषणाकल्पद्वारम् -तत्र मासकल्पेऽप्यस्थिताः कथम् ? पुरिमपश्चिमतीर्थकरसाधूनां नियमतो मासकल्पविहारः, मध्यमतीर्थकरसाधूनां तु दोषाभावे न विद्यते, एवं पर्युषणाकल्पोऽपि वक्तव्यः, एतदुक्तं भवति-तस्मिन्नप्यस्थिता एवेति समुदायार्थः, विस्तरार्थस्तु कल्पादवगन्तव्यः ।

अभिहितमानुषङ्गिकम्, इदानीं प्रकृतमुच्यते-आह-पुरिमपश्चिमतीर्थकरसाधूनामपि यदित्वरं सामायिकं तत्रापि 'करोमि भदन्त ! सामायिकं यावज्जीवं' इतीत्वरस्याप्याभवग्रहणात् तस्यैवोपस्थापनायां परित्यागात् कथं न प्रतिज्ञा लोप इति, अत्रोच्यते-अतिचाराभावात्, तस्यैव सामान्यतः सावद्ययोग-विनिवृत्तिरूपेणावस्थितस्य शुद्ध्यान्तरापादनेन संज्ञामात्रविशेषादिति । चशब्दो वाक्यालङ्कारे, प्रथममाद्यं चारित्रमिति,

इदानीं **छेदोपस्थापनम्**-छेदश्चोपस्थानं च यस्मिंस्तच्छेदोपस्थापनम्, एतदुक्तं भवति-पूर्वपर्यायस्य छेदो महाव्रतेषु चोपस्थापनमात्मनो यत्र तच्छेदोपस्थापनम्, तच्च सातिचारमनतिचारं च, तत्रानतिचारं यदित्वर-सामायिकस्य शिक्षकस्यारोप्यत इति, तीर्थान्तरसंक्रान्तौ वा, यथा पार्श्वनाथतीर्थाद्वर्धमानस्वामितीर्थं संक्रामतः पञ्चयामधर्मप्रतिपत्ताविति, सातिचारं तु मूलगुणघातिनो यत् पुनर्व्रतोच्चारणमिति, उक्तं छेदोपस्थापनम्,

इदानीं **परिहारविशुद्धिकम्**-तत्र परिहरणं परिहारस्तपोविशेषस्तेन विशुद्धिर्यस्मिंस्तत्परिहारविशुद्धिकम्, तच्च द्विभेदम्-निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमानकास्तदासेवकास्तदव्यतिरेकात्, तदपि चारित्रं निर्विशमानकमिति, आसेवितविवक्षितचारित्रकायास्तु निर्विष्टकायास्त एव स्वार्थिक-प्रत्ययोपादानान्निर्विष्टकायिकास्तदव्यतिरेकाच्चारित्रमपि निर्विष्टकायिकमिति, इह च नवको गणो भवति, तत्र चत्वारः परिहारिका भवन्ति, अपरे तु तद्वैयावृत्त्यकराश्चत्वार एवानुपरिहारिकाः, एकस्तु कल्पस्थितो वाचनाचार्यो गुरुभूत इत्यर्थः, एतेषां च निर्विशमानकानामयं परिहारः -

परिहारियाण उ तवो जहण्ण मज्झो तहेव उक्कोसो । सीउण्हवासकाले भणिओ धीरेहिं पत्तेयं ।।
तत्थ जहण्णो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ । अट्ठममिहमुक्कोसो एत्तो सिसिरे पवक्खामि ।।
सिसिरे तु जहण्णादी छट्ठादी दसमचरिमगो होंति । वासासु अट्ठमादी बारसपज्जंतगो णेओ ।।
पारणगे आयामं पंचसु गहो दोसभिग्गहो भिक्खे । कप्पट्ठियादि पइदिण करेति एमेव आयामं ।।
एवं छम्मासतवं चरित्तु परिहारिया अणुचरंति । अणुचरगे परिहारियपदट्ठिते जाव छम्मासा ।।
कप्पट्ठितोवि एवं छम्मासतवं करेंति सेसा उ । अणुपरिहारिगभावं वयंति कप्पट्ठिगत्तं च ।।

एवेसो अट्ठारसमासपमाणो उ वण्णिओ कप्पो । संखेवओ विसेसा विसेससुत्ताओ णायव्वो ।।
कप्पसमत्तीए तयं जिणकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुण जिणस्स पासे पवज्जंति ।।
तित्थयरसमीवासेवगस्स पासे व णो उ अण्णस्स । एतेसिं जं चरणं परिहारविसुद्धिगं तं तु ।।

तथेत्यानन्तर्यार्थे, गाथाभङ्गभयाद् व्यवहितस्योपन्यासः, **सूक्ष्मसंपरायमि**ति संपर्येत्येभिः संसारमिति संपरायाः कषायाः, सूक्ष्मा लोभांशावशेषत्वात् संपराया यत्र तत् सूक्ष्मसंपरायम्, तच्च द्विधा-विशुध्यमानकं संक्लिश्यमानकं च, तत्र विशुध्यमानकं क्षपकोपशमकश्रेणिद्वयमारोहतो भवति, संक्लिश्यमानकं तूपशमश्रेणितः प्रच्यवमानस्येति, **चः** समुच्चय इति गाथार्थः ।।११४।।

ततश्च सूक्ष्मसंपरायानन्तरं यथैवाख्यातं **यथाख्यातम**कषायचारित्रमिति यथा**ख्यातं** प्रसिद्धं **सर्वस्मिञ्जीवलोके,** तच्च छद्मस्थवीतरागस्य केवलिनश्च भवति, तत्र च छद्मस्थस्योपशामकस्य क्षपकस्य वा, केवलिनस्तु सयोगिनोऽयोगिनो वेति, शेषं निगदसिद्धम्, नवरं मरणं मरो जरा च मरश्च जरामरौ तावविद्यमानौ यस्मिन् **तदजरामरमिति** गाथार्थः ।।११५।।

**** विशेषावश्यकभाष्ये-१२६०, १२६१ ****

सामाइय त्थ पढमं छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं सुहुमं तह संपरायं च ।।
तत्तो य अहक्खायं खायं सव्वम्मि जीवलोयम्मि ।
जं चरिऊण सुविहिया वच्चंतयरामरं ठाणं ।।

राग-द्वेषविरहितः समस्तस्य प्रतिक्षणमपूर्वापूर्वनिर्जराहेतुभूताया विशुद्धेरायो लाभः समायः, स एव **सामायिकं** सर्वसावद्ययोगविरमणमित्यर्थः । ततश्च सर्वमप्येतच्चारित्रमविशेषतः सामायिकमेव छेदादि-विशेषैस्तु विशेष्यमाणमर्थतः संज्ञातश्च नानात्वं प्रतिपद्यते । तदत्रैतेषु मध्ये प्रथमं छेदादिविशेषाणामभावात् सामान्यसंज्ञायामेवावतिष्ठते सामायिकम् । एतच्च द्विधा-इत्वरम्, यावत्कथिकं च । तत्र स्वल्पकाल-भावीत्वरम्। इदं च भरतैरावतक्षेत्रेषु प्रथम-पश्चिमतीर्थकरतीर्थेऽनारोपितमहाव्रतस्य शिष्यस्य विज्ञेयम् । अत्र जन्मनि यावज्जीवितकयाऽस्त्यात्मनः, तावत्कालभावि यावत्कथं तदेव यावत्कथिकम्, आभववर्तीत्यर्थः। एतच्च भरतैरावतमध्यमद्वाविंशतितीर्थकरसाधूनां महाविदेहार्हत्संयतानां चावसेयम्, एषामुपस्थापनाया अभावादिति ।

द्वितीयं तु चारित्रं **छेदोपस्थापनमु**च्यते । तत्र च्छेदश्चोपस्थापना च यस्मिंश्चारित्रे तच्छेदोपस्थापनम्-पूर्वपर्यायस्य च्छेदः, महाव्रतेषूपस्थापनं चात्मनो यत्र तच्छेदोपस्थापनमित्यर्थः । एतदपि द्विधा-सातिचारम्, अनतिचारं च । तत्रानतिचारं यदित्वरसामायिकस्य शिष्यस्योपस्थापनायामारोप्यते, तीर्थान्तरसंक्रान्तौ वा,

यथा पार्श्वनाथतीर्थाद् महावीरतीर्थं संक्रामतः पञ्चयामधर्मप्रतिपत्ताविति । सातिचारं तु मूलगुणघातिनो यत्पुनरपि महाव्रतारोपणमिति ।

तृतीयं तु चारित्रं **परिहारविशुद्धिकम्** । तत्र परिहरणं परिहारस्तपोविशेषः, तेन कर्मनिर्जरारूपा विशुद्धिर्यस्मिंश्चारित्रे तत् परिहारविशुद्धिकम् । एतदपि द्विभेदम्-निर्विशमानकम्, निर्विष्टकायिकं च । तत्रास्यैव चारित्रस्यासेवकाः साधवो निर्विशमानका उच्यन्ते, तदव्यतिरेकादिदमपि चारित्रं निर्विशमानकं भण्यते । आसेवितैतच्चारित्रकायास्तु मुनयो निर्विष्टकायाः, त एव स्वार्थिकप्रत्ययोपादानाद् निर्विष्ट-कायिकाः, तदभेदादिदमपि चारित्रं निर्विष्टकायिकम् । एतत्स्वरूपं च विस्तरतो भाष्येऽभिधास्यत इति ।

तथा इत्यानन्तर्ये, गाथाभङ्गभयाद् व्यवहितस्योपन्यासः, 'सूक्ष्मम्' इत्यनुस्वारोऽप्यलाक्षणिकः । सूक्ष्मसंपरायं चतुर्थं चारित्रम् । तत्र संपर्येत्येभिः संसारमिति संपरायाः कषायाः, सूक्ष्मा लोभांशावशेषत्वात् संपराया यत्र तत् **सूक्ष्मसंपरायम्** । इदमपि द्विविधं विशुध्यमानकं संक्लिश्यमानकं च । तत्र विशुध्यमानकं क्षपकोपशमश्रेणिद्वयमारोहतो भवति । संक्लिश्यमानकं तूपशमश्रेणेः प्रच्यवमानस्य प्राप्यते । **चः** समुच्चये।

ततश्च सूक्ष्मसंपरायानन्तरं **सर्वत्र** साधु**जीवलोके ख्यातं** प्रसिद्धं **यथाख्यातं** पञ्चमं सर्वविशुद्धं चारित्रं भवति। तत् कथम्भूतम् ? इत्याह-**यच्चरित्वा**ऽऽसेव्य, शोभनं विहितमनुष्ठानं येषां ते **सुविहिताः** सुसाधवो **व्रजन्त्यजरामरं** मोक्षलक्षणं **स्थानम्** । तत्र मरणं मरः । स्वरान्तत्वादल्प्रत्ययः । न विद्यते जरा-मरौ यत्र तदजरामरम् । इदं च कषायोदयरहितत्वात् क्षीणमोहोपशान्तमोहलक्षणस्य च्छद्मस्थवीतरागस्य सयोग्यऽयोगिकेवलिनश्च भवति । इति निर्युक्तिगाथाद्वयसंक्षेपार्थः ।।१२६०, १२६१।।

देव० : अथ[१] योनिद्वारं विवृणोति-

पुढविदगअगणिमारुय इक्किक्के सत्तजोणिलक्खाओ ।
वणपत्तेय अणंता दस चउद्दस जोणिलक्खाओ।।२२९।।
विगलिंदिएसु दो दो चउरो चउरो य नारयसुरेसु ।
तिरिएसु हुंति चउरो चउदस लक्खा उ मणुएसु।।२३०।।

देव० : स्पष्टे, नवरं सर्वमीलनाच्चतुरशीतिलक्षाणि । अत्र च समानवर्णगन्धरसस्पर्शपरिणामा बहव्योऽपि व्यक्तय एकैव योनिः, अन्यथा प्रतिव्यक्तियोनिभेदे योनिभूयस्त्वं प्राप्नोतीति । इह चैताः सर्वा अपि सामान्येन सचित्ताचित्ततन्मिश्रसंवृतविवृततन्मिश्रशीतोष्णतन्मिश्रभेदान्नवधा भवन्तीति गाथार्थः।।२२९, २३०।।

१. योनयः पुनः सचित्ताचित्ततन्मिश्र संवृतविवृततन्मिश्र शीतोष्णतन्मिश्र भेदान्नवधा, एतासां च भेदाश्चतुरशीतिर्लक्षाणि, तद्विभागश्चायम् T,C,

** प्रवचनसारोद्धारे-९६८, ९६९ **

इदानीं 'जोणिलक्ख चुलसी'त्येकपञ्चाशदधिकशततमं द्वारमाह –

पुढविदगअगणिमारुय एक्केक्के सत्त जोणिलक्खाओ ।
वणपत्तेयअणंते दस चउदस जोणिलक्खाओ ।।
विगलिंदिएसु दो दो चउरो चउरो य नारयसुरेसुं ।
तिरिएसु होंति चउरो चउदस लक्खा उ मणुएसु ।।

'यु मिश्रणे' इत्यस्य धातोर्युवन्ति भवान्तरसङ्क्रमणकाले तैजसकार्मणशरीरवन्तः सन्तो जीवा औदारिकादिशरीरप्रायोग्यपुद्गलस्कन्धैर्मिश्रीभवन्त्यस्यामित्यौणादिके निप्रत्यये योनिर्जीवानामुत्पत्तिस्थानमित्यर्थः, तत्र **पृथिव्युदकाग्निमरुतां** सम्बन्धि**न्येकैकस्मिन्** समूहे सप्त **सप्त योनिलक्षा** भवन्ति, तद्यथा–सप्त पृथिवीनिकाये सप्तोदकनिकाये सप्ताग्निनिकाये सप्त वायुनिकाये, वनस्पतिनिकायो द्विविधस्तद्यथा–प्रत्येकोऽनन्तकायश्च, तत्र **प्रत्येकवनस्पति**निकाये **दश योनिलक्षाः, अनन्त**वनस्पतिनिकाये **चतुर्दश** लक्षाः ।

विकलेन्द्रियेषु द्वीन्द्रियादिषु द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियरूपेषु प्रत्येकं **द्वे द्वे** योनिलक्षे, तद्यथा–द्वे योनिलक्षे द्वीन्द्रियेषु द्वे त्रीन्द्रियेषु द्वे चतुरिन्द्रियेषु तथा **चतस्रो** योनिलक्षा **नारकाणाम्, चतस्रो** देवानाम्, तथा **तिर्यक्षु** पञ्चेन्द्रियेषु **चतस्रो** योनिलक्षाः, **चतुर्दश** योनि**लक्षा मनुष्येषु,** सर्वसङ्ख्यायाश्च मीलने चतुरशीतिर्योनिलक्षा भवन्तीति । न च वक्तव्यमनन्तानां जीवानामुत्पत्तिस्थानान्यप्यनन्तानि प्राप्नुवन्ति, यतो जीवानां सामान्याधारभूतो लोकोऽप्यसङ्ख्येयप्रदेशात्मकमेव, विशेषाधाररूपाण्यपि नरकनिष्कुट-देवशयनीयप्रत्येकसाधारणजन्तुशरीराण्यसङ्ख्येयान्येव, ततो जीवानामानन्त्येऽपि कथमुत्पत्तिस्थानानामानन्त्यम् ?, भवन्तु तर्ह्यसङ्ख्येयानीति चेन्नैवम्, यतो बहून्यपि तानि केवलिदृष्टेन केनचिद्वर्णादिना धर्मेण सदृशान्येकैव योनिरिष्यते, ततोऽनन्तानामपि जन्तूनां केवलिविवक्षितवर्णादिसादृश्यतः परस्परान्तर्भावचिन्तया चतुरशीतिलक्षणसङ्ख्या एव योनयो भवन्ति न हीनाधिकाः ।।९६८, ९६९।।

चक्रे० : अथ क्रमप्राप्तं योगद्वारमाहुः –

देव० : अधुना[१] योगानाह –

सच्चं मोसं मीसं असच्चमोसं मणोवई अट्ठ ।
काओ[२] उराल-विक्किय-आहारगमीस-कम्मइगो।।२३१।।

१. जीवतत्त्वस्य विचारयितुमारब्धत्वात्तद्गतमेव योगोपयोगादिकमभिधित्सुस्तावद्योगानाह । गुरवस्तु पाणेत्यादि-द्वारगाथाखण्डकमन्यथा व्याख्यानयन्ति, यथा संयमस्य योनिः संयमयोनिः शुभयोगस्तत्प्रभवत्वात्संयमस्येति । अस्मिंश्च व्याख्याने क्रमप्राप्तसेवयाय [?] द्वारमिति सामान्येन योगानाह T,C, २. काउ. B,K,

चक्रे० : इहाग्निसम्पर्कादिष्टकादे रक्ततेव मनोवाक्कायसम्बन्धादात्मनः शक्तिविशेषा योगाः, स्थविरस्याऽऽलम्बनयष्टिवज्जीवस्योपग्राहकाः । ते चाऽमी सत्यादयः । तत्र १-यथावस्थितार्थ-सङ्कल्पनेन **सत्यम्**, २-तद्विपरीतं **मृषा**, ३-**मिश्रमु**भयस्वभावम्, ४-तद्विपरीत**मसत्याऽमृषं मनः**, वाक् च प्रागुक्तभाषा[मनो]वत् सत्यादिका चतुर्द्धा । एवमष्टौ योगाः । **'काउ'** त्ति काययोगः **'उराल'**त्ति उदारं शेषशरीरेभ्यः प्रधानमौदारिकशरीरम्, तद्योगोऽप्युदारः, प्राधान्यं चेह तीर्थकृद्गणधरशरीरापेक्षम् । तदन्यस्याऽनुत्तरशरीरस्याऽप्यनन्तगुणहीनत्वात् । विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम्, तद्योगोऽपि **वैक्रियः** । आहृियन्ते गृह्यन्ते तीर्थकरादेः पार्श्वात् सूक्ष्माः पदार्था अनेनेत्याहारकं तस्याऽयमिति योगोऽ**प्याहारकः** । **मिश्र**स्त्रिधौ-दारिकशरीरिण उत्पत्तिकाले कार्मणेन । वैक्रियाहारककरणकाले च ताभ्यामेव मिश्रो भवतीत्यौदारिकमिश्रः । देवादीनामुत्पत्तिक्षणे कार्मणेन कृतवैक्रियस्य, पुनरौदारिकमिश्रणकाल औदारिकेण वैक्रियमिश्रः। आहारकमिश्रस्तु साधिताऽऽहारकप्रयोजनस्य पुनरौदारिकप्रवेश औदारिकेणेति । **'कम्मइगु'**त्ति कार्मणयोगो विग्रहे । कार्मणशरीरयोगो चतुर्थके पञ्चमे तृतीये चेति वचनात् केवलिसमुद्घाते च । तैजसस्य च सदैव कार्मणसहचरत्वान्न तद्व्यापारः पृथगस्तीति न तदभिधानमिति काययोगः सप्तधा । सर्वमेलने योगाः पञ्चदशेति गाथार्थः।।२३१।।

देव० : इह प्रथमं तावत्सुखप्रतिपत्तये मनोवाक्काययोगस्वरूपमुच्यते, तत्रात्मना सर्वप्रदेशैर्गृहीता मनोयोग्याः पुद्गलाः शुभादिमननार्थं करणभावमालम्बन्ते तत्सम्बन्धादात्मनः पराक्रमविशेषो मनोयोगः । तथात्मना वाग्योग्याः पुद्गला गृहीता विसृज्यमाना वाक्त्वेन करणतामापद्यन्ते, तेन वाक्करणेन सम्बन्धादात्मनो भाषणशक्तिर्वाग्योगः । कायः शरीरमात्मनो निवासस्तद्योगाज्जीवस्य वीर्यपरिणामः काययोगः । ते चामी त्रयोऽपि मनोवाक्कायसम्बन्धादग्निसम्बन्धादिष्टकादे रक्ततेवात्मनो वीर्यपरिणतिविशेषा मनोवाक्काययोगा इत्युच्यन्ते, यदाह –

जोगो विरियं थामो उच्छाह परक्कमो तहा चिट्ठा ।
सत्ति सामत्थं तिय जोगस्स हवंति पज्जाया ।। [पञ्चसंग्रह-३९६]

एते स्थविरस्य दुर्बलस्य वालम्बनयष्ट्यादिवज्जीवस्योपग्राहका इति । सम्प्रति गाथाव्याख्यानम्–अनुश्रियते सद्भ्योऽर्थात्पदार्थेभ्यो हितं यथावत्सङ्कल्पनेनेति सत्यं तद्विपरीतं मृषा, मिश्रमुभयस्वभावमसत्यामृषमुभयस्वभावविकलमनोदलिकरूपम्, मन इति मनोयोगः । **वइ**'त्ति चकाराभावेऽपि समुच्चयावगमाद्वाक्सत्यादिरूपेत्यर्थः । तत्र सत्या जीवं जीवमिति

प्ररूपयतोऽसत्या जीवमजीवमिति, सत्यामृषा क्वचिद्विवक्षितसमये मनुष्यशतमुत्पन्नमुपरतं वेति। असत्यामृषा तु विधेहि स्वाध्यायम्, नैतत्सदृशमन्यत्तपोऽस्तीत्येवमादि, एवमष्टौ योगाः । तथा **'काउ'**त्ति काययोग **'ओराल'**त्ति उदारं शेषशरीरेभ्यः प्रधानम्, प्राधान्यं चेह तीर्थकृद्गणधरशरीरापेक्षया, तदन्यस्यानुत्तरसुरशरीरस्याप्यनन्तगुणहीनत्वाद् यदि वा साधिकयोजनसहस्रप्रमाणत्वेन शेषशरीरेभ्यो बृहत्प्रमाणमुदारम्, बृहत्वं च भवधारणीयापेक्षमुत्तरवैक्रियं तु लक्षयोजनमानमपि स्यात् ।

वैक्रियादिवर्गणातः परिस्थूरवर्गणानिष्पन्नत्वेन वोदारमौदारिकशरीरं तद्योगोप्युदारः । विविधा विशिष्टा वा क्रिया विक्रिया, तस्यां भवं वैक्रियम्, तस्यायं योग इति **वैक्रियः** । आह्रियन्ते गृह्यन्ते तीर्थकरादेः समीपतः सूक्ष्माः पदार्था अनेनेत्याहारकम्, तस्यायमि**त्याहारकः**। तथा **मिश्रोऽय**मेवौदारिकादिरपर्याप्तकस्य जन्तोस्तत्रोत्पत्तावौदारिकः काययोगः कार्मणेनौदारिकशरीरिणश्च वैक्रियाहारककरणकाले ताभ्यामेव मिश्रो भवतीत्यौदारिकमिश्रः, वैक्रियमिश्रो देवादीनामुत्पत्तिसमये कार्मणेन कृतवैक्रियस्य पुनरौदारिकमिश्राद्धायामौदारिकेण, आहारकमिश्रस्तु साधिताहारककायप्रयोजनस्य पुनरौदारिकप्रवेश औदारिकेणेति प्रज्ञापनाव्याख्यानाभिप्रायः । **'कम्मइगु'**त्ति कार्मणो विग्रहे केवलिसमुद्घाते चेति । तैजसस्य तु सदैव कार्मणसहचरत्वान्न तद्व्यापारः पृथगिति न तदभिधानमिति काययोगः सप्तधा सर्वमीलने योगाः पञ्चदशेति गाथार्थः।।२३१।।

**** प्रवचनसारोद्धारे-१३०५ ****

इदानीं 'योगा पन्नरस'त्ति सप्तविंशत्युत्तरं द्विशततमं द्वारमाह –

सच्चं मोसं मीसं असच्चमोसं मणो तह वई य ।
उरल विउव्वाहारा मीस कम्मयग मिय जोगा ।।

यद्यपि मनोवाक्कायावष्टम्भसमुत्थो जीवस्य परिस्पन्द एव योग उच्यते तथाऽपीह योगशब्देन कारणे कार्योपचारात्तत्सहकारिभूतं मनःप्रभृत्येव विवक्षितमिति तैः सह योगस्य सामानाधिकरण्यम्, तत्र मनश्चतुर्धा, तद्यथा–**सत्यं मृषा मिश्रमसत्यामृषा च,** तत्र सन्तो मुनयः पदार्था वा जीवादयस्तेषु यथासङ्ख्यं मुक्तिप्रापकत्वेन यथावस्थितवस्तुस्वरूपचिन्तनेन च साधु सत्यम्, यथा–अस्ति जीवः सदसद्रूपो देहमात्रव्यापीत्यादिरूपतया यथावस्थितवस्तुविकल्पनचिन्तनपरम्, सत्यं विपरीतमसत्यम्, यथा-नास्ति जीव एकान्तसद्रूपो वेत्याद्ययथावस्थितवस्तुप्रतिभासनपरम्, सत्यं च मृषा चेति मिश्रम्, यथा धवखदिरपला-

शादिमिश्रेषु बहुष्वशोकवृक्षेष्वशोकवनमेवेदमिति विकल्पनपरम्, अत्र हि कतिपयाशोकवृक्षाणां सद्भावात् सत्यताऽन्येषामपि धवादीनां सद्भावादसत्यता, व्यवहारनयमतापेक्षया चैवमुच्यते, परमार्थतः पुनरिदमसत्यमेव, यथाविकल्पितार्थायोगात्, तथा यन्न सत्यं नापि मृषा नापि सत्यमृषा तदसत्यामृषा, इह विप्रतिपत्तौ सत्यां यद्वस्तुप्रतिष्ठाशया सर्वज्ञमतानुसारेण विकल्प्यते यथाऽस्ति जीवः सदसद्रूप इति तत्किल सत्यं परिभाषितमाराधकत्वात्, यत्पुनर्विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञमतोत्तीर्णं विकल्प्यते यथा नास्ति जीव एकान्तनित्यो वेति तदसत्यं विराधकत्वात्, यत्पुनर्वस्तुप्रतिष्ठाशामन्तरेण स्वरूपमात्र-पर्यालोचनपरम्, यथा - हे देवदत्त ! घटमानय, गां देहि मह्यमित्यादिचिन्तनं तदसत्यामृषा, इदं हि स्वरूपमात्रपर्यालोचनपरत्वान्न यथोक्तलक्षणं सत्यं नापि मृषेति, इदमपि व्यवहारनयमतेन द्रष्टव्यम्, निश्चयनयमतेन तु विप्रतारणादिबुद्धिपूर्वकमसत्येऽन्तर्भवत्यन्यथा तु सत्य इति । यथा मनः सत्यादिभेदाच्चतुर्धा तथा वागपि सत्यादिभेदाच्चतुर्धा । तथौदारिकवैक्रियाहारकाणि शरीराणि, तत्रोदारं प्रधानम्, प्राधान्यं च तीर्थकरगणधरशरीरापेक्षया द्रष्टव्यम्, ततोऽन्यस्यानुत्तरसुरशरीरस्याप्यनन्तगुणहीन-रूपत्वात्, अथवोदारं सातिरेकयोजनशतसहस्रमानत्वाच्छेषशरीरेभ्यो बृहत्प्रमाणम्, बृहत्ता चास्य वैक्रियमाश्रित्य भवधारणीयसहजशरीरापेक्षया द्रष्टव्या, अन्यथोत्तरवैक्रियं योजनलक्षमानमपि लभ्यत इति, उदारमेवौदारिकम्, तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम्, तथाहि–तदेकं भूत्वाऽनेकं भवत्यनेकं च भूत्वैकं तथाऽणु भूत्वा महद्भवति महद् भूत्वाऽण्वित्यादि, तथा चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादिकतथाविधकार्योत्पत्तौ विशिष्टलब्धिवशादाह्रियते–निर्वर्त्यत इत्याहारकम्, तथा मिश्रशब्दः प्रत्येकं संबध्यते, औदारिकमिश्रं वैक्रियमिश्रमाहारकमिश्रं च, तत्रौदारिकमिश्रं कार्मणेन, तच्चापर्याप्तावस्थायां केवलिसमुद्घातावस्थायां वा, उत्पत्तिदेशे हि पूर्वभवादनन्तरागतो जीव आद्यसमये कार्मणेनैव केवलेनाहारयति, ततः परमौदारिकस्याप्यारब्धत्वादौदारिकेण कार्मणमिश्रेण यावच्छरीरस्य निष्पत्तिः, केवलिसमुद्घातावस्थायां तु द्वितीयषष्ठसप्तमसमयेषु कार्मणेन मिश्रमौदारिकं प्रतीतमेव, तथा वैक्रियमिश्रं कार्मणेनौदारिकेण वा, तत्र कार्मणेन मिश्रं देवनारकाणामपर्याप्तावस्थायामाद्यसमयानन्तरं द्रष्टव्यम्, बादरपर्याप्तकवायोः पञ्चेन्द्रियतिर्यग्मनुष्याणां च वैक्रियलब्धिमतां वैक्रियारम्भकाले वैक्रिय-परित्यागकाले वौदारिकेण मिश्रम्, तथा सिद्धप्रयोजनस्य चतुर्दशपूर्वविद आहारकं त्यजत औदारिकं गृह्णत आहारकं वा प्रारभमाणस्याहारकमिश्रमौदारिकेण ज्ञेयम्, तथा 'कम्मयगं'ति कर्मजकं कर्मणो जातं कर्मजं कर्मात्मक-मित्यर्थस्तदेव कर्मजकम्, किमुक्तं भवति ? कर्मपरमाणव एवात्मप्रदेशैः सह क्षीरनीरवदन्योऽन्यानुगताः सन्तः शरीररूपतया परिणताः कर्मजशरीरमिति, अत एव तदन्यत्र कार्मणमित्युक्तम्, कर्मणो विकारः कार्मणमिति, तथा चोक्तम् –

कम्मविवागो कम्मणमट्ठविहविचित्तकम्मनिप्फन्नं । सव्वेसिं सरीराणं कारणभूयं मुणेयव्वं ।।

[कर्मविपाकः कार्मणमष्टविधविचित्रकर्मनिष्पन्नम् । सर्वेषां शरीराणां कारणभूतं ज्ञातव्यम् ।।]

अत्र **'सव्वेसिं'** इति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं बीजभूतं कार्मणं शरीरमिति, न खल्वामूलसमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावः, इदं च कर्मजं शरीरं जन्तोर्गत्यन्तरसंक्रान्तौ साधकतमं कारणम्, तथाहि-कर्मजेनैव वपुषा परिकरितो जन्तुर्मरणदेशम-पहायोत्पत्तिदेशमभिसर्पति, ननु यदि कार्मणवपुःपरिकरितो गत्यन्तरं संक्रामति तर्हि स गच्छन्नागच्छन् वा कस्मान्न दृश्यते? उच्यते, कर्मपुद्गलानामतिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात्, तथा च परतीर्थिकैरप्युक्तम् –

अन्तरा भवदेहोऽपि सूक्ष्मत्वान्नोपलभ्यते । निष्क्रामन्वा प्रविशन्वा नाभावोऽनीक्षणादपि ।।

तदेवं चतुर्धा मनोयोगश्चतुर्धा वाग्योगः सप्तधा च काययोग इति पञ्चदश योगाः । ननु तैजसमपि शरीरं विद्यते यद् भुक्ताहारपरिणमनहेतुर्यद्वशाच्च विशिष्टतपोविशेषसमुत्थलब्धिविशेषस्य पुंसस्तेजो-लेश्याविनिर्गमस्तत्किमिह नोक्तमिति ? उच्यते, सदा कार्मणेन सहाव्यभिचारितया तस्य तद्ग्रहणेनैव गृहीतत्वादिति ।।१३०५।।

चक्रे० : व्याख्याता प्राणादिद्वारगाथा । सम्प्रति जीवलक्षणभूतानुपयोगानाहुः –

देव० : अथ जीवे लक्षयितव्ये किं लक्षणमिति जिज्ञासायां जीवलक्षणान्युपयोगानाह –

नाणं पंचवियप्पं अन्नाणतिगं च सव्वसागारं ।
चउदंसणमणगारं उवओगा बारस हवंति।।२३२।।

चक्रे० : ज्ञानं पञ्चविकल्पं पञ्चभेदम् । १-तत्रेन्द्रियाऽनिन्द्रियप्रभवं मतिज्ञानम्, २-द्रव्यभाव-श्रुतोत्थं श्रुतज्ञानम्, ३-रूपिद्रव्यविषयमवधिज्ञानम्, ४-मनुष्यक्षेत्रवर्त्तिसंज्ञिमनःपर्यायग्राहकं मनःपर्यायज्ञानम्, ५-सर्वप्रकाशकं केवलमसहायं ज्ञानं केवलज्ञानम्, मिथ्यादृशां विपरीताऽर्थ-ग्राहकाणि ज्ञानान्य**प्यज्ञानान्येव** तेषां **त्रिकं** १-मत्यज्ञानम्, २-श्रुताज्ञानम्, ३-विभङ्गरूपम्, **सर्वं** ज्ञानमज्ञानं च **'सागारं'** ति आकारो व्यक्तिग्रहणपरिणामरूपो विशेषो वैशिष्ट्यम्, 'आगारो उ विसेसो' [विशेषा.भा.] इति वचनात्, तेन सह वर्तत इति साकारं विशेषग्राहकमित्यर्थः । चतुर्णां दर्शनानां समाहार**श्चतुर्दर्शनं** चक्षुर्दर्शनादि । १-तत्र चक्षुषा सामान्याऽऽकारस्य ग्रहणं चक्षुर्दर्शनम्, २-शेषेन्द्रियैर्मनसा चाचक्षुर्दर्शनम्, ३-अवधिनात्ववधिदर्शनम्, ४-केवलेन पुनः केवलदर्शनम्, न विद्यत आकारः प्रागुक्तरूपो यस्य त**दनाकारं** सामान्यस्यैव ग्रहणात् । मनःपर्यायज्ञानं तु विशेषग्राहकमेवेति न तत्कृतो दर्शनभेदः । एवमुपयुज्यन्ते जीवस्य पदार्थग्रहण इ**त्युपयोगा द्वादश भवन्ति**।।२३२।।

देव० : ज्ञायतेऽवबुध्यतेऽनेन वस्तुतत्त्वमिति **ज्ञानम्,** तच्च सम्यग्ज्ञानमेव पञ्च विकल्पा भेदा यस्य तत्तथा, भेदाश्चाभिनिबोधिकश्रुतावधिमनःपर्यवकेवलाख्यास्तत्राभिमुखो योग्यदेशावस्थित-वस्त्वपेक्षया नियतः स्वस्वविषयपरिच्छेदकतया बोधोऽभिनिबोधः स एवाभिनिबोधिक-मिन्द्रियानिन्द्रियप्रभवमर्थावग्रहादिभेदम् । श्रूयते तदिति श्रुतं शब्दमात्रं तच्च द्रव्यश्रुतमेव, यत्पुनः शब्दमाकर्णयतः स्वयं वा वदतः पुस्तकादिन्यस्तानि वाक्षराण्युपलभमानस्य शेषेन्द्रियगृहीतं वार्थं विकल्पयतोऽक्षरारूषितं विज्ञानमुपजायते तदिह भावश्रुतमक्षरानक्षरादि । अवधिर्मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरित्येवंरूपा, तदुपलक्षितं ज्ञानमप्यवधिर्देवनारकाणां भवप्रत्ययः शेषाणां सविपक्षानुगामिकावस्थितहीयमानभेदात् षोढा । मन इति मनोद्रव्य-पर्यायास्तान् परिसमन्तादवगच्छतीति मनःपर्यवमृजुविपुलभेदं मनुष्यक्षेत्रवर्त्तिसंज्ञिमनःपर्यायाणां ग्राहकम्, न तु तच्चिन्तितबाह्यवस्तूनाम्, तेषामनुमानगम्यत्वात्, तथा च 'जाणइ बज्झे अनुमाणाउ'त्ति केवलमसाधारणमनन्तं वा सकलद्रव्यगुणपर्यायावभासकमिति तथा मिथ्यात्वो-दयवतामसदध्यवसायात्मकानि ज्ञानान्यप्यज्ञानान्येव, तेषां त्रिकं मत्यज्ञानश्रुताज्ञानविभङ्गरूपं सर्वमिति सुब्लोपः प्राकृतत्वात् । सर्वं ज्ञानमज्ञानं च, सह आकारेण ग्राह्यार्थसारूप्यलक्षणेन वर्त्तत इति साकारं विशेषग्राहकमित्यर्थः । तथा चतुर्णां दर्शनानां समाहारश्चतुर्दर्शनं चक्षुर्दर्शनादि, तत्र चक्षुषा सामान्याकारस्य ग्रहणं चक्षुर्दर्शनम्, शेषेन्द्रियैर्मनसा चाऽचक्षुर्दर्शनम्, अवधिना त्ववधिदर्शनम्, केवलेन पुनः केवलदर्शनम्, न विद्यत आकारो ग्राह्यार्थसारूप्यं यस्य, सामान्याकारग्रहणादनाकारमिह च मनःपर्यवज्ञानं विशेषाकारग्राहकमेवेति, न तत्कृतो दर्शनभेदो यदाह –

विशेषानेव गृह्णानं क्षयोपशमपाटवात् ।
उत्पद्यते मनोज्ञानमतस्तत्र न दर्शनम् ।। [ ]

यत्पुनर्मनःपर्यवज्ञानी क्वचित्सामान्याकारं गृह्णाति तदवधिदर्शनेनैव वेदितव्यं तथा विभङ्गिनो दर्शनमवधिज्ञानिना समानमेवेति न ज्ञानवत्तत्रापि भेदस्तथा च प्रज्ञप्तिः – 'ओहिदंसणअण-गारोवउत्ताणं भंते किं नाणी अन्नाणी ? गोयमा ! नाणीवि अन्नाणीवि, जे नाणी ते अत्थेगइया तिन्नाणी अत्थेगइया चउनाणी जे अन्नाणी ते नियमा तिअन्नाणी'ति एवमुपयुज्यन्ते जीवस्य पदार्थग्रहणं प्रति साधनतां भजन्त इत्युपयोगा द्वादश भवन्तीति गाथार्थः ।।२३२।।

** प्रवचनसारोद्धारे-१३०४ **

इदानीं 'उवओग बारस'त्ति षड्विंशत्युत्तरद्विशततमं द्वारमाह –

मइ सुय ओही मण केवलाणि गइ सुयअन्नाण विब्भंगा ।
अचक्खु चक्खु अवही केवलचउदंसणुवउगा ।।

उपयुज्यते वस्तुपरिच्छेदं प्रति व्यापार्यते जीव एभिरित्युपयोगा बोधरूपा जीवस्य स्वतत्त्वभूता व्यापाराः, ते च द्विधा—साकारा अनाकाराश्च, तत्र आकारः–प्रतिवस्तु प्रतिनियतो ग्रहणपरिणामरूपो विशेषः 'आगारो उ विसेसो' इति वचनात् सह आकारेण वर्तन्त इति साकाराः, सामान्यविशेषात्मके वस्तुनि विशेषांशग्राहिण इत्यर्थः, तद्विपरीतास्त्वनाकाराः, सामान्यांशग्राहिण इत्यर्थः, तत्र **मतिश्रुतावधिमनःपर्यायकेवला**ख्यानि पञ्च ज्ञानानि, **मत्यज्ञानश्रुताज्ञानविभङ्ग**रूपाणि त्रीणि चाज्ञानानीत्यष्टौ साकाराः, **अचक्षुश्चक्षुरवधिकेवला**ख्यानि **चत्वारि दर्शना**न्यनाकाराः, तदेवं मिलिता द्वादश **उपयोगाः**, तत्र ज्ञानानि दर्शनानि च प्रागेवोक्तानि, तथा मतिश्रुतावधिज्ञानान्येव नञः कुत्सार्थत्वान्मिथ्यात्वकलुषिततया यदा कुत्सितानि भवन्ति तदा यथाक्रमं मत्यज्ञानश्रुताज्ञानविभङ्गव्यपदेशभाञ्जि भवन्ति, 'विभंग'त्ति विपरीतो भङ्गः परिच्छित्तिप्रकारो यस्मिन् तद्विभङ्गमिति ।।१३०४।।

चक्रे० : सम्प्रति जीवस्योत्तरोत्तरविशुद्धिरूपाणि गुणस्थानान्याहुः –

देव० : सम्प्रति जीवस्यैवोत्तरोत्तरविशुद्धिरूपाणि गुणस्थानान्याह –

मिच्छद्दिट्ठी सासायणे य तह सम्ममिच्छदिट्ठी य ।
अविरयसम्मद्दिट्ठी विरयाविरए पमत्ते य।।२३३।।[१]
तत्तो य अप्पमत्ते नियट्टिअनियट्टिबायरे सुहुमे ।[२]
उवसंतखीणमोहे होइ सजोगी अजोगी य ।।२३४।।

चक्रे० : १-मिथ्याऽतथ्योऽर्हद्धर्म इति दृष्टिर्दर्शनं यस्य स **मिथ्यादृष्टिः**, तर्हि कथमस्य गुणस्थानतेत्युच्यते, कस्यापि वचनादेर्जिनमतानुसारित्वाद् गुणस्थानता, यद्वा सूत्रोक्ताक्षरैकारोचनेऽपि मिथ्यादृष्टिः शेषरोचनात्तु गुणस्थानता । एकेन्द्रियादीनां तु चैतन्यमात्रगुणाऽपेक्षया।

२-आयं सादयतीत्यासादनम्, अनन्ताऽनुबन्धिकषायवेदनम्, नैरुक्तो यलोपः । सहासादनेन वर्त्तत इति **सास्वादनः** स चैवं भवति कश्चिद् गम्भीरभवोदधिवर्तिजन्तुरनाभोगनिर्वर्त्तितेन यथाप्रवृत्तिकरणसंज्ञेन शुभाध्यवसायेन सम्पादितसमस्तकर्मान्तःकोटाकोटिस्थितिरपूर्वकरणाख्य-

१. विरयाविरई A,T,C २. सुहमे P,K,T,C,Z

शुभाध्यवसायेन ग्रन्थिभेदं विधाय, अनिवृत्तिकरणाऽऽह्वशुभाध्यवसायेन मिथ्यात्वमोहनीयस्य कर्मणः स्थितेरन्तर्मुहूर्त्तप्रमाणमन्तकरणं करोति । ततोऽन्तर्मुहूर्तेनाऽधस्तनीं स्थितिं क्षपयित्वा, अन्तरकरणप्रथमसमय एवौपशमिकसम्यक्त्वमाप्नोति । तत्र चाऽऽन्तरमौहूर्त्तिकोपशमकाले जघन्यतः समयशेषे, उत्कर्षतः षडावलिकाशेषे, कस्यचिदनन्तानुबन्ध्युदयात्, उपशमश्रेणिपतितस्य च सासादनसम्यग्दृष्टिता भवति । तदनन्तरमवश्यमुपरितनमिथ्यात्वस्थित्युदयान्मिथ्यादृष्टिता।

३-**सम्यग्मिथ्यादृष्टि**र्मिश्रः स चाऽन्तरकरणकालप्राप्तमौपशमिकसम्यक्त्वमौषधविशेषकल्पमासाद्य मदनकोद्रवस्थानीयमुपरितनमिथ्यात्वमोहनीयमशुद्धार्द्धविशुद्धविशुद्धत्वेन त्रिपुञ्जीकृत्याऽर्द्धविशुद्धपुञ्जवेदनकालेऽन्तर्मुहूर्त्तं भवति । तत ऊर्ध्वमवश्यं सम्यक्त्वं मिथ्यात्वं वाऽऽयाति।

४-**अविरतसम्यग्दृष्टिर**प्रत्याख्यानकषायोदयादगृहीताऽणुव्रतादिः केवलसम्यक्त्ववान्।

५-**विरताविरतो** देशे स्थूलप्राणिवधादौ विरतः सर्वस्मिंश्चाऽविरतः प्रत्याख्यानकषायोदयात्।

६-**प्रमत्त** इति प्रमत्तसंयतः कषायदुष्प्रणिधानधर्माऽनादरादिप्रमादवान्।

७-**अप्रमत्त**स्तद्विपरीतः।

८-**'नियट्टि'** त्ति निवृत्तिरष्टमगुणस्थानकम् । इहाद्यसमय एवाऽसङ्ख्यलोकप्रदेशतुल्यानि जघन्यादीन्युत्कृष्टान्तान्यऽध्यवसायस्थानानि । उत्तरोत्तरेषु समयेष्वधिकाऽधिकानि । तेषु च जघन्यादुत्कृष्टं प्राक्तनोत्कृष्टाच्चोत्तरजघन्यमनन्तगुणविशुद्धम् । ततश्च युगपदेतद्गुणस्थानं प्रतिपन्नानां जन्तूनामन्योन्यस्य सम्बन्धिनोऽध्यवसायस्थानस्य निवृत्तिर्भिन्नाऽध्यवसायस्थानवर्त्तित्वमित्यर्थः । इह च कर्मणां स्थितिघातरसघातादीनपूर्वान् कुरुत इत्यपूर्वकरणोऽप्ययमुच्यते । तत्र पूर्वगुणस्थानेषु यावत् स्थितिखण्डकं रसखण्डकं च हतवांस्ततोऽत्र बृहत्तरं हन्ति । तथा विशुद्धिवशादपवर्तनाकरणेनोपरितनस्थितेरवतार्योदयक्षणानन्तरमन्तर्मुहूर्तकालक्षपणीयानां प्रतिसमयमसङ्ख्यगुणवृद्ध्या दलिकानां विरचनं गुणश्रेणिः । तां च प्राक्कालतो गुर्व्वीमपवर्त्तितस्वल्पदलिकां रचितवान् । इह तु कालतो लघ्वीमपवर्त्तितभूरिदलिकां च रचयति । तथा शुभप्रकृतिष्वशुभप्रकृतिदलिकानां विशुद्धिवशादनुसमयमसङ्ख्यगुणवृद्ध्या नयनं गुणसंक्रमस्तमप्यत्राऽपूर्वं करोति स्थितिबन्धं च पूर्वं दीर्घं कृतवानिह तु ह्रस्वमिति । अयं चोपशमक्षययोग्यकर्मदलिककरणादुपशमकः क्षपकश्च भण्यते।

९-अनिवृत्तिर्युगपदेतत्प्रतिपन्नानां मिथो नाऽध्यवसायव्यावृत्तिः प्रतिसमयमनन्तगुर्णाविशुद्धैकैकाऽध्यवसायस्थानत्वादस्य । सूक्ष्मसम्परायाऽपेक्षया बादरसम्परायो यस्य स बादरसम्परायोऽनिवृत्तिश्चासौ बादरसम्परायश्चानिवृत्तिबादरसम्परायः।

१०-'[१]सुहुमे' त्ति सूक्ष्मसम्परायः समन्तात् पराऽयन्ति पर्यटन्ति जीवाः संसारमेभिरिति सम्परायाः कषायाः, इह शेषाणामनुदयात् सूक्ष्मः किट्टीभूतो लोभाख्यः सम्परायो यस्य स तथा।

११-**उपशान्तः** सन्नेव करणविशेषाद् भस्मच्छन्नाग्निवदुदयायोग्यीभूतो मोहो यस्य स उपशान्तमोहः।

१२-**क्षीणमोहः** क्षपकश्रेणेः पारगतः केवलोत्पत्तेरर्वाग्वर्त्ती **भवति**।

१३-'**सजोगि**'त्ति सयोगी केवली कायवाङ्मनोयोगवान् । कायेन क्रामति । वाचा देशनां कुरुते । 'अमनस्काः केवलिनः' [ ] इति वचनान्न च केवलिनः सर्वथा मनोयोगो नास्ति, यदाह-

दव्वमणोजोगेण मणनाणीणं अणुत्तरसुराण ।
संसयवुच्छित्तिं केवलेण नाऊण सय कुणइ ।। [ ]

१४-**अयोगी च** योगनिरोधादयोगिकेवली। गुणिरूपतया चैषामभिधानं गुणगुणिनोरभेदोपचारात् । एतानि गुणानां ज्ञानादीनां स्थानानि गुणस्थानानि चतुर्दश भवन्तीत्यनुक्तमपि प्रस्तावाद् ज्ञेयम् । कालमानं चैषाम् –

मिच्छत्तमभव्वाणं अणाइयमणंतयं मुणेयव्वं ।
भव्वाणं तु अणाई सपज्जवसियं च तं होइ ।।
छावलियं सासाणं समहिअ तेत्तीससायर चउत्थं ।
देसूणपुव्वकोडी पंचमगं तेरसं च पुढो ।।
लहु पंचक्खर चरिमं तइयं छट्ठाइ बारसं जाव ।
इय अट्ठगुणट्ठाणा अंतमुहुत्ता य पत्तेयं ।। [प्रव.सारो॰ १३०७, ८, ९]

अयमन्यश्च विशेषः –

मिच्छे सासाणे वा अविरयसम्मंमि अहव गहियंमि ।
जंति जिया परलोए सेसिक्कारस गुणे मोत्तुं ।। [प्रव.सारो॰ १३०६]

इति गाथार्थः।।२३३, २३४।।

१. 'सुहमि'त्ति

देव० : १-तिष्ठन्ति यथासम्भवमविशुद्धविशुद्धरूपतया गुणा एष्विति स्थानान्यवस्थाविशेषा गुणानां ज्ञानादीनां स्थानानि गुणस्थानानि चतुर्दश भवन्तीत्यनुक्तमपि प्रस्तावाद् ज्ञेयम्, तत्र **मिथ्या** वक्ष्यमाणमिथ्यात्वोदयाद्विपर्यस्ता **दृष्टि**र्यस्य स तथा गुणस्थानत्वं चास्य भद्रकत्वाद्यपेक्षया।

२-आ ईषत्स्वादनं तत्त्वश्रद्धानरसानुभवः सह तेन वर्त्तत इति **सास्वादनो**ऽनन्तानुबन्ध्युदयाद् वक्ष्यमाणौपशमिकसम्यक्त्वात्प्रच्यवमानोऽद्याप्यनुदितमिथ्यात्वश्चेत्यर्थ एकारः सर्वत्र प्राकृतत्वात्।

३-**तथा** सम्यक्त्वमिथ्या च सम्यग्मिथ्या, **सम्यग्मिथ्या दृष्टि**र्यस्य स तथा वक्ष्यमाणार्ध-विशुद्धपुञ्जवेदनान्मिश्रदर्शन इत्यर्थः सर्वाण्यप्यव्ययानि समुच्चयार्थानि।

४-न विरतोऽप्रत्याख्यानकषायोदयात् सावद्ययोगेभ्य इत्य**विरतः** स चासौ वक्ष्यमाण-सम्यक्त्वयोगात्**सम्यग्दृष्टिश्च** स तथा।

५-विरतश्चासौ देशतोऽविरतश्च सर्वतः प्रत्याख्यानकषायोदया**द्विरताविरतः**।

६-प्रमत्त इति भीमादिन्यायात्प्रमत्तसंयतः[१], प्रमाद्यतीति **प्रमत्तो**ऽज्ञानसंशयविपर्ययरागद्वेषस्मृति-भ्रंशयोगदुष्प्रणिधानधर्मानादराणां मध्यादन्यतमप्रमादवान् स चासौ संयतश्च सर्वविरतः।

७-**ततश्चाप्रमत्त**संयतो वर्णितप्रमादरहितः।

८-**नियट्टि**'त्ति निवृत्तिबादरस्तत्र निवृत्तिमन्तो व्यावृत्ता अध्यवसायतः परस्परविलक्षणा इत्यर्थो बादराबादरकषाया जन्तवो यत्र स तथा । इयमिह भावना– किलैतस्मिन्नाद्यसमय एवासङ्ख्य-लोकप्रदेशतुल्यानि जघन्यादीन्युत्कर्षान्तान्यध्यवसायस्थानान्युत्तरोत्तरेषु च समयेष्वधि-काधिकानि, तेषु च जघन्यादुत्कर्षं प्राक्तनोत्कर्षाच्चोत्तरजघन्यमनन्तगुणविशुद्धम्, ततश्च युगपदेतद्गुणस्थानं प्रतिपन्नानां जन्तूनां परस्परमध्यवसायतो वैलक्षण्यमित्यर्थ इह च कर्मणां स्थितिघातरसघातादीनपूर्वान् कुरुत इत्यपूर्वकरणोऽप्ययमुच्यते तत्र पूर्वगुणस्थानेषु यावत्स्थिति-खण्डकं रसखण्डकं च हतवांस्ततोऽत्र बृहत्तरं हन्ति, तथा विशुद्धिवशादपवर्तनाकरणेनो-परितनस्थितेरवतार्योदयक्षणानन्तरमन्तर्मुहूर्त्तकालक्षपणीयानां प्रतिसमयमसङ्ख्यगुणवृद्ध्या दलिकानां विरचनं गुणश्रेणिस्तां च प्राक्कालतो गुर्वीमपवर्तितस्वल्पदलिकां च रचितवान्, इह तु कालतो लघ्वीमपवर्त्तितभूरिदलिकां च रचयति । तथा शुभप्रकृतिदलिकानां च रचयति तथा शुभप्रकृतिष्वशुभप्रकृतिदलिकानां विशुद्धिवशादनुसमयमसङ्ख्यगुणवृद्ध्या नयनं गुणसङ्क्रम-स्तमप्यत्रापूर्वं करोति स्थितिबन्धं च पूर्वं दीर्घं कृतवानिह तु ह्रस्वमिति, अयं चोपशमक्षय-योग्यकर्मदलिककरणादुपशमकक्षपकश्च भण्यते।

१. संयतस्ततः T,B,C

९-अनिवृत्तयोऽव्यावृत्ता बादरा यस्मिन्नसा**वनिवृत्तिबादरः,** प्रतिसमयमनन्तगुणविशुद्धैकैकाध्यवसायस्थानत्वादस्य युगपदेतत्प्रतिपन्नानां परस्परं नाध्यवसायवैलक्षण्यमित्यर्थः, अयमप्युपशमकः क्षपकश्च ९।

१०-**सुहुमे**[१]त्ति सूक्ष्मसम्परायस्तत्र समन्तात् परायन्ति पर्यटन्ति जीवाः संसारमेभिरिति सम्परायाः कषाया इह तु शेषाणामनुदयाल्लोभ एव ग्राह्यः, सूक्ष्मः किट्टीभूतसम्परायो यस्य स तथा, अयमप्युपशमकः क्षपकश्च।

११-मोहशब्दस्योभयत्र सम्बन्धा**दुपशान्तो** विद्यमान एव करणविशेषाद्भस्मच्छन्नाग्निवदुदयायोग्यीभूतो **मोहो** यस्य स तथोपशमश्रेणेरुत्तीर्ण इत्यर्थः।

१२-**क्षीणो**ऽभावमापन्नो **मोहो** यस्य स तथा क्षपकश्रेणेः पारगतः केवलोत्पत्तेरर्वाग्वर्ती भवति।

१३-'**सजोगि**'त्ति सयोगिकेवली, तत्र सह योगैर्मनोवाक्कायव्यापरैर्वर्त्तत इति सयोगी, सर्वघनाघनादेराकृतिगणत्वाद्[२] बहुव्रीहेर्मत्वर्थीयः । सयोगी चासौ केवली च, न च केवलिनो मनोयोगो नास्ति, मनःपर्यवज्ञान्यादिभिर्मनसा पृष्टस्य मनसैव देशकत्वात् ।

१४-योगनिरोधा**दयोगी,** स चासौ केवली **च**। गुणिरूपतया चामीषामभिधानं गुणगुणिनोः कथञ्चिदनन्यत्वादिति । कालमानं चामीषाम् –

मिच्छत्तमभव्वाणं अणाइयमणंतयं मुणेयव्वं ।
भव्वाणं तु अणाई सपज्जवसियं च सम्मत्ते ।।
छावलीयं सासाणं समहिय तेत्तीससायर चउत्थं ।
देसूणपुव्वकोडी पंचमगं तेरसं च पुढो ।।
लहु पंचक्खर चरिमं तइयं छट्ठाइ बारसं जाव ।
इय अट्ठगुणट्ठाणा अंतमुहुत्ता य पत्तेयं ।। [प्रव. सारो॰ १३०७, ८, ९]

अयमन्यश्च विशेषः –

मिच्छे सासाणे[३] वा अविरयसम्मंमि अहव गहियंमि ।
जंति जिया परलोए सेसिक्कारसगुणे मोत्तुं ।। [प्रव.सारो॰ १३०६]

इति गाथार्थः।।२३३, २३४।।

---

१. 'सुहमि'त्ति A,T,B,C २. सर्वघनाघनादे A, ३. सासायणे T,B,C

**** आवश्यकनिर्युक्तौ 'प्रतिक्रमण' अध्ययने संग्रहणिगाथायाम्-१, २ ****

अधुनाऽमुमेव गुणस्थानद्वारेण दर्शयन्नाह संग्रहणिकारः –

मिच्छद्दिट्ठी सासायणे य तह सम्ममिच्छदिट्ठी य।
अविरयसम्मद्दिट्ठी विरयाविरए पमत्ते य ।।
तत्तो य अप्पमत्तो नियट्टिअनियट्टिबायरे सुहुमे ।
उवसंतखीणमोहे होइ सजोगी अजोगी य ।।

कश्चिद्भूतग्रामो **मिथ्यादृष्टिः,** तथा **सास्वादनश्चान्यः**, सहैव तत्त्वश्रद्धानरसास्वादनेन वर्तत इति सास्वादनः, क्वणद्घण्टालालान्यायेन प्रायः परित्यक्तसम्यक्त्वः, तदुत्तरकालं षडावलिकाः, तथा चोक्तम्-

उवसमसंमत्तातो चयतो मिच्छं अपावमाणस्स। सासायणसंमत्तं तदंतरालंमि छावलियं ।।

तथा सम्यग्मिथ्यादृष्टिश्च सम्यक्त्वं प्रतिपद्यमानः प्रायः सञ्जाततत्त्वरुचिरित्यर्थः, तथाऽ**विरत-सम्यग्दृष्टि**र्देशविरतिरहितः सम्यग्दृष्टिः, **विरताविरतः** श्रावकग्रामः, **प्रमत्तश्च** प्रकरणात्प्रमत्तसंयतग्रामो गृह्यते, **ततश्चाप्रमत्त**संयतग्राम एव, **'णियट्टिअणियट्टिबायरो'**त्ति निवृत्तिबादरोऽनिवृत्तिबादरश्च, तत्र क्षपकश्रेण्यन्तर्गतो जीवग्रामः क्षीणदर्शनसप्तको निवृत्तिबादरो भण्यते, तत ऊर्ध्वं लोभाणुवेदनं यावदनिवृत्तिबादरः, **'सुहुमे'**त्ति लोभाणून् वेदयन् सूक्ष्मो भण्यते, सूक्ष्मसम्पराय इत्यर्थः, **उपशान्तक्षीणमोहः** श्रेणिपरिसमाप्तावन्तर्मुहूर्तं यावदुपशान्तवीतरागः क्षीणवीतरागश्च **भवति, सयोग्य**निरुद्धयोगो भवस्थकेवलिग्राम इत्यर्थः, **अयोगी च** निरुद्धयोगः शैलेश्यां गतो ह्रस्वपञ्चाक्षरोद्गिरणमात्रकालं यावदिति गाथाद्वयसमासार्थः ।। १, २।।

चक्रे० : उक्तानि जीवस्थानयोगोपयोगगुणस्थानानि । अथैतानि गत्यादिद्वारेषु विचार्यन्त इति तान्याहुः –

देव० : एवमियता ग्रन्थेन जीवस्थानानि तद्गतयोगोपयोगगुणस्थानानि च प्रतिपादितान्येतानि च गत्यादिद्वारेषु विचार्यन्त इति तान्याह –

गइइंदिए य काए[१] जोए वेए कसायनाणे य ।
संयम-दंसण-लेसा भवसम्मे सन्निआहारे।।२३५।।

चक्रे० : गतौ नारकादिकायाम् ४, **'इंदिए य'** त्ति एकेन्द्रियादौ ५, **काये** पृथ्वीकायादौ ६, **योगे** मनआदौ ३, **वेदे** स्त्र्यादौ ३, **कषाये** क्रोधादौ ४, **ज्ञाने** मत्यादौ ५, उपलक्षण-

१. काये T,B,C,K

त्वान्मत्यज्ञानादौ च ३, एष एवाऽन्यत्राऽपि सविपक्षपदे हेतुः । **संयमे** देशसंयमसामायिकादावसंयमे च ७, **दर्शने** च चक्षुर्दर्शनादौ ४, **लेश्यासु** कृष्णाद्यासु ६, **'भव'**त्ति भव्ये, अभव्ये च २, **'सम्मि'**त्ति सम्यक्त्वे क्षायिकौपशमिकक्षायोपशमिकमिश्रसास्वादनरूपे, मिथ्यात्वे च ६ ।

संज्ञिन्यसंज्ञिनि च २, **आहारके**ऽनाहारके च २, एतानि मूलतश्चतुर्दश उत्तरभेदापेक्षया तु द्विषष्टिरिति ।

अथ किमेतेष्वित्याहुः 'एएसु मग्गणट्ठाणेसु जीवगुणजोगुवओगामग्गिज्जंति' त्ति वाक्यं विचित्रत्वात् तन्त्ररचनायाः । अत एव नानाच्छन्दोविशेषैर्गुम्फोऽत्रेति ।

मार्ग्यन्ते विचार्यन्ते जीवादिपदान्यास्विति मार्गणास्ताश्च तानि स्थानानि च मार्गणास्थानानि । एतेषु मार्गणास्थानेषु जीवगुणयोगोपयोगाः । जीवचतुर्दशकगुणस्थानकयोगोपयोगा मार्ग्यन्ते । यथा कस्यां गतौ कियन्ति जीवस्थानानि – अपर्याप्तसूक्ष्मैकेन्द्रियादीनि, गुणस्थानानि वा मिथ्यादृष्ट्यादीनीत्यादि ।

तद्यथा – सुरनारकगत्योः पर्याप्ताऽपर्याप्तरूपं संज्ञिद्वयम् २ । मनुष्यगतौ संज्ञिद्वयमपर्याप्ताऽसंज्ञी च ३ । तिर्यग्गतौ सर्वाणि १४ । एकेन्द्रियेषु पर्याप्तापर्याप्तसूक्ष्मबादरैकेन्द्रियरूपाणि चत्वारि ४ । द्वित्रिचतुरिन्द्रियेषु पर्याप्ताऽ-पर्याप्तस्वरूपे द्वे २ । पञ्चेन्द्रियेषु पर्याप्ताऽपर्याप्तासंज्ञिसंज्ञिनः ४ । स्थावरकाये पञ्चविधे पर्याप्ताऽपर्याप्तसूक्ष्मबादरैकेन्द्रियरूपाणि चत्वारि ४ । त्रसकाये शेषाणि दश १० । मनोयोगे पर्याप्तः संज्ञी - १ । वाग्योगे पर्याप्ता द्वित्रिचतुरिन्द्रियाऽसंज्ञिसंज्ञिनः ५ । काययोगे सर्वाणि १४ । पुंस्त्रीवेदयोः संज्ञिद्वयम् २। नपुंसकवेदे सर्वाणि १४ । कषायेषु सर्वाणि १४ । मतिश्रुताऽवधिविभङ्गेषु संज्ञिद्वयम् २ । मतिश्रुताऽज्ञानयोः सर्वाणि १४ । मनःपर्यायकेवलज्ञानयोः पर्याप्तः संज्ञी १ । देशसंयतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायययथाख्यातेषु पर्याप्तः संज्ञी १ । असंयमे सर्वाणि १४ । चक्षुर्दर्शने पर्याप्तचतुरिन्द्रियासंज्ञिसंज्ञिरूपाणि त्रीणि ३ । अचक्षुदर्शने सर्वाणि १४ । अवधिदर्शने संज्ञिद्वयम् २ । केवलदर्शने पर्याप्तः संज्ञी १। आद्यलेश्यात्रये सर्वाणि १४ । तेजोलेश्यायां संज्ञिद्वयमपर्याप्तबादरैकेन्द्रियश्च ३, तेजोलेश्यावतां भुवनपत्यादीनां बादरभूदकप्रत्येकवनस्पतिषूत्पादाद्, [पद्मशुक्लयोस्तु संज्ञिद्विकम्] भव्येऽभव्ये च सर्वाणि १४ । क्षायिकक्षायोपशमिकयोः संज्ञिद्वयम् २, औपशमिकसम्यक्त्वे तु पर्याप्तः संज्ञ्येकः १, अपर्याप्तस्यौपशमिकसम्यक्त्वाऽनुपपत्तेः, तस्य तत्प्राप्तियोग्यशुद्ध्यभावात् ।

अणबंधोदयमाउगबंधं कालं पि सासणो कुणइ ।
उवसम सम्मद्दिट्ठी चउण्हमिक्कं पि नो कुणइ ।। [ ]

इति वचनादपर्याप्तस्य पारभविकौपशमिकसम्यक्त्वस्याप्यसम्भवः । उपशान्तमोहस्य सर्वार्थोत्पत्तावपि

'पढमसमए चेव संमत्तपुंजं उदयावलियाए छोढूण [१]सम्मत्तपुग्गले वेएइ त्ति [ ]

नाऽपर्याप्तस्यौपशमिकत्वम् । मिश्रे पर्याप्तसंज्ञी १ । सास्वादने बादरैकेन्द्रियद्वित्रिचतुरिन्द्रियाऽसंज्ञिनोऽपर्याप्ताः संज्ञिद्वयं च ७ । मिथ्यात्वे सर्वाणि १४ । संज्ञिनि संज्ञिद्वयम् २ । असंज्ञिनि संज्ञिद्वयवर्जानि द्वादश १२ । आहारके सर्वाणि १४ । अनाहारके सप्ताप्यपर्याप्ताः संज्ञीपर्याप्तोऽपीत्यष्टौ ८ ।

देवनारकगत्योश्चत्वार्याद्यानि गुणस्थानानि ४ । तिर्यग्गतौ पञ्च ५ । मनुष्यगतौ चतुर्दश १४ । एकद्वित्रिचतुरिन्द्रियेष्वाद्ये द्वे २ । पञ्चेन्द्रियेषु सर्वाणि १४ । पृथिव्युदकवनस्पतिकायेषु द्वे २ । तेजस्कायवायुकाययोरेकम् १ । त्रसकाये सर्वाणि १४ । योगेष्वयोगिवर्जानि त्रयोदश १३ । वेदेष्वाद्यानि नव ९ । कषायत्रयेऽपि तान्येव ९ । लोभे दशाऽऽद्यानि १० । मतिश्रुताऽवधिज्ञानेष्वविरतादीनि नव ९ । मनःपर्यायज्ञाने प्रमत्तादीनि सप्त ७ । केवलज्ञानेऽन्त्ये द्वे २ । अज्ञानत्रिके आद्यानि त्रीणि ३ । सामायिकच्छेदोपस्थापनीययोः प्रमत्तादीनि चत्वारि ४ । परिहारविशुद्धिके प्रमत्तापमत्ते द्वे २ । देशसंयमे विरताऽविरतमेकम् १ । सूक्ष्मसम्पराये सूक्ष्मसम्परायमेकम् १ । यथाख्यातेऽन्त्यानि चत्वारि ४ । असंयम आद्यानि चत्वारि ४ । चक्षुरचक्षुदर्शनयोराद्यानि द्वादश १२ । अवधिदर्शनेऽविरतादीनि नव ९ । केवलदर्शनेऽन्त्ये द्वे २ । आद्यलेश्यात्रय आद्यानि षट् ६ । तेजपद्मयोस्तु सप्त ७ । शुक्लायामाद्यवर्जानि १३ । भव्ये सर्वाणि १४ । अभव्य आद्यम् १ । क्षायोपशमिकसम्यक्त्वेऽविरतादीनि चत्वारि ४ । औपशमिकेऽष्टौ ८ । क्षायिक एकादश ११ । सास्वादने द्वितीयम् १ । मिश्रे तृतीयम् १ । मिथ्यात्व आद्यम् १ । संज्ञिनि सर्वाणि १४ । असंज्ञिन्याद्यद्वयम् २ । आहारक आद्यानि त्रयोदश १३ । अनाहारके मिथ्यात्वसास्वादनाऽविरतसयोग्ययोग्याख्यानि ५ ।

देवनारकगत्योरौदारिकद्विकाऽऽहारकद्विकोना एकादश योगाः ११ । तिर्यग्गतावाहारकद्विकोनाः १३ । मनुष्यगतौ सर्वे १५ । एकेन्द्रियेष्वौदारिकद्विकवैक्रियद्विककार्मणाख्याः पञ्च

१. पोग्गलो वइत्ति P,K

५ । द्वित्रिचतुरिन्द्रियेष्वौदारिकद्विककार्मणान्त्यभाषाख्याश्चत्वारः ४ । पञ्चेन्द्रियेषु सर्वे १५ । पृथिव्यप्तेजोवनस्पतिकायेष्वौदारिकद्विककार्मणाख्यास्त्रयः ३ । वायुकाये ते सवैक्रियद्विकाः ५ । त्रसकाये सर्वे १५ । मनोवाग्योगयोः कार्मणौदारिकमिश्रोनाः १३ । काययोगे सर्वे १५ । स्त्रीवेद आहारकद्विकोनाः १३ । पुंनपुंसकवेदयोः सर्वे १५ । कषायेषु सर्वे १५ । मतिश्रुतावधिषु सर्वे १५। मनःपर्यायज्ञाने कार्मणौदारिकमिश्रोनाः १३ । केवलज्ञान आद्याऽन्त्यमनोवाग्योगौदारिकद्विककार्मणाख्याः ७ । अज्ञानकत्रिक आहारकद्विकोनाः १३ । देशसंयमे कार्मणौदारिकमिश्राऽऽहारकद्विकोनाः ११ । सामायिकच्छेदोपस्थापनीययोः कार्मणौदारिकमिश्रोनाः १३ । परिहारविशुद्धिकसूक्ष्मसम्परायययोरष्टौ मनोवाग्योगा औदारिकयोगाश्चेति ९ । यथाख्याते तैजसकार्मणौदारिकमिश्राः ११ । असंयम आहारकद्विकोनाः १३ । चक्षुर्दर्शने कार्मणौदारिकमिश्रोनाः १३ । अचक्षुरवधिदर्शनयोः सर्वे १५ । केवलदर्शन आद्यान्त्यमनोवाग्योगौदारिकद्विककार्मणाख्याः ७ । लेश्याषट्के सर्वे १५ । भव्ये सर्वे १५ । अभव्य आहारकद्विकोनाः १३ । क्षायिकक्षायोपशमिकयोः सर्वे १५ । औपशमिके, सास्वादने, मिथ्यात्वे चाहारकद्विकोनाः १३ । मिश्रे मनोवाग्योगाष्टकम्, औदारिकवैक्रियौ च १० । संज्ञिनि सर्वे १५ । असंज्ञिन्यौदारिकद्विकवैक्रियद्विककार्मणाऽन्त्यभाषाख्याः ६ । आहारकेऽकार्मणाः १४ [सर्वे १५]। अनाहारके कार्मणयोगः १ ।

मनुष्यगतौ द्वादशोपयोगाः १२ । देवनारकतिर्यग्गतिषु मनःपर्यायकेवलद्विकवर्जाः ९ । एकद्वित्रीन्द्रियेष्वचक्षुर्दर्शनमतिश्रुताऽज्ञानरूपाः ३ । चतुरिन्द्रियेषु ते सचक्षुर्दर्शनाः ४ । पञ्चेन्द्रियेषु सर्वे १२ । स्थावरकाये मतिश्रुताऽज्ञानाऽचक्षुर्दर्शनाख्याः ३ । त्रसकाये, योगेषु, वेदेषु च सर्वे १२ । कषायेषु केवलिद्विकोनाः १० । ज्ञानचतुष्के ज्ञानचतुष्कदर्शनत्रयरूपाः ७ । केवलज्ञाने द्वौ केवलोपयोगौ २ । अज्ञानत्रये दर्शनद्विकाऽज्ञानत्रयरूपाः ५ । देशसंयमे ज्ञानत्रयदर्शनत्रयरूपाः ६ । सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायेषु ज्ञानचतुष्कदर्शनत्रयरूपाः ७ । यथाख्याते सकेवलद्वयाः ९ । असंयमे मनःपर्यायकेवलद्वयवर्जाः ९ । अचक्षुश्चक्षुर्दर्शनयोः केवलद्विकोनाः १० । अवधिदर्शने ज्ञानचतुष्कदर्शनत्रयरूपाः ७ । केवलदर्शने केवलोपयोगौ द्वौ २ । लेश्यापञ्चके केवलिद्विकोनाः १० । शुक्लायां द्वादश १२ । भव्ये द्वादश १२ । अभव्येऽज्ञानत्रयं दर्शनद्वयं च ५ । क्षायिकेऽज्ञानवर्जाः ९ । क्षायोपशमिकौपशमिकयोर्ज्ञानचतुष्कं

दर्शनत्रिकं च ७ । मिश्रे ज्ञानत्रयं दर्शनत्रयं चाऽज्ञानमिश्रम् ६ । सास्वादने मिथ्यात्वे च दर्शनद्वयमज्ञानत्रयं च ५ । संज्ञिनि द्वादश १२ । असंज्ञिनि द्वेऽज्ञाने द्वे दर्शने च ४ । आहारके द्वादश १२ । अनाहारके मनःपर्यायचक्षुर्दर्शनोनाः १० । एवं गत्यादिषु जीवस्थानगुणस्थान-योगोपयोगा दर्शिता इति।।२३५।।

देव० : इह प्राकृतत्वात् क्वचिद्विभक्तिलोपः क्वचित्त्वेकवद्भावस्तत्र गताविति **गतिमङ्गीकृत्य** ४, **'इंदिए य'**त्ति इन्द्रियाण्यङ्गीकृत्य ५, एवं **काये** पृथिवीकायादौ ६, **योगे** मन आदौ ३, **वेदे** स्त्र्यादौ ३, **कषाये** क्रोधादौ ४, **ज्ञाने** मत्यादावुपलक्षणत्वान्मत्यज्ञानादौ **च** ८, एवमन्यत्रापि यत्र सविपक्षं पदं तत्रायमेव हेतुः, **संयमे** देशसंयमसामायिकादावसंयमे च ७, **दर्शने** चक्षुर्दर्शनादौ ४, **लेश्यासु** कृष्णाद्यासु ६, भीमसेनवत्समुदायशब्दानामवयवेऽपि वृत्तिर्दर्शनाद्भवसिद्धिकेऽभव्ये च २, **'सम्मि'**त्ति सम्यक्त्वे क्षायोपशमिकक्षायिकौपशमिकमिश्रसास्वादनरूपे मिथ्यात्वे च ६, **संज्ञिन्य**संज्ञिनि च २, **आहारके**ऽनाहारके च, प्रथमश्चकारः समुच्चयार्थः, द्वितीयस्त्वेतेषामेव पदानामवान्तरभेदसूचकोऽत एव मूलतश्चतुर्दशसूत्तरभेदापेक्षया तु द्विषष्टिप्रमाणेष्विति गाथार्थः ।

किमित्याह 'एएसु मग्गणठाणेसु जीवगुणजोगुवओगामग्गिज्जंति'त्ति वाक्यम्, एतच्चैवं विचित्रत्वात्तन्त्ररचनाया अत एव नानाछन्दोविशेषैर्विरचनमिति । मार्ग्यन्ते विचार्यन्ते जीवादिपदान्यास्विति मार्गणास्ताश्च तानि स्थानानि च विचारास्पदानि तेषु, शेषं स्पष्टम्, तथा यद्यपि पूर्वमेकविधत्वद्विविधत्वादिभिर्बहुभिः प्रकारैर्जीवस्थानानि प्रतिपादितानि, तथाप्यति-सङ्क्षेपाश्रयणाद् दुरवगमम्, विस्तराश्रयणे च सङ्क्षेपरुचित्वात्सत्त्वानामनादेयं स्यादिति मध्यमस्थानवर्ती चतुर्दशक एव मार्गणासु मार्ग्यते, अस्यैव सूत्रे प्रायो विचारणात्,

तत्र गतिमङ्गीकृत्य तावत्सुरनारकयोः पर्याप्तापर्याप्तसंज्ञिनौ २, मनुष्येषु तृतीयोऽसंज्ञ्यपर्याप्तः ३, तिर्यक्षु चतुर्दशापि जीवस्थानानि १४ । इन्द्रियाण्यधिकृत्यैकेन्द्रिये पर्याप्तापर्याप्तसूक्ष्मबादराः ४, द्वित्रिचतुरिन्द्रियेषु तावेव पर्याप्तापर्याप्तौ द्वौ द्वौ २, पञ्चेन्द्रियेषु पर्याप्तापर्याप्ताऽसंज्ञिसंज्ञिनः ४। कायद्वारे स्थावरेषु पञ्चस्वप्येकेन्द्रियेष्विव ४, त्रसेषु शेषा दश १०। योगद्वारे मनोयोगे पर्याप्तसंज्ञ्येव १, वाग्योगे पर्याप्तद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिनः ५, काययोगे सर्वेऽपि १४ । वेदद्वारे

पुंस्त्रीवेदयोः कर्मग्रन्थाभिप्रायेण पञ्चेन्द्रियेष्वेव ४, सूत्राभिप्रायेण तु पर्याप्तापर्याप्तसंज्ञिनावेव, असंज्ञी तु पर्याप्तोऽपर्याप्तो वा नपुंसकवेद एव, तथा च प्रज्ञप्तिः –

'असन्निपुच्छा-गोयमा नपुंसगवेयगा' नपुंसकवेदे तु सर्वेपि १४ । कषायद्वारे चतुर्ष्वपि सर्वेपि १४ । ज्ञानद्वारे मतिश्रुतावधिविभङ्गेषु पर्याप्तापर्याप्तसंज्ञिनौ २, मनःपर्यवकेवलयोः पर्याप्तसंज्ञ्येव १, मतिश्रुताज्ञानयोः सर्वेऽपि १४ । संयमद्वारे देशसंयमे सामायिकादिषु च पर्याप्तसंज्ञी १, असंयमे तु सर्वेऽपि १४ । दर्शनद्वारे चक्षुर्दर्शने पर्याप्तचतुरिन्द्रियासंज्ञिसंज्ञिनः ३, अचक्षुर्दर्शने सर्वेऽपि १४, अवधिदर्शने पर्याप्तापर्याप्तसंज्ञिनौ २, केवलदर्शने संज्ञिपर्याप्तकः १ । लेश्याद्वार आद्यासु तिसृषु सर्वेऽपि, तैजस्यां बादरापर्याप्तकः संज्ञिद्विकं च ३, पद्मशुक्लयोस्तु संज्ञिद्विकम् २। भव्यद्वारे भव्येष्वभव्येषु च सर्वेऽपि १४ । सम्यक्त्वद्वारे क्षायोपशमिकक्षायिकयोः संज्ञिद्वयम्[१] २, सास्वादनेऽपर्याप्तबादरद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिनः संज्ञिपर्याप्तकश्च ७, मिश्रौपशमिकयोः पर्याप्तसंज्ञी, यत्पुनरौपशमिके संज्ञिनमपर्याप्तमपि केचिदिच्छन्ति तन्न युक्तिक्षमम्, यतोऽपर्याप्तावस्थायां तथाविधशुद्ध्यभावात्तस्यानुत्पत्तेः –

अणुबंधोदयमाउगबंधं कालं च सासणो कुणइ ।
उवसमसम्मद्दिट्ठी चउण्हमिक्कंपि नो कुणइ ।। [ ]

इति वचनात् पारभविकस्याप्यघटनादिति, मिथ्यात्वे तु सर्वेऽपि १४ । संज्ञिद्वारे संज्ञिनि संज्ञिद्विकमसंज्ञिनि संज्ञिद्विकरहिता द्वादश १४ । आहारकद्वार आहारकेषु सर्वे, अनाहारके तु सप्तापर्याप्ताः, संज्ञिपर्याप्तकश्च १४ । इति मार्गितानि गत्यादिषु जीवस्थानानि ।

सम्प्रति गुणस्थानानि मृग्यन्ते-तत्र गतिद्वारे देवनारकयोराद्यानि चत्वारि ४, तिर्यक्षु पञ्च ५, मनुष्येषु चतुर्दशापि ४ । इन्द्रियद्वार एकेन्द्रियविकलेन्द्रियेष्वाद्ये द्वे २, पञ्चेन्द्रियेषु चतुर्दश १४। कायद्वारे पृथिव्युदकवनस्पतिष्वाद्ये द्वे २, तेजोवायुषु प्रथममेव १, त्रसकाये चतुर्दश १४, योगद्वारे सामान्येन त्रयोदश १३, चरमगुणस्थानं त्वयोगिन एवमुत्तरत्रापि भावनीयम्। वेदद्वारे नव ९। कषायद्वारे कषायत्रये नव ९, लोभे तु दश १० । ज्ञानद्वारे मतिश्रुतावधिष्वविरतादीनि नव ९, मनःपर्यवे तु प्रमत्तादीनि सप्त ७, केवले चरमे द्वे २, अज्ञानत्रिके त्वाद्ये द्वे २, मिश्रदृष्टेरप्यज्ञानवादिनां तु मते त्रीणि ३, सास्वादनसम्यग्दृष्टेस्त्वनन्तानुबन्धिकषायैरतिदूषितत्वादज्ञानमेव।

१. संज्ञिद्विकं T,B,C

संयमद्वारे सामायिकच्छेदोपस्थापनीययोः प्रमत्तादीनि चत्वारि ४, परिहारविशुद्धिके प्रमत्ताप्रमत्ते २, देशविरतसूक्ष्मसम्परायययोः स्वं स्वम् १, यथाख्याते चरमाण्यसंयमे त्वाद्यानि चत्वारि ४। दर्शनद्वारे चक्षुरचक्षुर्दर्शनयोराद्यानि द्वादश १२, अवधिदर्शने त्वविरताद्यानि नव ९, केवलदर्शने चरमद्विकम् २, लेश्याद्वारे कृष्णनीलकापोतलेश्यास्वाद्यानि षट् ६, तैजसीपद्मयोः सप्त ७, शुक्लायां त्रयोदश १३, भव्यद्वारे भव्येषु सर्वाणि १४, अभव्येषु प्रथममेव १ । सम्यक्त्वद्वारे क्षायोपशमिके चत्वार्यविरतादीनि ४, क्षायिके त्वेकादश ११, औपशमिके पुनरष्टौ ८, सास्वादनमिश्रमिथ्यात्वेषु स्वं स्वं १ । संज्ञिद्वारे संज्ञिषु चतुर्दश १४, संज्ञित्वं च सयोगिनो द्रव्यमनःप्रतीत्यायोगिनस्तु पूर्वावस्थामसंज्ञिषु मिथ्यात्वसास्वादनौ २ । आहारकद्वार आहारकेष्वाद्यानि त्रयोदश १३, अनाहारकेषु मिथ्यात्वसास्वादनाविरतसयोग्ययोग्याख्यानि पञ्चेति ५ । मार्गितानि गुणस्थानकानि ।

सम्प्रति योगानामवसरस्तत्र तावद्येषु पदेषु पञ्चदशापि येषु च त्रयोदशयोगाः सम्भवन्ति तानि लाघवार्थं कथ्यन्ते, तथाहि– मनुजगति-१ पञ्चेन्द्रिय-२ त्रसकाय-३ काययोग-४ पुं-५ नपुंसकवेद-६ कषाय-१० मति-११ श्रुता-१२ वध्य-१३ चक्षु-१४ रवधिदर्शन-१५ लेश्याषट्क-२१ भव्य-२२ क्षायोपशमिक-२३ क्षायिकसम्यक्त्व-२४ संज्ञि-२५ लक्षणपञ्चविंशतिस्थानेषु पञ्चदशापि । तिर्यग्गति-१ स्त्रीवेदा-२ ज्ञानत्रिका-५ संयमा-६ भव्यौ-७ पशमिकसम्यक्त्व-८ सास्वादन-९ मिथ्यात्वे-१० ष्वाहारकतन्मिश्रवर्जितास्त्रयोदश, मनो-११ वाग्योग-१२ मनःपर्यव-१३ सामायिक-१४ च्छेदोपस्थापनीय-१५ चक्षुर्दर्शनेषु-१६ त्वौदारिकमिश्रकार्मणवर्जितास्त्रयोदशेति । सम्प्रत्यवशिष्टेषु कथ्यते । तत्र गतिद्वारे सुरनारकगत्योरौदारिकद्विकश्चाहारकद्विकवर्जिता एकादश एकादश ११। इन्द्रियद्वार एकेन्द्रियेष्वौदारिकद्विकवैक्रियद्विककार्मणाः ५, विकलेष्वौदारिकद्विककार्मणासत्या-मृषाभाषाः ४। कायद्वारे वायुकाय औदारिकद्विकवैक्रियद्विककार्मणाः ५ । शेषस्थावरकाये त एव वैक्रियद्विकवर्जाः ३। योग, वेद, कषाय द्वाराण्युक्तार्थानि । ज्ञानद्वारे केवलज्ञाने सत्या असत्यामृषावाग् २ मनः २ कार्मणौदारिकद्विकानि ७। संयमद्वारे परिहारविशुद्धिकसूक्ष्म-सम्पराययोर्वाक्चतुष्टयमनश्चतुष्टयौदारिकाः ९, यथाख्याते त एव कार्मणौदारिकमिश्रसहिताः ११, देशसंयमे तु पूर्वे नव वैक्रियद्विकान्विताः ११ । दर्शनद्वारे केवलदर्शने केवलज्ञानोक्ताः सप्त ७। लेश्या भव्यद्वारे तूक्तार्थे । सम्यक्त्वद्वारे मिश्रदृष्टौ वाक्चतुष्टयमनश्चतुष्टयौदारिक-वैक्रियाः १० । संज्ञिद्वारेऽसंज्ञिन्यौदारिकद्विकवैक्रियद्विककार्मणासत्यामृषाभाषाः ६ । आहारकद्वार

आहारकेषु कार्मणवर्जाश्चतुर्दश [सर्वे १५], अनाहारकेषु कार्मण एवेति १४। गत्यादिषु योगमार्गणा कृता ।

अथोपयोगा गवेष्यन्ते-तत्र गतिद्वारे सुरनारकतिर्यग्गतिषु मनःपर्यवकेवलद्विकरहिता नव ९, इह यत्र क्वचिज्ज्ञानदर्शने विवक्षिष्येते तत्र द्विकमित्यभिधास्यते मनुजगतौ द्वादशापि १२। इन्द्रियद्वार एकद्वित्रीन्द्रियेष्वचक्षुर्दर्शनमतिश्रुताज्ञाने च ३, चतुरिन्द्रियेषु चक्षुर्दर्शनं चतुर्थम् ४, पञ्चेन्द्रियेषु सर्वेऽपि १२। कायद्वारे स्थावरकायेष्वेकेन्द्रियेष्विव ३, त्रसकाये सर्वेऽपि १२। योगद्वारे सामान्येन सर्वेऽपि १२। एवं वेदद्वारेऽपि १२। कषायद्वारे चतुर्ष्वपि केवलद्विकहीना दश १०। ज्ञानद्वारे मतिश्रुतावधिमनःपर्यवेष्वाद्यानि चत्वारि ज्ञानानि त्रीणि च दर्शनानि ७, केवले केवलद्विकम् २, अज्ञानत्रिके त्वज्ञानत्रिकमाद्यदर्शनद्वयं च ५।

ननु पूर्वं विभङ्गिनोऽप्यवधिदर्शनं प्रतिष्ठितम्, तच्चेहाज्ञानत्रिके प्रथमदर्शनद्वयं प्रतिपादयतः कथं न विरुद्ध्यते ? सत्यम्, तत्सूत्राशयेन, एतत्पुनः कर्मग्रन्थाभिप्रायेणेति, अत्र च विभङ्गिनः सामान्याकारग्रहणमचक्षुर्दर्शनेनेति ।

संयमद्वारे सामायिकादिषु चतुर्ष्वाद्यचतुर्ज्ञानदर्शनत्रिकाणि ७, यथाख्याते तान्येव केवलद्विकयुतानि ९, देशसंयमे प्रथमज्ञानत्रयदर्शनत्रये ६, असंयमे मनःपर्यवकेवलद्विकवर्जा नव ९। दर्शनद्वारे चक्षुरचक्षुर्दर्शनयोः केवलद्विकरहिता दश १०, अवधिदर्शने प्रथमचतुर्ज्ञान-दर्शनत्रिकाणि ७, केवलदर्शने केवलद्विकम् २। लेश्याद्वारे पञ्चसु केवलद्विकरहिता दश १०, शुक्लायां तु सर्वेऽपि १२। भव्यद्वारे भव्येषु सर्वेऽपि १२, अभव्येष्वज्ञानत्रिकमाद्यदर्शनद्वयं च ५। सम्यक्त्वद्वारे क्षायोपशमिकौपशमिकयोराद्यचतुर्ज्ञानदर्शनत्रिकाणि ७, क्षायिके तान्येव सकेवलद्विकानि ९, सास्वादनमिथ्यात्वयोरज्ञानत्रयदर्शनद्वयलक्षणाः पञ्च ५, मिश्रे ज्ञानत्रय-दर्शनत्रयरूपाः षट् ६, केवलमज्ञानमिश्राः । संज्ञिद्वारे संज्ञिनि सर्वे, असंज्ञिन्याद्यमज्ञानद्वयं दर्शनद्वयं च ४, आहारकद्वार आहारकेषु सर्वे, अनाहारकेषु मनःपर्यवचक्षुर्दर्शनरहिता दशेति १०।

इह च योगद्वारे वाग्योगः कायं विना, मनोयोगश्च वाक्कायव्यतिरेकेण न सम्भवतीति तयोस्तदनुगतयोरेव जीवादिमार्गणा, कायस्तु वाङ्मनोभ्याम्, वाक् तु मनसा विनापि सम्भवतीति निश्चयनयमतेन तयोस्तद्विनाकृतयोर्जीवादयो मार्ग्यन्ते । तत्र काययोग आद्यानि चत्वारि जीवस्थानानि, द्वे गुणस्थानेऽज्ञानेऽचक्षुर्दर्शनं चेति त्रय उपयोगाः, औदारिकद्विकवैक्रिय-

द्विककार्मणाः पञ्च योगाः। मनोरहितवाग्योगे पर्याप्तापर्याप्तद्वित्रिचतुरिन्द्रियासंज्ञिनः ८ जीवाः, आद्यौ द्वौ गुणौ २, औदारिकद्विककार्मणाः सत्यामृषाभाषाः ४ स्वरूपा योगाः, आद्या अज्ञानद्वय-दर्शनद्वयरूपास्तूपयोगाः । मनोयोगे पर्याप्तापर्याप्तसंज्ञिनौ जीवौ चरमवर्जास्त्रयोदश गुणाः कार्मणौदारिकमिश्रवर्जास्त्रयोदश योगा द्वादशोपयोगा इति, निश्चयमतेन चापर्याप्तस्यापि वाङ्मनोयोगौ लभ्येत इति तयोस्तदभिधानमनवद्यमिति । यथास्थानं तु योगेषु या मार्गणा सा व्यवहाराभिप्रायेणेति कृतं प्रसङ्गेनेति जीवतत्त्वम्।।२३५।।

**** पञ्चसंग्रहे-२१ ****

गत्यादिस्थानोत्कीर्त्तनामाह –

गइइंदिए य काए जोगे वेए कसायलेसासु य ।
संजमदंसणनाणे भव्वसन्निसम्मआहारे ।।

गतीन्द्रिये च काये योगे वेदे कषायलेश्यासु च संयमदर्शनज्ञाने भव्यसंज्ञिसम्यगाहारे 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषसमासाद् द्वन्द्वैकत्वमित्येवंभूतलक्षणात् प्राकृतलक्षणानुसाराच्चोत्तरत्रापि द्रष्टव्यानि पदानि । पदार्थस्तु गतिद्वारं चतुर्व्विधम्, इन्द्रियद्वारं पञ्चधा, कायद्वारं द्विधा, योगवेदद्वारे प्रत्येकं त्रिधा, कषायद्वारं चतुर्द्धा, लेश्याद्वारं षोढा, संयमद्वारं च पञ्चधैकधा वा, दर्शनद्वारं चतुर्द्धा, ज्ञानद्वारमष्टधा, भव्यसंज्ञिसम्यग्दृष्ट्याहारकद्वाराणि सविपक्षाणि, तेषु जीवगुणस्थानानि मन्तव्यानीति वाक्यशेष इति गाथार्थः ।।२१।।

**** प्रवचनसारोद्धारे-१३०३ ****

इदानीं 'मग्गणचउदसगो'त्ति पञ्चविंशत्युत्तरद्विशततमं द्वारमाह –

गइइंदिए य काये जोए वेए कसायनाणेसुं ।
संजम-दंसण-लेसा भव-सम्मे-सन्नि-आहारे।।

गतिरिन्द्रियाणि काया योगा वेदा कषाया ज्ञानानि संयमो दर्शनानि लेश्या भव्याः सम्यक्त्वं संज्ञ्याहारक इति मूलभेदापेक्षया चतुर्दश मार्गणास्थानानि, मार्गणं–जीवादीनां पदार्थानामन्वेषणं मार्गणा तस्याः स्थानानि-आश्रया मार्गणास्थानानि, उत्तरभेदापेक्षया तु द्वाषष्टिः, तथाहि-सुरनरतिर्यग्नारकगतिभेदाद् **गतिश्चतुर्धा**, स्पर्शनरसनघ्राणचक्षुःश्रोत्रेन्द्रियभेदात् पञ्चे**न्द्रियाणि,** पृथिव्यप्तेजोवायुवनस्पतित्रसकायभेदात् **कायः** षोढा, मनोवचनकायाख्या **योगा**स्त्रयः, स्त्रीपुंनपुंसकस्वरूपा **वेदा**स्त्रयः, क्रोधमानमायालोभलक्षणाः **कषाया**श्चत्वारः, मतिश्रुतावधिमनःपर्यायकेवलभेदात् पञ्च **ज्ञानानि,** ज्ञानग्रहणेन चाज्ञानमपि तत्प्रति-पक्षभूतमुपलक्ष्यते, तच्च त्रिधा–मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानभेदात्, एवमष्टौ, सामायिकच्छेदोप-

स्थापनीयपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातभेदात् **संयमः** पञ्चधा, तत्प्रतिपक्षत्वाच्च देशसंयमोऽसंयमश्च गृह्यते, एवं सप्त, चक्षुरचक्षुरवधिकेवलभेदाच्चत्वारि **दर्शनानि,** कृष्णा नीला कापोती तैजसी पद्मा शुक्ला चेति षड् **लेश्याः, भव्य**स्तत्प्रतिपक्षत्वेन चाभव्य इति द्वयं, क्षायोपशमिकक्षायिकौपशमिकभेदात् **सम्यक्त्वं** त्रिधा, सम्यक्त्वग्रहणेन च तत्प्रतिपक्षभूतानि मिश्रसास्वादनमिथ्यात्वान्यपि गृह्यन्त एवं षट्, **संज्ञी** तत्प्रतिपक्षश्चासंज्ञीति द्वयम्, **आहारक**स्तत्प्रतिपक्षोऽनाहारक इति द्वयम्, सर्वमीलने च द्वाषष्टिरिति।।१३०३।।

चक्रे० : उक्तं सप्रपञ्चं जीवतत्त्वम्, सम्प्रत्यजीवतत्त्वमाहुः –

देव० : सप्रपञ्चं जीवतत्त्वमभिहितम्, सम्प्रत्यजीवतत्त्वस्यावसरस्तत्र जीवतत्त्वे जीवचतुर्दशक उक्त इह त्वजीवचतुर्दशकमाह –

धम्माधम्मागासा तियतियभेया तहेव अद्धा य ।
खंधा देसपएसा परमाणु अजीव चउदसहा।।२३६।।

चक्रे० : धर्म्माधर्माकाशानि धर्मास्तिकायाऽधर्मास्तिकायाऽऽकाशास्तिकायाः । धारयति गतिपरिणताञ्जीवपुद्गलांस्तत्स्वभावत्व इति धर्मः, अस्तयः प्रदेशास्तेषां कायः सङ्घातोऽस्तिकायो धर्मश्चासावस्तिकायश्च धर्मास्तिकायः । अधर्मास्तिकायस्तद्विपरीतः, आकाशास्तिकायः प्रतीतः । एते त्रयोपि **त्रित्रिभेदाः** । यथा धर्मास्तिकायो धर्मास्तिकायदेशो धर्मास्तिकायप्रदेश इति । एवमन्यावपि । तदेवमेते नव । **तथैवाऽद्धा च** कालः स चैकविध एव वर्तमानसमयलक्षणोऽतीतानागतयोर्विनष्टाऽनुत्पन्नत्वेनाऽसत्त्वात् । **स्कन्धाः** संहतिविशेषभाजः पुद्गलाः, **देशाः** स्कन्धभागाः, **प्रदेशाः** स्कन्धानामेव सूक्ष्मतमभागाः, **परमाणवो** निरंशाः स्कन्धरूपत्वाऽपरिणताः । एव**मजीवाश्चतुर्दशधा**।।२३६।।

देव० : पदेऽपि पदसमुदायावगमाद्धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायाः पुंस्त्वं च प्राकृत्वात्। तत्र धारयति गतिपरिणताञ्जीवपुद्गलांस्तत्स्वभाव[१] इति धर्मः । अस्तयश्चेह प्रदेशास्तेषां चीयत इति कायः सङ्घातोऽस्तिकायः । ततो **धर्म**श्चासावस्तिकायश्चेति धर्मास्तिकायः सकलदेशप्रदेशानुगसमानपरिणतिमद्विशिष्टं द्रव्यम्, एवमुत्तरत्रापि । न धारयति गतिपरिणतावपि जीवपुद्गलांस्तत्स्वभावतायां नावस्थापयति स्थित्युपष्टम्भकत्वात्तस्येत्य**धर्मः** । आङिति मर्यादया स्वस्वभावापरित्यागरूप[२]या काशन्ते स्वरूपेणैव प्रतिभासन्तेऽस्मिन् पदार्था **इत्याकाशः** । यदा त्वभिविधावाङ् तदा आङिति सर्वभावाभिव्याप्त्या काशत इत्याकाशः । एते किमित्याह- त्रयः - परिमाणमस्येति त्रिकस्ततो वीप्सायां द्विर्वचने **त्रिकत्रिको भेदो** येषां ते तथा, एकैकस्त्रिभेद

१. स्वभावतायामिति A,B,C २. रूपतया T,B,C

इत्यर्थः । तथाहि – धर्मास्तिकायो धर्मास्तिकायदेशो धर्मास्तिकायप्रदेशश्च, एवमुत्तरत्रापि । एवमेतेन च **तथैव** तेनैवाजीवत्वप्रकारेण**द्धा च** कालोऽयं त्वेकविध एव वर्तमानसमयलक्षणो ये पुनरतीतानागतसमयास्तेषां विनष्टानुत्पन्नत्वेनासत्त्वाद्, आवलिकादयस्तु पूर्वसमय-निरोधेनैवोत्तरसमयसद्भाव इति तत्त्वतः [१]समुदयसमुत्पाद्यसम्भवेन व्यवहारार्थमेव कल्पिताः । तथा स्कन्दन्ति शुष्यन्ति [२]धीयन्ते च पोष्यन्ते च पुद्गलानां विचटनेन चटनेन चेति **स्कन्धाः** संहतिविशेषभाजः पुद्गलाः । दिश्यन्ते प्रदेशापेक्षयाऽसमानपरिणतिरूपत्वेऽपि देशापेक्षां समानपरिणतिमाश्रित्य विशिष्टरुपतयोपदर्श्यन्त इति **देशाः** स्कन्धभागाः, प्रकर्षेण सौक्ष्म्यातिशयलक्षणेन दिश्यन्त इति **प्रदेशाः** । स्कन्धानामेव निरंशाभागाः परमास्तदन्यसूक्ष्मतरासम्भवात्, प्रकर्षवन्तस्ते च तेऽणवश्च **परमाणवः** । स्कन्धरूपत्वापरिणतनिर्विभागद्रव्यरूपाः, एव**मजीवाश्चतुर्दशधा** भवन्तीति गाथार्थः ।।२३६।।

* *नवतत्त्वप्रकरणे*-६ *

धम्माधम्मागासा तियतियभेया तहेव अद्धा य ।
खंधा देसपएसा परमाणु अजीव चउदसहा।।

धर्मश्चाधर्मश्चाकाशश्च **धर्माधर्माकाशास्ते** कथम्भूताः ? **त्रिकं त्रिकं भेदानां** येषां ते त्रिकत्रिकभेदाः । अयमत्र भावार्थः–सूचनात्सूत्रमितिन्यायाद्धर्मादिशब्दैर्धर्म्मास्तिकायादयोऽभिगृह्यन्ते ते च त्रिकत्रिकभेदास्ततश्च धर्म्मास्तिकायो धर्मास्तिकायदेशो धर्मास्तिकायप्रदेशः, एवमधर्मास्तिकायाकाशास्तिकाययोरपि वाच्यम् । इत्थं प्रत्येकं त्रिभेदतेति । एते च सङ्कलिता नव, **तथैवाद्धा च**ैवशब्दस्य भिन्नक्रमत्वात्, तथाद्धैव च काल एव च कोऽर्थः ? न केवलं धर्मादयो नवाऽजीवास्तथा काल एव चैवकारेण कालस्यैकरूपता नियम्यते कालद्रव्यमेकमेवेत्यर्थः। **स्कन्धा** द्विप्रदेशिकादयः, देशाश्च प्रदेशाश्च **देशप्रदेशा**स्तत्र देशाः स्कन्धानामेव सविभागाः, प्रदेशाश्च निर्विभागभागाः, **परमाणवः** स्कन्धपरिणामरहिताः, पुद्गला एते चत्वारः पूर्वैर्दशभिः सह चतुर्दशेत्यत एवाह–**अजीवाश्चतुर्दशधे**ति भावितार्थमेव । इति सूत्रगाथार्थः ।।६।।

* *प्रवचनसारोद्धारे*-१३०१ *

इदानीं 'अजीव चउदसगो'त्ति त्रयोविंशत्युत्तरद्विशततमं द्वारमाह –

धम्माऽधम्माऽऽगासा तियतियभेया तहेव अद्धा य।
खंधा देसपएसा परमाणु अजीव चउदसहा ।।

इहाजीवा द्विविधाः–रूपिणोऽरूपिणश्च, रूपमेषामस्तीति रूपिणः, रूपग्रहणं गन्धादीनामुपलक्षणम्,

१. समुदयमित्याद्यसम्भवेन T,B,C २. चीयन्ते T,B,C

तद्व्यतिरेकेण तस्यासम्भवादथवा रूपं नाम स्पर्शरूपादिसंमूर्च्छनात्मिका मूर्त्तिस्तदेषामस्तीति रूपिणः-पुद्गलाः, तेषामेव रूपादिमत्त्वात्, रूपव्यतिरेकिणोऽरूपिणोधर्मास्तिकायादयः, तत्र रूपिणश्चतुर्धा, अरूपिणश्च दशधा, बहुवक्तव्यत्वाच्च प्रथममरूपिण आह-**धर्मा**स्तिका**याधर्मा**स्तिका**याकाशा**स्तिकायाः-पूर्वोक्तस्वरूपास्त्रयोऽपि प्रत्येकं **त्रिभेदाः,** तद्यथा-धर्मास्तिकायद्रव्यं धर्मास्तिकायदेशा धर्मास्तिकायप्रदेशाः, तत्र धर्मास्तिकायद्रव्यरूपं सकलदेशप्रदेशात्मकाविभागधर्मानुगतसमानपरिणामवदवयविद्रव्यं धर्मास्तिकायद्रव्यम्, तथा तस्यैव धर्मास्तिकायद्रव्यस्य देशाः-बुद्धिपरिकल्पिता द्व्यादिप्रदेशात्मका विभागा धर्मास्तिकायदेशाः, तथा धर्मास्तिकायस्य प्रकृष्टा देशा-निर्विभागा भागा धर्मास्तिकायप्रदेशाः, ते चासङ्ख्येया लोकाकाशप्रदेशप्रमाणत्वात्तेषाम्, एवमधर्मास्तिकायाकाशास्तिकाययोरपि प्रत्येकं त्रिभेदता वाच्या, नवरमाकाशास्तिकायप्रदेशा अनन्ता द्रष्टव्याः, अलोकस्यानन्तत्वात्, दशम**श्चाद्धा**कालः, अस्य च वर्तमानसमयरूपस्यैव परमार्थसत्त्वादेशकल्पनाविरहः । तथा **स्कन्धा देशाः प्रदेशाः परमाणव**श्चेति चतुर्विधा रूप्यजीवाः, तत्र स्कन्दन्ति-शुष्यन्ति धीयन्ते च-पुष्यन्ति विचटनेन संघातेन चेति स्कन्धाः-अनन्तानन्तपरमाणुप्रचयरूपा मांसचक्षुर्ग्राह्याः कुम्भस्तम्भादयस्तदग्राह्या अचित्तमहास्कन्धादयोऽपि, पृषोदरादित्वाच्च रूपनिष्पत्तिः, अत्र बहुवचनं पुद्गलस्कन्धानामानन्त्यख्यापनार्थम्, देशाः-स्कन्धानामेव स्कन्धत्वपरिणाममजहतां बुद्धिपरिकल्पिता द्व्यादिप्रदेशात्मका विभागाः, अत्रापि बहुवचनमनन्तप्रादेशिकेषु तथाविधेषु स्कन्धेषु देशानन्तत्वसंभावनार्थम्, प्रदेशास्तु स्कन्धानां स्कन्धत्वपरिणामपरिणतानां बुद्धिपरिकल्पिताः प्रकृष्टा देशा निर्विभागा भागा इत्यर्थः, अत्रापि बहुवचनं प्रदेशानन्तत्वसंभावनार्थम्, परमाश्च तेऽणवश्च परमाणवो निर्विभागद्रव्यरूपाः । ननु प्रदेशपरमाण्वोः कः प्रतिविशेषः ?, उभयोरपि निर्विभागरूपत्वात्, उच्यते, स्कन्धप्रतिबद्धा निर्विभागाः प्रदेशाः, ये तु स्कन्धत्वपरिणामरहिता विशकलिता एकाकिन एवास्मिन् लोके वर्तन्ते ते परमाणवः, तदेव**मजीवा** जीवव्यतिरिक्ता**श्चतुर्दशविधा** भवन्ति ।।१३०१।।

चक्रे० : मूलभेदैः पुनरमी कति स्युरित्याहुः -

देव० : एवमेते धर्मास्तिकायादीनां देशादिभेदैश्चतुर्दशधामौलभेदैः पुनरमी कति स्युरित्याह -

धम्माधम्मापुग्गल नह कालो पंच हुंति अजीवा।
चलणसहावो धम्मो थिरसंठाणो य[1] अधम्मो।।२३७।।

चक्रे० : पूर्वार्द्धं सुगमम्, नवरं पुद्गलं विना चत्वारोऽम्यमूर्त्ता निष्क्रियाश्च । **धर्माऽधर्मौ** चैकजीवप्रदेशप्रमिताऽसङ्ख्यप्रदेशौ लोकव्यापिनौ । आकाशमनन्तप्रदेशं लोकाऽलोकव्यापि । **पुद्गलाः** पुनरनन्ता लोकवर्तिन एव । **कालस्तु** तत्त्वतो वर्तमानरूप एव, सूर्यगतिकृतस्तु व्यावहारिकः समयावलिकामुहूर्त्तादिर्मनुष्यक्षेत्र एव । पश्चार्द्धेनैतल्लक्षणम्, **चलनस्वभावो**

१. होइ अधम्मो P,K

गतिलक्षणो **धर्मो** धर्मास्तिकायः । **स्थिरं संस्थानं** – पदार्थानामवस्थानं यस्मादसा- **वधर्मास्तिकायः** स्थितिलक्षण इत्यर्थः, एतौ हि मनुष्यादिप्रयत्नादप्रयत्नाद् वा पदार्थानां लोके गतिस्थितिहेतू, अलोके त्वेतयोरभावात् सेन्द्रदेवप्रयत्नेनापि गतिस्थिती न स्यातामित्यनयोः सामान्येनाऽस्तित्वस्थापनम्, विशेषश्च गन्धहस्त्यादिभ्यो ज्ञेयः।।२३७।।

देव० : पूर्वार्धं सुगमम्, नवरममी अचिद्रूपा अकर्त्तारः, पुद्गलमन्तरेणामूर्त्ता निष्क्रिया एकैकद्रव्यरूपाश्च, **धर्माधमौ** चैकजीवप्रदेशप्रमितासङ्ख्यप्रदेशौ लोकव्यापिनौ, आकाशमनन्त-प्रदेशं लोकालोकव्यापि, **पुद्गलाः** पुनरनन्ता अनियतप्रदेशा लोक एव वर्त्तन्ते **काल**स्त्वनन्त-समयात्मको मनुष्यक्षेत्र एव, यदुक्तम् –

समयावलिकापक्षमासर्त्वयनसंज्ञिनः[१] ।
नृलोक एव कालस्य वृत्तिर्नान्यत्र कुत्रचित् ।। [ ]इति ।

अथैते किंलक्षणा इत्याह-चल्यते गम्यतेऽनेनेति **चलनं** गमनक्रिया हेतुरेवंविधः **स्वभावो** यस्य स तथा गतिलक्षण इत्यर्थो **धर्मो** धर्मास्तिकायः । तथा[२] स्थिरत्वस्य संस्थानं व्यवस्था यस्मादसौ **स्थिरसंस्थानो** लुप्तभावप्रत्ययस्य व्यधिकरणो बहुव्रीहिः, स्थितिलक्षण इत्यर्थोऽ**धर्मास्तिकायः,** स हि स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्यं प्रत्यपेक्षा-कारणत्वेन व्याप्रियत इति स्थित्यैव लक्ष्यत[३] इति गाथार्थः।।२३७।।

१. संज्ञिता T,B २. न तु धर्मास्तिकाय एव सिद्ध्यति किमिदं पुनस्तल्लक्षणप्रतिपादनम्, न खलु गगनकमलपरिमलोपवर्णनमुपपत्तिमावहति, तदिदं प्रलापमात्रम्, यतो यद्यच्छुद्धपदवाच्यं तत्तदस्ति यथा स्तम्भादि, शुद्धपदवाच्यश्च धर्मनामाऽस्तिकायो न चायमसिद्धो हेतुर्धर्म इत्यस्य तद्वाचकस्यासमस्तपदत्वेन तथाभिधेयार्थे बाधक-प्रमाणाभावात् । प्रमाणान्तरबाधितविषयत्वाख्यदोषरहितत्वेन च सिद्धत्वात् । न च खपुष्पादिषु संकेतितैः खादिशुद्धपदैरनेकान्तो, वृद्धपरम्परायातसंकेतविषयाणामेव शुद्धपदानां वाच्यत्वस्येह हेतुत्वेनेष्टत्वान्निपुणेन च प्रतिपत्रा भाव्यमन्यथा धूमादेरपि गोपालघटिकादिष्वन्यथाभावदर्शनादेषः प्रसङ्गो दुर्निवारः स्यादिति T,B,C ३. अनेनाप्यनुमानमेवसूचितम् । तच्चेदम् - यद्यत्कार्यं तत्तदपेक्षाकारणवद् यथा घटादिकार्यम्, या चासौ स्थितिर्यच्च तदपेक्षाकारणं तदधर्मास्तिकाय इति । अत्र च नैयायिकादिः सौगतो वा वदेत् नास्त्यधर्मादिकायोऽनुपलक्ष्यमानत्वात् खरविषाणवत्, तत्र यदि नैयायिकादिस्तदासौ वाच्यः कथं भवतोऽपि दिगादयः सन्ति, अथ दिगादिप्रत्ययलक्षणकार्यदर्शनाद् भवति हि कार्यात् कारणमानम्, एवं सति स्थितिलक्षणकार्यदर्शनादयमप्यस्तीति किं न गम्यते, अथ तत्र दिगादि-प्रत्ययस्यान्यतोऽसम्भवात् तत्कारणानि दिगादीन्यनुमिमीमहे, सिद्धं नः समीहितमाकाशादीनामवगाहनादि स्वस्वकार्य-व्यावृतत्वेन ततोऽसम्भवादधर्मास्तिकायादेव स्थितिः । अथासौ न कदाचिद् दृष्टः, एतद्दिगादिष्वपि समानम् । अथ सौगतः सोऽप्येवं वाच्यो यथा भवतः कथं बाह्यार्थे संसिद्धिर्नहि साकारज्ञानवादिनः कदाचिदप्यसौ प्रत्यक्षगोचरः, अथाकार-संवेदनात्तत्कारणमर्थः परिकल्प्यते स्थितिदर्शनेऽपि किं न तत्कारणस्याधर्मास्तिकायस्य निश्चयः । अथ न कदाचिदसौ तत्कारणत्वेनेक्षितो ननु बाह्यार्थेऽपि समानमेतन्नहि सोऽपि तदाकारकारितया कदाचिदवलोकितः। अथ मनस्कारस्य

चक्रे० : तथा –

देव० : तथा –

अवगाहो आगासो पुग्गलजीवाण पुग्गला चउहा।
खंधा-देस-पएसा परमाणु चेव नायव्वा।।२३८।।

चक्रे० : अवगाहोऽवकाशः पुद्गलानां जीवानां च यत्र तदाकाशम् । सूत्रे पुंनिर्देशः प्राकृतत्वात् । कालपुद्गलयोश्चाऽत्र सुज्ञानत्वाल्लक्षणं नोक्तं तच्चेदम् - शीताऽऽतपवर्षादिनैयत्यहेतुः कालः । वर्णगन्धादिलक्षणाश्च **पुद्गलाः** । ते च **चतुर्द्धा स्कन्धाः, देशाः, प्रदेशाः, परमाणवश्च ज्ञातव्याः** । ननु स्कन्धादिभेदाः प्रागुक्ता एव ? सत्यम्, किन्तु न पुद्गलभेदत्वेनेति।।२३८।।

देव० : अवगाहन्तेऽवकाशं लभन्तेऽस्मिन्नित्य[१]**वगाह आकाशः,** केषामवगाहः स इत्याह– **पुद्गलजीवानाम्,** अनेनावगाहकारणत्वमस्याभिहितम्, [२]इह च कालपुद्गलयोः सुज्ञानत्वाल्लक्षणं

चिद्रूपतायामेव व्यापारो नतु नियताकारत्वेऽतः सूत्रार्थः [बाह्यार्थः] कारणं कल्पते । एवं तर्हि जीवपुद्गलौ परिणाममात्र एव कारणं स्थितिपरिणतौ पुनरधर्मास्तिकायोऽपेक्षाकारणत्वेन व्याप्रियत इत्यनियमेन स्थितिकारणः स्यात् नन्वेवमर्थोऽपि किं न सन्निहित एव स्वाकारमर्पयति । अथ चक्षुरादि व्यापारमयमपेक्षते, अधर्मास्तिकायोऽपि तर्हि स्वपरगतौ विश्रसा प्रयोगावपेक्षत इति नानयोर्विशेषमुत्पश्याम इति गाथार्थः T,B,C

१. अवगाहमाकाशं पुंस्त्वमुभयत्र प्राकृतवशात्केषामवगाहं तदित्याह T,B,C २. नचास्य तत्कारणत्वमसिद्धम् । यतो यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं यथा चक्षुराद्यन्वयव्यतिरेकानुविधायिरूपादिविज्ञानम्, आकाशान्वयव्यतिरेकानुविधायी चावगाहस्तथाहि-शुषिरमाकाशं तत्रैव चावगाहो नतु तद्विपरीते पुद्गलादौ न चैवमलोकाकाशेऽपि स्यादवगाहः, तत्र हि धर्मास्तिकायस्य जीवादीनां चासत्त्वेनावगाहितुरेवाभावात्कस्यासौ भविष्यति । नत्वेवमपि न तत् सिद्धिर्हेतोरसिद्धत्वात् तदसिद्धिश्चान्वयाभावात् सति हि तस्मिन्नवगाहमत्वस्य न च तत्सिद्धिरस्ति । ततो व्यतिरेकस्याप्यसिद्धिरिति । अथ भित्याद्यभाव एवाकाशं नत्वाकाशाभाव एव भित्यादय इति कथं न भवति, अथ तेषां प्रमाणप्रतीतत्वाद्, इहापि वियति विहग इत्यादि प्रतीत्यन्यथानुपपत्त्याऽनुमानतस्तत् सिद्धिरिति समानम् । न चेयं प्रतीतिरन्यथापि सम्भवतीति न ततस्तत्सिद्धिरिति युक्तमेवं हि भित्यादिप्रतीतेरेव भित्याद्यभावेऽपि भावकल्पनया तस्याप्यभावप्रसक्तिः, अथ तत्प्रतीतेः प्रामाण्यनिश्चय इति नान्यथा त्वकल्पना। एवं तर्हि वक्तव्यं कुतोऽस्याः प्रामाण्यनिश्चयः किं प्रमाणान्तरानुग्रहाद् बाधकप्रमाणाद्वा । यदि आद्यपक्षः किं तत्प्रमाणान्तरं य इहाबाधितप्रत्ययः स सर्वः प्रमाणं यथा सुखादि प्रत्ययोऽबाधितप्रत्ययाश्चामी भित्यादिप्रत्यया इत्यनुमानमिति चेद् यद्येवमिहापि यो य इह प्रत्ययः स स सालम्बनो यथेह कुण्डे दधीति प्रत्ययः, इह प्रत्ययश्चायमिह विहग इत्यनुमानमस्त्येव, अथैवमाधारमात्रस्यैव सिद्धिर्नत्वाकाशस्य, ननु यदैवाधारमात्रं तदैवाकाशमिति ब्रूमः, अथ बाधकाभावाद्, ननु बाधकमपि विपरीतप्रत्ययोत्पत्तिरूपं तदभावश्चोभयत्र समानमिति न भित्याद्यभाव एवाकाशम् । किं तु शुषिररूपमन्यदेव ततस्तद्भावभावित्वादवगाहस्य कथं न तत्कारणत्वसिद्धिरिति T,C

नाभिहितम्, तत्पुनर्वर्तनालक्षणः कालः, वर्त्तन्ते तेन तेन रूपेण भावा भवन्ति तान् प्रति प्रयोजकत्वं वर्त्तना, तथाहि - यदमी शीतातपवर्षादय ऋतुविभागेन भवन्ति, तदवश्यममीषां नैयत्यहेतुना केनापि भाव्यम्, स च कालः । शब्दान्धकारोद्योतच्छायातपवर्णगन्धरसस्पर्शादि-लक्षणाश्चः पुद्गलाः, शब्दस्य च पौद्गलिकत्वं मूर्त्तत्वान्मूर्त्तता च प्रतिघातविधायित्वादिति, उक्तं हि-

प्रतिघातविधायित्वाल्लोष्टवन्मूर्त्तता ध्वनेः ।
द्वारवातानुपाताच्च धूमवच्च परिस्फुटम् ।। [ ]

अन्धकारादीनां तु पौद्गलिकत्वं चक्षुर्विज्ञानविषयत्वादित्यलमतिविस्तरेण । अथ पुद्गलाः कतिभेदा इत्याह-**पुद्गलाश्चतुर्द्धा स्कन्धा देशाः प्रदेशाः परमाणवश्चैव** ज्ञातव्याः । ननु स्कन्धादिभेदाः पूर्वमुक्ता एव, सत्यम्, किन्तु न पुद्गलत्वेनेति गाथार्थः।।२३८।।

**** नवतत्त्वप्रकरणे-९, १० ****

अथ प्रकारान्तरेण जीवस्य पञ्चैव भेदान् धर्मास्तिकायादीनां च लक्षणानि गाथाद्वयेनाह –

धम्माधम्मापुग्गल नह कालो पंच हुंति अजीवा ।
चलणसहावो धम्मो थिरसंठाणो अहम्मो य ।।
अवगाहो आगासं पुग्गलजीवाण पुग्गला चउहा ।
खंधा देसपएसा परमाणु चेव नायव्वा ।।

अजीवा पञ्च भवन्ति, के त इत्याह– १-धर्मास्तिकायः २-अधर्मास्तिकायः ३-पुद्गलास्तिकायः ४-**'नह'** इति नभ आकाशं तेनाकाशास्तिकायः ५-**कालः** ।

अथ लक्षणान्याह–

१-**धर्मो** धर्मास्तिकाय**श्चलनस्वभावो** यस्य बलेन जीवाजीवौ चलतः । २-**अधर्मः**-अधर्मास्तिकायः **स्थिरसंस्थानः,** कोऽर्थः ? यस्य बलेन जीवाजीवौ स्थिरसंस्थानेन निश्चलतया तिष्ठतः।।९।।

३-**'आगासं'** अवकाशः, कोऽर्थः ? स्तम्भादौ यस्य बलेन कीलकः क्षिप्तः सन् प्रविशति तदाकाशं **पुद्गलानां जीवानां** चावकाशदायकम् । ते **पुद्गलाश्चतुर्धा** चतुःप्रकारा १-**स्कन्धाः** २-**देशाः** ३-**प्रदेशाः** ४-**परमाणवश्च** ।

ननु प्रदेशपरमाण्वोः परस्परं को भेदः ? उच्यते–प्रदेशोऽपि निर्विभागः परमाणुरपि निर्विभागः, परं स्कन्धलग्नः प्रदेशः, स्कन्धात् पृथग्भूतः परमाणुरिति वृद्धाः।।१०।।

चक्रे० : अथ कालस्वरूपमाहुः –

देव० : अथ कालस्वरूपमाह –

समयावलियमुहुत्ता दिवसा[१] पक्खा य मास वरिसा य।
भणिओ पलियासागर ओसप्पिणिसप्पिणी कालो।।२३९।।

चक्रे० : समयाः सर्वसूक्ष्माः कालविशेषाः, श्रुतोक्तपट्टशाटिकादृष्टान्ताज्ज्ञेयाः । **आवलिका** असङ्ख्येयसमयसमूहरूपाः। **मुहूर्त्तदिवसपक्षमासवर्षाणि** प्रतीतानि । **'पलिय'**त्ति पल्योपमानि, तत्प्रमाणं चेदम् –

योजनं व्युच्छ्रितः पल्यस्तथा योजनविस्तृतः ।
सप्तरात्रप्ररूढानां केशाग्राणां स पूरितः ।।
ततो वर्षशते पूर्ण एकैकं केशमुद्धरेत् ।
क्षीयते येन कालेन तत्पल्योपममुच्यते।। [ ]

पल्योपमदशकोटीकोट्यात्मकानि **सागरोपमाणि । अवसर्पिण्युत्सर्पिण्यश्च** पूर्वोक्तमानाः। **कालो भणित** इति सम्बन्धः।।२३९।।

देव० : समयाः परमनिकृष्टाः कालविशेषास्ते च प्रवचनप्रतिपादितपट्टशाटिकापाटन-दृष्टान्तादवसेयाः । **आवलिका** असङ्ख्येयसमयसमुदयलक्षणाः, **मुहूर्त्ता** द्विघटिकाप्रमाणाः, **दिवसाश्च**तुष्प्रहरात्मकाः, **पक्षाः** पञ्चदशाहोरात्रमानाश्चः समुच्चये, **मासास्त**द्द्विगुणा **वर्षाणि** द्वादशमासानि, **'पलिय'**त्ति उत्तरपदलोपात् पल्योपमानि, एवं सागरोपमाण्यपि तत्र पल्योपमप्रमाणम् —

योजनविस्तृतः पल्यस्तथा योजनमुच्छ्रितः[२] ।
सप्तरात्रप्ररूढानां केशाग्राणां स पूरितः ।।
ततो वर्षशते पूर्ण एकैकं केशमुद्धरेत् ।
क्षीयते येन कालेन तत्पल्योपममुच्यते ।। [ ]

१. दियहा A,T,C २. योजनविस्तृतः T,B,C

पल्योपमदशकोटीकोट्यात्मकानि **सागरोपमाणि, अवसर्पिण्युत्सर्पिण्यश्च** पूर्वोक्तमानाः, किमित्याह—**कालो भणित** इति सम्बन्धः । इह चानुक्ता अपि प्राणस्तोकलवादयः[१] कालविशेषाः स्वयं ज्ञेया उपलक्षणत्वात् सूत्रस्येति गाथार्थः[२]।।२३९।।

** आवश्यकनिर्युक्तौ-६६३ **

अद्धाकालद्वारावयवार्थं व्याचिख्यासुराह –

समयावलिय मुहुत्ता दिवसमहोरत्त पक्ख मासा य ।
संवच्छर युग पलिया सागर ओसप्पि परियट्टा ।।

तत्र परमनिकृष्टः कालः **समयो**ऽभिधीयते, स च प्रवचनप्रतिपादितपट्टशाटिकापाटनदृष्टान्तादवसेयः, **आवलिका** असङ्ख्येयसमयसमुदायलक्षणा, द्विघटिको **मुहूर्त्तः, दिवस**श्चतुष्प्रहरात्मकः, यद्वा आकाशखण्डमादित्येन स्वप्रभाभिर्व्याप्तं तद्दिवसं इत्युच्यते, शेषं निशेति, **अहोरात्रम**ष्टप्रहरात्मकमहर्निशमित्यर्थः, **पक्षः** पञ्चदशाहोरात्रात्मकः, **मास**स्तद्द्विगुणः, **चः** समुच्चये, **संवत्सरो** द्वादशमासात्मकः, **युगं** पञ्चसंवत्सरम्, असङ्ख्येययुगात्मकं पलितमिति उत्तरपदलोपाद्, इत्थं सागरोपममपि, तत्र पल्योपमदशकोटीकोट्यात्मकं **सागरमा**ख्यायते, **उत्सर्पिणी** सागरोपमदशकोटीकोट्यात्मिका, एवमवसर्प्पिण्यपि, **परावर्त्तो**ऽनन्तोत्सर्प्पिण्यवसर्प्पिण्यात्मकः, स च द्रव्यादिभेदभिन्नः प्रवचनादवसेय इति गाथार्थः ।।६६३।।

** विशेषावश्यकभाष्ये-२०३६ **

के पुनस्ते समयादयोऽद्धा कालभेदाः ? इत्याह निर्युक्तिकारः –

समया-ऽऽवलि मुहुत्ता दिवसमहोरत्त पक्ख मासा य ।
संवच्छर युग पलिया सागर ओसप्पि पलियट्टा ।।

इह निर्विभागः परमसूक्ष्मकालांशः **समयो** भण्यते । स च प्रवचनप्रतिपादितोत्पलपत्रशतपट्टसाटिकापाटनदृष्टान्ताद् विशेषतः समवसेयः । असंख्येयसमयसमुदयसमितिसमागमनिष्पन्ना **आवलिका** । द्विघटिको **मुहूर्त्तः** । दिवसकरप्रभाप्रकाशितनभःखण्डरूपः, चतुष्प्रहरात्मको वा **दिवसः** । सूर्यकिरणस्पृष्टव्योमखण्डरूपः, चतुष्प्रहरात्मको वा दिवसः, सूर्यकिरणास्पृष्टव्योमखण्डरूपा, चतुर्यामात्मिका वा रात्रिः, तदुभयं **त्वहोरात्रम्** । पञ्चदशाहोरात्राणि **पक्षः** । पक्षद्वयात्मको **मासः** । द्वादशमासनिर्वृत्तः **संवत्सरः** । पञ्चसंवत्सरप्रमाणं **युगम्** । असंख्येययुगमानं **पल्योपमम्** । पल्योपमदशकोटीकोटिघटितं **सागरोपमम्** । दशसागरोपमकोटीकोट्यात्मि**कोत्सर्पिणी** । एवमवसर्पिण्यपि । अनन्ताभिरुत्सर्पिण्यऽवसर्पिणीभिः पुद्गल**परावर्तः,** स च द्रव्यादिभेदभिन्नः प्रवचनादवसेयः। इति निर्युक्तिगाथार्थः ।।२०३६।।

---

१. उच्छ्वासप्राणस्तोकलवादयः T,B.C २. गाथार्थ इति जीवतत्त्वम् A,T,C

चक्रे० : उक्तमजीवतत्त्वं शेषाण्याहुः –

देव० : अवसितमजीवतत्त्वमथ शेषाण्याह –

सुग्गइमग्गो पुन्नं दुग्गइमग्गो य होइ पुण पावं।
कम्म सुहाऽसुह आसव संवरणं तस्स जो नियमो।।२४०।।

चक्रे० : पूर्वार्द्धं स्पष्टम्, पश्चार्द्धमुच्यते । **कर्म शुभाशुभं** सातासातावेदनीयादिकम् । सदसद्व्यापारैर्यन्नवमुपार्जयति जन्तुरितिशेषः स **आश्रवः** । **संवरणं** संवर इत्यर्थः, **तस्या**श्रवस्य **यो नियमो** निरोधः।।२४०।।

देव० : सुगतिः सुदेवत्वसुमानुषत्वलक्षणा तस्या मार्ग इव **मार्ग**स्तत्प्रापकत्वेन, किम् ? तत्**पुण्यं** शुभप्रकृतिरूपम्, **दुर्गति**र्नारकत्वतिर्यक्त्वकुदेवत्वकुमानुषत्वलक्षणा, तस्या **मार्गः**[१] पूर्ववत्, **च**कारः पुण्यपापयोरात्मनो बन्धनत्वं प्रति समत्वमाक्षिपति, तथा चोद्धुष्यते-पुण्यपापक्षयान्मोक्ष इति, **भवति पुनः पापं** तथा **कर्म** मनोवाक्कायव्यापारः, किंविशिष्टम् ? **शुभाशुभम्, आश्रव**ः शुभाशुभमनोवाक्कायव्यापारैर्हि जन्तूनां शुभाशुभकर्माण्याश्रवन्ति, तथा चोक्तम्–

मैत्र्यादिवासितं चेतः कर्म सूते शुभात्मकम् ।
कषायविषयाक्रान्तं वितनोत्यशुभं पुनः ।।
शुभार्जनाय निर्मिथ्यं श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेयमशुभार्जनहेतवे ।।
शरीरेण सुगुप्तेन शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तुघातकेनाशुभं पुनः ।।[योगशास्त्र-४/७५, ७६, ७७]इति।

संवरणं संवर इत्यर्थः, **तस्या**श्रवस्य **यो नियमो** नियन्त्रणं निरोध इत्यर्थः, स पुनर्द्वेधा, द्रव्यतो भावतश्च, तत्र ज्ञानावरणादिकर्मादाननिरोधो द्रव्यसंवरः, भवहेतुक्रियानिरोधस्तु भावसंवरः, स च शैलेश्यवस्थायामिति गाथार्थः।।२४०।।

---

१. मार्ग इव मार्गः T,B.C

चक्रे० : तथा –

देव० : तथा –

तवसंजमेहिं निज्जर पाणिवहाईहिं होइ [१]बंधोत्ति।
कम्माण सव्वविगमो मुक्खो जिणसासणे भणिओ।।२४१।।

चक्रे० : सुगमा, नवरं **तपःसंयमाभ्यां** संयमिनां सकामा कर्म**निर्जरा,** नारकतिर्यगादीनां तु शीतोष्णक्षुत्पिपासादिक्लेशैर्विपाकादपि कर्मनिर्जरणादिहानुक्ताऽप्यकामनिर्जराऽपि स्यात्।।२४१।।

देव० : तपःसंयमाभ्यां निर्जरा, इयमपि सकामाकामभेदाद् द्विधा, तत्र सकामा संयमिनां निर्जरणाभिप्रायेण तैस्तपःसंयमविधानाद्, अकामा तु नारकतिर्यगादिजन्तूनां तेषां कर्मनिर्जराभिप्रायविकलानामपि शीतोष्णक्षुत्पिपासादिक्लेशैर्विपाकादेव कर्मनिर्जरणादिह च यद्यपि 'अणुकंपाऽकामनिज्जर' इत्याद्यभिधानादकामनिर्जराया अपि सम्यक्त्वलाभहेतुत्वेनोपयोगित्वम्, तथापि प्राधान्यख्यापनार्थं सकामैवात्राभिहितेति । तथा **प्राणिवधादिभि**रादिशब्दान्मृषावादादत्तादानमैथुनपरिग्रहमिथ्यात्वकषायदुष्टयोगप्रमादै**र्भवति** बन्ध एतैश्चाशुभप्रकृतीनामेव **बन्धः**, सद्वेद्यादीनां तु देवपूजादिभिरिह च –

प्रकृतिस्थित्यनुभावप्रदेशा विधयोऽस्य तु ।
प्रकृतिस्तु स्वभावः स्याज्ज्ञानावृत्त्यादिरष्टधा ।।
निकर्षोत्कर्षतः कालानियमः कर्मणां स्थितिः ।
अनुभावो विपाकः स्यात् प्रदेशोंशप्रकल्पनम् ।। [ ]

तथायमपि सम्परायप्रत्ययेर्यापथप्रत्ययभेदाद् द्विधैव, तत्रोपशान्तमोहादर्वाक् सम्परायप्रत्ययः, परतः पुनरीर्यापथप्रत्ययोऽयोगिनोऽर्वागिह पुनः साम्परायिक एवोक्त, इतरस्य तु प्रकृतितः सद्वेद्यविषयत्वेन, स्थितितो द्विसामयिकत्वेन, अनुभागतो मन्दानुभावत्वेन, प्रदेशतोऽल्पप्रदेशत्वेन स्वल्पविषयत्वान्न विवक्षा, **इति**र्वाक्यसमाप्तौ, तथा **कर्मणां सर्वविगमः,** न तु देशविगमः, तस्याऽऽसंसारं प्रतिक्षणमेव सम्पद्यमानत्वा**न्मोक्षो जिनशासने भणितो**ऽनेन शासनान्तरेषु यदन्यथाऽन्यथा मोक्षभणनं तत्प्रत्याक्षिपतीति गाथार्थः।।२४१।।

---

१. बंधत्ति P, बंधुत्ति K

चक्रे० : उक्तानि तत्त्वानि, सम्प्रति तच्छ्रद्धाने सति सम्यक्त्वं भवतीत्याहुः –

देव० : एवं देवधर्ममार्गसाधुतत्त्वस्वतत्त्वं प्रपञ्चितम्, सम्प्रति यदुक्तमेतद्विषयं श्रद्धानं सम्यक्त्वं तद्विवरिषुराह[१] –

जीवाइनवपयत्थे जो जाणइ तस्स होइ सम्मत्तं।
भावेण सद्दहंते अयाणमाणेऽवि सम्मत्तं।।२४२।।

चक्रे० : जीवादिनवपदार्थान् यो जानाति, ज्ञानं च श्रद्धानं विना निष्फलमिति श्रद्धत्ते च **तस्य भवति सम्यक्त्वम्,** न पुनर्ज्ञानमात्रेणैव, तथा **भावेन** शुद्धेन परिणामेन **श्रद्दधति** - जिनोक्तमेव तत्त्वमिति मन्यमानेऽ**जानत्यपि सम्यक्त्वम्** । ननु पूर्वं देवादिविषयं श्रद्धानं सम्यक्त्वमुक्तम्, इह तु जीवादिविषयमिति विरुध्यते ? न, देवादीनां जीवादिष्वेवाऽन्तर्भावात् ।।२४२।।

देव० : जीवादिनवपदार्थान् यो जानाति, उत्तरार्धवर्त्तिनः श्रद्दधच्छब्दस्येहापि सम्बन्धादर्थवशाच्च षष्ट्यन्ततायां **तस्य** श्रद्दधत एव **भवति सम्यक्त्वम्,** यतोऽस्ति हि स कश्चिदात्मनः परिणामो येन सत्यपि जीवादिस्वरूपावबोधे कस्यचिदेव सम्यक्प्रतिपत्तिर्भवति, न पुनः सर्वस्य, यथा हि सत्यपि दर्शने कस्यचिच्छङ्कादि[२] जायते, अन्यस्त्वन्यथाभावमिति, तत्र कारणविशेषोऽनुमीयते, एवमिहापि, ततश्च जीवादिस्वरूपपरिज्ञानस्य सम्यग्भावहेतुरात्म-परिणामविशेषः सम्यक्त्वम्, न तु ज्ञानमेव, अत एव हि ज्ञानादावरणभेदो विषयभेदः कारणभेदः, ज्ञानकारणत्वं च सम्यक्त्वस्य श्रुतकेवलिनोक्तमिति । ननु पूर्वं देवादिविषयं श्रद्धानं सम्यक्त्व-मभिहितमिह तु जीवादिविषयमिति कथं न विरोधः ? न, देवादीनां जीवादिष्वेवान्तर्भावितत्वाद्, अथैतत्परिज्ञानविकलेषु का वार्त्तेत्याह **भावेनान्तः**करणेन **श्रद्दधति** जिनवचनमेव तत्त्वमिति प्रतिपद्यमानेऽ**जानत्यपि सम्यक्त्वम्,** तत्पुनर्द्रव्यसम्यक्त्वमेव, प्राच्यं तु भावसम्यक्त्वमुक्तं हि–

जिणवयणमेव तत्तं एत्थरुई होइ दव्वसम्मत्तं ।
जहभावा णाणसद्धा परिसुद्धं भावसम्मत्तं ।। [पञ्चवस्तु-१०६३]

यतः – सम्मं अन्ना य गुणे सुंदररयणम्मि होइ जा सद्धा ।
तत्तोऽणंतगुणा खलु विन्नायगुणम्मि बोधव्वा ।। [पञ्चवस्तु-१०६४]

इति गाथार्थः।।२४२।।

१. वुवुर्षुराह A,T,B,C, २. कस्यचिच्छखेश्चेतिमानं प्रतिपद्यते A कश्चिच्छखेश्चेतिमानं प्रतिपद्यते T,B,C

** नवतत्त्वप्रकरणे-५१ **

अथ नवतत्त्वानां परिज्ञाने फलमाह –

जीवाइनवपयत्थे जो जाणइ तस्स होइ सम्मत्तं ।
भावेण सद्दहंतो अयाणमाणेवि सम्मत्तं ।।

जीवादिनवपदार्थान् यो जानाति श्रद्दधाति च **तस्य सम्यक्त्वं भवत्यथ** च **भावेन** 'तमेव सच्चं नीसंकं जं जिणेहिं पवेईयं' इत्यादिरूपेण **श्रद्दधानो**ऽपि कोऽर्थः श्रद्धानं कुर्वति जीवादि नवपदार्थानर्थादि-कथने**नाजानन्नपि** जीवादिनवपदार्थज्ञानरहितेऽपि जीवे **सम्यक्त्वं** भवति ।।५१।।

चक्रे० : सम्यक्त्वं च मिथ्यात्वत्यागे स्यात्, तच्च ज्ञातमेव त्यक्तुं शक्यमिति भेदतस्तत्स्वरूपमाहुः –

देव० : तदियता ग्रन्थेन 'देवो धम्मो मग्गो' इत्यादि द्वारगाथापूर्वार्धं व्याख्यातमधुना 'तव्विवरियं' इत्यादिकमुत्तरार्द्धं विवरितुमाह –

दुविहं लोइयमिच्छं देवगयं गुरुगयं मुणेयव्वं।
लोउत्तरं[1] पि दुविहं देवगयं गुरुगयं चेव।।२४३।।

चक्रे० : लोका जिनमतबहिर्वर्त्तिनो जनाः, तेषु भवं **लौकिकं मिथ्यात्वं द्विविधम्** - **देवगतं गुरुगतं** च, देवाः सुगतादयस्तेषु देवबुद्ध्या पूजादि, गुरवः शाक्यादयस्तेषु गुरुबुद्ध्या प्रणामादि । लोकेभ्यो वर्णितस्वरूपेभ्य उत्तरा ज्ञानादिगुणैः प्रधानभूता आर्हतास्तेषु भवं मिथ्यात्वमपि **लोकोत्तरं तदपि द्विविधम्, देवगतं गुरुगतं च**, तत्र देवगतं यद्वीतरागेऽ-प्युपयाचितादिना रागाद्यारोपणम्, गुरुगतं यत्पार्श्वस्थादिषु गुरुबुद्ध्या वन्दनकादि।।२४३।।

देव० : द्विविधम्, लोका जिनमतबहिर्वर्त्तिनो जनास्तेषु भवं **लौकिकं मिथ्यात्वम्,** कथमित्याह- देवान् गतं प्राप्तं **देवगतं** देवविषयमित्यर्थः, एवं **गुरुगतमपि मुणितव्यं** ज्ञातव्यं ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च, तत्र देवगतं यददेवेष्वपि स्त्रीशस्त्राक्षसूत्रादिसूचितरागद्वेष[2]मोहेषु नाट्याट्टहाससङ्गीताद्युपप्लवविसंस्थुलेषु प्राकृतजननिर्विशेषेषु हरिहरहिरण्यगर्भादिषु देवत्वबुद्ध्या वन्दनपूजनसत्कारादिकरणम्, गुरुगतं यदगुरुष्वपि सर्वभोजिषु मिथ्योपदेशिष्वब्रह्मचारिषु महा-परिग्रहिषु शाक्यतापसादिषु गुरुत्वबुद्ध्या वन्दननमस्करणादि, हिंसादिदूषिते मिथ्यादृष्टिनिषेविते-

१. लोगुत्तरं P, K, २. द्वेषाज्ञानेषु T,B,C,

ऽधर्मेऽपि धर्मबुद्धिरित्येतदपि मिथ्यात्वम्, किन्तु देवप्रणेतृकत्वाद् गुरूपदेष्टृकत्वाच्च धर्मस्य तद्ग्रहणेनैव ग्रहणमिति न पृथग्भणनम्, लोकेभ्यो वर्णितस्वरूपेभ्य उत्तरा ज्ञानादिगुण-भाक्त्वादुत्तमा अर्हन्तास्तेषु भवं मिथ्यात्वमपि **लोकोत्तरम्, तदपि द्विविधम्, देवगतं गुरुगतं च, एवो**ऽवधारणे, तेन न प्राग्वदत्रापि धर्मविषये मिथ्यात्वं तत्र देवगतं यद्वीतरागेऽप्युपयाचितादिना रागाद्यारोपणम्, उक्तं च –

लोगुत्तमदेवम्मिवि लोइयदेवाण जाणि लिंगाणि ।
इच्छापरिग्गहाईणि तेसिमारोवणं मिच्छा ।। [श्रावकधर्मविधिप्र॰ १८]

गुरुगतं तु यल्लोकोत्तमलिङ्गिष्वपि पार्श्वस्थादिषु गुरुत्वबुद्ध्या वन्दनादिविधानम्, प्रपञ्चितं चैतदधस्तादिति गाथार्थः।।२४३।।

चक्रे० : अथैतत्परिहारे फलमाहुः –

देव० : अथैतत्परिहारे फलमाह –

चउभेयं मिच्छत्तं तिविहं तिविहेण जो विवज्जेइ।
अकलंकं सम्मत्तं होइ फुडं तस्स जीवस्स।।२४४।।

चक्रे० : स्पष्टा।।२४४।।

देव० : सुगमा, नवरं तिस्रो विधाः करणकारणानुमतिलक्षणा यस्य तत् **त्रिविधं** मिथ्यात्वम्, **त्रिविधेन** मनोवाक्कायलक्षणेन करणेनेति गम्यमिहैवं भावनागाथा –

एयं अणंतरुत्तं मिच्छं मणसा न चिंतइ करेमि ।
सयमेसो व करेऊ अन्नेण कए व सुट्ठुकयं ।।
एवं वाया न भणइ करेमि अन्नं च न भणइ करेहि ।
अन्नकयं न पसंसइ न कुणइ सयमेव काएणं ।।
करसन्नभमुहरेववाइएहिं न य कारवेइ अन्नेणं ।
न पसंसइ अन्नकयं छोडियहसियाइचेट्ठाहिं।।[श्रावकधर्मविधिप्र॰ ३२, ३३, ३४]

तथा **विवज्जेइ**त्ति, विशेषेण गुरुसाक्षिकत्वलक्षणेन वर्जयति प्रत्याख्याति, **अकलङ्कम**तिचारकालुष्याभावात्, **स्फुटं** प्रकटमुद्घाटितशिरस्कतयेति । इह च क्वचित् पञ्चरूपं मिथ्यात्वमुपवर्ण्यते, यथा –

आभिग्गहियं अणभिग्गहं च तह अभिनिवेसियं चेव ।
संसइय मणाभोगं मिच्छत्तं पंचहा एवं ।। [प्रा. कर्मग्रन्थ-४/७४]

तत्राभिग्रहिकं पाषण्डिनां स्वस्वशास्त्रनियन्त्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणां भवति । अनाभिग्रहिकं तु प्राकृतलोकानां सर्वे देवा वन्दनीया, न निन्दनीया, एवं सर्वे गुरवः, सर्वे धर्मा इति । आभिनिवेशिकं जानतोऽपि यथास्थितं वस्तु दुरभिनिवेशविप्लावितधियो गोष्ठामाहिलादेरिव भवति । सांशयिकं देवगुरुधर्मेष्वयमयं वेति संशयानस्य भवति । अनाभोगिकं विचारशून्यस्यैकेन्द्रियादेर्वा विशेषविज्ञानविकलस्य भवतीति।।२४४।।

चक्रे० : अथ सम्यक्त्वस्यैव कर्मक्षयमूलकारणत्वं बिभणिषवो व्यतिरेकेण दृष्टान्तमाहुः –

देव० : एवं यथा सम्यक्त्वं भवति तथा दर्शितमधुनास्यैव कर्मक्षयमूलकारणत्वं व्यतिरेकरूपतया बिभणिषुर्दृष्टान्तमाह –

कुणमाणो [१]वि हि किरियं परिच्चयंतो वि सयणधणभोगे।
दिंतो वि दुहस्स उरं न जिणइ अंधो पराणीयं।।२४५।।

चक्रे० : कुर्वाणोऽपि क्रियां शस्त्रप्रक्षेपादिकां **परित्यजन्नपि स्वजनधनभोगान्** रणरसिकत्वेनेति भावः, **ददानोऽपि दुःखस्योरः** शरीरानपेक्ष इत्यर्थः । **न जयत्यन्धः परानीकमित्यक्षरार्थः।।२४५।।**

देव० : कुर्वन्नपि क्रियां प्रहरणप्रक्षेपादिरूपाम्, **परित्यजन्नपि स्वजनधनभोगान्,** सङ्ग्रामैकतान इति हृदयम्, **ददपि दुःखस्योरः** शरीरनिरपेक्ष इत्यर्थः । **न जयत्यन्धः परानीकमित्यक्षरार्थः**, भावार्थः सम्प्रदायगम्यः, स चायम् –

१. वि हु A

श्रीवसंतपुरे[१] पूर्वं जितशत्रुरभून्नृपः । तस्यान्धः शब्दवेधी च सूरसेनः सुतोऽजनि ।।१।।
तस्यानुजोऽभवद्वीरसेनः शूरशिरोमणिः । अपरेद्युः परानीकैर्विष्वक्पुरमरुध्यत ।।२।।
संवर्म्य युद्धश्रद्धालुरथ ज्येष्ठसुतो रथी । महावीर्यः पुरात्पित्रा वार्यमाणोऽपि निर्ययौ ।।३।।
शब्दवेधीतया यत्र यत्राश्रौषीदसौ ध्वनिम् । तत्र तत्र क्षिपन् बाणानवधीद्वैरिणो रणे ।।४।।
अन्धः कथञ्चिन्निश्चित्य हतशेषैः स वैरिभिः । मौनमास्थाय निपुणैः पाणिग्राहमगृह्यत ।।५।।
तदाकर्ण्य कनिष्ठोऽस्य भ्राता संवर्म्य निर्गतः । अरींश्चक्रे कथाशेषानशेषान् शूरशेखरः ।।६।।
जयश्रिया समं सूरसेनं प्रत्यानिनाय सः । प्रत्यूहव्यूहरहितश्चाभूद्भोगैकभाजनम् ।।७।।
इति गाथार्थः।।२४५।।

चक्रे० : तदेवं दृष्टान्तमुपदर्श्य दार्ष्टान्तिकमाहुः –

देव० : तदेवं दृष्टान्तमुपदर्श्य दार्ष्टान्तिकमाह –

कुणमाणो वि निवित्तिं परिच्चयंतो वि सयणधणभोगे।
दिंतो वि दुहस्स उरं मिच्छद्दिट्ठी न सिज्झइ[२] उ।।२४६।।

चक्रे० : कुर्वन्नपि निवृत्तिम् – अन्यदर्शनोक्तां विरतिम् । **परित्यजन्नपि स्वजनधनभोगान्, ददानोऽपि दुःखस्योरः** पञ्चाग्नितपःप्रमुखै**र्मिथ्यादृष्टिर्न सिध्यति**, दर्शनविकलत्वा-दन्धकुमारवत् कार्यसिद्धयक्षमः, अत्र चाऽर्थे भावतो दर्शनविकलस्तामलिदृष्टान्तः ।।२४६।।

देव० : कुर्वन्नपि निवृत्तिमन्यदर्शनाभिहिताम्, तद्यथा–पञ्च यमाः पञ्च नियमा इत्यादिकां तथा **परित्यजन्नपि स्वजनधनभोगान्,** पञ्चाग्नितपआदिना **ददपि दुःखस्योरो मिथ्यादृष्टिर्न सिद्धयति, तुर**वधारणे, नैव सिद्धयति दर्शनविकलत्वाद्, अन्धकुमारवदसमर्थः कार्यसिद्धये, इति गाथार्थः।।२४६।।

---

१. वसंतपुरमित्यास्ते पुरं तत्राभवन्नृपः । जितशत्रुरितिख्यातस्तत्सुतौ द्वौ बभूवतुः ।।
तत्राद्यः सूरसेनाख्यः शब्दवेधी विलोचनः । कनिष्ठो वीरसेनः सुसुवे कान्तिर्महाभुजः ।।
रुद्धेऽन्येद्युः परानीकैः पुरे ज्येष्ठसुतो नृपं । विज्ञाय वार्यमाणोऽपि राज्ञा तदभ्यषेणयत् ।।
शब्दवेधितया यत्र यत्राश्रौषीदसौ ध्वनिम् । तत्र तत्र क्षिपद्बाणान् परास्तवैरिणो व्यधात् ।।
लिङ्गेभ्यस्तं विदित्वान्धं तूष्णीभूय सुशिक्षितैः । हस्तग्राहं गृहीतोऽसौ विचक्षुः परिपन्थिभिः ।।
तदाकर्ण्य कनिष्ठोऽस्य भ्राता संवर्म्य सत्वरं । निर्जगाम पुरात्तस्माद् हेलया चावधीद् द्विषः ।।
ज्येष्ठं प्रत्यानयद् बन्धुं जयलक्ष्म्या समन्ततः । प्रत्यूह व्यूहरहितः सोऽभूद् भोगैकभाजनम् ।। इति गाथार्थः ।। T,C

२. सिज्जइ ओ P, सिज्जई उ K, सिज्झइ ओ A

चक्रे० : यत एवं ततः किं कार्यमित्याहुः –

देव० : यत एवं ततः किं कर्त्तव्यमित्याह –

तम्हा कम्माणीयं जेउमणो दंसणंमि पयइज्जा।
दंसणवओ हि सफलाणि हुंति तवनाणचरणाणि।।२४७।।

चक्रे० : स्पष्टा, नवरं **'दंसणंमि पयइज्जा'** सम्यग्दर्शने प्रयतेत।।२४७।।

देव० : **यस्मा**त्सिद्धिमार्गमूलास्पदं सम्यग्दर्शनमन्तरेण न कर्मक्षयः स्यात्तस्मात् **कर्मानीकं जेतुमनाः** सम्यग्**दर्शने प्रयतेत,** तस्मिंश्च सति यद्भवति तद्दर्शयति-**दर्शनवतो हि** हेतौ यस्मात् सम्यग्दर्शिनः **सफलानि भवन्ति तपोज्ञानचरणानि,** चक्षुष्मतो वीरसेनकुमारस्येव सङ्ग्रामप्रवर्तनानि, अतस्तत्र यत्नवता भाव्यमिति गाथार्थः।।२४७।।

चक्रे० : किञ्च चारित्रमप्यतिशेते सम्यग्दर्शनमित्याहुः –

देव० : किञ्च चारित्रमप्यतिशेते सम्यग्दर्शनमित्याह –

भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं।
सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति।।२४८।।

चक्रे० : एषाऽपि स्पष्टैव, नवरं **चरणरहिता** द्रव्यतश्चारित्रवर्जिता इत्येवं ज्ञेयं न पुनर्भावतः, भावतश्चारित्राऽभावे केवलज्ञानस्याप्यनुत्पादनात् । स्वयमेव च वक्ष्यति 'चरणकरणेहिं रहिओ न सिज्झई सुट्ठु सम्मदिट्ठी वि'त्ति।।२४८।।

देव० : भ्रष्टेन च्युतेन, कुतः ? **चारित्रात् सुष्ठुतरं** सुतरां पुनर्बोधिलाभानुबन्धि **दर्शनं ग्रहीतव्यम्,** शक्यमोक्षोपायत्वाद्, यदभ्यधायि –

जइ न तरसि धारेउं मूलगुणभरं सउत्तरगुणं च ।
मुत्तूण तो तिभूमी सुसावगत्तं वरतरागं ।। [उपदेशमाला-५०१]

तथा **सिद्ध्यन्ति चरणरहिताः** प्राणिनो दीक्षाप्रवृत्त्यनन्तरान्तकृत्केवलिनः, **दर्शनरहितास्तु न सिद्ध्यन्ति,** अतो दर्शनमेव प्रधानं सिद्धिकारणं तद्भावभावित्वाद्, एतत्पुनर्दर्शननयाभिप्रायादभिधीयते, तत्त्वतस्तु चारित्रमेव दर्शनज्ञानसमन्वितं मुक्तिकारणम्, न पुनः सम्यग्दर्शनमेव, तस्य सर्वगतिष्वपि भावाद्, न च मनुजगतिव्यतिरेकेणान्यासु मुक्तिश्चारित्राभावाद्, उक्तं हि–

सव्वाओवि गईओ अविरहिया नाणदंसणधरेहिं ।
ता मा कासि पमायं नाणेण चरित्तरहिएणं ।। [ ]

यद्यप्यन्तकृत्केवलिनश्चरणरहिता अपि सिद्ध्यन्तीत्यभिहितं तदपि नातिपेशलम्, यतस्तेषामपि सर्वसंवररूपचारित्रव्यतिरेकेण सिद्धेरभावात्, भावचारित्रव्यतिरेकेण केवलज्ञानस्याप्यनुत्पादाच्च, तथा च स्वयमेव वक्ष्यति 'चरणकरणेहिं रहिओ न सिज्झई सुट्ठु सम्मदिट्ठी वि' इति गाथार्थः ।।२४८।।

** आवश्यकनिर्युक्तौ-११५९ **

किञ्च-शक्य एवोपाये प्रेक्षावतः प्रवृत्तिर्युज्यते, न पुनरशक्ये शिरःशूलशमनाय तक्षकफणालङ्कार-ग्रहणकल्पे चारित्रे, चारित्रं च तत्त्वतो मोक्षोपायत्वे सत्यप्यशक्यासेवनम्, सूक्ष्मापराधेऽप्यनुपयुक्तगमना-गमनादिभिर्विराध्यमानत्वादायासरूपत्वाच्च, नियमेन च छद्मस्थस्य तद्भ्रंश उपजायते सर्वस्यैवातः –

भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं ।
सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ।।

भ्रष्टेन च्युतेन, कुतः ? **चारित्रात्,** सुतरां **दर्शनं ग्रहीतव्यम्,** पुनर्बोधिलाभानुबन्धिशक्यमोक्षोपायत्वात्, तथा च–**सिद्ध्यन्ति चरणरहिताः** प्राणिनः दीक्षाप्रवृत्त्यनन्तरमृतान्तकृत्केवलिनः, **दर्शनरहितास्तु न सिद्ध्यन्ति,** अतो दर्शनमेव प्रधानं सिद्धिकारणम्, तद्भावभावित्वादित्ययं गाथार्थः ।।११५९।।

** हितोपदेशप्रकरणे-२१ **

कथम् ? इत्याह –

भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं ।
सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ।।

चरित्राद् व्यावहारिकसंयमाद्, **भ्रष्टेन** परिपतितेन चारित्रधात्रीधरशिरःपरिसरतस्तदावरणकर्मणा नन्दिषेणादिवत् पर्यस्तेन, **दर्शनं** सम्यक्त्वं शुद्ध्यतिशयेन **ग्रहीतव्यम**ङ्गीकार्यम् । किम् ? इत्यत आह **चरणरहिता** व्यावहारिकचारित्रविनाकृता अपि **सिद्ध्यन्ति** सिद्धिमध्यासते मरुदेवादिवत् । **दर्शनरहितास्तु** तीव्रव्रतभृतोऽपि निह्नवादिव**न्न सिद्ध्यन्ती**ति ।।२१।।

चक्रे० : इत्थं सम्यक्त्वस्वरूपमभिधाय तद्भेदानाहुः –

देव० : इत्थं सम्यक्त्वस्वरूपमभिधाय तद्भेदानाह –

एगविहदुविहतिविहं चउहा पंचविहदसविहं सम्मं।
मोक्खतरुबीयभूयं संपइराया व धारेज्जा।।२४९।।[1]

चक्रे०: तत्र**ैकविधं** तत्त्वरुचिरूपम्, **द्विविधं** नैसर्गिकं जातिस्मरणादिप्रभवम्, अधिगमजं तु गुर्वाद्युपदेशात् तत्त्वाधिगमोद्भवम्, **त्रिविधं** क्षायिकं क्षायोपशमिकमौपशमिकं च । तत्र क्षायिकमनन्तानुबन्धि४मिथ्यात्व५मिश्र६पौद्गलिकसम्यक्त्व७क्षयोत्थमत्यन्तविशुद्ध-तत्त्वरूचिपरिणामरूपम् । तथा क्षायोपशमिकम्, उदीर्णस्य मिथ्यात्वस्य क्षयेणानुदीर्णस्य चोपशमेन सम्यक्त्वरूपताऽऽपत्तिलक्षणेन विष्कम्भितविपाकोदयस्वरूपेण च यन्निर्वृत्तं तत् । तच्च प्रदेशतो मिथ्यात्वं विपाकतस्तु सम्यक्त्वपुञ्जं वेदयमानस्य भवति, यदुक्तम् –

मिच्छत्तं जमुइन्नं तं खीणं अणुइयं तु उवसंतं ।
मीसीभावपरिणयं वेइज्जंतं खओवसमं ।। [विशेषा.भा॰ ५३२]

तथोदीर्णस्य मिथ्यात्वस्य क्षये सति, अनुदीर्णस्य य उपशमो विपाकप्रदेशवेदनरूपस्य द्विविधस्याऽप्युदयस्य विष्कम्भणं तेन निर्वृत्तमौपशमिकम्, प्राग्वर्णितविधिना प्राप्तम् । यदि वा-

उवसामगसेढिगयस्स होइ उवसामियं तु सम्मत्तं ।
जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं ।। [विशेषा. भा॰ ५२९]

कारक-रोचक-दीपकभेदाद् वा त्रिविधम् । कारकं साधूनामिव, रोचकं श्रेणिकादेरिव, दीपक-मङ्गारमर्दकादेरिव। वेदकस्य पृथग्विवक्षया **चतुर्द्धा**, तच्च पौद्गलिकसम्यक्त्वचरमपुद्गल-वेदनकाले स्यात् । ईषत् तत्त्वश्रद्धानेन सास्वादनस्याऽपि सम्यक्त्वविवक्षया **पञ्चविधम्**। एषामेकैकस्य निसर्गाऽधिगमभेदविवक्षया **दशविधं** निसर्गरुच्यादिभेदतो वा, तथा च –

निस्सग्गुवएसरुई आणारुइ सुत्तबीयरुइमेव ।
अभिगम वित्थाररुई किरिया संखेव धम्मरुई ।। [उत्तरा॰ २८-१६]

१-'निस्सग्गेण' गुरूपदेशं विना जिनोक्ततत्त्वेषु श्रद्धा यस्य सः निसर्गरुचिः। २-गुरूपदेशात्तु श्रद्धा यस्य स उपदेशरुचिः। ३-यज्जिनैराज्ञप्तं तत् तथैवेति मन्वानाज्ञारुचिः । ४-सूत्रे -

१. धारिज्जा T,C

सिद्धान्तेऽङ्गोपाङ्गरूपे यदुक्तम्, तत् तथेति श्रद्दधानः सूत्ररुचिः । ५-एकस्मिन्नपि[१] पदे जीवादितत्त्वरूपेऽनेकानि पदानि सम्यक्त्वविषयाणि प्रसरन्ति बीज इव मूलाङ्कुरपत्रपुष्पफलानि, तत्र बीजकल्पे रुचिर्यस्य स बीजरुचिः । ६-अभिगमेन समस्तश्रुतार्थपरिच्छेदेन रुचिर्यस्य सोऽभिगमरुचिः। ७-सर्वप्रमाणनयविधिभिर्यः सर्वद्रव्यभावोपलम्भरूपो विस्तारस्तत्र रुचिर्यस्य स विस्ताररुचिः । ८-ज्ञानदर्शनचारित्रतपोविनयसत्यसमितिगुप्तिक्रियासु रुचिर्यस्य स क्रियारुचिः । ९-अनभिगृहीतकुदृष्टिः प्रवचनाऽनभिज्ञोऽपि भावेन जिनोक्ततत्त्वानि श्रद्दधानः संक्षेपरुचिः । १०-योऽस्तिकायधर्मं श्रुतधर्मं चारित्रधर्मं च जिनोक्तं श्रद्धते स धर्मरुचिः। तदेवंविधं **मोक्षतरुबीजभूतं सम्यक्त्वं सम्प्रतिराजवद्धारयेत् ।।२४९।।**

देव० : तत्रैकविधं तत्त्वरुचेः सर्वत्रानुगतत्वात्, तस्या एव नैसर्गिकाधिगमजभेदविवक्षया **द्विविधम्,** तत्र नैसर्गिकं जातिस्मरादिप्रभवम्, अधिगमजं तु गुर्वाद्युपदेशात्तत्त्वाधिगमसम्भवम्, अविवक्षितनिसर्गाधिगमक्षायिकक्षायोपशमिकौपशमिकभेदविवक्षया वेदकस्य क्षायोपशमिकत्वेन विवक्षणात्सास्वादनस्य चानन्तानुबन्धिकषायदूषितत्वेनाविवक्षणाच्च **त्रिविधम्,** तत्र क्षायिकमनन्तानुबन्धि४मिथ्यात्वमिश्रसम्यक्त्व७क्षयाज्जातम् । ननु सम्यक्त्वक्षये कुतः सम्यग्दृष्टित्वम् ? उच्यते–निर्मदनीकृतकोद्रवकल्पा अपनीतमिथ्यात्वभावा मिथ्यात्वपुद्गला एव सम्यक्त्वम्, तत्परिक्षये च तत्त्वरुचिपरिणामानिवृत्तेः प्रत्युत श्लक्ष्णाभ्रपटलापगमे चक्षुर्दर्शनवद्विशुद्धतरापत्तेः क्षायोपशमिकं पुनरेवम्–इह कश्चित्प्रवाहतोऽनादिमिथ्यादृष्टिस्तथाविधधर्माचार्यसामग्रीसमवधाने सत्यपूर्वकरणेनाभिमुखीभवन्मिथ्यात्वपुञ्जकान्मिश्रपुञ्जकं करोति, मदनकोद्रवपुञ्जकादिवार्धविशुद्धतत्पुञ्जकम्, ततोऽपि सम्यक्त्वपुञ्जकमर्धविशुद्धकोद्रवपुञ्जकादिव सर्वविशुद्धतत्पुञ्जकम्, तच्च निर्मलतयात्मनस्तत्त्वरुचेरावृतिं न करोति, स्वच्छाभ्रपटलगृहकमिव प्रदीपप्रभायास्ततस्तृतीयसम्यक्त्वपुञ्जकं विशिष्टविपाकतो वेदयञ्जन्तुः क्षायोपशमिकसम्यग्दर्शनी भण्यते, यत उक्तम्–'मिच्छत्तं जमुइन्नं' उदयावलिकास्थं 'तं खीणं अणुइयं तु उवसंतं विष्कम्भितोदयमपनीतमिथ्यास्वभावं चोपशान्तमुच्यते, तत्र विष्कम्भितोदयं शेषमिथ्यात्वम्, अपनीतमिथ्यास्वभावं च विशोधितसम्यक्त्वपुञ्ज एव 'मीसीभाव' क्षयोपशमरूपं 'परिणयं वेइज्जंतं, प्रदेशतो मिथ्यात्वम्, रसतस्तु सम्यक्त्वं 'खओवसमं' औपशमिकं तु–

उवसामगसेढिगयस्स होइ उवसामियं तु सम्मत्तं ।
जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं ।। [विशेषा.भा० ५२९]

१. अर्हन् देवः सुसाधुर्गुरुर्जिनोक्तमेव तत्त्वमिति बीजे - धर्मबीजभूते रुचिर्यस्य स बीजरुचिः M

इहाद्यं प्रतीतमेव, द्वितीयं तु विव्रियते –

इह यथाप्रवृत्तिकरणेन सागरोपमकोटीकोटेरन्तर्मिथ्यात्वस्थितिमानीयोदयक्षणादन्तर्मुहूर्त्तमतिक्रम्यापूर्वकरणानिवृत्तिकरणाभ्यामन्तर्मुहूर्त्तप्रमाणमन्तरकरणं करोति जन्तुस्ततस्तस्मादधस्तन्युपरितनी चेति मिथ्यात्वस्य स्थितिद्वयं भवति स्थापना । ततोऽधस्तनीं स्थितिमन्तर्मुहूर्त्तेन वेदयित्वान्तकरणं प्राप्तः प्रथमसमयादेवौपशमसम्यक्त्वं लभते, तत्पुनर्न पुद्गलानुभवरूपमपित्वध्यवसायमात्रम्, यदुक्तम् –

ऊसरदेसं दट्ठिल्लयं व विज्झाइ वणदवो पप्प ।
इयमिच्छस्स अणुदए उवसमसम्मं लहइ जीवो ।। [ ]

तच्चावस्थितस्वरूपम्, यदाह –

जं मिच्छस्साणुदओ न हायए तेण तस्स परिणामो ।
जं पुण सयमुवसंतं न वट्टएवट्ठिओ तेणं ।। [ ]

औपशमिकस्य च क्षायोपशमिकादयं विशेषः, क्षायोपशमिके प्राक्समितमनुसमयमुदेति, प्रदेशतश्च वेद्यते क्षीयते च स्थगितमपि कोद्रवदृष्टान्तात्, न त्वस्मिन्नयं प्रकारोऽस्ति, उदयविष्कम्भणमात्रत्वाद्विशूच्याहारवद्, अस्मादेव च भ्रश्यन्तो द्वीन्द्रियादिषूत्पद्यन्ते, नान्यस्माद्, अन्यतो झटिति मिथ्यात्वप्राप्त्या षडावलिककालासम्भवाद् ।

कारकरोचकदीपकभेदतो वा त्रिविधम्, कारकं साधूनामिव, रोचकं श्रेणिकादेरिव, दीपकमङ्गारमर्दकादेरिव, वेदकस्य पृथग्विवक्षया **चतुर्द्धा,** तत्स्वरूपं च –

बावीससंतमोहस्स सुद्धदलियक्खयंमि आढत्ते ।
जीवस्स चरमसमये अणुभवणे वेयगं होइ ।। [ ]

इह च क्षायोपशमिकं समस्तपरिवेषितभोजनसमानम्, वेदकं तु चरमकवलतुल्यमिति भेदविवक्षा, ईषत्तत्त्वश्रद्धानत्वेन सास्वादनस्यापि सम्यक्त्वविवक्षया **पञ्चविधम्,** तत्पुनः –

उवसमसमत्ताओ [१]चवओ मिच्छं अपावमाणस्स ।
सासायणसम्मत्तं छावलियं होइ नायव्वम् ।। [संबोधप्र० ८७४]

---

१. चविओ T,C

इह च क्षायिकं साद्यपर्यवसितम्, क्षायोपशमिकं तूत्कृष्टतः पूर्वकोटिपृथक्त्वाधिकानि षट्षष्टिसागरोपमानि, जघन्यतोऽन्तर्मुहूर्त्तम्, औपशमिकमुभयथाप्यन्तर्मुहूर्त्तम्, वेदकमेक-सामयिकम्, सास्वादनमुत्कर्षतः षडावलिकम्, जघन्यतस्त्वेकसामयिकम् । एतेषामेकैकस्य निसर्गाधिगमभेदविवक्षया दशविधं सम्यक्त्वमिति सर्वत्र योगः । निसर्गरुच्यादिभेदतो वा **दशविधम्,** तथा च –

निस्सग्गुवएसरुई आणारुई सुत्तबीयरुइमेव ।
अभिगम वित्थाररुई किरिया संखेव धम्मरुई ।। [उत्तरा॰ २८-२६]

रुचिशब्दः सर्वपदेषु दृश्यः, सम्यक्त्वे गुणेऽपि वाच्ये गुणिरूपतयाभिधानं तयोः कथञ्चिदनन्यत्वख्यापनाय एतेषां व्याख्यानगाथाः –

जो जिणदिट्ठे भावे चउव्विहे (द्रव्यादिरूपतया) सद्दहेइ सयमेव ।
एमेव नन्नहत्ति य निस्सग्गरुइत्ति नायव्वो ।।
एए चेव उ भावे उवइट्ठे जो परेण सद्दहइ ।
छउमत्थेण जिणेण व उवएसरुइत्ति नायव्वो ।।

रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ । (देशत एव न सर्वतः) आणाए रोयंतो (आज्ञयैवाचार्यसम्बन्धिन्या तथेति श्रद्दधानो माषतुषादिवत्) सो खलु आणारुई नाम ।।

जो सुत्तमहिज्जंतो सुएण ओगाहई उ सम्मत्तं ।
अंगेण बाहिरेण व सो सुत्तरुइत्ति नायव्वो ।।
एगपएणेगाइं पयाइं जो पसरई उ सम्मत्ते ।
उदएव्व तेल्लबिंदू सो बीयरुइत्ति नायव्वो ।।

तत्त्वैकदेशोत्पन्नरुचिरपि क्षयोपशमविशेषात् समस्ततत्त्वेषु रुचिमान् भवतीत्यर्थः ।

सो होइ अभिगमरुई सुयनाणं जेण अत्थओ दिट्ठं ।
एक्कारसअंगाइं पइन्नगादिट्ठिवाओ य ।।
दव्वाण सव्वभावा (पर्यायाः) सव्वपमाणेहिं जस्स उवलद्धा ।
(ये यद्विषयास्ते तेन) सव्वाहिं नयविहीहिं वित्थाररुइत्ति नायव्वो ।।

विस्तारविषयत्वेन ज्ञानस्य रुचेरपि तद्विषयत्वादस्य ज्ञानपूर्विकाभिरुचिः ।

दंसणनाणचरित्ते तवविणए सच्चसमिइगुत्तीसु ।
जो किरिया भावरुई सो खलु किरियारुई नाम ।।

दर्शनाद्याचारानुष्ठाने यस्य भावतो रुचिरस्तीत्यर्थः । चारित्रान्तर्गतत्वेऽपि तपआदीनां पुनर्भणनं विशेषमुक्त्यङ्गत्वख्यापनार्थम् ।

अणभिग्गहिय कुदिट्ठी संखेवरुइत्ति होइ नायव्वो ।
अविसारओ पवयणे अणभिग्गहिओ य सेसेसु ।।

उक्तविशेषणो यः संक्षेपेणैव चिलातीपुत्रवत् प्रशमादिपदत्रयेण तत्त्वरुचिमवाप्नोति स संक्षेपरुचिरित्यर्थः ।

जो अत्थिकायधम्मं (अस्तिकायानां धर्मादीनां धर्मं गत्युपष्टम्भादिपर्यायं)
सुयधम्मं खलु चरित्तधम्मं च ।
सद्दहइ जिणाभिहियं सो धम्मरुइत्ति नायव्वो ।। [प्रव.सारो॰ ९५०-६०]

धर्मेषु पर्यायेषु धर्मे वा श्रुतधर्मादौ रुचिरस्येतिकृत्वा । शिष्यमतिव्युत्पादनार्थं चेत्थमुपाधिभेदेन सम्यक्त्वभेदाभिधानमन्यथा हि निसर्गोपदेशयोरधिगमादौ वा क्वचित् केषाञ्चिदन्तर्भाव इति भावनीयमिति । एवं सम्यक्त्वस्य कर्मक्षयलक्षणमनन्तरफलं तद्भेदाश्च प्रतिपादिताः, सम्प्रति तस्यैव परम्परफलप्रतिपादनपुरस्सरं तत्पालने दृष्टान्तमाह- सम्यक्त्वं **मोक्षतरोर्बीजभूतम**नेन मोक्षः परम्परफलमेतस्येत्यभिहितम्, **सम्प्रतिराजवद्धारयेत्,** सम्प्रदायगम्यश्चायमर्थस्तथाहि -

अस्ति वत्सेषु कौशाम्बी नगरी निर्जितालका । वसन्ति धनिनो यस्यामतिपुण्यधनेश्वराः ।।१।।
तस्यां पुर्यामथाचार्यौ महागिरिसुहस्तिनौ । युगाग्रण्यावनुग्रामं विहरन्तावुपेयतुः ।।२।।
तत्रैकच्छत्रदुर्भिक्षे भिक्षाहेतोः सुहस्तिनः । साधुसङ्घाटकः प्रापदेकमीश्वरमन्दिरम् ।।३।।
धन्यंमन्यस्तमानम्य गृहेशः सपरिच्छदः । खण्डखाद्यादिभिर्भोज्यैरतिप्राज्यैरुपास्थितः ।।४।।
तदाग्रहाज्जगृहतुः स्तोकं स्तोकं तु तौ मुनी । भिक्षाकस्तादृगद्राक्षीदेकस्तद्विस्मितेक्षणः ।।५।।
विवेकलोचनस्यान्धं करिण्या व्यथितः क्षुधा । प्रगल्भैश्चाटुभिर्वल्लां प्रार्थयामास तौ ततः ।।६।।
भद्र भक्तं गुरोरेतदिति तौ प्रत्यवोचताम् । पृष्ठलग्नस्ततस्ताभ्यामभ्यर्णं सोऽगमद्गुरोः ।।७।।
तद्दर्शनोद्भवानन्दबाष्पैः खेदं विनुद्य सः । ययाचे भक्तमाचार्यं कारुण्यैकसुधानिधिम् ।।८।।

भक्तदानाद् भविष्यन्तं प्रेत्य शासनदीपकम् । श्रुतातिशयतो ज्ञात्वा तत्त्ववित्तमभाषत ।।९।।
जिघत्सुर्वत्स चेद्दीक्षां [१]कक्षीकुरु तदार्हतीम् । इति तं दीक्षितं स्वैरं स्निग्धस्वादून्यभोजयत् ।।१०।।
तेनातिमात्रभुक्तेन नक्तं जातविसूचिकः । मृत्युमासादयामास [२]समाधिसुधयोक्षितः ।।११।।
[३]इतश्च पाटलीपुत्रमित्यस्ति नगरं गुरु । मौर्यवंशध्वजश्चन्द्रगुप्तस्तत्राभवन्नृपः ।।१२।।
ततो जनदृशामिन्दुर्बिन्दुसारनृपोऽजनि । मूर्ध्ना यच्छासनं भूपैर्दध्रे बिन्दुरिवाक्षरैः ।।१३।।
तस्मादासीदशोकश्रीर्भूधरो हिमवानिव । पावनी व्यानशे कीर्तिगङ्गायत्प्रभवा भुवम् ।।१४।।
प्राणेभ्योऽपि प्रियः पुण्यैर्लक्षितो राजलक्षणैः । अभूदायतदोर्नालः कुणालस्तस्य नन्दनः ।।१५।।
[४]अनिष्टशङ्किना मातृसपत्नीभ्यः स भूभृता । बालोऽप्यवन्त्यां कौमारभुक्तौ प्रेम्णा व्यसृज्यत ।।१६।।

१. कांक्षीकुरु T,C

२. प्रणिधानपरायणः A

३. ततो राजकुमारस्य कुणालस्य विचक्षुषः । अव्यक्तसामायिकताप्रभावादभवत्सुतः ।।१२।।
अथोत्पत्तिं कुणालस्य शृणुतावहिताः क्षणम् । तत्रास्ति पाटलिपुत्रं प्रति सर्वपुरां पुरम् ।।१३।।
नरेन्द्रश्चन्द्रगुप्तोऽस्मिन्मौर्यवंशमणिर्गुणी । आसीत् स्वयंवरायातराज्यश्रीः प्राज्यविक्रमः ।।१४।।
ततस्तस्याभवत् सूनुर्बिन्दुसारो धराधिपः । यच्छाशनं नृपैर्मूर्ध्ना दध्रे बिन्दुरिवाक्षरैः ।।१५।।
तस्मादभूदशोकश्रीः शोकापनुददर्शनः । सुकृतोपस्कृतोपायैर्यस्यानन्दः सदैव हि ।।१६।। T,C

४. पित्रा मातृसपत्नीभ्यो विघ्नसम्भवभीलुना । दत्त्वावन्तीं सहामात्यैः शैशवेऽपि व्यसर्जिसः ।।१८।।
तत्र च क्षितिभृत्सूनोः क्षेमोदन्तपिपासितः । स्वहस्तलिखिताल्लेखान् प्रैष्यत्प्रेम्णा मुहुर्मुहुः ।।१९।।
तस्य विद्यावधूकेलिकाले कालविदन्यदा । अधीयतां कुमारोऽयमिति लेखं नृपोऽलिखत् ।।२०।।
असंवर्त्यैव तं लेखमुदस्थाद्देहचिन्तया । नृपः श्रीमानशोकश्रीरपिधाय निधिं यथा ।।२१।।
तस्मिंश्चिद्दैवता कस्मात्काचित्तत्र विसर्पिणी । सर्पिणीवागमद्राज्ञी कौटिल्यकुलमन्दिरम् ।।२२।।
लेखार्थाधिगमात्तस्याः पापायाः कोऽपि मत्सरः । क्षीरपानान्महोरग्या विषोद्गार इवोदगात् ।।२३।।
अनुस्वारमकारस्य दत्वाह्राय व्यधात्ततः । अंधीयतां कुमार इत्यहो स्त्रीणां नृशंसता ।।२४।।
अलक्ष्य दक्षतायोगात्तथैव च मुमोच तं । अनाचार्यं हि कौशल्यं कुसृतौ बत योषिताम् ।।२५।।
प्रत्यावृत्तेन भूभर्त्राऽप्रतिवाच्यैव मुद्रितः । ही मुह्यन्ति महान्तोप्यशुभोदर्के हि भाविनि ।।२६।।
वन्दित्वोन्मुद्र्य कौमारैः सचिवैः सप्रवाचितः । यावत्तावदवलोकि तत्कार्यमतिदारुणम् ।।२८।
अकाण्डकुलिशोत्पात दुस्सहां दधतो दशाम् । तूष्णीं तस्थुर्मिथो म्लानमुखाम्भोजेक्षिणस्ततः ।।२९।।
कुमारस्तानवोचत्किं व्यरंसिष्टार्द्धवाचिते । ताताज्ञोक्तस्य मेऽज्ञातस्येवार्द्धपरिवेषिते ।।३०।।
तेषामितिप्रणुन्नापि चिन्ताश्रोतश्विनी जुषां । विषादपङ्कनिर्मग्नायावद्गौनैव निर्ययौ ।।३१।।
तावल्लेखं करात्तेषां जटित्याच्छिद्य सोग्रहीत् । अवार्यविषवीर्योग्रं यथा हि माहितुंडिकः ।।३२।।
लेखार्थाधिगमेऽध्यासीदवार्यं मौर्यशासनम् । तच्चेन्मयि स्खलत्यन्यः कस्तदाबतपास्यति ।।३३।।
इत्यानङ्ग दृशौ सद्यः सन्तप्तायःशलाकया । असूत्रं सूत्रयन्हारं शोकाश्रैर्मत्रिणां हृदि ।।३४।। T,C

राजा स्वहस्तविन्यस्तवर्णानि लिखितान्यथ । प्राहिणोदन्वहं स्नेहामृतस्यन्दीनि सूनवे ।।१७।।
कलाग्रहणकालं च सूनोर्ज्ञात्वान्यदा नृपः । स्वयं लिखित्वा लिखितमवन्त्यां प्राहिणोदिति ।।१८।।
अधीयतामधिकृता हितचिन्ताभरश्चिरम् । कुमारस्त्यक्तनिःशेषापरव्यापारमादरात् ।।१९।।
असंवृत्यैव तं लेखं देहचिंताचिकीर्षया । नृपः प्रमादादुद्घाटं मुक्त्वा निधिमिवोत्थितः ।।२०।।
नृपपार्श्वोपविष्टासीत् काचिद्देवी तदा किल । सा लेखं वाचयन्त्युच्चैरभून्मत्सरपिच्छिला ।।२१।।
दत्त्वा बिन्दुमकारस्य व्यधादंधीयतामिति । कौशलं कुसृतौ किंचिदनाचार्यं हि योषिताम् ।।२२।।
निवृत्तेन पुनर्लेखोऽप्रतिवाच्यैव भूभुजा । संवर्त्य मुद्रितः स्थूलः प्रमादस्तादृशामपि ।।२३।।
तं राज्ञा प्रेषितं प्रेक्ष्य कुमारः पिप्रियेतराम् । क्षुद्वानिव शिशुः प्राप्य विषाक्तमपि मोदकम् ।।२४।।
उन्मुद्र्याधिकृतेनोच्चैर्यावल्लेखः प्रवाचितः । तावदालोकि दुर्वाचं दुःश्रावं चेदमग्रतः ।।२५।।
तदुच्चारणदुःस्थेऽस्मिन् मौनमास्थाय तस्थुषि । उत्सुकस्तत्कराल्लेखं कुमारः स्वयमग्रहीत् ।।२६।।
लेखार्थाधिगमेऽध्यासीदवार्यं मौर्यशासनम् । तच्चेन्मयि स्खलत्यन्यः कस्तदा पालयिष्यति ।।२७।।
इत्यानङ्ग दृशौ सद्यः सन्तप्तायःशलाकया । मामेति तुमुलं जल्पत्यनल्पं मन्त्रिमण्डले ।।२८।।
किंवदन्ती ददन्ती सा मूर्च्छामूर्वीपतेर्भृशम् । प्राविशत्कर्णयोस्तप्तत्रपुधारानुकारिणी ।।२९।।
मूर्च्छान्ते शोकसन्तापनिर्यद्बाष्पप्लुतेक्षणः । विललाप विशामीशो रोदयन्निव रोदसी ।।३०।।
हा वत्स[१] ! स्वच्छहृदय कुलाधार कलानिधे । विनीत स्फीतदाक्षिण्य विवेकिन् मधुराकृते ।।३१।।
किमेवमविविच्यैव विमर्शकशिरोमणे । व्यधास्त्वं निर्घृणं कर्म मम भाग्यविपर्ययात् ।।३२।।
विविश्वानेवमुर्वीशः शोकोत्कर्षवशां दशाम् । कथञ्चिन्मन्त्रिभिर्विद्यावयोवृद्धैरबोध्यत ।।३३।।
राज्यानर्ह इति ग्राममेकं दत्त्वास्य जीवने । उज्जयिन्याः प्रभुत्वेऽन्यं सुतं राजा न्ययोजयत् ।।३४।।

१. अविविच्यैव चक्षुष्यहो कथं जघ्निथाक्षिणी । पशुचेष्टानिर्विशिष्टं धिक्तेजोऽप्यविवेकिनाम् ।।३७।।
लिखितेऽध्ययने कार्ये ही कथमंधताभवत् । अहह व्यापृतः पाणिर्विधे ! मत्सरिणः क्वचित् ।।३८।।
मनोरथः कथं सिध्येन्नियतेर्यत्र वामता । वर्द्धन्ते नहि शस्यानि वैगुण्येऽम्बुभृतः क्वचित् ।।३९।।
विविश्वानेवमुर्वीशः शोकोत्कर्षवशांदशाम् । मन्त्रिभिः श्रुतवयोवृद्धैः कथञ्चित्प्रत्यबोध्यत ।।४०।।
राज्याऽनर्होऽयमित्यस्मै ततो ग्राममदान्नृपः। अयोग्येषु नहि प्रेम्णा तत्त्वज्ञैर्न्यस्यते पदम् ।।४१।।
तद् ग्रामस्थः कुणालोऽथ व्यापारान्तरवर्जितः । काञ्चिद्गीतकलां भेजे हाहाहूहूपहासिनीम् ।।४२।।
पुत्रभूयं समुत्पन्ने तस्मिन्निश्चेत्यदामुना । कुणालः पाटलीपुत्रमागान्मथोरथैर्वृतः ।।४३।।
तत्रात्मवश्यतां पौरान् श्रोतांसीवमनोनयत् । विपञ्ची स्वरसौभाग्यं प्रगीतो गीतमद्भूतम् ।।४४।। T,C

न्यायेन लालयन् ग्रामलोकं गीतकलाप्रियः । कुणालः कालममरकुमारक इवानयत् ।।३५।।
स रङ्कजीवस्तत्रास्य सुतत्वेनोदपद्यत । ततः कुणालो राज्यार्थी पाटलीपुत्रमाययौ ।।३६।।
तत्रात्मवश्यतां पौरान् मृगानिव नयन्नयम् । विपञ्चीश्रुतिभिः स्फीतं प्रगीतो गीतमद्भुतम् ।।३७।।
तद्गीतकलया सद्यो बन्दितामधिरोपिताः । तं राज्ञः पुरतः पौरा वर्णयामीति चक्रिरे ।।३८।।
अस्ति कश्चिदिहायतो देव सम्प्रति गायनः । यस्याऽपौंस्नी कला गीतौ वर्ण्यते किमतः परम् ।।३९।।
ततस्तमाह्वदुर्वीशः कौतुकोत्सुकमानसः । व्यङ्गत्वाच्चान्तरे कृत्वा प्रतिसीरामजीगपत् ।।४०।।
बभाण प्रीणितोऽत्यर्थमथ गीतामृतोर्मिभिः । हंहो वृणु वरं स्वैरं त्वं गाथकमतल्लिके ।।४१।।
[१]कलितावसरः कालवेदी स्वाजन्यसूचकम् । जगौ प्रगल्भकलवाक् कुणालः श्लोकमीदृशम् ।।४२।।
प्रपौत्रश्चन्द्रगुप्तस्य बिन्दुसारस्य नप्तृकः । अशोकश्रीतनुजोऽन्धो याचते तात काकिणीम् ।।४३।।
चिरं रूढमपि प्राच्यशोकमुद्भिन्नमुद्वहन् । तस्मात्तद्वचसः खड्गप्रहारमिव गर्जितात् ।।४४।।
आगच्छागच्छ वत्सेति दूरोदञ्चद्भुजो नृपः ।
आहूय सस्वजे सूनुं वक्षः सिञ्चन् घनाश्रुभिः ।।४५।। युग्मम्
स गद्गदमवादीच्च याच्योऽहं त्वं च याचकः । काकिणीति त्वया क्षुद्रं किमेतद्याचितं ततः ।।४६।।
अथोक्तं मन्त्रिभिर्नाल्पमिदं किन्तु बहु प्रभो । राज्यं हि काकिणी राज्ञां कुमारस्तदयाचत ।।४७।।
सास्रं प्राह नृपः पुत्र राज्यं लभ्यं त्वया भृशम् । त्वन्नेत्रे हरता किन्तु वेधसा न खलायितम् ।।४८।।
सोऽभ्यधात्तात राज्याय मौक्तिकायोषबिन्दुवत् । नार्होऽस्मि नूनमर्हस्तु सुतो मे मेघबिन्दुवत् ।।४९।।
राजोचे ते कदा सूनुः सोऽभ्यधात्तात सम्प्रति । ततः प्रीतः सुतं वेगादानयेत्यादिशन्नृपः ।।५०।।
तमानीतं ततः पश्यन्नवितृप्तैर्विलोचनैः । भूभृन्नाङ्केषु मातिस्म विस्मयस्फुटकण्टकः ।।५१।।

१. ततस्तत्कालमुत्फुल्लपुलकोत्तभितांगकः । जगौ सम्बन्धगर्भिण्या कुणालः कलया गिरा ।।४९।।
चन्द्रगुप्तप्रतिपौत्रो बिन्दुसारस्य नप्तृकः । राज्ञोऽशोकश्रियः पुत्रो याचते तात! काकिणीम् ।।५०।।
ततस्तद्वचसः स्निग्धाद्गर्जितादसिघातवत् । शोकसंभारमुर्वीशः पुनरुद्भूमुद्वहन् ।।५१।।
आगच्छागच्छ वत्सेति दूरोदञ्चद्भुजद्वयः । आहूय सस्वजे सूनुं वक्षः सिञ्चन् घनाश्रुभिः ।।५२।।
सगद्गदमवादीच्च त्वया वत्स क्रमागतम् । राज्यं हि काकिणीशब्दात् कुलजीवितं याचितम् ।।५३।।
तदत्रोत्कण्ठिताः कामं त्वत्तो हि वयमास्महि । चिन्तारत्नं हितार्थि स्युः किंत्वस्यैवार्थिनो जनाः ।।५४।।
त्वच्चक्षुर्दस्युनास्माकं धात्रा किं नु खलायितम् । भाजनं हरताधानां यथातः किमु कुर्महे ।।५५।।
सोऽभ्यधात्तात नार्होऽस्मि राज्यायाम्बुधिबिन्दुवत् । मौक्तिकाय तथाप्यर्हः सुतो मे घनबिन्दुवत् ।।५६।। T,C

तेनारुणकरेणोच्चैर्बालेनोत्सङ्गसङ्गिना । भास्वता भूभृतां मध्ये स पूर्वाद्रिरिवाबभौ ।।५२।।
पित्रा यत्सम्प्रतीत्युक्तं तेन नामक्रियोत्सवे । भूपः सम्प्रतिरित्यस्य शिशोर्नाम विनिर्ममे ।।५३।।
निर्विघ्नमनयद् वृद्धिं कलाः किञ्चाध्यजीगपत् । उज्जयिन्यां च साम्राज्ये प्रौढिप्राप्तमतिष्ठिपत् ।।५४।।
तस्यासीमप्रतापस्य शासनं मनुजेश्वराः । अवचूलकलां निन्युर्दुरतिक्रमविक्रमाः ।।५५।।
किञ्चार्धभरतक्षेत्रे नासीत्कश्चिदसौ नृपः । नास्मै ननाम यो नाम प्राभृतीकृतवैभवः ।।५६।।
आचन्द्रगुप्ताद्वर्धिष्णुमौर्यवंशः[१] शनैः शनैः । सम्प्रतिनृपतौ प्रापत् परां वृद्धिं श्रियान्विताम् ।।५७।।
अन्यदा वन्दितुं जीवत्स्वामिनीं प्रतिमां गुरुः । समवासरतां तत्र महागिरिसुहस्तिनौ ।।५८।।
तत्राथ रथयात्रायां राजमन्दिरमीयिवान् । पुरःप्रसृमरोद्दामनानानाट्योत्सवो रथः ।।५९।।
तत्र वातायनासीनः सम्प्रतिः पृथिवीपतिः । सङ्घसङ्गतमद्राक्षीद् गुरुमार्यसुहस्तिनम् ।।६०।।
ततः क्वचिदमूनस्मि दृष्टपूर्वी मुनीश्वरान् । इत्यूहां चक्रिवान् यावत् तावत्प्राग्जातिमस्मरत् ।।६१।।
ततश्चिन्तामणेर्लाभादधिकं मुदमुद्वहन् । कल्याणिभक्तिरागत्य वन्दतेऽसौ गुरुक्रमान् ।।६२।।
आख्यद्विस्तरतस्तस्य धर्मं जैनेश्वरं गुरुः । प्रकाशयितुमात्मानमप्राक्षीदथ पार्थिवः ।।६३।।
भगवन् कथयाव्यक्तसामायिकफलं किमु । गुरुर्जगाद राज्यादिरव्यक्तसमताफलम् ।।६४।।
सञ्जातप्रत्ययेनोक्तमेवमेतन्न संशयः । परं प्रत्यभिजानीत मां न वेति निवेद्यताम् ।।६५।।
श्रुतोपयोगाद्विज्ञाय प्राग्भवं भगवानथ । प्राह प्रत्यभिजानामि शिष्योऽभूः प्राग्भवे मम ।।६६।।
एवं संवादितज्ञानि पादपीठेऽलुठन्नृपः । प्रभुप्रसादविस्फुर्त्तिः शेषेति स्तुतवान् गुरुम् ।।६७।।
तदाप्रभृति सम्यक्त्वमूलं धर्ममगारिणाम् । प्रपेदे गुरुपादान्ते शङ्कादिभिरकश्मलम् ।।६८।।
शुश्राव श्रुतमश्रान्तश्रद्धासंशुद्धमानसः । जीवाजीवादितत्त्वानि समन्तादधिजग्मिवान् ।।६९।।
विधिना जिनवेश्मानि तद्बिंबानि च निर्ममे । तेषां च स्थापनान्युच्चैः प्राज्यन्याय्यवसुव्ययात् ।।७०।।
परः सहस्रैर्भूभृद्भिरहम्प्रथमिकैर्वृतः । रथयात्रां व्यधात् कुर्वन् रथे पुष्पादिरोहणम् ।।७१।।
तासु वासःफलस्मेरपुष्पखाद्यकपर्दकान् । रथारूढो निचिक्षेप दिक्षु कृत्यविचक्षणः ।।७२।।
अग्रण्यं सर्वपूज्यानां श्रीसङ्घं भृशमार्चिचत् । आवाद्यैः[२] पटहध्वानैरमारिमुदघोषयत् ।।७३।।
किं बहुना ? तथा कथञ्चिज्जैनेद्रं सिषेवे धर्ममात्मनि ।
अजीगमद्यथा सात्म्यं सम्प्रतिः परमार्हतः ।।७४।। कुलकम्

१. वर्धिष्णुभसंस्तस्मात्परं क्रमात् । मौर्यवंशो भृशं तस्मिन् यवमध्यश्रियं दधौ । A,T,C
२. अ मा घातं च सर्वत्र घोषयामास सघृणः T,C

अन्यदा प्राग्भवोद्भूतक्षुदातङ्कस्मृतेर्नृपः । उज्जयिन्याश्चतुर्दिक्षु सत्रागाराण्यचीकरत् ।।७५।।
गुणवानगुणः स्वीयः परो वेत्यविशेषितम् । विश्रब्धस्तेषु भुक्त्वाथ सुष्वाप प्रमदाज्जनः ।।७६।।
भक्त्या विज्ञपयामास गुरुं चार्यसुहस्तिनम् । अनुगृह्णीत मां भक्तपानादिग्रहणाद्विभो ।।७७।।
प्रत्यवोचन्नृपं सूरिः कल्याणी ते मतिर्नृप । किन्त्वाद्यान्तिमतीर्थ्यानां राजपिण्डो न कल्पते ।।७८।।
आहूय सत्राधिकृतानन्येद्युरवदन्नृपः । सत्रेष्वन्नादिना भुक्तशेषेण क्रियते किमु ।।७९।।
अवदंस्ते तदस्माकं भवनेषूपयुज्यते । ततस्तानादिशद्भद्रास्तत्साधुभ्यः प्रयच्छत ।।८०।।
अहं वो वितरिष्यामि मूल्यं बत समर्गलम् । यन्नामी राजपिण्डत्वात् किञ्चिद् गृह्णन्ति मद्गृहे ।।८१।।
एवं पौपिकसार्पिष्कप्रमुखा वणिजः स्वयम् । राज्ञा सप्रणयं प्रोक्ताः प्रदाने स्वस्ववस्तुनः ।।८२।।
राजाज्ञा स्यात्कृता पुण्योपार्जना च यथातथा । इत्यालोच्य वचो राज्ञः सर्वे ते बहु मेनिरे ।।८३।।
ततः स्वादिष्टपानान्नखाद्यादीन्यादराज्जनैः । वस्त्रपात्राणि चात्यर्थं प्रत्यलाभ्यन्त साधवः ।।८४।।
महागिरिश्च तज्ज्ञात्वानुशास्ति स्म सुहस्तिनम् । आर्येदं भक्तपानादि नैषणाशुद्धिमृच्छति ।।८५।।
शिष्यानुरागतः सोऽपि तदवद्यं विदन्नपि । अपह्नुते स्म हि मोहस्तादृशेष्वप्यनर्गलः ।।८६।।
प्रभो नैवात्र शङ्कापि कार्या यस्मादसौ प्रजा ।
भाक्तिकं वीक्ष्य राजानमस्मास्वाद्रियतेतराम् ।।८७।। यदुक्तम्

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः । राजानमनुवर्तन्ते यथा राजा तथा प्रजा ।।८८।।

आः किमस्मात्परं पापं यदकृत्यं विदन्नपि । सेवते किञ्च कृत्यत्वं तस्यैव स्थापयत्यसौ ।।८९।।
तदुत्पथस्थितस्यास्य सहावासेन किं मम ।
इति बुद्ध्या व्यधात्तस्य विसम्भोगं महागिरिः ।।९०।। युग्मम्
सुहस्तिनि ततः सद्यो विवेकः कश्चिदुद्ययौ । निर्म्मथात्सदुपक्रान्ताच्चित्रभानुरिवारणौ ।।९१।।
ततोऽसौ गर्हमाणः स्वं पादलग्नो महागिरिम् । प्रतिपद्य स्वकं दोषं क्षमयामास तत्क्षणात् ।।९२।।
प्रायश्चित्तं वितीर्यार्य महागिरिरमुं रयात् । अन्तश्चकार मण्डल्याः सन्तो हि प्रह्लवत्सलाः ।।९३।।
अन्यदा सम्प्रतिभूपः सर्वानाजूहवन्नृपान् । अनार्यानार्यमूर्धन्यो जैनशासनभावितः ।।९४।।
धर्मं विस्तरतस्तेषामाचचक्षे विचक्षणः । सर्वतो गमयित्वा च ग्राहयामास दर्शनम् ।।९५।।
प्रभुश्चेदस्मि वः सम्यग् भवत श्रावकास्तदा । एतदेवार्थये युष्मन्नार्थादीत्यादिदेश च ।।९६।।

तेऽभिनन्द्य वचो राज्ञः स्वदेशेषु तदाज्ञया । ययुर्धन्यतमंमन्याः प्राप्त्या धर्ममहानिधेः ।।९७।।
ततस्ते स्वीयदेशेषु चण्डडिण्डिमवादनात् । अहिंसां घोषयामासुः सम्प्रतिभक्तमानिनः ।।९८।।
चक्रुश्चैत्यानि तेष्वर्हच्चारुबिम्बान्यतिष्ठिपत् । रथांश्च रथयात्राश्च व्यधुः सम्प्रतिराजवत् ।।९९।।
अथान्यदा पुनस्तेषां धर्मे स्थैर्यविधित्सया । श्रीसुहस्तिनमाचार्यमवन्तीशो व्यजिज्ञपत् ।।१००।।
प्रभो प्रत्यन्तविषयान् बोधयन्तो महर्षयः । विहरन्ति न किं सत्त्वोपकारे ह्यादरः सताम् ।।१।।
आचार्यः प्रत्यवोचत्ते कल्प्याकल्प्यं तथैषणाम् । न जानन्ति तदेषु स्यान्मुनीनां विहृतिः कथम् ।।२।।
मुनिचर्याबहिर्भूतेष्वनार्येषु हि जग्मुषः । प्रायश्चित्तसमापत्तिर्यतेः सूत्रे निगद्यते ।।३।।
ततस्तान् भावयामास मुनिवेषधरैर्भटैः । अनार्यदेशान्नृपतिरसाध्यं किं हि धीमताम् ।।४।।
तैर्भैक्षमेषणापूर्वं गृह्णद्भिः सर्वतो यदा । कल्प्याकल्प्यं च जल्पद्भिर्भावयामासिरे जनाः ।।५।।
तदा तेषु सुखं साधुविहारः समजायत । क्षेत्रेषु बीजनिक्षेप इव कृष्टेषु धीधनैः ।।६।।
कुद्दुकान्ध्रमहाराष्ट्रद्रविडाद्यास्तदादितः । अनार्यदेशाः साधूनां जग्मुः सुखविहारताम् ।।७।।
श्रीमान् सम्प्रतिराजेन्द्रो मौर्यवंशोज्ज्वलध्वजः । परःसहस्रैर्दुर्धर्षः सैन्यैरिव गुणाद्भूतैः ।।८।।
नातिक्रामन् क्वचिद्रत्नत्रयीं शक्तित्रयीमिव । धर्मं न्यायमिव स्थाने प्रयुञ्जानश्चतुर्विधम् ।।९।।
पुरस्कुर्वन्नुपायज्ञममात्यमिव सद्गुरुम् । समूलघातमाहत्य मिथ्यात्वमिव शात्रवम् ।।१०।।
इत्थं स्वस्येव जैनस्य निस्सीममहिमावधिः । श्रीशासनस्य साम्राज्यमेकच्छत्रमसूत्रयत् ।।११।।
इत्थं यथा परिपचेलिमपुण्यलभ्यमुच्चैस्तरामधृतसम्प्रतिभूमिपालः ।
तद्वद् बुधाः शिवपदद्रुमबीजभूतमव्याहतं वहत दर्शनरत्नमेतत् ।।१२।।

इति गाथार्थः।।२४९।।

* नवतत्त्वप्रकरणे-२ *

साम्प्रतं सूत्रकार एव सम्यक्त्वस्य यावन्तो भेदाः सम्भवन्ति, तावतः सूचयंस्तत्फलं चोपदर्शयंस्तद्विषयं सनिदर्शनं कृत्योपदेशमाह –

एगविहदुविहतिविहं चउहा पंचविहदसविहं सम्मं ।
मोक्खतरुबीयभूयं संपइराया व धारेज्जा ।।

एकविधद्विविधत्रिविधमित्येकविधमेकप्रकारं च तद् द्विविधं च द्विभेदमेकभेदद्विविधं तच्च तत्त्रिविधं

च त्रिप्रकारमेकविधद्विविधत्रिविधमिति कर्म्मधारयसमासः । **चतुर्द्धा** चतुर्भिः प्रकारैः । पञ्च विधा अस्येति पञ्चविधं पञ्चभेदं तच्च तद्दशविधं च दशप्रकारं **पञ्चविधदशविधं 'सम्मं'** इति सम्यक्त्वम्, **मोक्ष** एव मुक्तिरेव **तरुर्वृक्षस्तस्य बीजभूतं** कारणभूतम्, **सम्प्रतिराज इव धारयेद्** बिभृयात् । तात्पर्यार्थस्त्वयम्- एकविधादिभेदयुक्तं सम्यक्त्वं यतो मोक्षतरुबीजमतो धारयेत्सुस्वार्थी जीवस्तत्सम्प्रतिराज इव । इति गाथार्थः ।।२।।

** प्रवचनसारोद्धारे-९४२ **

एगविहदुविहतिविहं चउहा पंचविहदसविहं सम्मं ।
दव्वाइ कारगाई उवसमभेएहि वा सम्मं ।।

एकविधं द्विविधं त्रिविधं चतुर्धा पञ्चविधं दशविधं सम्यक्त्वं भवतीति शेषः, तत्रैकविधं तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वम्, एतच्चानुक्तमप्यविवक्षितोपाधिभेदत्वेन सामान्यरूपत्वादवसीयत इत्यस्यां गाथायां न विवृत्तम्, द्विविधादि तु न ज्ञायत इत्युल्लेखमाह-**'दव्वाइ'** इत्यादि, द्विविधं द्रव्यादिभेदतः, तत्र च 'दव्व'त्ति सूचामात्रत्वाद् द्रव्यतो भावतश्च, द्रव्यतो विशोधिविशेषेण विशुद्धिकृता मिथ्यात्वपुद्गला एव, भावतस्तु तदुपष्टम्भोपजनितो जीवस्य जिनोक्ततत्त्वरुचिपरिणामः, आदिशब्दः प्रकारान्तरैरपि द्विविधत्वदर्शनार्थः, तेन नैश्चयिकव्यावहारिकभेदतः पौद्गलिकापौद्गलिकभेदतो नैसर्गिकाधिगमिक-भेदतोऽपि च द्विविधमिति, तत्र यद्देशकालसंहननानुरूपं यथाशक्ति यथावत्संयमानुष्ठानरूपं मौनम् अविकलं मुनिवृत्तं तन्नैश्चयिकं सम्यक्त्वम्, व्यावहारिकं तु सम्यक्त्वं न केवलमुपशमादिलिङ्गगम्यः शुभात्मपरिणामः किन्तु सम्यक्त्वहेतुरप्यर्हच्छासनप्रीत्यादिः कारणे कार्योपचारात्सम्यक्त्वम्, तदपि हि पारम्पर्येण शुद्धचेतसामपवर्गप्राप्तिहेतुर्भवतीति, उक्तं च -

जं मोणं तं सम्मं जं सम्मं तमिह होइ मोणं तु । निच्छयओ इयरस्स उ सम्मं सम्मत्तहेऊवि ।।

[यन्मौनं तत्सम्यक्त्वं यत्सम्यक्त्वं तदिह भवति मौनमेव ।
निश्चयस्य इतरस्य तु सम्यक्त्वहेतुरपि सम्यक्त्वम् ।।]

व्यवहारनयमतमपि च प्रमाणम्, तद्बलेनैव तीर्थप्रवृत्तेः, अन्यथा तदुच्छेदप्रसङ्गात्, तदुक्तम् -

जइ जिणमयं पवज्जह ता मा ववहारनिच्छयं मुयह । ववहारनओच्छेए तित्थुच्छेओ जओऽवस्सं ।।
[यदि जिनमतं प्रतिपद्यसे तर्हि व्यवहारनिश्चयौ मा मुञ्च । व्यवहारनयोच्छेदे तीर्थोच्छेदो यतोऽवश्यं ।।]

इति, तथाऽपनीतमिथ्यास्वभावसम्यक्त्वपुञ्जगतपुद्गलवेदनस्वरूपं क्षायोपशमिकं पौद्गलिकम्, सर्वथा मिथ्यात्वमिश्रसम्यक्त्वपुञ्जपुद्गलानां क्षयादुपशमाच्च जातं केवलजीवपरिणामरूपं क्षायिकमौपशमिकं चापौद्गलिकम्, नैसर्गिकाधिगमिके पुनरग्रे वक्ष्येते, तथा 'त्रिविधं **कारकादि**' कारकरोचकदीपकभेदतः, **'उवसमभेएहिं व'**त्ति वाशब्दस्त्रैविध्यस्यैव प्रकारान्तरप्रदर्शनार्थः, बहुवचनं च गणार्थम्, ततस्त्रिविधं चतुर्विधं

पञ्चविधं दशविधं च **सम्यक्त्वमुपशमादिभिर्भेदैर्भवतीति**, इदमुक्तं भवति–औपशमिकक्षायिकक्षायोपशमिकभेदात् त्रिविधम्, औपशमिकक्षायिकक्षायोपशमिकसास्वादनभेदाच्चतुर्विधम्, औपशमिकक्षायिकक्षायोपशमिकसास्वादनवेदकभेदात्पञ्चविधम्, एतदेव प्रत्येकं निसर्गाधिगमभेदाद्दशविधमिति, कथं पुनर्द्विविधादिभेदं **सम्यक्त्वमि**त्याह–सम्यग्–अवैपरीत्येनागमोक्तप्रकारेण, न तु स्वमतिपरिकल्पितभेदैरिति भावः ।।९४२।।

चक्रे० : अथ सम्यक्त्वयोग्यमाहुः –

देव० : अथ सम्यक्त्वयोग्यमाह –

भासामइबुद्धिविवेगविणयकुसलो जियक्ख गंभीरो।
उवसमगुणेहिं जुत्तो निच्छयववहारनयनिउणो।।२५०।।
जिणगुरुसुयभत्तिरओ हियमियपियवयणजंपिरो धीरो ।
संकाइदोसरहिओ अरिहो सम्मत्तरयणस्स।।२५१।।

चक्रे० : भाषा सावद्येतररूपा, **मति**र्यथावस्थितशास्त्रार्थबोद्धी, **बुद्धि**रौत्पत्त्यादिका, **विवेकः** कृत्याकृत्यादिविषयः, **विनयः** प्रतीतः, एषु **कुशलः**, **जिताक्षो** जितेन्द्रियः, **गम्भीरो**ऽलक्ष्यरोषतोषादिः, **उपशम**प्रधानै**र्गुणैर्युक्तः**, **निश्चयनयव्यवहारनयनिपुणः** ।।२५०।।

द्वितीयगाथा तु स्पष्टा, नवरं **शङ्कादिदोषरहितः**, तत्र शङ्का जिनधर्मस्तत्त्वमतत्त्वं वेति सन्देहः, काङ्क्षा – अन्यान्यदर्शनाभिलाषः, विचिकित्सा आत्मनः फलं प्रति संशयः, आसीत्पूर्वेषां फलं सात्त्विकत्वाद् मादृशां तु क्व भविष्यति, विजुगुप्सा वा विदः साधवस्तेषां जुगुप्सा सदाचारनिन्दा, यथाऽतिमलदुर्गन्धा इमे मुनयो यद्युष्णोदकेन स्नायुस्तदा को दोषः स्यात्, परपाषण्डिप्रशंसा तत्संस्तवस्तैः सह परिचयः, एते पञ्च सम्यक्त्वाऽतिचाराः ।।२५१।।

देव० : भाषा सावद्येतररूपा, **मति**र्मेधा यथास्थितशास्त्रार्थविवेचनम्, **बुद्धिरौ**त्पत्तिक्यादिका, **विवेकः** सम्यक्कृत्याकृत्यपर्यालोचनम्, **विनयो** गुर्वादिष्वभ्युत्थानादिः, एषु **कुशलो** निपुणः । **जिताक्षो** नियन्त्रितेन्द्रियो **गम्भीरो**ऽनुपलक्षितरोषतोषविषादादिः, विशेषणसमासश्चानयोः । **उपशमेनो**पलक्षिता **गुणाः** शमसंवेगादयो वक्ष्यमाणास्तै**र्युक्तो,** नयशब्दस्य प्रत्येकमभिसम्बन्धा**न्निश्चयनयव्यवहारनयनिपुणः** ।।२५०।।

तथा **जिनगुरुश्रुतभक्तिरतो** व्यक्तम्, **हितमितप्रियवचनजल्पक**स्तत्र हितं पथ्यान्नवद्, मितमल्पं कार्यापेक्षमित्यर्थः, प्रियमाह्लादि, तच्च तद्वचनं च तज्जल्पतीत्येवंशीलः, प्राक् सामान्येन भाषापरिज्ञानमभिहितम्, इह तु यथा तज्जल्पनं तथेत्यपौनरुक्त्यम्, **धीरो** व्यसनेषु चाविक्लवः, **शङ्कादयः** शङ्काकाङ्क्षाविचिकित्सापरपाषण्डप्रशंसातत्संस्तवास्ते च ते, दूष्यते सम्यक्त्वमेभिरिति **दोषाश्च** तै **रहितः** । तत्र शङ्का सन्देहः, सा च सर्वविषया देशविषया च, आद्यास्ति वा नास्ति वा धर्म इत्यादि, द्वितीया त्वेकैकवस्तुधर्मगोचरा, यथास्ति जीवः केवलं सर्वगोऽसर्वगो वा सप्रदेशोऽप्रदेशो वेत्यादि, इयं च द्विधाप्यर्हत्प्रणीतप्रवचनेऽप्रत्ययरूपा सम्यक्त्वं दूषयति, केवलागमगम्या अपि हि पदार्था अस्मदादिप्रमाणपरीक्षानिरपेक्षा आप्तप्रणेतृकत्वान्न सन्देग्धुं योग्या, यत्रापि मोहवशात् क्वचन संशयो भवति तत्राप्यप्रतिहतेयमर्गला यथा-

तत्थ य मइदोब्बलेणं तव्विहायरियविरहओ वा वि ।
णेयगहणत्तणेण य नाणावरणोदएणं च ।।

हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झिज्जा।
सव्वन्नुमयमवितहं तहा वि तं चिंतए मइमं ।।

अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।
जियरागदोसमोहा नऽन्नहावाइणो तेणं ।। [ध्यानशतक-४७,४८,४९]

काङ्क्षा अन्यान्यदर्शनग्रहः, सापि सर्वतो देशतश्च, सर्वतः सर्वपाषण्डिधर्मकाङ्क्षारूपा, एकादिदर्शनाकाङ्क्षा तु देशाकाङ्क्षा, यथा सुगतेन भिक्षुणामक्लेशको धर्म उपदिष्टः । यथा

मृद्वी शय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे ।
द्राक्षाखण्डं शर्करा मध्यरात्रे मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ।। [ ]

एतदपि घटमानकमेव, न दूरापेतमित्यादि । इयमपि परमार्थतो जिनमतानाश्वासरूपा सम्यक्त्वं दूषयति । विचिकित्सा चित्तविप्लवः, स च सत्यपि युक्त्यागमोपपन्ने जिनधर्मेऽस्य महतस्तपः-क्लेशस्यायत्यां फलसम्पद्भावि ?[अ]न्यथा क्लेशमात्रमेवेति, यतः कृषीवलादीनां क्रियाः सफला अफलाश्च दृश्यन्त इति । यदाह-

पुव्वपुरिसा जहोचियमग्गचरा घडइ तेसिं फलजोगो ।
अम्हेसु धीसंघयणविरहओ न तह तेसिं फलं ।। [ ]

इह च शङ्का सकला सकलपदार्थभाक्त्वेन द्रव्यगुणविषया, असौ पुनः क्रियाविषयैवेति भेदः, यद्वा विचिकित्सा सदाचारनिन्दा, यथाऽस्नाने प्रस्वेदजलक्लिन्नत्वाद् दुर्गन्धवपुष इति, को दोषः स्याद्यदि प्रासुकवारिणाङ्गप्रक्षालनममी कुर्वीरन्निति । पाषण्डप्रशंसा च सर्वतः सर्वदर्शनानि युक्तियुक्तानीति मध्यस्थप्राया दृष्टिरिदमपि सम्यक्त्वदूषणमेव, यदुक्तम् –

सुनिश्चितं मत्सरिणो जनस्य न नाथ ! मुद्रामतिशेरते ते ।
माध्यस्थ्यमास्थाय परीक्षका ये मणौ च काचे च समानुबन्धाः ।।[अयोगव्य.द्वा॰ २७]

देशतस्त्विदमेव बुद्धादिवचनं तत्त्वमिति, इदं तु व्यक्तमेव सम्यक्त्वदूषणम्, तैः सह संस्तवः परिचयस्तत्संस्तवः, एकत्र वासे हि तत्प्रतिक्रियादर्शनाद् दृढसम्यक्त्वस्यापि दृष्टिभेदः सम्भाव्यते, किमुत मन्दबुद्धेर्नवधर्मस्येति । एवंविधगुणयुक्तोऽर्हः **सम्यक्त्वरत्नस्य,** अमीषां गुणानां मध्ये केचित्सम्यक्त्वलाभहेतवः, केचिद् भूषणकल्पाः, केचित्प्रतिपातप्रतिबन्धकाश्च विज्ञेया, एतावद्गुणमार्गणेन च न्यक्कृतचिन्तामणिं सम्यक्त्वरत्नमपात्रे समारोपयतः सिद्धान्त-विराधनामाहेति गाथार्थः।। २५१।।

चक्रे॰ : अथ सम्यक्त्ववतां श्लाघामाहुः –

देव॰ : अथ स्वर्गापवर्गादिपरमसुखनिबन्धनसम्यक्त्वगुणशालिनां श्लाघामाह –

ते धन्ना ताण नमो ते च्चिय चिरजीविणो बुहा[1] ते य।
जे निरइयारमेयं धरंति सम्मत्तवररयणं।।२५२।।

चक्रे॰ : पाठसिद्धा, इह केचिज्जिनोक्तकालद्रव्यादिषु विप्रतिपद्यन्ते तान् निराकर्तुमाहुः –

त्रैकाल्यं द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्याः,
पञ्चान्येवास्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः।
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः;
प्रत्येति श्रद्दधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः ।। [प्रव.सारो॰ ९७१]

त्रिकालमेव त्रैकाल्यमतीतानागतवर्तमानरूपम् । द्रव्याणि गुणाश्रयास्तेषां षट्कम्, धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायजीवास्तिकायपुद्गलास्तिकायकालरूपम् । नवपदानि जीवाजीवादीनि तत्त्वानि तैः सहितम्, कायाश्च लेश्याश्च कायलेश्याः षट्सङ्ख्याः कायलेश्याः,

१. प्रक्रिया T,B,C २. बुहा ते उ A

षट्कायलेश्याः, जीवानां षट्कायलेश्या जीवषट्कायलेश्याः, तत्र षट्कायाः पृथ्वीकायादयः, षड् लेश्याः कृष्णाद्याः, पञ्चान्येवास्तिकाया धर्मास्तिकायाद्याः, पञ्चशब्दो व्रतादिष्वपि योज्यः, ततो व्रतानि पञ्च प्राणिवधविरमणादीनि, समितयः पञ्चेर्याद्याः, गतयो नारकाद्याः, ज्ञानानि मतिज्ञानादीनि, चारित्राणि सामायिकं छेदोपस्थापनीयं परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातं चेति । पश्चार्धं स्पष्टम् ।।२५२।।

देव० : त एव धनमर्हन्तीति **धन्या** आत्यन्तिकैकान्तिकधनवन्तः, उक्तं हि –

धनेन हीनोऽपि धनी मनुष्यो यस्यास्ति सम्यक्त्वधनं विचित्रम् ।
धनं भवेदेकभवे सुखाय भवे भवेऽनन्तसुखी सुदृष्टिः ।। [ ]

तेभ्य एव **नमः,** सकलगुणाधारदर्शनगुणयुक्तत्वात्, **त** एव **चिय** एवार्थे सर्वत्र योज्यः, **चिरजीविनो** भवन्त्विति शेषो धर्मानुगतजीवितत्वात् । **बुधाश्च त एव** विवेकसम्पन्नत्वात् । **तुः** समुच्चये दर्शित एव, उत्तरार्धं स्पष्टम्, केवलमतिचाराः प्रागभिहिता इति गाथार्थः ।

इह च दर्शनविषयेषु कालद्रव्यतत्त्वादिषु क्वचित् सङ्ख्याविषया क्वचिन्नामविषया क्वचिच्चास्तित्वविषया परेषां विप्रतिपत्तिरतस्तन्निराकर्तुमाह –

त्रैकाल्यं द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्याः,
पञ्चान्येवास्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः ।
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः;
प्रत्येति श्रद्दधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः ।। [प्रव.सारो॰ ९७१]

व्याख्या–त्रिकालमेव त्रैकाल्यं भूतभवद्भविष्यत्स्वरूपम्, द्रव्याणि गुणाश्रयास्तेषां षट्कं धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायकालपुद्गलास्तिकायजीवास्तिकायरूपम्, पद्यन्ते गम्यन्ते सम्यग्ज्ञानिभिरिति पदानि तत्त्वानि नव च जीवाजीवादीनि तानि पदानि च तैः सहितम्, षट्शब्दः सिंहावलोकितन्यायेन जीवशब्देनापि सम्बध्यते, ततः प्रत्येकं षड्जीवा एकद्वित्रिचतुष्पञ्चेन्द्रियानिन्द्रियाः, कायाः पृथ्वीकायादयः, लेश्याः कृष्णाद्याः, पञ्चान्येवास्तिकाया धर्मास्तिकायादयः, कालस्तु निरुद्धसमयरूपत्वान्नास्तिकायः, पञ्चशब्दस्योत्तरपदेष्वपि सम्बन्धः । व्रतानि प्राणिवधविरमणादीनि, समितय ईर्याद्या, गतयो नारकाद्या, ज्ञानानि मत्यादीनि चारित्रभेदाः

सामायिकादय इतिरुल्लेखे, एतत् त्रैकाल्यादिज्ञानश्रद्धानानुष्ठानविषयतया मोक्षमूलम् । किं स्वमतिकल्पनया ? नेत्याह—त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैस्ततश्च प्रत्येति निश्चयरूपतया जानाति, ज्ञातमपि कश्चिन्न तथेति प्रतिपद्यत इत्याह, श्रद्दधाति रोचयति, रोचयन्नपि कश्चिन्नानुतिष्ठतीत्याह, स्पृशति चासेवते, मतिमान् यः, इह च प्रत्ययादीनां त्रैकाल्यादिषु यथासम्भवं योजना कार्या, स वै स्फुटं शुद्धदृष्टिः सर्वोपधा शुद्धदर्शन इति वृत्तार्थः।।२५२।।

चक्रे० : कैः पुनर्लिङ्गैः सम्यक्त्वमस्यास्तीति श्रद्धेयमित्याहुः —

देव० : कैः पुनर्लिङ्गैः सम्यक्त्वमस्तीति श्रद्धेयमित्याह —

उवसम संवेगो वि य निव्वेओ विय तहेव अणुकंपा।
अत्थिक्कं चेव तहा सम्मत्ते लक्खणा पंच।।२५३।।

चक्रे० : १-**उपशम**स्तीव्रकषायानुदयः, २-**संवेगो** मोक्षाभिलाषः, ३-**निर्वेदो** भववैराग्यम्, ४-**अनुकम्पा** दुःखितेषु दया, ५-**आस्तिक्यं** तत्त्वान्तरश्रवणेऽपि जिनधर्म एवास्तिकभावः, एतानि **पञ्च सम्यक्त्वे** सम्यक्त्वसत्तायां **लक्षणानि**।।२५३।।

देव० : १-**उपशमो**ऽनन्तानुबन्धिनामनुदयः, विभक्तिलोपः प्राकृतत्वात्, अन्ये तु क्रोधकण्डूविषयतृष्णोपशान्तिरुपशम इत्याहुः । नन्वेवं कृष्णश्रेणिकादीनां सापराधे निरपराधे च परे क्रोधवतां विषयतृष्णातुराणां च कथमुपशमः ? तदभावे च सम्यक्त्वं न गम्येत, नैवं लिङ्गिनि सति लिङ्गैरवश्यं भाव्यमिति नायं नियमः । दृश्यते हि धूमरहितोऽप्ययस्कारगृहेषु वह्निः । अयं तु नियमः सुपरीक्षिते लिङ्गे लिङ्गी भवत्येव, यदाह –

लिङ्गे लिङ्गी भवत्येव लिङ्गीन्येवेतरत्पुनः ।
नियमस्य विपर्यासे सम्बन्धो लिङ्गलिङ्गिनोः।। [ ]

सञ्ज्वलनोदयाद्वा कृष्णादीनां क्रोधकण्डू विषयतृष्णे, सञ्ज्वलना अपि केचित्तीव्रतयाऽनन्तानुबन्धिसदृशविपाकवन्त इति सर्वमनवद्यम्, २-**संवेगो** मोक्षाभिलाषो**ऽपि चे**ति समुच्चये, एवं सर्वाव्ययानि । ३-**निर्वेदो** भववैराग्यम्, अन्ये तु संवेगो भवविरागः, निर्वेदो मोक्षाभिलाष इति विपर्ययमाहुः । ४-**अनुकम्पा** दुःखितेष्वपक्षपातेन दुःखप्रहाणेच्छा । ५-अस्तीति मतिरस्येत्यास्तिकस्तस्य भावः कर्म वाऽ**स्तिक्यम्,** तत्त्वान्तरश्रवणेऽपि जिनोक्ततत्त्वविषये निराकाङ्क्षा-

प्रतिपत्तिः । एतानि सम्यक्त्वे लक्षयितव्यानीति शेषः । लक्ष्यते गम्यते परोक्षमपि सम्यक्त्व-मेभिरिति **लक्षणानि पञ्चेति** गाथार्थः।।२५३।।

**** प्रवचनसारोद्धारे-९३६ ****

'लक्खणपंचविहसंजुत्तं'ति विवृण्वन्नाह–

उवसम संवेगोऽवि य निव्वेगो तह य होइ अणुकंपा ।
अत्थिक्कं चिय एए संमत्ते लक्खणा पंच ।।

'उवसमे'त्यादि, अपराधविधायिन्यपि कोपपरिवर्जन**मुपशमः,** स च कस्यचित्कषायपरिणतेः कटुकफलावलोकनाद्भवति कस्यचित्पुनः प्रकृत्यैवेति, तथा नरामरसुखपरिहारेण मुक्तिसुखाभिलाषः **संवेगः,** सम्यग्दृष्टिर्हि नरेन्द्रसुरेन्द्राणां विषयसुखानि दुःखानुषङ्गाद् दुःखतया मन्यमानो मोक्षसुखमेव सुखत्वेन मन्यतेऽभिलषति चेति, तथा नारकतिर्यगादिसांसारिकदुःखेभ्यो निर्विण्णता **निर्वेदः,** सम्यग्दर्शनी हि दुःखातिगहने संसारकारागारे गुरुतरकर्मदण्डपाशिकैस्तथा तथा कदर्थ्यमानः प्रतिकर्तुमक्षमो ममत्वरहितश्च दुःखेन निर्विण्णो भवति, अन्ये तु संवेगो भवविरागो निर्वेदो मोक्षाभिलाष इत्यनयोरर्थ-व्यत्ययमाहुः, **तथा** दुःखितेषु प्राणिष्वपक्षपातेन दुःखप्रहाणेच्छा दयाऽ**नुकम्पा,** पक्षपातेन तु करुणा स्वपुत्रादौ व्याघ्रादीनामप्यस्त्येव सा चानुकम्पा द्रव्यतो भावतश्च भवति, द्रव्यतः सत्यां शक्तौ दुःखप्रतिकारेण भावत आर्द्रहृदयत्वेनेति, तथाऽस्तीति मतिरस्येत्यास्तिकस्तस्य भावः कर्म वाऽऽ**स्तिक्यम्,** तत्त्वान्तर-श्रवणेऽपि जिनगदिततत्त्वविषये निराकाङ्क्षा प्रतिपत्तिः, **एतान्यु**पशमादीनि **पञ्च सम्यक्त्वे** सम्यक्त्वविषयाणि **लक्षणान्ये**तैः परस्थं परोक्षमपि सम्यक्त्वं सम्यगुपलक्ष्यत इति ।।९३६।।

चक्रे० : सम्यक्त्ववांश्च शुद्धपरिणामः स्यादित्याहुः –

देव० : अथानादिविषयकषायसंवलितात्मसु प्राणिषु कथमुपशमादि सम्भवतीत्याह –

इत्थ य परिणामो खलु जीवस्स सुहो उ होइ विन्नेओ[१] ।
किं मलकलंकमुक्कं कणगं भुवि ज्झामलं होइ।।२५४।।

चक्रे० : अत्र च सम्यक्त्वे सति **परिणामो** भावः **खलु** निश्चयेन **जीवस्य शुभ** एव **भवति विज्ञेयः** । एतदेवार्थान्तरन्यासेन समर्थयन्ति । **किं मलकलङ्कमुक्तं** किट्टकालिमादिरहितम्, **कनकं भुवि ध्यामलं भवति** ? न भवतीत्यर्थः।।२५४।।

---

१. विन्नेउ P,K

देव० : अत्र च सम्यक्त्वे सति **परिणामो** भावः, **खलु** निश्चयेन **शुभ** एव विशुद्ध एव **भवती**ति **ज्ञातव्यः** । तत्प्रतिबन्धकक्लिष्टकर्मापगमात्, शुभभावरूपाश्चाम्युपशमादय उक्तस्यैव समर्थनायाह-**किं मलकलङ्कमुक्तं** किट्टकालिमादिरहितं **कनकं भुवि ध्यामलं भवति ?** नैवेत्यर्थ इति गाथार्थः।।२५४।।

**** धर्मसंग्रहण्याम्-८०७, श्रावकप्रज्ञप्तौ-५४ ****

तथा चाह -

एत्थ य परिणामो खलु जीवस्स सुहो उ होइ विन्नेओ ।
किं मलकलंकमुक्कं कणगं भुवि झामलं होइ ? ।।

अत्र सम्यक्त्वे सति **परिणामो**ऽध्यवसायः, **खलु**रवधारणे, **शुभ** एव, **तु**रेवकारार्थः, **जीवस्य भवति विज्ञेयो** न त्वशुभः । अथवा किमत्र चित्रमिति प्रतिवस्तूपमामाह-'किमित्यादि' **किं मलकलङ्करहितं कनकं भुवि ध्यामलं भवति ?** नैव भवतीति भावार्थः । एवमिहापि मलकलङ्कस्थानीयं प्रभूतं क्लिष्टं कर्म्म यदा क्षीणं भवति जीवस्य तदा नैव ध्यामलत्वतुल्योऽशुभपरिणामो भवतीति ।।८०७।।

चक्रे० : सम्प्रत्युपशमादिभ्यः सत्त्वानां क्रियाविशेषमाहुः -

देव० : सम्प्रत्युपशमादीनामेव सहेतुकफलदर्शनद्वारेण स्वरूपमुपवर्णयति -

पयईए कम्माणं वियाणिउं वा विवागमसुहं ति।
अवरद्धे वि न कुप्पइ उवसमओ सव्वकालंपि।।२५५।।

चक्रे० : प्रकृत्या स्वभावेन **कर्मणां** कषायरूपाणां **विज्ञाय वा विपाकमशुभ-मित्य**स्माद्धेतो**रपराद्धेऽपि** 'कर्त्तरि क्तः' कृतापराधेऽपि **न कुप्यति । उपशमतः सर्वकालमप्य** पराधिनिग्रहक्षमत्वकालेऽपीत्यर्थः।।२५५।।

देव० : प्रकृत्या स्वभावेन **कर्मणां** कषायलक्षणानां **विज्ञाय वा विपाकं** परिणाम**मशुभं** कटुफल**मित्य**स्माद्धेतो**रपराद्धेऽपि** भावे क्तः, विप्रिये सति **न कुप्यति** श्रुतत्वादपराधकारिभ्य एव **उपशमतः सर्वकालमप्य**पराधनिर्यातनसामर्थ्योत्पत्तावपीत्यर्थ इति गाथार्थः।।२५५।।

** धर्मसंग्रहण्याम्-८०८, श्रावकप्रज्ञप्तौ-५५ **

प्रशमादीनां बाह्यप्रशस्तयोगत्वमुपदर्शयति –

पयईए व कम्माणं वियाणिउं वा विवागमसुहं ति ।
अवरद्धेऽवि न कुप्पइ उवसमतो सव्वकालंपि ।।

प्रकृत्या वा सम्यक्त्वाणुवेदनजनितस्वभावरूपया **विज्ञाय वा कर्म्मणां** कषायनिबन्धनानां **विपाकमशुभं** यथा कषायाविष्टोऽन्तर्मुहूर्त्तमात्रेणापि यद् बध्नाति तदनेकाभिरपि सागरोपमकोटीभिर्दुःखेन वेदयत इति, ततः किमित्याह–'**अवरद्धे** इत्यादि' अपराध्यति स्मेत्यपराद्धः प्रतिकूलकारी तस्मिन्नपि न कोपं गच्छति, **उपशमत** उपशमेन हेतुना **सर्वकालमपि** यावत्सम्यक्त्वपरिणामोऽवतिष्ठत इति भावः ।।८०८।।

चक्रे० : तथा –

देव० : तथा –

नरविबुहेसर[१]सोक्खं दुक्खं चिय भावओ उ मन्नंतो।
संवेगओ न [२]मोक्खं मोत्तूणं किंपि पत्थेइ।।२५६।।

चक्रे० : नरविबुधेश्वराणां नरेन्द्रसुरेन्द्राणां **सौख्यं दुःखमेव भावतो मन्यमानः ।**

कह तं भन्नइ सुक्खं सुचिरेण वि जस्स दुक्खमल्लियइ ।
जं च मरणावसाणे भवसंसाराणुबंधिं च ।।[उपदेशमाला-३०] इति वचनात् ।

संवेगतो न मोक्षं मुक्त्वा किमपि प्रार्थयते।।२५६।।

देव० : नरविबुधेश्वराणां नरेन्द्रसुरेन्द्राणां सुखमेव **सौख्यं** विषयसेवाजनिता मनः-परितुष्टिर्दुःखानुषङ्गाद् **दुःखमेव** ।

कह तं भन्नइ सुक्खं सुचिरेण वि जस्स दुक्खमल्लियइ ।
जं च मरणावसाणे भवसंसाराणुबंधिं च ।। [उपदेशमाला-३०]

भवभ्रमणानुबन्धि इति वचनाद्भावतः परमार्थतस्तुः पूरणे, **मन्यमानः संवेगतो न मोक्षं मुक्त्वा किमपि प्रार्थयते**ऽभिलषति, मोक्षसुखस्यैव भावतः सुखत्वेन मतत्वादिति गाथार्थः।।२५६।।

---

१. सुक्खं दुक्खं चिय भावओ य T,C,P,K २. मुक्खं मुत्तूणं T,C,P,K

** धर्मसंग्रहण्याम्-८०९, श्रावकप्रज्ञप्तौ-५६ **

तथा –

नरविबुहेसरसोक्खं दुक्खं चिय भावतो तु मन्नंतो ।
संवेगतो न मोक्खं मोत्तूणं किंचि पत्थेइ ।।

नरविबुधेश्वरसौख्यं चक्रवर्तीन्द्रसौख्यं कर्मजनिततया सावसानत्वेन दुःखनिबन्धनत्वात्, **दुःखमेव भावतः** परमार्थतो **मन्यमानः संवेगतः** संवेगेन हेतुना, **न मोक्षं** स्वाभाविकं जीवरूपमपर्यवसानं **मुक्त्वा किञ्चिदन्यत् प्रार्थयते** ।।८०९।।

चक्रे० : तथा –

देव० : तथा –

नारय-तिरिय-नरामरभवेसु निव्वेयओ वसइ दुक्खं।
अकयपरलोयमग्गो ममत्तविसवेगरहिओ वि।।२५७।।

चक्रे० : नारकादिभवेषु विषये **निर्वेदतो** वैराग्यवशान्**ममत्वमेव विषं** तस्य **वेगो** लहरिस्तद्**रहितोऽपि** धनस्वजनशरीरादिषु त्यक्तात्मीयत्वाभिमानोऽपि चारित्रमोहनीयवशान्न कृतः परः प्रकृष्टो लोकः सिद्धिक्षेत्ररूपस्तस्य मार्गश्चारित्रं येन सो**ऽकृतपरलोकमार्गः** । **दुःखं** यथा भवत्येवं **वसति** । चारित्रमप्राप्नुवन् कष्टेनास्त इत्यर्थः।।२५७।।

देव० : नारकादिभवेषु निर्वेदतो दुःखं यथा भवत्येवं **वसत्या**स्ते, अयमभिप्रायो नानाविधशारीरमानसदुःखगहने संसारकारागारे कर्मदण्डपाशिकैस्तथा तथा कदर्थ्यमानः प्रतिकर्तुमसमर्थो निर्वेदाद् दुःखं वसति, किंविशिष्टः सन् ? चारित्रमोहनीयपारतन्त्र्यान्न **कृतः परलोको** जन्मान्तरम्, स पुनरिह प्रस्तावाच्छुभस्तस्य मार्ग इव **मार्गः** कुशलानुष्ठानं येन सोऽपि, यद्वा परः प्रकृष्टः सर्वातिशायी स चासाववयवेऽपि समुदायप्रयोगाल्लोकश्च सिद्धिक्षेत्रलक्षणः परलोकस्तस्य मार्गः प्राग्वत्, यद्यपि कर्मदोषाद्भवाब्धेर्निस्तरणोपायं नानुतिष्ठति, तथापि तत्र निर्विण्ण एवास्त इत्यर्थः । अत एव **ममत्वमेव** दारुणपरिणामत्वेन **विषं** तस्य **वेगो** लहरिस्तेन **रहितो**ऽनित्यतादिभावनाभावितत्वेन धनस्वजनशरीरादिवस्तुषु त्यक्तात्मीयत्वाभिमान इत्यर्थो**ऽपि**र्भिन्नक्रमे योजित एवेति गाथार्थः।।२५७।।

** धर्मसंग्रहण्याम्-८१०, श्रावकप्रज्ञप्तौ-५७ **

नारयतिरियनरामरभवेसु निव्वेदतो वसति दुक्खं ।
अकयपरलोगमग्गो ममत्तविसवेगरहितो वि ।।

नारकतिर्यग्नरामरभवेषु सर्वेष्वेव **निर्वेदतो** निर्वेदेन कारणेन **वसति दुःखम्** । किंविशिष्टः सन्नित्याह- **अकृतपरलोकमार्गोऽ**कृतसदनुष्ठानः । अयं हि सकलेऽपि जीवलोके परलोकानुष्ठानमन्तरेण सर्वमेवासारं मन्यत इति । पुनः कथम्भूत इत्याह–**ममत्वविषवेगरहितोऽपि,** अपिरेवकारार्थः, प्रकृत्या ममत्वविषवेगरहित एव, विदिततत्त्वत्वादिति ।।८१०।।

चक्रे० : तथा –

देव० : तथा –

दट्ठूण पाणिनिवहं भीमे भवसायरंमि दुक्खत्तं।
अविसेसओ णुकंपं दुहा वि सामत्थओ कुणइ।।२५८।।

चक्रे० : पूर्वार्धं सुगमम्, **अविशेषतोऽ**नात्मपरविभागे**नानुकम्पा द्विधाऽपि** । द्रव्यतो बाह्यापत्प्रतीकारेण भावतश्चार्द्रहृदयतया प्रतिबोध्य प्रतिबोध्य सन्मार्गप्रापणेन **सामर्थ्यतः** स्वशक्त्यनुसारेण **करोति** ।।२५८।।

देव० : पूर्वार्धं सुगमम्, **अविशेषतोऽ**पक्षपातेन, पक्षपातेन तु स्वापत्यादिषु करुणा व्याघ्रादीनामप्यस्ति, **अनुकम्पां द्विधापि** द्रव्यतो बाह्यापत्प्रतीकारेण, भावतश्चार्द्रहृदयतया, **सामर्थ्यतः** स्वशक्तिमपेक्ष्य **करोत्य**नुकम्पामिति गाथार्थः।।२५८।।

** धर्मसंग्रहण्याम्-८११, श्रावकप्रज्ञप्तौ-५८ **

तथा –

दट्ठूण पाणिनिवहं भीमे भवसागरम्मि दुक्खत्तं ।
अविसेसतोऽणुकंपं दुहावि सामत्थतो कुणति ।।

दृष्ट्वा प्राणिनिवहं जीवसंघातं **दुःखार्त्तं** शारीरमानसैर्दुःखैरभिभूतम्, क्व दृष्ट्वेत्याह–**भीमे** भयानके **भवसागरे** संसारसमुद्रे**ऽविशेषत** आत्मीयेतरविचाराभावेना**ऽनुकम्पां द्विधापि** द्रव्यतो भावतश्च, तत्र द्रव्यतः प्रासुकपिण्डादिदानेन, भावतो मार्गयोजनया, **सामर्थ्यतः** स्वशक्त्यनुरोधेन **करोति** ।।८११।।

चक्रे० : तथा –

देव० : तथा –

मन्नइ तमेव सच्चं नीसंकं जं जिणेहिं पन्नत्तं।
सुहपरिणामो सम्मं कंखाइविसुत्तियारहिओ।।२५९।।

चक्रे० : मन्यते तदेव सम्यक् **सत्यम**विसंवादि, **निःशङ्कं** निःसन्देहं **यत्किञ्चिज्जिनैः प्रज्ञप्तम्**। **शुभः परिणामः** प्रस्तावादास्तिक्यलक्षणो यस्य स तथाऽऽस्तिक इत्यर्थः । **काङ्क्षादय** एव **विस्रोतसिका**श्चित्तविप्लुतयस्ताभी **रहित** इति।।२५९।।

देव० : मन्यतेऽभ्युपगच्छति **तदेव** सम्यक् **सत्यम**विसंवादि **निःशङ्कं** निस्सन्देहं यत् किम् ? **यज्जिनैः प्रज्ञप्तम्, शुभपरिणाम** आस्तिक्यलक्षणो यस्य स तथास्तिक इत्यर्थः । **सम्यक्** शब्दो योजित एव, **काङ्क्षादय** एव **विश्रोतसिका**श्चित्तविप्लुतयस्ताभी **रहित** इत्यन्ये तूपशमादीन्यन्यथा व्याचक्षते, १-सुपरीक्षितप्रवक्तृप्रवाच्यप्रवचनतत्त्वाभिनिवेशान्मिथ्याभिनिवेशोपशान्तिरुपशमः । यो ह्यतत्त्वं विहाय तत्त्वं प्रतिपन्नः स लक्ष्यते सम्यग्दर्शनीति । २-संवेगो भयं जिनप्रवचनानुसारिणो नरकादिषु नानादुःखमवलोकयतस्तद्भीरुतया तत्प्रशमोपायभूतं धर्ममनुतिष्ठतो लक्ष्यते विद्यतेऽस्य सम्यक्त्वमिति । ३-निर्वेदो विषयेष्वनभिष्वङ्गो यथा इहपरलोकयोर्दुरन्तः कामभोगाभिष्वङ्गस्तस्मादुज्झितव्य एवायमिति निर्वेदाल्लक्ष्यते सम्यक्त्वमिति ४-अनुकम्पा कृपा, यथा सर्व एव सत्त्वाः सुखार्थिनो दुःखप्रहाणार्थिनश्च, तन्नैषामल्पापि पीडा मया कार्येत्यनयापि लक्ष्यते सम्यक्त्वम् ५-सन्ति खलु जिनप्रवचनोपदिष्टा अतीन्द्रिया जीवपरलोकादयो भावा इति परिणाम आस्तिक्यम्, अनेनापि लक्ष्यते सम्यक्त्वमिति गाथार्थः।।२५९।।

**** धर्मसंग्रहण्याम्-८१२, श्रावकप्रज्ञप्तौ-५९ ****

तथा –

मन्नति तमेव सच्चं नीसंकं जं जिणेहिं पन्नत्तं ।
सुहपरिणामो सव्वं कंखादिविसोत्तियारहितो ।।

मन्यते प्रतिपद्यते **तदेव सत्यं निःशङ्कं यज्जिनैः प्रज्ञप्तं शुभपरिणामः** साकल्येनानन्तरोदितगुणसमन्वितः सर्वं समस्तम्, न तु किञ्चिन्मन्यते किञ्चिन्नेति, भगवत्यविश्वासायोगात् । किंविशिष्टः

सन्नित्याह-**काङ्क्षादिविस्रोतसिकारहितः** काङ्क्षा अन्यान्यदर्शनग्रहः, आदिशब्दाद्विचिकित्सादिपरिग्रहः, शङ्का तु निःशङ्कमित्यनेनैव गता, काङ्क्षादय एवं विस्रोतसिकां संयमसस्यमङ्गीकृत्याऽध्यवसायसलिलस्य विस्रोतो गमनं तया रहित इति ।।८१२।।

चक्रे० : अथ प्रकृतं निगमयन्तः सम्यक्त्वफलमाहुः -

देव० : प्रकृतमेव निगमयन् सम्यक्त्वफलमाह -

एवंविहपरिणामो सम्मद्दिट्ठी जिणेहिं पन्नत्तो।
एसो उ भवसमुद्दं लंघइ थोवेण कालेण।।२६०।।

चक्रे० : एवंविध उपशमादिरूपः **परिणामो** यस्य स तथा, **सम्यग्दृष्टिर्जिनैः प्रज्ञप्तः** । **तु**रेवकारार्थः, **एष** एव **भवसमुद्रं लङ्घयति स्तोकेन कालेन** । तथा चागमः -

'उक्कोसदंसणेणं भंते जीवे कइहिं भवग्गहणेहिं सिज्झिज्जा ? गोयमा ! उक्कोसेणं तेणेव तओ मुक्के तइयं नाइक्कमइ'त्ति ।।२६०।।

देव० : एवंविध उपशमादिरूपः **परिणामो** यस्य स तथा **सम्यग्दृष्टिर्जिनैः प्रज्ञप्तः, एष** एवोत्कृष्टदर्शनाराधको **भवसमुद्रं लङ्घयति स्तोकेन कालेनो**त्कृष्टतस्तेनैव भवेन, जघन्यतस्तृतीयेन, तथा चागमः -

'उक्कोसदंसणेणं भंते जीवे कइहिं भवग्गहणेहिं सिज्झिज्जा ? गोयमा ! उक्कोसेणं तेणेव तओ मुक्के तइयं नाइक्कमइ'त्ति गाथार्थः।।२६०।।

**** धर्मसंग्रहण्याम्-८१३, श्रावकप्रज्ञप्तौ-६० ****

उपसंहरन्नाह -

एवंविहपरिणामो सम्मदिट्ठी जिणेहिं पन्नतो ।
एसो य भवसमुद्दं लंघइ थोवेण कालेणं ।।

एवंविधपरिणामोऽनन्तरोद्दिष्टप्रशमादिपरिणामः **सम्यग्दृष्टिर्जिनैः प्रज्ञप्तः** । अस्यैव फलमाह - **एष च** सम्यग्दृष्टि**र्भवसमुद्रं लङ्घयत्य**तिक्रामति, **स्तोकेन कालेन,** प्राप्तबीजत्वादुत्कर्षतोऽप्यपार्द्धपुद्गलपरावर्त्तेन किञ्चिदूनेन सिद्धिप्राप्तेः ।।८१३।।

चक्रे० : एवमुक्तं मोक्षहेतुः सम्यक्त्वम्, परं तद्विरतिसहायं ज्ञेयम्, अविरतसत्कस्य निकाचितकर्मक्षयकृतस्तपसोऽप्यसारत्वादित्याहुः –

देव० : एकमैकान्तिकसौख्यहेतुः सम्यक्त्वमुक्तं तत्पुनर्विरतिसहायमेव ज्ञेयम्, तद्विना कृतस्य निकाचितकर्मक्षयकृतस्तपसोऽप्यसारत्वादिदमेवाह –

सम्मद्दिट्ठिस्सवि अविरयस्स न तवो बहुफलो होइ।
हवइ हु हत्थिण्हाणं चुंदच्छिययं[१] व तं तस्स।।२६१।।

चक्रे० : मिथ्यादृष्टितपसस्तावत्तामलिदृष्टान्तादेवासारत्वं प्रसिद्धम् । **सम्यग्दृष्टेरप्यविरतस्य तपो न बहुफलं** न मोक्षफलं **भवति** । **हुर्यस्मादर्थे** यस्मात् **तत्तस्य** तपो **हस्तिस्नानं** हस्तिस्नानमिव **भवति** । यथा हस्ति स्नात्वा पुनर्धूलिमङ्गे निक्षिपति । एवमयमपि तपसा कर्म क्षपयित्वा पुनरविरत्या बध्नाति । चुंदांछितकमिव **चुंदाछितकं वा** । चुंदं तक्ष्णामुपकरण-विशेषस्तस्यां छितकमाकर्षणम् । एतद्धि वध्रीभिरावेष्ट्य कराभ्यामाकृष्यते । तत्र यदा वामकरेणाकृष्यते । तदा दक्षिणतो वध्रीवेष्टकैः पूर्यते । यदा तु दक्षिणेन तदा वामतः । एवमयमप्येकतस्तपसा कर्म क्षपयत्यन्यतस्त्वविरत्या बध्नातीत्यर्थः।।२६१।।

देव० : मिथ्यादृष्टेस्तपसस्तावदसारत्वं सुस्थितमेव, तथा च –

सट्ठिं वाससहस्सा तिसत्तखुत्तोदएण धोएण ।
अणुचिन्नं तामलिणा अन्नातवोत्ति अप्पफलो।। [उपदेशमाला-८१]

सम्यग्दृष्टेरपि सावद्ययोगेभ्योऽ**विरतस्य न तपो**ऽनशनादि **बहुफलं** शिवसुखफलं **भवति,** स्वर्गादिसुखफलं तु **भवत्येव**, किन्तु **तस्या**ल्पत्वात्, किमित्येवमित्याह-**हुर्यस्मादर्थे**, यस्मा**त्तत्त**-पस्तस्य हस्तिस्नानमिव **हस्तिस्नानं** भवति, यथा हि हस्ती स्नात्वा पुनर्धूलिपुञ्जमङ्गे निक्षिपति, एवमयमपि तपसा कर्म क्षपयित्वा पुनरविरत्या बध्नाति, **चुंदां[२] छितकं वा**त्राप्युपमानार्थो वाच्यः, चुंदं[३] तक्ष्णामुपकरणविशेषस्तस्यां छितकमाकर्षणम्, एतद्धि वध्रीभिरावेष्ट्य कराभ्यामाकृष्यते, तत्र यदा वामकरेणाकृष्यते तदा दक्षिणतो वध्रीवेष्टकैः पूर्यते, यदा तु दक्षिणेन तदा वामतः । एवमयमप्येकतस्तपसा कर्म क्षपयति, अन्यतस्त्वविरत्या बध्नातीत्यर्थ इति गाथार्थः।।२६१।।

---

१. वुंद A,B २. वुंदां छितकं A ३. वुंदं A

चक्रे० : उक्तमेवार्थमुदाहरणद्वारेण समर्थयितुमाह –

देव० : उक्तमेवार्थमुदाहरणद्वारेण समर्थयितुमाह –

चरणकरणेहिं रहिओ न सिज्झई[१] सुट्ठुसम्मदिट्ठी वि।
जेणागमंमि सिट्ठो रहंधपंगूण दिट्ठंतो।।२६२।।

चक्रे० : स्पष्टा, नवरं रथदृष्टान्तः –

संजोग सिद्धीइ फलं वयंति न हु एगचक्केण रहो पयाइ ।

अथान्धपङ्गुदृष्टान्तः, तत्राऽन्वयेनाऽयम् –

अंधो य पंगू य वणे समिच्चा ते संपउत्ता नगरं पविट्ठा ।। [आव.नि॰ १०२]

व्यतिरेकस्तु –

पासंतो पंगुलो दड्ढो धावमाणो य अंधओ ।

सम्प्रदायगम्यौ चेतौ, तथाहि –

कुतोऽपि नगराल्लोको विपक्षातङ्कशङ्कया । अरण्यं शरणीचक्रे किञ्चिद्वैरिदुरासदम् ।।१।।
अपरेद्युः पुनस्तत्राप्यवस्कन्दभयातुरः । आत्तप्राणः पलायिष्ट विमुच्य शकटादिकम् ।।२।।
तत्राभूतां पुमांसौ द्वावन्धपङ्गू निराश्रयौ । तथैव तस्थतुस्तौ च निःस्वत्वादकुतोभयौ ।।३।।
धाटीभटेषु तत्रैत्य मोषं मोषं गतेष्वथ । दावानलः प्रजज्वाल कल्पान्ताग्निरिवोत्थितः ।।४।।
अथ दावोन्मुखो धावन्नन्धः प्रौच्यत पङ्गुना । जिजीविषुर्मुमूर्षुर्वा किं दावमभियासि भोः ।।५।।
सोऽवदत्तर्हि भो भद्र ! क्व याम्याख्याहि जीवितुम् । आकर्षय मुखान्मृत्योः प्राणदानं ह्यनुत्तरम् ।।६।।
ततस्तं पङ्गुरूचेऽन्धमेहि स्कन्धे निधेहि माम् । येन मद्दृष्टमार्गे स्यान्निरपाया भवद्गतिः ।।७।।
अन्धोऽपि युक्तं पङ्गूक्तं मन्यमानः सपद्यपि । तथैव विदधाति स्म प्राणभीर्महती हि भीः ।।८।।
ततः समेतौ तौ स्थानं जग्मतुर्द्वावपीप्सितम् । एवं दर्शनचारित्रेऽपि [सु]युक्ते शिवप्रदे ।।९।।

व्यतिरेकस्तु –

उदस्थान्नगरे क्वापि परितोऽपि प्रदीपनम् । कुर्वाणमिव लोकानां लङ्कादाहप्रकाशनम् ।।१।।
ततोऽनश्यज्जनः सर्वः कुर्वन् हाहारवं जवात् । कष्टेन महता तस्मात् प्राणमात्रधनस्तदा ।।२।।

१. सिज्झइ Z

अन्धपङ्गू नरौ द्वौ च तत्रानाथौ बभूवतुः । बहिर्नीतौ न तौ केनाप्यात्मना गन्तुमक्षमौ ।।३।।
पश्यन्नपि ततः पङ्गुर्मार्गं निर्गन्तुमात्मनः । गमनक्रियया शून्यो भस्मीभावमवाप्तवान् ।।४।।
अन्धस्तु धावमानोऽपि त्रातुं प्राणान्नितस्ततः । अपश्यन्ननलस्यैव प्रविवेशास्य कोटरे ।।५।।
अन्धपङ्गू तदेवं तौ मृतौ द्वावप्यसङ्गतौ । एवं दर्शनचारित्रे, अप्यसक्ते न सिद्धिदे ।।६।।।२६२।।

देव० : चरणकरणाभ्यां रहितः सुष्ठ्वपि सम्यग्दृष्टिः क्षायिकदर्शनोऽपीत्यर्थो **न सिद्ध्यति, येन** कारणे**नागमे** सामायिकनिर्युक्तौ **शिष्टः** कथितो दृष्टान्तः, केषाम् ? रथश्चान्धपङ्गू च तेषां **रथान्धपङ्गूनाम्,** तत्र रथदृष्टान्तो यथा –

संजोगसिद्धीए फलं वयंति न हु एगचक्केण रहो पयाइ ।

इत्**यन्धपङ्गुदृष्टान्तः** पुनरन्वयतो यथा –

अंधो य पंगू य वणे समिच्चा ते संपउत्ता नगरं पविट्ठा । [आव.नि॰ १०२]

व्यतिरेकतस्तु - पासंतो पंगुलो दड्ढो धावमाणो य अंधओ । इति, सम्प्रदायगम्यौ पुनरिमौ, तथाहि –

कुतश्चिन्नगराल्लोकः परचक्रभयाकुलः । पलाय्य सपरिवारः किञ्चित्कान्तारमाश्रयत् ।।१।।
दैवात्तत्राप्यवस्कन्दभये कन्दलितोदये । प्रणश्य त्यक्तसर्वस्वः सदिशो विदिशो ययौ ।।२।।
अन्धः पङ्गुश्च तत्र द्वावनाथौ केवलं स्थितौ । जजागार युगान्ताग्निमित्रमत्रान्तरे दवः ।।३।।
तद्भयादाकुलं धावन् दृग्घीनः पङ्गुनोच्यत । सुष्ठु मागाः पुरोभागादेति दावानलो ज्वलन् ।।४।।
का गतिस्तर्हि मे स्यादित्युक्ते तेनावदत्पुनः । समा चिन्ता ममाप्येषा त्वमन्धः पङ्गुलस्त्वहम् ।।५।।
किन्त्वारोपय मां स्कन्धे तव पादौ ममाक्षिणी । एह्येहि येन संयुज्य तरावो व्यसनार्णवम् ।।६।।
अथैवं विहिते तेन कृतसाहायकौ मिथः । तौ स्थानं वाञ्छितं प्राप्तौ न सिद्धिः किं हि संहते ।।७।।
समेते सिद्धये स्यातामेवं ज्ञानक्रियेऽपि [हि]। विधत्तास्मिन् द्वये यत्नमसपत्नं ततो बुधाः ।।८।।

व्यतिरेकस्तु –

पुरे क्वापि वियद्व्यापिज्वालमासीत्प्रदीपनम् । आदाय तद्भिया प्राणान् प्राणश्यत्कोऽपि कुत्रचित् ।।१।।
जनस्य नश्यतो वेगात् कौचिदन्धलपङ्गुलौ । वराकौ विस्मृतौ दैवमहो दुर्बलघातकम् ।।२।।
धावन्नितस्ततोऽबन्धमन्धः प्लोषतयाकुलः । गर्तायां पतितो दावात्तत्क्षणं भस्मसादभूत् ।।३।।
पश्यन् पलायितुं मार्गमग्निं चापान्तमागतम् । प्रसह्य दह्यमानाङ्गः पङ्गुलः पञ्चतां ययौ ।।४।।
तद्वद्दर्शनचारित्रे निराकाङ्क्षे परस्परम् । नैव साधीयसी स्यातां वाञ्छितार्थप्रसिद्धये ।।५।।
इति गाथार्थः।।२६२।।

चक्रे० : अथ चरणकरणयोरेव स्वरूपमाहुः –

देव० : अथ चरणकरणयोरेव स्वरूपमाह –

वय समणधम्म संजम वेयावच्चं च बंभगुत्तीओ।
नाणाइतियं तव कोहनिग्गहा इई चरणमेयं।।२६३।।
पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो ।
पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु।।२६४।।

चक्रे० : **व्रतानि** प्राणिवधविरत्यादीनि ५, **श्रमणधर्मः** क्षान्त्यादिः १०, **संयमः** पृथ्व्यादिसंरक्षणादिः १७,

पुढवीदग अगणि मारुय वणसइबिति चउ पणिंदि अजीवे ।
पेहुप्पेह पमज्जण परिठवण मणोवईकाए ।। [दशवै. नि॰ ४६]

वैयावृत्यमाचार्यादीनाम् १०, तद्यथा –

आयरिय उवज्झाए थेर तवस्सी गिलाणसेहाणं ।
साहम्मिअकुलगणसंघसंगयं तमिह कायव्वं ।। [दशवै.नि॰ ४७-१]

ब्रह्मगुप्तयः ९,

वसहि कह निसिज्जिदिय कुड्डंत्तर पुव्वकीलिय पणीए ।
अइमायाहारविभूसणा य नव बंभगुत्तीओ ।। [प्रव.सारो॰ ५५८]

ज्ञानादित्रिकं प्रतीतम् ३, **तपो**ऽनशनादि १२, **क्रोधनिग्रहादिः** क्रोधादिजयः ४, **इत्येतच्चरणं** चारित्रं मूलगुणरूपम्, यावज्जीवमासेव्यमानत्वात् । इह चादरार्थं केषाञ्चिद् भेदानां पुनर्भणनान्न पौनरुक्त्याशङ्का कार्या।।२६३।।

तथा –

पिण्डस्याऽशनपानखाद्यस्वाद्यरूपस्य, यद्वा पिण्डस्योपलक्षणत्वात् शय्यावस्त्रपात्राणां च **विशुद्धिर्द्विचत्वारिंशद्दोषरहितत्वम्** ४, **समितय** ईर्याद्याः ५, **भावना** अनित्यताद्याः १२,

तथा च –

१. निग्गहाई A, निग्गहा इइ Z

भावयितव्यमनित्यत्वमशरणत्वं तथैकतान्यत्वे ।
अशुचित्वं संसारः कर्माश्रवसंवरविधिश्च ।।
निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।
बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ।। [प्रशमरति-१४९, १५०]

प्रतिमाः मासिक्याद्याः १२ –

मासाई सत्तंता पढमाबिइ तइय सत्तराइदिणा ।
अहराइ एगराई भिक्खु पडिमाण बारसगं ।। [प्रव.सारो॰ ५७४]

इन्द्रियाणां स्पर्शनादीनां **निरोधो** जयः ५, **प्रतिलेखना** वस्त्रपात्रादीनाम् २५, **गुप्तयो** मनोगुप्त्याद्याः ३, **अभिग्रहा** द्रव्यक्षेत्रकालभावविषयाः ४, एवं पुनः **करणम्**, इदं चोत्तरगुणरूपं प्राप्तकालमेवासेव्यमानत्वात् ।।२६४।।

देव० : तत्र **व्रतानि** प्राणातिपातविरमणादीनि पञ्च, **श्रमणधर्मः** क्षान्त्यादिर्दशधा, **संयमः** पृथिव्यादिसंरक्षणादिः सप्तदशधा, **वैयावृत्त्यमा**चार्यादिविषयं दशधा, स्त्रीषण्ढपशुमद्वसति-युवतिभुक्तासन-मिथुनकलितकुड्यान्तर-सरागवनिताकथा-प्राक्तनसुरतचिन्तन-कामिनीकमनीयाङ्गवीक्षण-स्वाङ्गसंस्कार-प्रणीतभोजन-अतिभोजनोज्झनस्वरूपा **ब्रह्मगुप्तयो** नव, **ज्ञानादित्रिकं** प्रसिद्धम्, **तपो**ऽनशनादि द्वादशधा, **क्रोधनिग्रहादिः** क्रोधमानमायालोभजयः, **एतत्** किम् ? **चरणं** चारित्रमुच्यते । अत्राह-दशविधश्रमणधर्मे क्षान्तिमार्दवार्जवमुक्तीनामुक्तत्वादिह क्रोधादिनिग्रह इति न वाच्यम्, पुनरुक्तत्वादुच्यते–तत्र तेषामासेवनारूपत्वेन विधिरूपतया सङ्गीतत्वादिह त्विमे निग्रहरूपतया प्रतिषेधरूपाः परिज्ञातव्यास्ततो न पौनरुक्त्यं विधिप्रतिषेधयोर्भिन्नलक्षणत्वाद्, अथवा तत्र क्षान्त्यादिचतुष्टयग्रहणेन क्रोधाधिचतुष्टयनिरोध उक्तः, इह तु साधोरपि तथाभूतकारणवशाद् बलात्क्रोधादि विजृम्भणे तत्फलविपाकसंवेदनेन विफलतापादनं कार्यमिति क्रोधादिनिग्रह इत्युक्तमतो न पौनरुक्त्यम् ।

ननु च संयमतपसी अपि दशविधश्रमणधर्मग्रहणादुक्त एव, तत्कथं पृथगुपन्यस्यते ? उच्यते-प्राधान्यख्यापनार्थम्, तथाहि–संयमो गुप्तिकृत्, तपस्तु प्रागुपात्तकर्मक्षयकृदिति, एवं तर्हि वैयावृत्त्यग्रहणं न कार्यम्, द्वादशतपोग्रहणेनैवोक्तत्वाद्, उच्यते-एकादशविधं तप आत्मन एवोपकारि, इदं तु स्वपरोपकारित्वेन प्रधानमिति भेदोपन्यासभागित्यदोषः, ननु चैवं विनयः

कस्मान्न पृथगुक्तः ? असावप्युभयोरप्युपकारक इति, उच्यते-उक्त एवासौ 'वेयावच्चं चे'ति चशब्दग्रहणात्, ननु च चारित्रग्रहणं न कार्यम्, व्रतग्रहणादेवास्योक्तत्वाद्, न, चारित्रं समुदाय-रूपम्, व्रतानि तु चारित्रैकदेशस्तताश्च व्रतग्रहणे नाशेषचारित्रग्रहणमिति । तथा च सामान्य-विशेषयोः कथञ्चिद्भेद एवेत्युक्तं चरणम् ।।२६३।।

तथा **पिण्डस्य** चतुर्विधाहारस्योपलक्षणत्वाच्छय्यावस्त्रपात्राणां च **विशुद्धि**रुद्गमोत्पादनैषणा-दोषमलाभावः, **समितयः** पञ्चेर्यादयः, **भावना** अनित्यतादयो द्वादश, **प्रतिमाश्च** मासिक्यादयो द्वादशैव, **इन्द्रियाणि** स्पर्शनादीनि पञ्च, तेषां **निरोध** इष्टानिष्टविषयेषु रागद्वेषपरिहारेण जयः, **प्रतिलेखना** वस्त्रपात्रादीनां पञ्चविंशतिधा, **गुप्तय**स्तिस्रो मनोगुप्त्यादयः, **अभिग्रहा** द्रव्यक्षेत्रकालभावविषयाश्चतुर्विधाः **चः** समुच्चये, **एव**त्ति एवम्, **तुः** पुनरर्थे, तेनैतदुक्तं भवति, **करणं** पुनरेवं भवति । ननु चरणं करणं चेति किं कृतो नामभेदो द्वयोरप्यासेवनारूपत्वात् ? उच्यते—चरणं मूलगुणरूपम्, करणं तूत्तरगुणस्वभावमित्यत एव । चर्यत इति चरणं सततासेवनारूपम्, तथाहि–व्रतादीनां यावत्कथं सततमासेव्यमानत्वात्, करणं तु कादाचित्कम्, तथाह्यभक्तार्थी न पिण्डमादत्ते । एवं समितयोऽपि कादाचित्काः सर्वदा गमनादेरयोगात्, भावना अपि विशिष्टकालविषया एव ध्यानोपरमादिषु भाव्यमानत्वात्, प्रतिमा अपि विशिष्टपुरुष-कालविषया एव, तथेन्द्रियनिरोधोऽपीष्टानिष्टविषयप्राप्तौ रागादिवर्जनं क्वचित्, प्रत्युपेक्षणापि विशिष्टकालविषयैव, गुप्तयोऽप्यनियता एव, क्वचित्सङ्कुचितकायाद्यवस्थासु सम्भवात्, अभिग्रहा अपि क्वचिदेव काले पुरुषे वा स्युरिति । तदियता क्रियासहचरितमेव सम्यग्दर्शनं मोक्षायेति स्थापितमिति गाथाद्वयार्थः।।२६४।।

** प्रवचनसारोद्धारे-५५१ **

सम्प्रति 'चरणं'ति षट्षष्टं द्वारमाह –

वय समणधम्म संजम वेयावच्चं च बंभगुत्तीओ ।
नाणाइतियं तव कोहनिग्गहा इइ चरणमेयं ।।

'वये'त्यादिगाथादशकम्, **व्रतानि** प्राणातिपातविरमणादीनि परिग्रहविरमणान्तानि तथा श्रमणानां साधूनां धर्मः **श्रमणधर्मः** क्षान्तिमार्दवादिको दशभेदस्तथा सम्-एकीभावेन यमः–उपरमः **संयमः** सप्तदशभेदस्तथा व्यापिपर्ति स्मेति व्यापृतस्तस्य भावो **वैयावृत्य**माचार्यादिभेदाद्दशप्रकारं तथा **ब्रह्म** ब्रह्मचर्यं तस्य **गुप्तयो** ब्रह्मचर्यगुप्तयस्ताश्च वसत्यादिका नव तथा ज्ञायतेऽनेनेति ज्ञानमाभिनिबोधिकादि तदादिर्यस्य

तद् ज्ञानाद्यादिशब्दात्सम्यग्दर्शनचारित्रपरिग्रहो ज्ञानादि च तत् त्रिकं च **ज्ञानादित्रिकं** तथा **तपो** द्वादशप्रकारमनशनादि तथा क्रोधस्य निग्रहः **क्रोधनिग्रहो** बहुवचनं माननिग्रहादिपरिग्रहार्थम्, **इत्येवं** प्रकार-**मेतच्चरणं** भवतीति, 'कोहनिग्गहाई चरणं' इति तु पाठे क्रोधनिग्रह आदिर्यस्य माननिग्रहादिकदम्बकस्य तत्क्रोधनिग्रहादि, एतच्चरणमवसेयमिति । इह सहृदयंमन्यः प्राह-ननु चतुर्थव्रतान्तर्गतत्वाद् गुप्तयो न पृथग्भणनीयाः, अथ परिकरभूताश्चतुर्थव्रतस्य ब्रह्मचर्यगुप्तयोऽभिधीयन्त एवं तर्हि प्राणातिपात-विरमणादेरेकैकस्य व्रतस्य परिकरभूता भावना अपि वाच्याः, गुप्तेर्भणने वा चतुर्थं व्रतं न भणनीयम्, तथा ज्ञानादित्रिकस्य ग्रहणं न करणीयम्, किन्तु ज्ञानसम्यग्दर्शनयोरेवोपन्यासः कार्यः, चारित्रस्य व्रतग्रहणेनैव ग्रहणात्, तथा श्रमणधर्मग्रहणे संयमग्रहणं तपोग्रहणं चातिरिच्यते, संयमतपसी वोद्धृत्य श्रमणधर्मोपन्यासः करणीयः, तथा तपोग्रहणे सति वैयावृत्त्यस्योपन्यासो निरर्थकः, वैयावृत्त्यस्य तपोऽन्तर्गतत्वात्, तथा क्षान्त्यादिधर्मग्रहणे सति क्रोधादिनिग्रहग्रहणमनर्थकमेव, तदियं गाथा परिभाव्यमाना आलूनविशीर्णेति, तत्रोच्यते, चतुरचक्रवर्तिभिर्यदेतदुच्यते-व्रतग्रहणे सति गुप्तयो न पृथग्वाच्या इति, तदयुक्तम्, चतुर्थव्रतस्य हि निरपवादत्वं दर्शयितुमेता ब्रह्मचर्यगुप्तयः पृथगुपात्ताः, यदुक्तमागमे -

नवि किंचि अणुन्नायं पडिसिद्धं वावि जिणवरिंदेहिं । मुत्तुं मेहुणभावं न विणा तं रागदोसेहिं ।। इति।

[नैव किञ्चिदनुज्ञातं प्रतिषिद्धं वापि जिनवरेन्द्रैः । मुक्त्वा मैथुनभावं न स विना रागद्वेषौ ।।]

अथवा प्रथमचरमतीर्थकरयोः परिग्रहव्रताद् भिन्नमेतन्महाव्रतं भवतीत्येतस्यार्थस्य ज्ञापनार्थं भेदेनोपन्यास इति, यच्चाभ्यधीयत-व्रतग्रहणे ज्ञानादित्रिकं न वक्तव्यम्, किन्तु ज्ञानदर्शनद्वयमेव चारित्रस्य व्रतग्रहणेनैव गतत्वादिति, तदयुक्तम्, यतो यदेतद् व्रतचारित्रं स एकांशः सामायिकादेः पञ्चविधस्य चारित्रस्य, चतुर्विधं चारित्रमद्याप्यगृहीतमस्ति, तदर्थं ज्ञानादित्रयमुपन्यस्तमिति, यच्चोक्तम्-श्रमणधर्मग्रहणे संयमतपसोरुपादानं न विधेयम्, श्रमणधर्मग्रहणेनैव तयोर्गृहीतत्वात्न तदप्यसाधु, संयमतपसोः प्रधानमोक्षाङ्गत्वेन पृथगुपादानात्, कथं मोक्षं प्रति प्रधानाङ्गत्वमिति चेत्, तत्र ब्रूमः-अपूर्वकर्माश्रवसंवरहेतुः संयमः, पूर्वोपार्जितकर्मक्षयहेतुश्च तपः, ततः प्रधानत्वमनयोः, अतः श्रमणधर्मगृहीतयोरप्यनयोः प्रधानतया भेदेनोपन्यासः कृतः, दृष्टश्चायं न्यायो यथा ब्राह्मणा आयाता वशिष्टोऽप्यायातः, अत्र हि ब्राह्मणग्रहणेन वशिष्टस्यापि ग्रहणं कृतमेव तथापि प्रधानतया तस्य भेदेनोपन्यासः क्रियत इति, यच्चोक्तम्-तपोग्रहणेन वैयावृत्त्यस्यापि ग्रहणाद्भेदेन तदुपादानं न विधेयमिति, तदप्यचारु, वैयावृत्त्यस्य यथा स्वपरोपकारकारित्वेन प्राधान्यं न तथाऽनशनादीनां शेषतपोभेदानामिति ख्यापनार्थं तस्य भेदेनोपादानम्, यच्चाभिहितम्-श्रमणधर्मग्रहणेनैव गृहीतत्वात्क्रोधा-दिनिग्रहः पृथग् न वक्तव्य इति, तदप्यसाधीयः, यतो द्विविधाः क्रोधादयः-उदीर्णा अनुदीर्णाश्च, तत्रोदीर्णानां क्रोधादीनां निग्रहणं क्रोधादिनिग्रहोऽनुदीर्णानां तु तेषामुदयनिरोधनं क्षान्त्यादय इति ज्ञापनार्थं पृथगुपादानम्, अथवा वस्तु त्रिविधं-ग्राह्यं हेयमुपेक्षणीयं च, तत्र क्षान्त्यादयो ग्राह्याः क्रोधादयो हेया अतो निग्रहीतव्यास्त इत्येवमर्थमित्थमुपन्यासः, ततः सर्वमनवद्यमिति ।।५५१।।

** उपदेशमाला पुष्पमालायाम्-११८ **

उक्ताः सर्वचरणमूलगुणाः, तदुत्तरगुणान्निरूपयन्नाह –

पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो ।
पडिलेहण गुत्तीओ अभिग्गहा उत्तरगुणेसु ।।

प्रकटार्था, नवरमुपलक्षणमात्रमेव पिण्डविशुद्ध्यादीनामुत्तरगुणत्वम्, ततश्च 'इच्छा मिच्छा तहक्कारो' इत्यादिप्रकारा अन्या अपि सामाचार्योऽत्रोत्तरगुणेषु द्रष्टव्याः, तदेवं लेशमात्रतया निरूपितं भेदतश्चारित्रम्, एवमपरेऽपि सामायिकच्छेदोपस्थापनीयादयश्चारित्रभेदाः समयचर्याभिज्ञैरिह वक्तव्याः ।।११८।।

** प्रवचनसारोद्धारे-५६२ **

इदानीं 'करणं'ति सप्तषष्टं द्वारमाह –

पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो ।
पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु ।।

'पिंडे'त्यादिगाथा, 'पिडि सङ्घाते' इत्यस्य 'इदितो नुम् धातो' (पा० ७-१-५८) रिति नुमि कृते पिण्डनं पिण्डः सङ्घातः, बहूनां सजातीयानां विजातीयानां वा कठिनद्रव्याणामेकत्र समुदाय इत्यर्थः, समुदायश्च समुदायिभ्यः कथञ्चिदभिन्न इति त एव बहवः पदार्था एकत्र संश्लिष्टाः पिण्डशब्देनोच्यन्ते तस्य विविधमनेकैराधाकर्मादिपरिहारप्रकारैः शुद्धिर्निर्दोषता **पिण्डविशुद्धिः**, सं-सम्यक् प्रशस्ता अर्हत्प्रवचनानुसारेणेतिश्चेष्टा **समितिः**–ईर्यासमित्यादिका, भाव्यन्त इति **भावनाः** अनुप्रेक्षा अनित्यत्वादिकाः, **प्रतिमाः** प्रतिज्ञा अभिग्रहप्रकारा मासिक्यादयः, **इन्द्रियाणि** स्पर्शनादीनि तेषां **निरोध** आत्मीयात्मीयेष्टानिष्टविषयरागद्वेषाभाव इत्यर्थः, **प्रतिलेखनं** प्रतिलेखना आगमानुसारेण प्रति प्रति निरीक्षणमनुष्ठानं वा, सा च चोलपट्टादेरुपकरणस्य, **गुप्तिः** गोपनमात्मसंरक्षणं मुमुक्षोर्योगनिग्रह इत्यर्थः, अभिगृह्यन्त इत्**यभिग्रहा** नियमविशेषा द्रव्यादिभिरनेकप्रकाराः, **चः** समुच्चय **एव**कारः क्रमप्रतिपादनार्थः, एत**त्करणं** भवतीति, क्रियत इति करणं मोक्षार्थिभिः साधुभिर्निष्पाद्यत इत्यर्थः, **तु**शब्दो विशेषेण मूलगुणसद्भावे करणत्वमस्य नान्यथेति (दर्शनाय)। अत्राह परः – ननु समितिग्रहणेनैव पिण्डविशुद्धेर्गृहीतत्वान्न पिण्डविशुद्धिग्रहणं कर्तव्यम्, यत एषणासमितौ सर्वाऽप्येषणा गृहीता, पिण्डविशुद्धिरप्येषणैव, तत्किं भेदेनोपन्यासः ? इति, अत्रोच्यते, पिण्डद्रव्यव्यतिरेकेणाप्येषणा विद्यते वसत्यादिरूपा तद्ग्रहणार्थमेषणासमितिग्रहणं भविष्यतीति पिण्डविशुद्धेस्तु भेदेनोपन्यासः कारणे ग्रहणं कर्तव्यं नाकारण इत्यस्यार्थस्य ज्ञापनार्थः, अथवाऽऽहारमन्तरेण न शक्यते पिण्डविशुद्ध्यादिकरणं सर्वमेव कर्तुमतो भेदेनोपन्यास इति ।।५६२।।

चक्रे० : अथ सम्यग्दर्शनक्रिययोः सहकारित्वे सति किं केन स्वभावेनोपकुरुत इत्याहुः –

देव० : अथ सम्यग्दर्शनक्रिययोः सहकारित्वे सति किं केन स्वभावेनोपकुरुते ? किमविशेषेण शिबिकोद्वाहकपुरुषवदुत भिन्नस्वभावतया गमनक्रियायां नयनचरणादिवद्, अत्रोच्यते, भिन्नस्वभावतया, अत आह –

सम्मग्गस्स पयासगं इह भवे नाणं तवो सोहणं,
कम्माणं चिरसंचियाण नियय गुत्तीकरो संजमो ।
बोधव्वो [१]नवकम्मुणो नियमणे भावेह एयं सया;
एसिं [२]तिण्हवि संगमेण भणिओ मोक्खो जिणिंदागमे।।२६५।।

चक्रे० : इह मोक्षार्थप्रवृत्तौ **सन्मार्गस्य प्रकाशकं भवेज्ज्ञानं** सम्यग्दर्शनाविनाभूतम्, मिथ्यादृशां ज्ञानस्याप्यज्ञानरूपत्वात्, क्रिया तु तपःसंयमरूपतया द्विधा, तत्र **तपः शोधनं कर्म्मणां चिरसंचितानां नियतं** निश्चितम्, **गुप्तिकरो** निरोधकः **संयमो नवकर्म्मण** आगन्तुपाप्मनः, **निजमनस्येवं सदा भावयत । एषां त्रयाणामपि संगमेन मोक्षो जिनागमे भणितः** । एतावता 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति प्रतिष्ठितम् । ज्ञानतपःशब्दोपादानेन चान्तमङ्गलमिहाविष्कृतमिति वृत्तार्थः।।२६५।।

देव० : तत्र कचवरसमन्वितमहागृहशोधने प्रदीपपुरुषादिव्यापारवदिह कर्मकचवरभृतजीवशोधनालम्बनो ज्ञानादीनां स्वभावभेदेन व्यापारोऽवसेय इति समुदायार्थः । अवयवार्थस्तु **सन्मार्गस्य** मोक्षाध्वनः **प्रकाशकमिह** सहकारिव्यापारविचारे **भवेज्ज्ञानं** प्रदीपवत्, क्रिया तु तपःसंयमरूपतया द्विधा, तत्र **तपः** शोधयतीति **शोधनं कर्मणां चिरसञ्चितानाम्,** कर्मकरपुरुष इव कचवरस्य, **नियतं** निश्चितं **गुप्तिकरो** निरोधकः **संयमो बोधव्यः,** कस्य ? **नवकर्मण** आगन्तुकपाप्मनः, पवनप्रेरितकचवरादि निरोधकवातायनादिस्थगनवत्, **निजमनसि भावय,** नैवं **सदा** न पुनरेकमेव ज्ञानं क्रिया वा सर्वत्र प्रकाशादिष्वलमेवंरूपाभ्युपगमस्य मिथ्यात्वाद् यदाह–

